॥ श्री दैवरात-ऋषिकुल-योगाश्रमः गोकर्ण ॥

# छन्दोदर्शनम्

# CHHANDO-DARŚANA

दैवरातार्षेयम् ।

*by*

ṚSHI DAIVARĀTA

卐

श्रीकाव्यकण्ठगणपतिमुनिविरचितेन वासिष्ठान्वयभाष्येण परिष्कृतम् ।

WITH A COMMENTARY

*by*

KĀVYAKAṆṬHA GAṆAPATIMUNI

TO BE KNOWN AS

VĀSISHṬHĀNVAYABHĀSHYAM

BHARATIYA VIDYA BHAVAN

CHOWPATTY : BOMBAY

## ABOUT THE BOOK

'Is revelation of Veda Mantras possible even today?' Yes, why not, asks Kavyakantha Ganapati Muni. If Brahma Darshana can be had even today, though, with great creative effort and through the path laid down by the Shastras, the possibilities of Sabda Brahma Darshana, that is, Veda Mantra Darshana has to be admitted without further arguments. It is in this context that the revelation of Chhando-Darshana to Rishi Daivarata is proof positive of new Veda Mantras being revealed by the same processes as in the past.

When Daivarata was performing severe austerities along with his Guru, in the vicinity of Shri Renukamba in the year 1917, he went into a state of 'Samadhi' (communion) and some words began to emerge from his lips. After observing this for two days his Guru Kavyakantha Ganapati Muni realised that it was Rigvedic metrical expression and took down what emerged from his lips for several days until it stopped. He later arranged the mantras into eight Anuvakas and named the whole text 'Chhando-Darshana.' He wrote a profound, full-fledged commentary on it.

Apart from being good and high poetry, the thought content of 'Chhando-Darshana' is not merely eulogistic and penetrating, but philosophical and inspiring. The unitive thought of the Mantras, the logical sequence and the arrangement of hymns and sections are artistic. The vigour and force of the language is contagious. When the Rishi speaks of the cosmic gods and goddesses, of Indra, of Sarasvati, of Brahmanaspati, one is carried away by the grand conceptions reflected in the words.

Rs. 45/-

॥ श्री दैवरात-ऋषिकुल-योगाश्रमः गोकर्ण ॥

# छन्दोदर्शनम्

# CHHANDO-DARŚANA

दैवरातार्षेयम् ।

*by*

ṚSHI DAIVĀRĀTA

श्रीकाव्यकण्ठगणपतिमुनिविरचितेन वासिष्ठान्वयभाष्येण परिष्कृतम् ।

*With a Commentary by*

KĀVYAKAṆṬHA GAṆAPATIMUNI

TO BE KNOWN AS

VĀSISHṬHĀNVAYABHĀSHYAM

तद्भूमिकासमलङ्कृतम् ।

WITH A PREFACE BY

ŚRI GAṆAPATIMUNI

तदनुक्रमणिकासूत्रप्रतिक्लृप्तम् ।

*Also with Contents*

आङ्ग्लेयभाषान्तरेण सम्पूरितम् ।

*With English Translation*


1968

BHARATIYA VIDYA BHAVAN

CHOWPATTY : BOMBAY

©

*All rights reserved by the Author*

FIRST EDITION, 1968

**This Chhandodarshana by Brahmarshi Daivarat**
**has been sponsored by**
**Loka Shikshana Trust, Hubli**
**and published by**
**Bharatiya Vidya Bhavan, Bombay.**

PRINTED IN INDIA

By B. G. GUTTAL, B. A., LL. B., at the Samyukta Karnatak Press, Koppikar Road, Hubli and Published by S. Ramakrishnan, Executive Secretary, Bharatiya Vidya Bhavan, Chowpatty, Bombay-7.

# CONTENTS


| | PAGES |
|---|---|
| *INTRODUCTION* . . . . | i |
| *PREFACE TO THE COMMENTARY IN SANSKṚT* . ( वासिष्ठान्वयभाष्यभूमिका ) | v |
| *PREFACE TO THE COMMENTARY ON CHHANDO-DARSANA* | xiii |
| छन्दोदर्शनम् **CHHANDO - DARŚANA** | |
| *SECTION I* . . . . प्रथमोऽनुवाकः | 2 |
| *SECTION II* . . . . द्वितीयोऽनुवाकः | 55 |
| *SECTION III* . . . . तृतीयोऽनुवाकः | 161 |
| *SECTION IV* . . . . चतुर्थोऽनुवाकः | 215 |
| *SECTION V* . . . . पञ्चमोऽनुवाकः | 268 |
| *SECTION VI* . . . . षष्ठोऽनुवाकः | 322 |
| *SECTION VII* . . . . सप्तमोऽनुवाकः | 390 |
| *SECTION VIII* . . . . अष्टमोऽनुवाकः | 424 |
| *INDEX* . . . . . ( छन्दोदर्शनसर्वानुक्रमणिकासूत्रम् ) | 490 |

## SYSTEM OF TRANSLITERATION

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अ | आ | इ | ई | उ | ऊ | ऋ | ए | ऐ | ओ | औ | ं | : |
| A | Á | I | Ī | U | Ū | Ṛ | E | AI | O | AU | Ṁ | Ḥ |

| | | | | |
|---|---|---|---|---|
| क् | ख् | ग् | घ् | ङ् |
| K | KH | G | GH | Ṅ |
| च् | छ् | ज् | झ् | ञ् |
| CH | CHH | J | JH | Ñ |
| ट् | ठ् | ड् | ढ् | ण् |
| Ṭ | ṬH | Ḍ | ḌH | Ṇ |
| त् | थ् | द् | ध् | न् |
| T | TH | D | DH | N |
| प् | फ् | ब् | भ् | म् |
| P | PH | B | BH | M |

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| य् | र् | ल् | व् | श् | ष् | स् | ह् | क्ष् | त्र | ज्ञ् |
| Y | R | L | V | Ś | SH | S | H | KSH | TR | JÑ |

# ABBREVIATIONS

| Abbreviation | | Full form |
|---|---|---|
| *Ai.*, *Ait.* | | Aitareya |
| *Āp. Gṛ.* | – | Āpastamba Gṛhya Sūtra |
| *Ār.* | – | Āraṇyaka |
| *Athar.* | – | Atharvaṇa Veda |
| *Br.*, *Brāh.* | | Brāhmaṇa |
| *Bṛ.*, *Bṛh.* | | Bṛhadāraṇyaka |
| *B.*, *B. S.*, *Br. Sū.* | | Brahma Sūtra |
| *Ch.*, *Chh.*, *Chhā.*, *Chhānd.* | | Chhāndogya |
| *Īś.* | – | Īśāvāsya |
| *Kau.* | – | Kaushītakī |
| *Ken.* | – | Kena |
| *Māṇḍ.* | – | Māṇḍūkya |
| *Manu Smṛ.* | – | Manu Smṛti |
| *Muṇḍ.* | – | Muṇḍaka |
| *Nā.*, *Nār.*, *Nārā.* | | Nārāyaṇa |
| *Nir.* | – | Nirukta |
| *Pāṇ. Sū.* | – | Pāṇinīya Sūtra |
| *Praś.*, *Praśn.* | | Praśna |
| *Ṛg.* | – | Ṛg Veda |
| *Sar. Sūtra* | – | Sarvānukrama Sūtra |
| *Sam.* | – | Samhitā |
| *Śata.* | – | Śatapatha |
| *Śuk. Yaj.* | – | Śukla Yajus |
| *Śvet.*, *Śvetāś.* | | Śvetāśvatara |
| *Tai.*, *Tait.*, *Taitti.* | | Taittirīya |
| *Up.* | – | Upanishad |
| *Yaju.* | – | Yajurveda |

## अन्वयभाष्ये उदाहृताः प्रमाणग्रन्थाः

| संक्षेप | | ग्रन्थ |
|---|---|---|
| आ. गृ. सू. | – | आपस्तम्ब गृह्यसूत्र |
| ई. उ. मं. | – | ईशावास्योपनिषन्मन्त्र |
| ईशोप. | – | ईशावास्योपनिषत् |
| ऋ. मं. | – | ऋग्वेदमन्त्र |
| ऋक्सर्वानु. सू. | – | ऋक्सर्वानुक्रमसूत्र |
| ऐ. आ. | – | ऐतरेय आरण्यक |
| ऐ. ब्रा. | – | ऐतरेय ब्राह्मण |
| ऐ. उ. | – | ऐतरेय उपनिषत् शान्तिमन्त्र |
| कठो. | – | कठोपनिषत् |
| केनोप. | – | केनोपनिषत् |
| कौ. ब्रा. | – | कौषीतकी ब्राह्मण |
| गी., भ. गी. | | भगवद्गीता |
| च. सं. | – | चरकसंहिता |
| छं. द. अनु. | – | छन्दोदर्शन अनुवाकः |
| छां. उ. | – | छान्दोग्य उपनिषत् |
| तै. आ. | – | तैत्तिरीय आरण्यक |
| तै. ब्र. उ. | – | तैत्तिरीय ब्रह्म उपनिषत् |
| तै. ब्रा. | – | तैत्तिरीय ब्राह्मण |

| | | | |
|---|---|---|---|
| तै. भृ. उ. | – तैत्तिरीय भृगु उपनिषत् | ब्रह्मो. | – ब्रह्मोपनिषत् |
| तै. य. / तै. यजुः | तैत्तिरीय यजुर्वेद | भृ. उ. | – भृगु उपनिषत् |
| तै. उ. | – तैत्तिरीय उपनिषत् | भ्वा. / भ्वा. प. | भ्वादि परस्मैपदम् |
| तै. शि. उ. | – तैत्तिरीय शिक्षा उपनिषत् | मनुस्मृ. | – मनुस्मृति |
| तै. सं. | – तैत्तिरीयसंहिता | मां. उ. | – माण्डूक्य उपनिषत् |
| ना. उ. | – नारायण उपनिषत् | मुं. उ. | – मुण्डक उपनिषत् |
| नि. | – निरुक्त | यजुः सं. | – यजुर्वेदसंहिता |
| नि. अ. खं. | – नि. अध्यायकाण्डम् | यो. सू. | – योगसूत्र |
| पा. सू | – पाणिनीय सूत्र | वा. सं. | – वाजसनेयसंहिता |
| प्र. उ. / प्रश्नो. | प्रश्नोपनिषत् | शि. उ. | – शिक्षा उपनिषत् |
| | | श. प. ब्रा. | – शतपथब्राह्मण |
| बृ. उ. | – बृहदारण्यक उपनिषत् | शु. य. | – शुक्लयजुर्वेद |
| ब्र. सू. | – ब्रह्मसूत्र | श्वे. उ. | – श्वेताश्वतर उपनिषत् |
| ब्र. सू. शा. | – ब्रह्मसूत्र शारीरक भाष्यम् | सं. | – संहिता |
| | | साम. | – सामवेद |

# INTRODUCTION

It is somewhat of an audacity on my part to venture to write an introduction to this remarkable publication. Perhaps the only excuse I can put forth is my close association with the great author, Brahmarshi Daivarāta of Gokarṇa, and my persistent efforts to place this work into the hands of the public. Almost from the day I came to know of this work of the author some twenty years ago, I have been hankering to see that it is published. But I thought it was no use publishing in these days the Sanskrit text alone without an English translation. Being a book worthy of close study by Vedic scholars all the world over, I set about making attempts to get it translated. It required years for a combination of circumstances in which good translators, the author, myself, and financial help could be linked up, co-ordinated and set in motion. The late Dr. Rajendra Prasad who looked upon Daivarātji almost as his Guru, encouraged the whole effort, and at last the manuscript was ready to go to print.

It is indeed shameful that such a unique Sanskrit work as 'Chhando-darśana' (1917) along with the masterly commentary 'Anvaya-bhāshya' by the versatile genius and disciple of Ramaṇa Maharshi, Kāvya-Kaṇṭha Gaṇapati Muni, should not have been able to see the light of day for the last fifty years. When I first brought portions of it to the notice of Mahāmahopādhyāya Datto Vāman Potdār of Poona, he said that it was for the first time two thousand years after the 'Samhitī-karaṇa' of the Vedas that he had occasion to see newly revealed Ṛgvedic Mantras. When I showed the same to Vinobā Bhāve, another great Vedic scholar, he exclaimed, this is new Ṛgveda (hā navīn Ṛgveda āhe). The late Dr. M. S. Aṇey, the President of the Vaidik Samśodhan Maṇḍal and also the Secretary of the Maṇḍal, Dr. Sonṭakke were wonder-struck at the four hundred and fifty new Mantras. Dr. Hans Peter, a German Vedic scholar of note who had been recently to India, applied the usual tests and said that the Mantras were perfectly Ṛgvedic in style. He admired the 'Anvaya-Bhāshya' and said that he had hardly seen any Sanskrit commentary so rich and profound in its exposition of the text.

I need not say much here about the author, as his Guru Vāsistha Gaṇapati Muni has given some important facts about him in his preface to 'Anvaya-Bhāshya'. He is now 77 and mostly stays in Ṛshi-kula Yogāśram, Gokarṇ, Karnātaka. He is childlike in his nature and even now full of vigour and enthusiasm. His creativity does not seem to have suffered on account of age as his studies and research in Vedic lore are still on. Two of his other works 'Vāk-Sudhā' and 'Vedārtha-Kalpalatā' are being printed, but alas, without any commentary and any English or other translation. His original work 'Yoga-Sudhā' based entirely on Vedic Mantras still awaits translation. His mastery over the four Vedas and his masterly and eloquent interpretation of Vedic Mantras and literature is hardly to be found elsewhere. He can speak most fluently and compose poetry in Sanskrit. He can as well give talks in Kannada, Hindi, Marathi, Tamil, Telugu, Gujerathi and Nepali. Unfortunately his ignorance of English is proving a great handicap to him.

But in trying to say something about the many-sided genius of Daivarātji, I should not forget to point out the unique features of 'Chhando-darśana,' his magnum opus. Vāsishṭha Gaṇapati Muni, sets at rest the doubts of sceptics as to whether there can be Mantra-darśana in modern times, by enunciating the proposition that if Brahma-Darśana is a possibility and is being striven after by numerous Sādhakas, the revelation of Śabda-Brahma, that is of the Vedic Mantras, which lead to Brahma-darśana, must be a possibility. What is necessary is the creation of the conditions of consciousness in which Mantra-darśana takes place.

Unfortunately for us a great depression seems to have overtaken us. On account of that we feel that whatever great, noble, unique, original in literature, philosophy, religion, yoga and other activities can be done has been done already in the past and that nothing new can be done. This inferiority complex has seized us inspite of the fact that a Ramakrishna, a Vivekananda, an Aurobindo, a Gandhi has contributed something new, substantial, and original not only to Indian thought and culture but to world-thought and culture. I think the revelation of 'Chhando-darśana' proves beyond doubt that inspiration which worked in the souls of the great Ṛshis of the past is very much alive even now in this land of ours.

Vāsishṭha Gaṇapati Muni has given us all the relevant details of the circumstances under which the Mantras were revealed to young Daivarāta. There is nothing mysterious or even mystic or secret about it. By utter devotion to the Guru, Daivarāta had completely surrendered himself and had full faith that that was the way to achieve perfection. He threw himself with the utmost confidence into intensive Sādhanā and followed meditative processes whereby he was able to be in a yogic trance for hours. If in one

age and at one time man's mind could condition itself for the descent of the Vedic Mantras from above the mind and intellect, why should it not be possible now? That was how Daivarāta could prove that it can be done even now.

It was not an accident nor a chance Mantra finding expression through a highstrung mind that happened in the case of Daivarāta. The whole process repeated itself for sixteen days and while the disciple was in a trance and unware of what he was saying, the Guru studiously took down what was clear and whole and audible to him. To be master of Sanskrit is one thing, but even that Daivarāta was not at that time; even then Mantras true to the style, diction, accent, archaism, vocabulary, grammar and all that, poured out of the lips of the young disciple day in and day out. This shows that at stated times there was a sustained inspiration and a steady flow of Mantras 450 in number.

This phenomena should hearten every one and remind us that it is not only the past that could be bright and great, but that the future too can be greater and brighter, that creative evolution has not stopped, nor have the fountains of life gone dry. Sri Aurobindo who is a modern seer has given a call and declared that from the dawns of the past we have to look forward to the noons of the future.

Apart from being good and high poetry, the thought content of 'Chhando-darśana' is not merely eulogistic but penetrating, philosophical and inspiring. The unitive thought of the Mantras, the logical sequence and the arrangement of hymns and sections is artistic. The vigour and force of the language is contagious. When the Ṛshi speaks of the cosmic gods and goddesses, of Indra, of Sarasvatī, of Brahmaṇaspati, one is carried away by the grand conceptions reflected in the words.

Now a few acknowledgements which cannot but be a part of the introduction. I deem it not only a privilege but my great good fortune that Brahmarshi Daivarāta gave me the opportunity to serve him and the great cause he represents. Next to him, though I have been in charge of editing I must thank the translators who very patiently and doggedly pursued the work with the occasional help and guidance of Daivarātjī. One of them, Sri Devudu Narasimhaśāstri is unfortunately now no more. The other translator, Prof. S. R. Malgi had to bear the major burden. I must not forget Smt. Shanta A. Diwakar for having collected facts and drafted a life-sketch of Daivarātji in collaboration with Prof. S. R. Malgi. That life-sketch has been very helpful in introducing the Brahmarshi to many friends.

All these efforts however, would have gone in vain if the Bhāratiya Vidyā Bhavan of Bombay had not come forward to take up the publication

of this great work. I must therefore express my gratitude to them both on my account and on account of Brahmarshi Daivarāta also.

Even with all these arrangements, if Sri Arvind Mafatlal, Bombay, who is a genuine lover of our culture, had not extended his generous and timely financial help, it would have been difficult to bear the heavy burden of printing a Sanskrit volume of about five hundred pages, which cannot in the very nature of things be a quick seller.

Last but not the least, the Samyukta Karnatak Press, Hubli, deserves my thanks for the meticulous care with which the very difficult work of printing Vedic Mantras has been carried out.

Equally important is the role played by Shri H. R. Purohit, Shri P. V. Acharya, Shri V. Y. Jathar and Shri G. L. Kulkarni who studiously went through the proofs and attended to the general get-up of the Volume.

I must also thank in anticipation all those who would treasure the book and appreciate as well as realise the fact that the day of Ṛshis is not yet gone and would never go.

Hubli
15-9-1968

R. R. DIWĀKAR

# छन्दोदर्शने

## श्री वासिष्ठगणपतिमुनिना विरचिता

## वासिष्ठान्वयभाष्यभूमिका ।

---

**श्रीछन्दोदर्शने पूर्णे दैवरातर्षिसंश्रुते ।**
**वासिष्ठान्वयभाष्यस्य भूमिकेयं वितन्यते ॥**

सुविदितमेवेदं सर्वेषां शास्त्रचिन्तकानां विदुषाम्, "वेद" एव स्वतःसिद्धं प्रधानं प्रत्यक्षं प्रमाणम् – सर्वेष्वपि अर्थेषु प्रत्यक्ष–परोक्ष–अपरोक्षसिद्धेषु अन्यनिरपेक्षेण अतीन्द्रियार्थादिसर्वार्थतत्त्वबोधकत्वादिति ; तदपि दर्शनत्वादेवेति विस्तरेण मीमांसितं "विश्वमीमांसायाम्" "वेदप्रमाणचर्चायाम्"; तदेवात्र सङ्क्षेपतो निर्दिश्यते सतां दिग्दर्शनार्थम् । तथा हि ऋङ्मन्त्रवर्णं अनुश्रूयते—

"यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन् ऋषिषु प्रविष्टाम्"
(ऋ. मं. १०-७१-३)

इति ऋङ्मन्त्रवर्णात्–यज्ञरूपेण योगेन तपसा पूर्वे महर्षयः ऋषिषु विज्ञानेन सत्येन अनुभावरूपेण प्रविष्टां अन्तर्हितां वेदात्मिकां संवित्स्वरूपां छन्दस्वतीं तां परां वाचं ईशप्रेरितया दिव्यया अन्तर्दृशा ते स्वयमेव भगवदनुग्रहेण अन्वविन्दन्—प्राप्नुवन् इति गम्यते ।

सा च छन्दोमयी वागपि काव्यरूपा गायत्रादिछन्दोनिबन्धनक्लृप्ता प्रत्यक्षब्रह्मसञ्ज्ञका मन्त्रलक्षणतत्त्वसंहितेति प्रतीयते ; "ऋषिर्विप्रः काव्येन" (ऋ.मं. ८–८९–१) "सद्यः काव्यानि बळधत्त विश्वा" (ऋ. मं. १-९६-१) "स पूर्वया निविदा कव्यताऽऽयोः" (२) इत्यादिभिः ऋङ्मन्त्रपादैः तथा समर्थनात् इति ।

अत एव "ऋषिर्दर्शनात्" इति यास्कनिरुक्तमपि सङ्गच्छते, तच्च आर्षं वेदमन्त्रदर्शनं समष्टेः करणेन तत्प्रेरणया च ऋषिभिः तपसा दृष्टं साक्षात्कृतं स्वान्तरनुभावसिद्धं अतीन्द्रियं सत्यवस्तुतत्त्वार्थविज्ञानमेव भवितुमर्हति, तदेव ज्ञानं वेदः इत्यनूद्यते, अपि च तदेव विज्ञानं

यथानुभूतमेव अन्तरुद्वारेण स्वात्मचैतन्यसत्त्वसंस्फुरणेन अकृत्रिमया परया वाचा स्वबुद्धिकृति-कल्पनामन्तरेण यदनूद्यते सा दिव्या वागपि वेदशब्देन व्यवह्रियते, कार्येऽपि कारणगुणोपचारादिनियमदर्शनात् ।

अस्मिन्नर्थे ऋङ्मन्त्रवर्ण एव प्रत्यक्षं प्रमाणम्—

" हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः सं यजन्ते सखायः ।
अत्राह त्वं विजहुर्वेद्याभि रोहब्रह्माणो विचरन्त्यु त्वे " ॥

( ऋ. मं. १०-७१-८ ) इति ।

अत्रेदं यास्कनिरुक्तं—

" यद् वै किञ्च अनूचानोऽभ्यूहति आर्षं तद् भवति " इति ।

एतेन ऋषीणां तपसा अभ्युदितं अतीन्द्रियं दर्शनरूपं ज्ञानमेव वेदः, तस्य छन्दसा शब्दरूपेण अनुश्रवणात् श्रुतिरिति च सम्पद्यते; तथा च वेदप्रमाणचर्चायां तत्सूत्रम्, " दर्शनं यत् समष्टेः करणेन स्वकीयेनेव वा अन्तर्हृदये परत्र परहृदये वा गुप्तमर्थमृषिः पश्यति " इति ॥

अथ " अनन्ता वै वेदाः " इति श्रुतेः अनन्तत्वेन प्रसिद्धः स तादृशो वेदः ऋषिदर्शनात् प्रागेव परमे व्योमनि परे ब्रह्मणि अक्षरात्मनि सत्यरूपे अखण्डशब्दब्रह्मतन्मात्र-रूपेण स्वयं नित्यं प्रतिष्ठितः सन् चिन्मात्र एव आस, येन स्वयमीश्वरोऽपि इदं विश्वं निर्मिमाय इति श्रूयते । तथा च कुत्सस्य आर्षं ऋङ्मन्त्रदर्शनम्—

" स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।
आपश्च मित्रं धिषणा च साधन देवा अग्निं धारयन् द्रविणोदाम् " ॥

(ऋ. मं. १-९६-१)

" स पूर्वया निविदा कव्यताऽऽयोरिमाः प्रजा अजनयन्मनूनाम् " (२)

इति च ॥

" अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः " ॥

इति च स्मृतिः ॥

तस्मात् स्वयमेव परमाकाशे विश्वरूप–परब्रह्मवाचकात्मना विद्यमान एव वेदः ऋषिभिः तपसा अन्तर्दृशा च दृष्टः श्रुतश्च सन् वेदशब्दार्हो बभूव । तस्य वेदस्य प्रसिद्धं अपौरुषेयत्वं पुरुषमतिकल्पितत्वाभावात्; ईश्वरकृतित्वं तु तत्प्रेरितत्वात्; अत्र सर्वस्यैव जगतः ईश्वरप्रेरितत्वाविशिष्टत्वेऽपि ऋषीणां वेददर्शने तु अगत्या सम्भावनीयः अनन्यसाधारणः अस्ति कश्चिद् विशेषः इति उन्नीयते ।

अथ कोऽसौ विशेषः वेददर्शनस्य अपौरुषेयत्वे इति चेत् उच्यते—वस्तुसिद्धस्य तत्त्वस्य तपसा निर्विषयात्मकेन विमर्शेन साक्षात्कृतार्थस्य तस्य यथार्थ्येन तदनुवादतामात्रेण वागुद्गारः इति ब्रूमः ; तद्यथा—स्वप्नदशायां स्वप्नदर्शनेनोदितस्येव देवताद्यावेशदशायां च तत्समानमेव भवितुमर्हति, समाधौ तु सद्दर्शनेन समुदीर्णस्य वेदमन्त्रस्यापि नैव पुरुषमतिकृतिविषयत्वम्, अत एव तस्य अलौकिकत्वं अकृत्रिमत्वं चेति सङ्गच्छते ॥

"यामृषयो मन्त्रकृतो मनीषिणः। अन्वैच्छन् देवास्तपसा श्रमेण ॥
तां देवीं वाचꣳ हविषा यजामहे। सा नो दधातु सुकृतस्य लोके"

(तै. ब्रा. २-८-८-५)

इत्यादि वेदवचनोपोद्बलितं ऋषीणां मन्त्रकर्तृत्वमपि तद्दर्शन-श्रवणादिमन्त्रत्वसिद्धमेव भवितु-मर्हति, न तु पुनः पुरुषमतिकल्पितत्वरूपमिति वेदितव्यम् ।

ऋषिदृष्टत्वादेव च तेषां वेदमन्त्राणां मनु-वसिष्ठ-वामदेव-विश्वामित्रादीनां तत्तदार्षेयत्वव्यवहारः शास्त्रीय एवेति सम्पद्यते । तेषां मन्त्राणां विनियोगे तत्तदृषीणामनुस्मरण-विधानादिति ॥

## प्रस्तुतं वेदमन्त्राणां नूतनदर्शनतत्त्वविमर्शनम्

वेदस्य तस्य अनन्तत्वात् नित्यत्वात् वस्तुतत्त्वसिद्धत्वादेव च पूर्वैः पूर्वतरैश्च ऋषिभिः तदा तदा तपसा यथा दृष्टो वेदः अनुश्रूयते—तथैव पुनरिदानीमपि तादृशेन तपसा प्रत्यग्-दृशा च द्रष्टुं शक्यः इति उन्नीयते ; सोऽयं नित्यसिद्धस्य भूतार्थस्य सत्यस्य वस्तुनः स्वभावः, यत् खलु शास्त्रीयेन प्रमाणेन प्रत्यक्षीकरणार्हतासत्त्वम् ; यथा खलु (वस्तुतः) अमेयस्यापि सतः ब्रह्मात्मनो दर्शनं स्वस्वरूपानुभूतिरूपपरम्, तच्च अनन्यसाधारणं अशक्य-सम्पादमपि तपसा शास्त्रदृष्ट्या च इदानीमपि सुसम्पादमेवेति सर्वेषामपि विदुषामभ्युपगतमेव शास्त्रसिद्धं तत्त्वम्, तत् तथैव सत्यमिति चेत् वेदमन्त्रदर्शनस्यापि तत्समानमेव भवितुमर्हतीति यथा शास्त्रं तदभ्युपगन्तव्यमेवेति निर्विवादम् । परब्रह्मणः साक्षात्कारे यदि ईदृशी शक्यता-कथा चेत् किं पुनर्वक्तव्यं प्रत्यक्षस्य शब्दब्रह्मणो वेदस्य दर्शने तत् समानमिति; अस्मिन्नर्थे ऋषेर्दैवरातस्य तपसा दिव्यदर्शनेन च समाविर्भूतं "छन्दोदर्शनम्" तदिदमेव प्रत्यक्षं प्रमाणम् ,—

तदेतदपि समर्थितमस्माभिः विश्वमीमांसायाम् —

"इदानीमपि मन्त्राख्यां सत्यसन्धो महायशाः ।
प्रदिशन् आत्मदृष्टिभ्यो दैवरातः प्रदृश्यते" ॥

इति ॥

## छन्दोदर्शनाविर्भावः

अस्मिन् छन्दोदर्शने यत् ( सत्यं ) मया प्रत्यक्षीकृतं तदेव यथार्थमनूद्यते सर्वतः प्रकाशार्थं सर्वेषां प्रतिबोधार्थम् ॥

अयं मे शिष्यवर्गेषु अन्यतमो देवरातः, सोऽयं बाल्ये वयसः षोडशवर्षेभ्यः प्रागेव योगनिष्ठः सन् मया सहैव गोकर्णात् प्रस्थितः श्रीभगवतो रमणमहर्षेर्दर्शनार्थं अरुणाचलमुपागच्छत्, तत्र च श्रीमहर्षेः अखण्डसहजसमाधिनिष्ठायाः सन्दर्शनेन तादृशीमन्तर्निष्ठां स्वयमपि अनुभवितुं अनवरतं परमे साधने तपसि निरतोऽभूत् ; तथाऽपि गुरुसेवातत्परतया मया सह पडवेटनामकं श्रीरेणुकाम्बाक्षेत्रं प्रति समागच्छत, तत्र १८३९ तमे शालिवाहनशके भाद्रपद्मासे शारद्यां नवरात्र्यां मात्रा गुरुपत्न्या सौभाग्यवत्या श्रीविशालाक्ष्या मया च सहैव प्रथमतः श्रीरेणुकाम्बायाः सन्निधौ मन्त्रयोगपूर्वकं तपः समाचरत् । ततश्च पुनरुत्तरत्रापि तीव्रं तपश्चरतः तस्यास्य देवरातस्य मुखात् समाधिदशायां केचन शब्दाः प्रादुरभूवन् । ततः दिनद्वयानन्तरं तन्मार्गणे सा वैदिकी छन्दोमयी वागिति अभूत् तत्र मम मनीषा, तत्र समाद्यौ देवरातस्य मुखाद् योगावेशेनोदीर्णं तद् वाग्विनिःसरणमनुलक्ष्य तदिदं "छन्दोदर्शनं" मयैव सङ्गृह्य यथाश्रुतमेव समुल्लिख्य प्रकाश्यं नीतम् । अथ च शिष्यवात्सल्यात् "बालादपि सुभाषितम्" इति अभियुक्तानां वचनानुसारेण तत्र आर्षदर्शनगौरवानुदर्शनेन च तस्मिन्नेव समये इदं वासिष्ठमन्वयभाष्यमपि स्वयमहमेव व्यरचिषम् ।

अत्र केचन मन्त्राः लेखनानवसरतया निर्गताः, केचन स्पष्टतया गृहीतुमशक्यतया वृथा गताः, केचित्तु अर्धर्चशः पादशश्च लिखितुं उपलब्धाः, तान् सर्वानपि परित्यज्य ये खलु स्पष्टतया पूर्णतया च लिखितुं उपलब्धाः तानेव सङ्गृह्य तदर्थप्रकाशनाय अनेन अन्वयभाष्येण योजितवानस्मि । तथैव मन्त्राणां सूक्तानां च केषांचित् तस्मिन् दर्शनावसरे पूर्वापरीभावोऽप्यासीत्, तदपि संविमृश्य देवतादिपरत्वेन विभागशः तेषां सूक्तानां अनुवाकानां च योजनेन तदनुक्रमेणैव भाष्यमिदं विरचितम् ॥

अत्रायं विशेषः — सोऽयं कुमारः सम्प्रति पञ्चविंशतिवर्षवयस्को देवरातः विशेषतः संस्कृतभाषायामव्युत्पन्नमतिरपि बाल्यादेव निरंतरं तपोयोगादिसाधननिरतः सन् अनन्यसाधारणं यदिदं वैदिकं "छन्दोदर्शनम्" अपश्यत्, तस्मात् तदिदं दिव्यं आर्षदर्शनमेवेति प्रतिज्ञायते, तदिदं छन्दोदर्शनं प्रसिद्धाभिर्ऋग्भिः समानमेवास्ति, छन्दतः स्वरतः शब्दतः अर्थतः तत्त्वदर्शनतश्चेति शास्त्रदृशा सर्वथा प्रतीयते, तदिदं सर्वमपि अस्य प्रत्यक्षदर्शनेन स्पष्टीभविष्यति ; तस्मात् तदिदं सदसद्विवेकशालिनो विद्वांसः समदृशो निष्कल्मषहृदया एव विमर्शितुं अभिमन्तुमर्हन्ति भवन्तः इति विज्ञापये ॥

एवं देवरातोऽयं तपस्वी योगी च सन् अध्यात्मतत्त्ववेत्ता वेदमन्त्रद्रष्टा च भवन् तेन योगेन तपसा विद्यया सदाचारेण सद्वृत्तेन विनयादिना च प्राचां महर्षीणां अलङ्कृतं "ब्रह्मर्षिपदम्" अर्हतीति सौहार्देन अभिमन्ये ॥

देवरातस्य जन्म— गोकर्णे, शालिवाहनशके १८१३ तमे खरसंवत्सरे पुष्यमासे शुक्लपक्षे पञ्चम्यां तिथौ सोमवासरे ।

॥ शान्तिः स्वस्तिः श्रीः ॥

## ॥ दैवरातस्य जातकम् ॥

| | | | |
|---|---|---|---|
| | | रा. १० | |
| चं. १२<br>गु. १ | रैवतपक्षरीत्या | | |
| शु. ३ | निरयनराशिचक्रम् | | लग्न २ |
| र. ७<br>बु. (वक्र)२ | के. ४ | कु. १ | श. १ |

ग्रहलाघवरीत्या चेदमेव राशिचक्रं भवति ।

१८१३ शालिवाहनशके खरसंवत्सरे पुष्यशुद्ध
पञ्चमी सोमवासरे जननकालः ३६–३०.
रैवतपक्षरीत्या अयनांशाः १८–२१–३०.
ग्रहलाघवरीत्या अयनांशाः २२–४९–०.
ग्रहलाघवरीत्या धनुर्मासे २२ दिने जन्म,
रैवतपक्षरीत्या धनुर्मासे २६ दिने जन्म,
ग्रहलाघवरीत्या शततारा चतुर्थचरणे जन्म,
रैवतपक्षरीत्या पूर्वाभाद्रा द्वितीयचरणे जन्म.

—इति वासिष्ठः गणपतिः

देवरातस्य छन्दोदर्शनम् — पडवेटग्रामे ( मद्रासप्रान्ते ) श्रीरेणुकाम्बाक्षेत्रे १८३९ तमे शालिवाहनशके शारद्यां नवरात्र्यां तपसः प्रारम्भः, कार्तिकपूर्णमास्यां प्रारभ्य षोडश-दिनपर्यन्तं छन्दोदर्शनोदयः ॥

वासिष्ठगणपतिमुनेः अन्वयभाष्यरचना—तस्मिन्नेव समये १८३९ तमे शके कार्तिक-पूर्णिमायां प्रारभ्य माघशुक्लपूर्णिमायां समाप्तिं नीता ॥

तत्रायं प्रवृत्तो विश्वमीमांसायां वेदप्रमाणचर्चायां वेदमन्त्राणां नूतने दर्शने विमर्शः शास्त्रदृष्ट्या संवृत्तः ॥

तत्रेमे विश्वमीमांसाश्लोकाः —

"वेदश्छन्दोमयो मन्त्रो दिव्यज्ञानानुभावदः ।
प्रत्यक्षं सत् प्रमाणं स्यात् तपसा दर्शनादृषेः ॥ १ ॥

वेदो ब्रह्मात्मविज्ञानं नित्यं तस्यानुभावतः ।
तपसा तत्प्रकाशार्थं सोदीर्णा वागपि श्रुतिः ॥ २ ॥

समष्टेः करणेनेव ऋषीणामात्मनीरितम् ।
हृदाऽनूदितमेवान्तरार्षं तद्दर्शनं श्रुतम् ॥ ३ ॥

अनन्ता वै स्थिता वेदाः व्योम्न्यखण्डस्वरात्मकाः ।
तपसाऽन्तः समाधौ च श्रूयन्ते ते महर्षिभिः ॥ ४ ॥

स्वभावः सिद्धवस्तूनां द्रष्टुर्दर्शनयोग्यता ।
सामर्थ्यं तादृशं यत्र तत्र स्यात् स्फुरणं स्वयम् ॥ ५ ॥

ददृशुर्ऋषयो वेदं पूर्वे ते तपसा यथा ।
इदानीमपि तच्छक्यं तथैव द्रष्टुमन्तरे ॥ ६ ॥

ब्रह्मात्मदर्शनं यद्वत् पूर्ववत् सत्प्रमाणतः ।
इदानीमपि सम्पाद्यमृषीणामिव तत्त्वतः ॥ ७ ॥

तपसाऽन्तर्दृशा चैव पूर्णसद्वस्तुदर्शनात् ।
वेदवाचामपि तथा दर्शनं हि भवेत् सताम् ॥ ८ ॥

परस्यापि ब्रह्मणश्चेद् दर्शनं शास्त्रतो भवेत् ।
किं शब्दब्रह्मरूपस्य वेदस्य नेति वादतः ॥ ९ ॥

बहुधाऽपि तपस्तप्त्वा प्राप्तुं तत्मन्त्रदर्शनम् ।
नाशक्नवमहं पूर्णं संस्कर्तुं हृदयं तथा ॥ १० ॥

तथाऽपि तपसैवाप्तुं शक्यं तन्मन्त्रदर्शनम् ।
इति मे सुदृढो यत्नो निश्चयोऽप्यस्ति शास्त्रतः ॥ ११ ॥

**इदानीमपि मन्त्राख्यां सत्यसन्धो महायशाः ।**
**प्रदिशन् आत्मदृष्टिभ्यो दैवरातः प्रदृश्यते** ॥ १२ ॥

**एवं यो यतते योगान्मनोवाक्प्राणकर्मणाम् ।**
**सोऽप्यन्तस्तपसाऽवश्यं मन्त्रद्रष्टा भवेदृषिः"** ॥ १३ ॥

एवमेव भाष्यान्ते उपसंहारश्लोकाश्च विद्यन्ते एतदर्थप्रतिपादकाः ॥

अत्रैते भवन्ति उपसंहारश्लोकाः –

**आर्षेण चक्षुषाऽपश्यद् या ऋचस्तप आचरन् ।**
**वैश्वामित्रो दैवरातो विश्वामित्र इवापरः** ॥ १ ॥

**ता इमा अतिगम्भीराः शुद्धाः परमपावनीः ।**
**वासिष्ठोऽन्वयभाष्येण समलङ्कृतवान् मुनिः** ॥ २ ॥

**इदं ये मन्वते धीराः नवीनं मन्त्रदर्शनम् ।**
**गम्भीरं दैवरातस्य तेषां नश्यन्ति संशयाः** ॥ ३ ॥

**इत्ययं वेदसिद्धान्तो नूतने मन्त्रदर्शने ।**
**वेदशास्त्रप्रमाणेन वासिष्ठेन समुद्धृतः** ॥ ४ ॥

अथ अस्मिन्नर्थे नूतनमन्त्राविर्भावे नूतने च मन्त्रदर्शने नूतनर्षित्वे च ऋङ्मन्त्रवर्ण एव प्रधानं प्रमाणम् ।

तथा च वसिष्ठार्षेयं ऋङ्मन्त्रवर्णदर्शनम् —

"ये च पूर्वऋषयो ये च नूत्ना इन्द्रब्रह्माणि जनयन्त विप्राः ।
अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥

(ऋ. मं. ७-२२-९)

हे इन्द्र ये च पूर्वे प्राचीनाः ऋषयः प्रसिद्धाः, ये च नूत्नाः नूतनाः ऋषयः ब्रह्माणि ब्रह्मरूपान् मन्त्रान् जनयन्त अजनयन्, प्रादुर्भावयामासुः, ते ऋषयः मन्त्राश्च अस्मे अस्मासु सख्यानि शिवानि च सन्तु इति स्पष्टतरोऽर्थः ॥

तथैव माधुश्छन्दसं ऋङ्मन्त्रदर्शनम् –

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत ।
स देवाँ एह गच्छति ॥ (ऋ. मं. १-१-२)

अस्य मन्त्रस्य वासिष्ठं ऋग्भाष्यवचनम्, पूर्वेभिः पुरातनैः ऋषिभिः उत नूतनैः ऋषिभिः नवीनैश्च मन्त्रद्रष्टृभिः अग्निः ईड्यः ईडितुं शक्यः, ऋषिभिरित्यनेन एतदाह – नानृषिः यथावद् भगवन्तं स्तोतुं शक्नुयादिति, नूतनैः इत्यनेन एतदाह – न ऋषित्वं कालसापेक्षमिति ॥

तस्मात् तादृशतपःसामर्थ्यराहित्यमेव मन्त्रदर्शनराहित्ये अनृषित्वे च कारणम्, तथैव तादृशमन्त्रदर्शनमेव ऋषित्वे प्रधानं कारणमिति च सम्पद्यते।

एतेन इदमुक्तं भवति—तपसा मन्त्रदर्शनसमर्थं मूर्धन्यं हृदय्यं च अध्यात्मं दिव्यं यन्त्रं साधनीयम्। तच्च नूतनैः इदानीन्तनैः इतः परमपि साधयितुं शक्यमिति सिद्धम्॥

इति

**वासिष्ठो गणपतिः मुनिः**

॥ इति वासिष्ठान्वयभाष्यभूमिका समाप्ता ॥

PREFACE TO THE COMMENTARY

ON

# CHHANDO - DARŚANA

This is the preface to the commentary called 'Anvaya-bhāshya' written by Vāsishṭha Gaṇapati Muni, on 'Chhando-darśana.'

---

This is the commentary called 'Vāsishṭhānvaya-Bhāshya' on the whole of 'Śrī Chhando-darśana' revealed to Ṛshi Daivarāta.

It is well-known to all learned thinkers on Śāstras (the religious and ethical Laws) that Veda is the only self-evident, main, and direct authority; because, in every way, in arriving at the full knowledge of the Reality (The Thing-in-itself) which is beyond the reach of the senses, the Veda is self-corroborative and does not depend on any other authority or evidence, direct or indirect. In 'Viśva-mīmāṁsā' (a work of Gaṇapati Muni) this subject of Veda being self-evident on account of direct vision, has been discussed, under the heading 'Discussion about the self-evident nature of the Veda.' The same subject has been summarised here in brief for the attention of readers.

In this connection the Ṛg-Veda states as follows:

> "They (the Ṛshis, seers) performed sacrifice and acquired Vāk (that is, the power of speech); by the same means they acquired the Mantras which had entered the hearts of the Ṛshis" (Ṛg. X–71-3).

The Ṛg–Veda Mantra quoted above is clear. Ṛshis of old performed Tapas (made creative efforts) in the form of sacrifice; they obtained the transcendent (parām) inner speech in the form of Vedic Mantras full of insight, which had entered the hearts of the Ṛshis in the form of true knowledge pregnant with experience. *They acquired the Mantras themselves through* a divinely inspired inner vision and the grace of God.

That metrical speech of the Ṛshis is also in the form of poetry with measured metres such as Gāyatrī and others. She (speech) gives us the knowledge of Reality, has the characteristic of Mantras and leads us to Brahma. It is said that "a Ṛshi and a Vipra are known to be so because they compose poetry" (Ṛg. VIII–81-1). "He (the Ṛshi) appropriated to himself all the Kāvyas" (Ṛg. I-96–1). "He (the Ṛshi) sang Ṛks as in old days" (Ṛg. I–96-2). These are the quotations which support the statements made above.

It is therefore that Yāska in his Nirukta defines Ṛshi as one who has vision ( of Mantras ).

That alone is the vision of Mantras which is obtained by Ṛshis as described obove: It has to be born of inspiration. It is the result of creative effort of the highest order. It has to be direct and true to inner experience and it is to pertain to the truth which is normally beyond the senses. It is that knowledge which is designated as Veda. That is true knowledge issuing out of inner experience, which takes the form of spiritually inspired pure expression without any effort and without the help of one's intellect, intelligence or imagination. That is the divine speech known as Veda in common parlance. The effect which is Veda, contains within itself the cause ( inspiration etc. ) also, as is usually the case.

In support of this truth, the following quotation:

" Friendly Brahmins who get together to discuss intellectually what is deeply felt in their hearts, are baffled and leave out of consideration the transcendental as indeterminable. Those who know wander in joy." ( Ṛg. X-71-8 )

Yāska in his Nirukta says, " That is Ārsha ( pertaining to Ṛshis ) which emerges from beyond the power of speech."

Thus, that knowledge which emerges in the form of super-sensual vision as a result of the creative effort ( tapas ) of the Ṛshis is Veda. Since it is heard in the form of metrical language it is called Śruti ( that which is heard ).

The Sūtra ( aphorism ) in the 'Veda-pramāṇa charchā' in 'Viśvameemāṁsā', is as follows:

That full knowledge or secret and deep meaning which the Ṛshi sees totally in his own heart or in others by means of his efforts ( tapas ) is real knowledge. The Veda declares that Vedas are infinite and this is well-known. Even before being visualised by the Ṛshis the Veda being eternal exists. It exists in the cosmic void, in Brahman, in the immutable spirit in the form of Reality or Truth, in the form of the subtle totality of sound, in the form of consciousness. It is said that out of that the Creator himself brought forth this manifestation in the form of the universe.

Kutsa Ṛshi says in his Mantra:

" He ( Creator ) was born with effort and immediately assumed all the available knowledge of Kāvyas ( Vedas ); he sang and with the help of Agni and other Gods created everything else " ( Ṛg. I-96-1 ).
Again, " He knew the Kāvyas before and created the people along with the Manus ( the progenitors ) " ( Ṛg. I-96-2 ).

The Smṛti also endorses the same:

> "The primeval speech ( power of speech ) is unborn, eternal and born of herself. She is divine and in the form of Vedas. It is from the Vedas that all activities and creation start."

Therefore, eternally existing as they do in the highest heavens by themselves, in the form of cosmos and or the great Creator, the Veda came to deserve the designation of Veda having been seen and heard by Ṛshis through their creative effort and inner sight. The Veda is known to be not man-made; it is super-human because it is not born of human intellect or human imagination; Veda is born of God because it is God-inspired. But one can say that the whole creation is God's; what then is the uniqueness of the Veda ? There is certainly some uniqueness in the vision of the Veda by the Ṛshis as it is not a normal or common occurrence.

One may well question as to what is uncommon in the vision and expression of the Veda by the Ṛshis and what is super-human about it. We assert that the realisation of Truth through creative effort, disinterested and detached investigation of it and then the unmistakable correct expression in faultless language of the realised truth, is the uncommonness about it. For instance, the seeing of gods and goddesses in dreams and their appropriation is one thing, while the vision of the Veda Mantra in ones ecstatic condition of communion with truth in which the human element does not participate is quite another. Hence the uniqueness and the absence of any artificiality in the vision of Veda Mantras.

One may see the following quotation:

> "We worship that Goddess of Speech whom the wise Ṛshis, the Mantramakers worshipped by their creative efforts with hard labour and became like unto gods. Let her give us a place in the world of good deeds or merit." ( Tait. Br. II-8-5 ).

These and other quotations from Vedic literature prove the Mantra-making capacity of the Ṛshis as well as their ability to see the Mantras and hear them. It is obvious that the Veda is not born of human intellect and imagination.

It is because the respective Veda Mantras have been seen by Manu, Vasiṣṭha, Vāmadeva, Viśvāmitra and others that they have been ascribed to the respective Ṛshis and when using those Mantras, the names of the respective Ṛshis are mentioned and remembered.

Now let us consider the question of the revelation of new Veda Mantras.

Veda Mantras are without number. They are eternal and they reflect the truth of things. Just as in the past Ṛshis of old saw and heard and

expressed the Veda Mantras through their creative efforts, so too today it is possible for seers to see, hear and express Veda Mantras by the same means, namely creative Tapas. It is the very nature of all eternal and self-evident truths that they can be cognised by creative, scientific processes laid down. It is accepted by all learned men that Brahma or Reality, though it is beyond all measure, is capable of being realised as experience and is of the nature of one's own soul, though that kind of experience is very rare and almost impossible of easy achievement; it is achievable through creative effort and through the path laid down by the Śhāstras. Similarly, the vision of Veda Mantras has to be accepted equally as a possibility. If the possibility of the realisation of Brahma is admitted, the possibility of Śabda-Brahma-Darśana, that is of the Veda Mantra Darśana has to be admitted without further argument.

It is in this context that we say that the revelation of 'Chhando-darśana' to Ṛshi Daivarāta through Tapas (creative effort) and divine vision is proof positive (of the possibility of new Veda Mantras being revealed by the same processes as in the past).

This fact also has been supported by me in 'Viśvamīmāṁsa':

The truthful and reputed Daivarāta has shown through his spiritual insight that Mantras (new) can be seen (even today).

**Emergence of 'Chhando-darsana'**

It is only that truth which I have myself experienced and realised that I am placing before the public for their benefit.

Daivarāta is one of my disciples. He was devoted to Yoga in his boyhood even before he was sixteen. He came away from Gokarṇa with me for the Darśana (meeting) of Bhagavān Ramaṇa Maharshi of Aruṇāchalam. He saw that Sri Ramaṇa Maharshi was enjoying without any break Sahaja-Samādhi (inborn effortless ecstatic condition) and was struck by that achievement. He too decided to attain that state of consciousness and began ceaseless sādhanā to that end. Even so, on account of his extreme devotion to his Guru, that is myself, he followed me to a village called Paḍaveta. It is a place of pilgrimage of the deity Reṇukāmbā in Madras State.

There in the year 1839 of Śālivāhana Śaka (1917 A.D.) in the month of Bhādrapada and the ninth day of Śarad, Daivarāta also began austerities for the first time along with myself and my wife Viśālāksii. Austerities were begun with proper Mantras in the vicinity of Reṇukāmbā. Then and when he was performing severe austerities and when in Samādhi (communion) some words began to emerge from Daivarāta's lips. After observing for two days, I realised that it was Ṛgvedic metrical expression. In that Yogic ecstacy of his, when I saw that it was Vedic Mantras which were being

expressed, I was convinced that it was ‘ Chhando-darśana. ’ I took down what emerged from his lips; the result is ‘ Chhando-darśana. ’

On account of my affection for my dear disciple and in accordance with the well-known Sanskrit saying, “ valuable words even from children are worthy of note ”, and also on account of my deep respect for Vedic revelation, I myself wrote out the commentary called ‘ Anvaya-bhāshya .’

Some of the Mantras which came out of Daivarāta’s lips could not be taken down on account of the speed with which they came; some were not distinct enough; some of the Mantras were only half or quarter. All such Mantras have been discarded. Only those Mantras which were complete, clearly audible, and which could be taken down in full have been compiled and commentary has been written by me for their elucidation. Similarly, the Sūktas and Mantras and Anuvākas have been arranged in logical order according to Devatas involved, and commentary written accordingly.

Herebelow is Daivarāta’s horoscope as drawn by me:

*The Birth of Śrī Daivarāta Maharshi*

| | | | |
|---|---|---|---|
| | | Rāhu 10 | |
| Jupiter 1<br>Moon 12 | RĀŚI | | |
| Venus 3 | | | Lagna 2 |
| Sun 7<br>Mercury 2 | Ketu 4 | Mars 1 | Saturn 1 |

Born on 4th January 1892 at 14 Hrs. 36 Mts. ( 36 Gl. 30 V. Gl.) Śalivāhana Śaka 1813 Khara Saṁvatsara Pushya Śuddha Pañchamī Monday on the 22nd day of Dhanus Māsa ( as per Grahalāghava ) or on 26th day of Dhanus Māsa ( as per Raivata Paksha ).

| | | | |
|---|---|---|---|
| Sun: | 8-21-17 | Venus: | 9-17-20 |
| Moon: | 10-19-25 | Saturn: | 5-07-46 |
| Mars: | 6-24-50 | Rāhu: | 1- 1 -31 |
| Mercury: | 8-07-47 | Ketu: | 7- 1 -31 |
| Jupiter: | 10-21-33 | | |

Now I may say a few words. This boy Daivarāta is now twentyfive years old. He is not specially learned in Sanskrit, but he has been devoting much of his time since boyhood to austerities, Yoga and spiritual practices. That is the reason why he has been blessed with the revelation of this 'Chhando-darśana'. This is revelation of Veda Mantras as of old. This collection is as good as any well-known Ṛgvedic Mantras. One may test them by examining metre, words, svara (accent), meaning, and philosophical ideas. All this will be clear if one studies these Mantras. I therefore plead that this 'Chando-darśana' may be studied and given its due by those who have power to discriminate, who are learned, impartial, and pure in heart.

I have great love for Daivarāta and there is no doubt that he is a man of Tapas (creative effort), he is a Yogi, a philosopher, a seer of Veda Mantras. He deserves the designation of 'Brahmarshi' like the Ṛshis of old on account of his yoga, Tapas, learning, good conduct, high character, modesty and such other great qualities.

Daivarāta was born on Monday being the fifth day of the bright half of the month of Pushya of the year Khara, 1813 (1891 A.D.), Śālivāhana Śaka.

The austerities at Reṇukāmbā Kshetra, Paḍaveta (Madras State), began on the ninth day of Śarad in the year 1839 of Śālivāhana Śaka.

Revelation of 'Chhando-darśana' continued for sixteen days, beginning from the Full Moon day of Kārtika in the year 1839 (1917 A. D.) of Śālivāhana Śaka.

The commentary was written in the same year from the full-moon day of Kārtika to Full-Moon day of Māgha 1839 (1917 A. D.), of Śālivāhana Śaka (Three months).

Now when discussing the authority of the Vedas, the 'Viśwa-Mīmāṁsā' (of Gaṇapati Muni) discusses according to Śāstras. Here are the verses:

> Vedas are metrical Mantras capable of giving divine knowledge and spiritual experience. They are self-evident being revealed on account of Tapas and vision. (1)
>
> Veda is high knowledge of Brahma (the Reality) which can be experienced all the time. Speech in the form of Śruti (revealed word) has emerged through Tapas in order to convey the knowledge of Brahma. (2)
>
> When all the faculties and powers are concentrated on Truth or Reality what emerges from the heart of the Ṛshi is called revelation. (3)
>
> Infinite are Vedas in the high heavens. They are in the form of unbroken solid sound. They are heard by great Ṛshis through Tapas when in communion. (4)

It is the very nature of self-evident truths that they depend for revelation upon the capacity of the person who seeks truth. Wherever there is such capacity truth reveals itself. ( 5 )

Just as in the past the Ṛshis saw Truth through their Tapas, it is possible even today to see the truth through the same means. ( 6 )

Just as people had Brahma Darśana, spiritual realization of the Reality in the past, so too it can be there today. ( 7 )

By Tapas and inner sight, just as there can be realization of Truth, so too can there be vision of Veda Mantras by the same means. ( 8 )

According to Śāstras, if the highest Brahma can be realised, why cannot there be realization of the Śabda-Brahma which but leads to Brahma. ( 9 )

I tried hard through Tapas to attain Mantra Darśana; but I could not succeed in taking my soul to that level. ( 10 )

Even then I believe that one can have Mantra Darśana through Tapas alone; I believe in steady effort in that direction and the Śāstras also uphold this view. ( 11 )

Daivarāta, the reputed and steady seeker after truth has shown that one could have Mantra Darshana. ( 12 )

Thus he who through concentration of mind, speech, vital power, and action tries hard, compulsively becomes a seer of Mantras through Tapas. ( 13 )

At the end of the commentary, there are concluding verses as follows:

Vaiśvāmitra Daivarāta, verily like the Viśvāmitra of old, saw Ṛgveda Mantras revealed to him on account of his having attained the super-sight of a Ṛshi through Tapas. ( 1 )

Those Mantras are very profound. They are pure and have the power to purify others. Vāsishṭha Muni has embellished them by his 'Anvaya Bhāshya' commentary. ( 2 )

This is the finding of the Vedas in the matter of new Mantra Darśana which has been proved by Vāsiṣṭha with authority from the Vedas and the Shāstras.

In this matter of revelation of new Mantras and their vision and the possibility of new Ṛshis, the best authority would be the Vedas themselves.

Here below is a quotation from the Ṛgveda:

"Oh Indra, the Ṛshis of old as well as new ones to whom fresh

mantras were revealed, are there; let those Ṛshis as well as Mantras, be auspicious to us" ( Ṛg. VII-22-9 ).

Vāsishṭha comments as follows:

" Oh Indra, the reputed old Ṛshis as well as the new ones gave birth to Mantras; let all those Ṛishis and Mantras be friendly and auspicious to us."

Similarly the Mantra of Madhuchchandas:

" Agni is praised by the ancient Ṛshis as well as by the new ones. He goes to the other gods." ( Ṛg. I-1-2 ).

Vāsishṭa comments as follows:

" Both by the ancient Ṛshis as well as by modern seers of Mantras, the God Agni is capable of being praised."

By referring to Ṛshis, the Mantra means that no one who is not a Ṛshi will be able to praise the god properly; by referring to new Ṛshis, the Mantra indicates that there is no time limit for Ṛshis to be born and see new Mantras.

It is only the want of proper and high degree of Tapas and capacity which is the cause of there being no revelation and no Ṛshi and not any other reason of want of time or occasion or opportunity. Moreover, that kind of revelation of Mantras alone makes the Ṛshi.

So, the conclusion is that by Tapas one should develop the capacity of the head and heart and the wonderful inner instrument of the soul to see new Mantras. It is that instrument which will be able to attain the highest Reality. This is beyond any doubt.

Thus says Vāsisthṭha Gaṇapati Muni.

Thus ends the Preface to the Commentary called '*Vāsishṭhānvaya Bhāshya*'.

Shri Brahmarshi Daivarat



The Seer
of
" CHHANDODARSHANA "



Shri Kavyakantha
Vashistha Ganapati Muni

ĪM OM ŚRĪH

# छन्दोदर्शनम्

## दैवरातार्षेयम् ।

# CHHANDO-DARŚANA

## DAIVARĀTĀRSHEYAM

### अथ वासिष्ठमन्वयभाष्यम् ।

श्री ब्रह्मणस्पतिर्विजयतेतराम् ।

आद्यं मङ्गलं पद्यम् ।

वेदद्रष्टा स भगवान् ब्रह्मर्षिर्ब्रह्मणस्पतिः ॥
वाचं सञ्चोदयत्वाशु वेदार्थस्य प्रकाशने ॥ १ ॥

वेदमाता भगवती शब्दब्रह्मात्मिका परा ॥
तत्त्वं प्रबोधयत्वाशु लेखनी ब्रह्मचोदनी ॥ २ ॥

छन्दोदर्शनवेदेऽस्मिन् दैवरातर्षिसंश्रुते ॥
वासिष्ठान्वयभाष्यं वै मन्त्रार्थं बोधयेदलम् ॥ ३ ॥

नमस्ते ब्रह्मणे वाचे साक्षाद् वाचकशक्तये ॥
वाच्यात्मवस्तुसत्त्वाय ब्रह्मणस्पतये नमः ॥ ४ ॥

**Anvaya Bhashya ( Commentary ) by Vasishtha Muni**

Victory to Brahmaṇaspati !

INVOCATORY VERSES

1. May Bhagavān Brahmaṇaspati, the Brahmarshi who is the real seer of the Veda be pleased to inspire my power of speech for the exposition of the meaning of the Veda itself.
2. The great Bhagavatī Vedamātā is Brahma itself in the form of words. It is she who inspires all writing about Brahma. May she enable us to see the Truth without delay.
3. In this Veda, namely, Chhando-darśana, revealed to Daivarāta the Seer, may the commentary, Anvaya Bhāshya by Vāsishṭha, explain the full meaning of all the mantras.
4. Let me bow to Brahma, to the power of Speech, to the very power of expression and to Brahmaṇaspati, who is the very essence of that Reality which is to be explained here.

अथ प्रथमः त्रिदैवत्योऽनुवाकः ।

अनुवाकः १ । सूक्तम् १ । ऋचः १—३ । सविता ॥

अथ सावित्रं प्रथमं सूक्तम् ।

असौ मित्रस्तृचं, दैवरातो वैश्वामित्रः, मित्रात्मा सविता, गायत्री ।
"मित्रः, आत्मा, सविता" इति वा प्रत्यृचं देवताः ॥

THE ṚSHI IS DAIVARĀTA

**The First Section ( Anuvaka ) concerns three Devatas**
**Section I: Hymn 1: Riks 1-3—**SAVITĀ.

**I Hymn is on** *Savitā.*

This Hymn beginning with 'asau mitraḥ', contains 3 Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Savitā the god, Gāyatrī is the metre. "Mitra—the soul of the Sūkta—is Savitā, the Son."

अथ प्रथमा ऋक् ।

असौ मित्रो दिवस्पतिर्द्रष्टृणां वसिष्ठो गिरः ।
पतिश्चिकेत विश्वथा ॥ १-१-१ ॥

पद्पाठः— असौ । मित्रः । दिवःऽ पतिः । द्रष्टृणां । वसिष्ठः । गिरः ॥
पतिः । चिकेत । विश्वऽथा ॥

This Mitra ( Savitā ) is Divaspati, the Lord of the sky. He is the greatest of the seers, the Lord of speech. He knows all and everything and from all points of view. ( 1—1—1 )

अथ अन्वयभाष्यम् ।

असौ सविता वस्तुतः अधिदैवततत्त्वेन अन्तर्यामिसत्त्वेन च परोक्षः, अधिभौतिक-ज्योतिः शरीरदृशा मण्डले प्रत्यक्षः, शास्त्रदृशा च अध्यात्मतत्त्वतः अपरोक्षः प्रत्यगात्मस्वरूपः, एव तत्त्वत्रयसामरस्ययोगेन साक्षात्कृतः । मित्रः सर्वेषां भूतानां प्राणभृतां च मित्रभूतः, सर्वार्थप्रकाशकत्वात्, विश्वहिततमत्वाच्च सः मित्रवदुपस्थितः, अत एव मित्रनाम्ना वेदेषु प्रसिद्धः । "मित्रो जनान् यातयति ब्रुवाणः" (ऋ.मं. ३-५९-१) इति मन्त्रवर्णोपवर्णितः अनुश्रूयते ॥ दिवस्पतिः द्युलोकाधिपतिः, अथवा दिवः इति जात्यैकवचनम्, "तिस्रो द्यावस्त्रेधा ससृुरापः" (ऋ.मं. ७-१०१-४) इति श्रवणात्, तस्मात् दिवः "भूर्भुवः स्वः"

इति प्रसिद्धायाः एतल्लोकत्रयात्मिकाया अदितेः अधिपतिः असौ आदित्यः, द्रष्टॄणां दर्शनसत्त्वानां सर्वेषां चेतनात्मनां वसिष्ठः वसितृतमः श्रेष्ठः, गिरः स्वार्धावयवात्मिकायाः वाचः प्रत्यक्ष-ब्रह्मरूपायाः गायत्र्याः, पतिः अधिपतिः अध्यक्षः, अत एव सः ब्रह्मणस्पतिः इति प्रसिद्धः, विश्वथा सर्वथा चिकेत चिकेतति जानाति सर्वज्ञः इति यावत् । अत्र "कित् ज्ञाने" इति आर्ष—वैदिक धातोर्निष्पन्नम् क्रियापदम्, तस्य "चिकेत" इति रूपं छान्दसम्, "यश्चिकेत स सुक्रतुः" (ऋ. मं. ५-६५-१) "य ईं चिकेत गुहा भवन्तम्" (ऋ. मं. १-६७-७) इति च तथारूपदर्शनात् । अमुष्य तस्य परमपुरुषस्य विश्वहिततमत्वम्, सर्वलोकाधिपतित्वम्, सर्वसाक्षित्वम्, सर्ववाग्-विद्याद्यधिपतित्वम्, सर्वज्ञत्व च स्वतः सिद्ध सत्त्वमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

*Mitra* is visible to the physical eye as the solar orb; he is invisible as the indweller (the spirit) of all. He, in his original form, becomes the object of experience, provided one follows the Śastra. He is the friend of all, because he illumines all, and is the highest God existent. Further, he stands by everybody with ready help like a friend. He is described as Mitra (friend) in a mantra in the Ṛgveda. cf. "Mitra inspires all to strive". (Ṛg. III-59-1)

*Divaspati*: He is the lord of the sky or as the singular class-name indicates, Divaḥ stands for all the three worlds. The worlds are three: Ether is indicated by the word Dyu; though one by nature, it expresses itself in three forms, viz. Bhūḥ, Bhuvaḥ and Svaḥ, the consummate form of which is Aditi. Her lord is Āditya. So Divaspati may mean Āditya also.

*Vasishṭhaḥ* (Drashṭṛṇām): The best of all sentient ones. Giraḥ Patiḥ: He is the Lord of speech, of Gāyatrī. Gāyatrī is the Vāk— the Pratyaksha Brahma— the heard word and hence expression of the two halves of the word, viz., Vāchya and Vāchaka (that which is to be expressed and expression). He is therefore Brahmaṇaspati.

*Viśvathā Chiketa*: He is Omniscient. Chiketa is the Vedic form for Chiketati in classical Sanskrit— from the root *kit* to know. The verb chiketa derived from the root *kit*, is a Vedic form: cf. "yaś chiketa sa sukratuḥ" (Ṛg. V-65-1) "ya īm chiketa guhā bhavantam". (Ṛg. I-67-7)

The natural and fundamental nature of the Parama-Purusha is to do the highest good to all. He is the Lord of all worlds, the Seer of all and of every thing. He is the king of all speech and arts, and is Omniscient.

## द्वितीया ऋक् ।

अयं विश्वानि भूतानि प्र चेतयति चेतसा ।
तिसृभी रोचनाभिः ॥ १-१-२ ॥

पदपाठः– अयं । विश्वानि । भूतानि । प्र । चेतयति । चेतसा ॥
तिसृऽभिः । रोचनाभिः ॥

This Mitra activises all living beings by His intelligence and (His) three rays of light. (1-1-2)

## अन्वयभाष्यम् ।

अयम् योऽसौ पूर्वस्मिन् प्रथमे मन्त्रे श्रुतः यथोक्तलक्षणः सोऽयं अन्तरात्मा सर्वेषां भूतानां प्राणिनां च अन्तर्हृदये प्रत्यगात्मरूपेण अन्तर्हितः सन्, चेतसा चेतनेन चेतयति, अत्र "चिती सञ्ज्ञाने" इति (भ्वा. प. र.) धातोः तवर्गीयान्तस्य व्युत्पत्तेः चेतः-शब्दस्य ज्ञानरूपचेतनार्थकत्वम्, अथवा चेतसा वाचा प्राणेन मनसा च सह त्रिभिः तेजोऽबन्नात्मकैः भूतैः त्रिवृत्कृतेन करणत्रयात्मकेन अन्तःकरणेन, तथा तिसृभिः अग्नीन्द्रादित्यात्मिकाभिः वाक्–प्राण–मनोरूपाभिः, रोचनाभिः ज्योतिर्मयीभिः चित्तिभिः त्रिशक्तिरूपाभिः वागाद्यधिष्ठिताभिः संवित्क्रियेच्छाभिः, विश्वानि इमानि सर्वाणि दृश्यमानानि, भूतानि भौतिकानि अचेतनानि प्रत्यक्षसिद्धानि भूतजातानि प्रचेतयति सविदिच्छाक्रियात्मकचेतनाकलाभिः प्रेरयति स्वकीयान्येव सम्भावयति, आत्मसात्करणेन तानि सचेतनानि करोतीति यावत्, अग्निरयःपिण्डमिवेति भावः ॥ तस्यास्य सर्वान्तर्यामितया सर्वचेतयितृत्वमपि स्वतः सिद्धमेवेति ॥

### COMMENTARY—SUMMARY TRANSLATION

*Ayam:* In the last mantra, Mitra was described with his characteristics as the Ātmā, the innermost soul, because he dwells in the hearts of all the beings, as Pratyagātmā—concealed within. Chetasā, that is by his intelligence (derived from the root *chit* to know). This root chit denotes knowledge or activity in the form of knowledge; or the word chetasā may denote Vāk, Prāṇa and Manas—the result of triple evolution (Tri-vṛt-karaṇa) in the form of Tejas, Āpaḥ and Anna—the elements of fire, water and earth (the earth is equated to food here). These are the three components which form the Antaḥ-karaṇa (generally four).

*Tisṛbhiḥ Rochanābhiḥ*: The three Lights—Agni, Indra and Āditya in the universe and Vāk, Prāṇa, and Manas in the individual, are the forms of knowledge, viz., the three forces of Jñāna (Saṁvit), Kriyā and Ichchhā.

*Viśvāni-Bhūtāni*: All the visible things in the world, both mobile and immobile.

*Prachetayati*: Makes aware, inspires with three forces—Saṁvit, Kriyā and Ichchhā ( these are aspects of knowledge ). He makes all the living beings active like himself ( Ātmasāt-karaṇa ) just as fire heats an iron-ball to red heat. He is an activiser of all because he is the indweller of all.

## तृतीया ऋक् ।

तत् ते सवितस्तुरीयं पदं पश्यामि दर्शतम् ।
ज्योतिर्विश्वस्य दर्शयत् ॥ १-१-३ ॥

पदपाठः– तत् । ते । सवितः । तुरीयं । पदं । पश्यामि । दर्शतम् ॥
ज्योतिः । विश्वस्य । दर्शयत् ॥

I see the fourth stage or poise of Thine which is worth seeing. Oh ! Savitā that is the light illumining all and everything. ( 1-1-3 ).

## अन्वयभाष्यम् ।

हे सवितः! प्रसवितः, सर्वेषां भूतानां प्राणिनां च प्रसव–चेतन–प्रेरणादि-हेतुभूत परमात्मन्, तुरीयं तुरीयपदात्मकं, ते तव दर्शतम् दर्शनीयं सर्वान्तरात्मकं, तत् परोक्षसिद्धं परमं सर्वस्मात् परतया प्रतिष्ठितं, तुरीयं चतुर्थ पदम् परमं वस्तुभूतम्, परंधामरूपं च, पश्यामि साक्षात्करोमि, तच्च तुरीयं पदं विश्वस्य सर्वस्यापि दृश्यमानस्य अस्य जगतः, दर्शयत् प्रकाशकम्, ज्योतिः सर्वावभासकं, परञ्ज्योतिःस्वरूपमिति पश्यामीत्यन्वयः ॥ तत् स्वयं परञ्ज्योतिरात्मैवायमिति तदर्थः ॥ "नमस्ते तुरीयाय दर्शताय पदाय" इति ( बृ. उ. ५-१४-७ ) श्रुतस्य तस्य तुरीयपदस्य दर्शनीयत्वेन निर्देशः प्रसिद्धः ॥ तस्य च दर्शनीयार्थत्वं दर्शत इति पदस्य ऋङ्मन्त्रवर्णोपदिष्टम्, "वायवायाहि दर्शत" (ऋ. मं. १-२-१) इत्यत्र "दर्शत दर्शनीय" ( नि. १०-२-१ ) इति यास्कनिरुक्तवचनात् दर्शनीयत्वमिति सपद्यते, "दर्शनार्ह" इति तदर्थः "यो विश्वतः प्रत्यङ् असि दर्शतः" (ऋ. मं. १-१४४-७) "बळित्था तद् वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतोऽजनि ॥ ( ऋ. मं. १-१४१-१ ) इति च तदनुश्रवणम् ॥

"तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम्" (ऋ. मं. १-२२-२१) इति मन्त्रवर्णे स्पष्ट तदनुश्रवणम् ॥ एवमिह यानि गायत्र्याः त्रीणि पदानि सवितुरेव तानि भवन्ति, यानि सवितुः त्रीणि पदानि गायत्र्याः वाचो देव्याः तानि भवन्ति, तानि च उच्चारणीयानि, सर्वान्तर एवात्मा तुरीयं पदम्, तच्च दर्शनीयमेव नोच्चारणीयम्, परञ्ज्योतिःस्वरूपत्वात् इति ॥ अत्र आदौ "दर्शतम्" इति दर्शितमेव तत् तुरीयं पदं "दर्शयद्-ज्योतिः"

इति यद् विशेषयति तद् ऋषिर्ज्ञापयति— तस्य सर्वान्तरात्मनः तद् दर्शनं तु–स एव सर्वस्यापि द्रष्टा तथा दर्शयिता च इति तत्त्वतः द्रष्टृत्वेन दर्शयितृत्वेनैव भवितुमर्हति, न तु दृश्यतयेति ॥ अत्र किञ्चिदस्ति रहस्यम् — वस्तुतत्त्वविशिष्टम्, तदपि वैदिक–छन्दः-स्वरप्रक्रियामर्यादया समाविष्टम् ॥ अस्मिन् मन्त्रे "तुरीयं पदं पश्यामि" इत्यन्वये "तुरीयं" इति शब्दः नपुंसकः द्वितीयैकवचनान्तो भवति, तदा "तुरीयम्" इति स्वरितान्तः सम्पद्यते, यथा प्रसिद्धे ऋङ्मन्त्रे प्रसिद्धम् "तुरीयं वाचो मनुष्या वदन्ति" (ऋ. मं. १-१६४-४५) इत्यत्र श्रूयते स्वरः ॥ "तुरीयं स्विज्जनयद् विश्वजन्यः" इति च (ऋ. मं. १०-६७-१) स्पष्टं तत्स्वरानुश्रवणम् ॥ अत्र तु "तुरीय" इति उदात्तान्तं पदं विद्यते, एतत् तु सम्बुध्यन्तं पदं गम्यते एतेन स्वरभेदविशेषेण ॥ यथा प्रसिद्धे ऋङ्मन्त्रे प्रतिश्रूयते, "तुरीयादित्य हवनं त इन्द्रियमातस्थावमृतं दिवि" इति ॥ (ऋ. ८-५२-७) तत्र हे तुरीय आदित्य इति सम्बोधनार्थकं तद् वचनम् । तद्वदेव अत्रापि "हे तुरीयपदात्मक सवितः" इत्यन्वयेन तव दर्शतं दर्शनीयं तथा विश्वस्य दर्शयत् प्रकाशकं च सत् तत् परमं पदं ज्योतिः पश्यामि इत्यर्थो भवितुमर्हति ॥ सोऽयमेवार्थः औपनिषदेन यजुर्मन्त्रान्तरेण समानतत्त्वको भवति, तथा हि "गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पदी अपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे, असावदो मा प्रापदहमदः प्रापम्" इति ॥ (बृ. उ. ५-१४-७) तदनुश्रवणम् ॥

तत्र असौ सवितैव तुरीयपदस्वरूपः परोरजाः इत्यर्थः, तस्य एतदेव निर्वचनमपि तत्रैव एवमनुश्रूयते,— "अथास्याः (गायत्र्याः) एतदेव तुरीयं दर्शतं पदं परोरजाः य एष तपति, यद् वै चतुर्थं तत् तुरीयं दर्शतं पदमिति, ददृश एव ह्येष परोरजाः इति सर्वमुह्येवैष रजः उपर्युपरि तपति, एवं हैव श्रिया यशसा तपति योऽस्याः एतदेव पदं वेद" इति (बृ. उ. ५-१४-३) ॥ एतेन तस्य तुरीयपदस्य तथा तत्तुरीयपदात्मनः सवितुः दर्शनीयत्वम्, तथा सर्वेभ्यो लोकेभ्यः परतमत्वं च सिध्यति ॥ एतदेव तस्य उपव्याख्यानं भवति ॥ ३ ॥

॥ इति प्रथमेऽनुवाके प्रथमं सूक्तम् सम्पूर्णम् ॥

## COMMENTARY—SUMMARY TRANSLATION

*Savitaḥ*: He is responsible for the birth (Prasava) and inspiration (preraṇā) of all the living beings and so, he is Savitṛ and therefore he is Paramātmā. Your poise (of consciousness) which is the inner-most, ought to be seen. It is immediate though invisible and beyond all. It is the poise (turīya) which is the highest object for realisation and the highest position which one should attain. That fourth poise is the light that illumines all and everything in this world. It is the Light Supreme. This fourth poise is referred to in the *Bṛhadāraṇyaka Upanishad,* cf. "Salutation to thy fourth poise which ought to be seen" (Bṛ. Up. 5–14–7). And darśata is darśanīya according to Yāska. Just as the eye sees in the sky the Light that gives the

power of sight to the eye, the wise continuously see that Highest Poise of Vishṇu.

Gāyatrī has three feet ( padas ) and they are the same as those of Savitṛ and vice versa. Gāyatrī lords over speech. Her three feet are expressible in words. The fourth ' foot ' is Ātmā, the Indweller of all. He is to be seen ( realised ) only and not expressible in words: because he is the Light Supreme.

The fourth poise was first referred to as darśata and there is a specific reference later to it as Darśayat Jyotiḥ. By this the Ṛshi reminds us that seeing or realising him who is everywhere, means further, that He is not to be considered merely as an object of sight because, He is that sees and shows, which actually means that the sight is the same as the seer and shower, but never can He be seen as an object of sight.

Thus ends the first hymn in the first Section.

---

अथ प्रथमेऽनुवाके द्वितीयं सवितृसूक्तम् ।
अनुवाकः १ । सूक्तम् २ । ऋचः १—७ ।

असौ यः सप्त, दैवरातो वैश्वामित्रः, सविता, चतुर्थीपञ्चमीषष्ठीनां अग्नीन्द्र-सूर्याश्च, अनुष्टुप् ।

**Now the Savitr Sukta, Second in first Anuvaka.**
**Section I: Hymn 2: Riks 1–7.**

This hymn contains 7 Ṛks, beginning with ' Asau yaḥ ': Daivarāta Vaiśvāmitra is the Ṛshi, Savitā is the god, in 4th, 5th and 6th mantras Agni, Indra, Sūrya are mentioned, Anushṭup is the metre.

सविता

## अथ प्रथमा ऋक् ।

असौ यः सहसा तपन् परीतः प्रति तिष्ठति ।
विश्वस्य सवितर्यस्मिन्नमुष्मिन् त्सामिदं जगत् ॥ १–२–१ ॥

पदपाठः– असौ । यः । सहसा । तपन् । परि । इतः । प्रति । तिष्ठति ॥
विश्वस्य । सवितरि । अस्मिन् । अमुष्मिन् । सं । इदं । जगत् ॥

Verily, He ( Savitā ) stands ever-burning and all-pervading. In Him the soul and the whole universe is born and exists. ( 1–2–1 )

## अन्वयभाष्यम् ।

असौ सविता, यः तपन् सहसा बलेन परीतः व्याप्तः, विश्वस्य अस्य सर्वस्यापि जगतः, सवितरि प्रसवितरि, अस्मिन् जीवरूपे, अमुष्मिन् ईश्वरे, जगद् इदं, सं सन्ततं

प्रतितिष्ठति ॥ अत्र यत् अमुनोपक्रम्य अमुनैवोपसंहरति, यच्चेममुष्य विशेषणं करोति, तद्दर्शयति—जीवमीश्वरादनन्यं तादात्म्यात्, पश्यति च ईश्वरस्येदं जगत् न जीवस्येति ॥

### COMMENTARY—SUMMARY TRANSLATION

This Savitā who is burning pervades all with all his might. It is Savitā that has given birth to all. In Īśvara, who creates all Jīvas and the whole universe, everything exists.

In beginning and concluding with 'that' and by a special reference to 'this' (soul), the Ṛshi reminds us that Jīva and Īśvara are not different. They have identity. The Ṛshi sees that the whole universe is the creation of Īśvara and not of Jīva.

## द्वितीया ऋक् ।

नमस्ते देव सवितर्नमस्ते विश्वचक्षुषे ।
नमो विश्वस्य रोचिषे नमस्तेऽस्तु विश्वायुषे ॥ १–२–२ ॥

पदपाठः– नमः । ते । देव । सवितः । नमः । ते । विश्वऽचक्षुषे ।
नमः । विश्वस्य । रोचिषे । नमः । ते । अस्तु । विश्वऽआयुषे ।

Salutations to you Oh! Lord Savitā; to you who sees all and everything; to you who illumines all and everything; to you who is the life( āyus ) of all and everything. ( 1–2–2 )

## अन्वयभाष्यम् ।

हे देव ! सवितः ! ते तुभ्यं नमः, विश्वचक्षुषे विश्वस्य नेत्राय ते नमः, विश्वस्य रोचिषे ज्योतिषे नमः, विश्वायुषे विश्वस्य प्राणाय ते नमः अस्तु इति ॥

"मनोमयः प्राणशरीरो भारूपः" (छां. उ. ३ - १४ - २) इति ब्राह्मणं चात्र भवति, मन्त्रे चक्षुः ब्राह्मणे मनश्च न करणविशेषाभिप्राये, अपि तु साक्षिसामान्यपरे, विश्वप्राणभूतस्य व्यापकज्योतिषः अनन्तरभूतः साक्षी परमात्मा इत्युक्तं भवति ॥

### COMMENTARY—SUMMARY TRANSLATION

"Manomayaḥ prāṇa-śariro bhārūpaḥ" (Chhā. Up. 3–14–2). This quotation from the Chhāndogya Upanishad is corroborative of the above mantra.

The word 'chakshu' in the mantra, the word 'manaḥ' in the Upanishad do not refer to the senses but to the Onlooker, who is the life ( Prāṇa ) of all and everything; who is all-pervading Light and who is not different from these. He is the Paramātmā, the indwelling On-looker or Witness.

## तृतीया ऋक् ।

दधामि सत्य सवितर्धिया तव व्रतं गिरा ।
त्रीणि ते ऽमुष्य पदानि यत् प्रथमानि ज्योतींषि ॥ ३ ॥

पदपाठः— दधामि । सत्य । सवितः । धिया । तव । व्रतं । गिरा ॥
त्रीणि । ते । अमुष्य । पदानि । यत् । प्रथमानि । ज्योतींषि ॥

Oh ! Savitā the Truth, I take to your praise and service with my mind and speech. The three first lights which shine are your three names or steps ( Agni on earth, Indra in the sky and Sun in the heavens ).

## अन्वयभाष्यम् ।

हे सत्य ! सवितः ! सत्यस्वरूप सत्यप्रेरक ! तव व्रतं कर्म, धिया गिरा च दधामि धारयामि स्तौमीति यावत्, तदिदं स्तोत्रं भवति, अमुष्य ते त्रीणि पदानि नामानि, यत् प्रथमानि आद्यानि ज्योतींषि वक्ष्यमाणानीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh ! Satya Savitā, you are Truth and Inspirer of Truth. Your vrata ( service ) I undertake with mind and speech, which means, I praise you as follows: Thy three names are the first lights. The names are given in the next mantra.

## चतुर्थी ऋक् ।

अग्निः पृथिव्यां ज्वलति स्वरतीन्द्रस्त्वन्तरिक्षे ।
धीनां विश्वस्य जनिता सूर्यः प्र रोचते दिवि ॥ ४ ॥

पदपाठः— अग्निः । पृथिव्यां । ज्वलति । स्वरति । इन्द्रः । तु । अन्तरिक्षे ॥
धीनां । विश्वस्य । जनिता । सूर्यः । प्र । रोचते । दिवि ॥

Agni burns on the earth. Indra thunders in the mid-air. The Sun, the father of every mental activity shines in the sky.

## अन्वयभाष्यम् ।

पृथिव्यां अग्निः ज्वलति, अन्तरिक्षे तु इन्द्रः स्वरति शब्दायते अशनिना, विश्वस्य सम्बन्धिनः धीनां जनिता जनयिता सूर्यः दिवि प्ररोचते, कर्मप्रविभक्तानि एतानि त्रीणि नामानि भवन्तीति । अत्र " जनिता मन्त्रे " इति ( पा. सू. ६–४–५३ ) पाणिनि सूत्रात्

" जनयिता " इत्यस्य आर्ष छान्दसं रूपम्– " जनिता " इति ऋगादि मन्त्रेष्वेव भवति, " सोमः पवते जनिता मतीनाम् " इति ( ऋ. म. ९–९६–४ ) संश्रुतम् ॥

COMMENTARY—SUMMARY TRANSLATION

Agni burns on this earth and Indra roars with thunder and Savitā shines in the sky as the father of the mind. Therefore, Agni, Indra and Sūrya are the functional names of the same entity. Janitā for Janayitā in the mantra is archaic. cf. ( Ṛg. IX-96-4 ).

## पञ्चमी ऋक् ।

आत्मानं यं ते बिभ्रति गर्भमात्मनि पूरुषाः ।
अमृतं तदु सुवीर्यं ज्योतिर्विश्वस्य दर्शयत् ॥ ५ ॥

पदपाठः— आत्मानं । यं । ते । बिभ्रति । गर्भं । आत्मनि । पूरुषाः ॥
अमृतं । तत् । उं इति । सुऽवीर्यं । ज्योतिः । विश्वस्य । दर्शयत् ॥

The three Purushas ( Agni, Indra and Sun ) have the Ātman as the inmost core. The Ātman is imperishable and very powerful. It is the light of Ātman which illumines the whole Universe.

## अन्वयभाष्यम् ।

ते पूरुषाः अग्नीन्द्रसूर्याः देवतात्मानः, तथैव त इमे पुरुषाः सर्वे प्राणिनोऽपि आत्मनि प्रत्यञ्चि गर्भ अन्तर्हित यं आत्मानं प्रचेतनं बिभ्रति, तत् विधेयप्राधान्यात् नपुंसकं अमृतं नाशरहितं सुवीर्यं वीर्यवत्तमं दर्शयत् सर्वावभासकं विश्वस्य सम्बन्धि ज्योतिः, यद् वयं सवितेति स्तुमः इति ॥

COMMENTARY—SUMMARY TRANSLATION

The three Purushas are Agni, Indra and the Sun. They have an immortal essence or Ātman which in fact is the light which sustains and illumines everything. We pray to this power as Savitā.

## षष्ठी ऋक् ।

यत् पृथिव्यामाग्नेयमैन्द्रं यद् वाऽन्तरिक्षे ।
दिवि ज्योतिर्यदादित्यं वर्धयन्ति मयि तेजः ॥ ६ ॥

पदपाठ :– यत् । पृथिव्यां । आग्नेयं । ऐन्द्रं । यत् । वा । अन्तरिक्षे ॥
दिवि । ज्योतिः । यत् । आदित्यं । वर्धयन्ति । मयि । तेजः ॥

May that which is known on the earth as Agni, that which is known in the mid-air as Indra and that which shines as Āditya in the sky increase the Tejas ( powerful brilliance ) in me.

## अन्वयभाष्यम् ।

पृथिव्यां यत् आग्नेयं, अन्तरिक्षे यत् ऐन्द्रं वा, दिवि यत् आदित्यं सूर्यसम्बन्धि ज्योतिः, तानि मयि तेजो वर्धयन्ति वर्धयन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

Let all these three forms of Savitā strengthen me.

## सप्तमी ऋक् ।

तत् ते सवितस्तुरीयं परं दिव्यं धिया सुगम् ।
पदं पश्यामि दर्शतं ज्योतिर्विश्वस्य दर्शयत् ॥ ७ ॥

पदपाठ :– तत् । ते । सवितः । तुरीयं । परं । दिव्यं । धिया । सुऽगम् ॥
पदं । पश्यामि । दर्शतं । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh ! Savitā, I see your fourth step or poise the great and famous one. It is the highest, the divine one, and can be reached only by the power of intelligence. It is the light which deserves to be seen and which illumines all and everything.

## अन्वयभाष्यम् ।

हे तुरीयपदात्मक सवितः ! ते तव तत् तुरीयं दर्शतं दर्शनीयं परं श्रेष्ठं दिव्यं अलौकिकं अधिदैवततत्त्वसहितं धिया सुगं सम्प्राप्यम्, विश्वस्य दर्शयत् स्वयम्प्रकाशकं परञ्ज्योतिःस्वरूपं पदं पश्यामि साक्षात्करोमीति ॥

अत्र गायत्र्याः त्रीणि पदानि सवितुः त्रीणि पदानि भवन्ति, तानि एतानि उच्चारणीयानि, सर्वान्तर एवात्मा तुरीयं पदं दर्शनीयमेव न तु उच्चारणीयमिति ॥

प्रसिद्धे ऋग्वेदे पदपाठे गणन्तपाठः ( गलितपाठः ) केवलं पाठप्रवचनपरम्परागतः, न तु शास्त्रविहितः, तादृशपाठक्रमस्य विधानादर्शनात्, तस्मात् अत्र छन्दोदर्शने गणन्त–पाठानवलम्बनेन सर्वत्रापि समग्रमन्त्रस्य पदविभागशः पाठक्रम एव आद्रियते ॥

“गणन्तपाठो नाम” पूर्वत्र यत्र कुत्रापि मन्त्रे एकदा अनुक्रमेण समागतानां त्रयाणां पदानां ततोऽप्यधिकानां च मन्त्रान्तरे पठितानां तेषां पुनरुच्चारप्रसङ्गे तु तावतां पदानां परित्यागेन पाठः ॥ अस्य “गलितपाठः” इति संज्ञाऽपि विद्यते । सोऽयं गणन्तपाठः क्रम-

पाठे जटापाठादिषु च नास्ति, तत्र तु तावतां पदानां संहितापाठक्रमेण पठनमेवास्ति, न तु पुनः तेषां पदानां पुनरागतानां परित्यागः, तस्मात् सर्वत्रापि पदलोपप्रयुक्तं गणन्तपाठं विनैव समग्रमन्त्राणां पदपाठ एव युक्ततरः इति प्रतीयते ॥

॥ इति प्रथमेऽनुवाके द्वितीयं सवितृसूक्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh ! Savitā, your fourth step or poise is worthy of being seen; it is the highest, divine and unworldly. Referred to as godly or spiritual, it is attainable by the mind. It is self-illuminating, and is self-effulgent. It is the Light Supreme, giving light to the whole of the universe. I see it.

The three feet of Gāyatrī are the three feet of Savitā. They are expressible. The all-pervading Ātman is the fourth foot or poise. It is to be realised by experience, but cannot be expressed in words.

[In the Pada Pāṭha of the famous Ṛgveda, Gaṇanta Pāṭha has come down along the teaching tradition though not prescribed by the Śāstra. The practice of Gaṇanta Pāṭha is not to be found anywhere (prātiśākhya). Therefore, in this Chhando-Darśana, without adhering to the practice of Gaṇanta Pāṭha, the practice of teaching the entire mantra by the method of repeating word by word (sampūrṇa pada pāṭha-krama) is being followed.]

Thus ends the second hymn in the first Section.

---

अथ प्रथमेऽनुवाके तृतीयं अग्निसूक्तम् ।

अनुवाकः १ । सूक्तम् ३ । ऋचः १—४ ।

अग्ने तव चतुष्कं, दैवरातो वैश्वामित्रः, अग्निः, त्रिष्टुप् । तृतीया जगती ।

**Now The Agni Sukta, second in the first Anuvaka**

**Section I: Hymn 3 - Riks 1-4 - AGNI**

This hymn consists of four Ṛks beginning with 'Agne Tava' Daivarāta Vaiśvamitra is the Ṛshi: Agni the god and Trishṭup the metre, the third Ṛk being in Jagatī metre.

अथ प्रथमा ऋक् ।

अग्ने तवेमेव्योमन्नीह भासो
यन्मे प्राणाश्चक्षुषी आविशन्तः ॥
त्वं मे देव वागसि विश्वरूपा
वाचं देवीं मनसा प्र ब्रवीषि ॥ १ ॥

पदपाठ :— अग्ने । तव । इमे । विऽओमनि । इह । भासः ।

यत् । मे । प्राणाः । चक्षुषी इति । आऽविशन्तः ॥

त्वं । मे । देव । वाक् । असि । विश्वऽरूपा ।

वाचं । देवीं । मनसा । प्र । ब्रवीषि ॥

Oh ! Agni, my prāṇas ( vital powers ) entering my eyes are thy rays which are shining in the mid-air. They enter my eyes as life-force and enable them to see. Oh ! Shining One, you are my Vāk, who has the universal power and you give utterance to Vāk by your Mind-Power.

## अन्वयभाष्यम् ।

चक्षुषी आविशन्तः मे प्राणाः इति यत्, ते इमे प्राणाः, हे अग्ने इह व्योमनि वियति अन्तरिक्षे विद्यमानाः भासः भाभ्यो नातिरिच्यन्ते इति यावत्, हे देव ! त्वं मे विश्वरूपा विश्ववाङ्मयवचनसामर्थ्यात् विश्वात्मिका वाक् असि, " तेजोमयी वाक् " ( छां. उ. ६। ६। ४-५ ) इति ब्राह्मणं चात्र भवति, मनसा करणेन वाचं देवीं सूक्ष्मां सङ्कल्परूपां प्रब्रवीषि त्वमेव, अन्तरात्मत्वात्, ज्ञानेन्द्रियेषु चक्षुः ते विभूतिः, कर्मेन्द्रियेषु वाक्, वस्तुतस्तु त्वं अन्तरात्मा मनःकरणकः इति ॥

### COMMENTARY—SUMMARY TRANSLATION

The prāṇas, that is life-forces, entering my eyes are your mid-air rays; they are not different from the rays. Oh ! Lord, as you have the genius of creating universal literature, you are my all-pervading Vāk (Viśva Rūpā Vāk). cf. Chhā. Up. VI: 6-4 & 5, VI: 7-6. As you are the Antarātmā, the indweller, it is you who utter the subtle ( sūkshma ) and the willed ( saṅkalpa ) Vāk with your mind. And you are the eye among the Jñānendriyas ( senses which are means of knowledge ) and Vāk among Karmendriyas ( senses for action). In fact, you are the Antarātmā, the indweller, with mind as your instrument.

## द्वितीया ऋक् ।

त्वं मे माता पृथिवी द्यौरुतासि

त्वं मे पिता सविता सत्यधर्मा ।

त्वं मे धाता प्रणेता वनस्पति-

स्त्वं मे धेनूनां परितोऽसि पासि ॥ २ ॥

पदपाठः— त्वं । मे । माता । पृथिवी । द्यौः । उत । असि ।
त्वं । मे । पिता । सविता । सत्यऽधर्मा ॥
त्वं । मे । धाता । प्रऽनेता । वनस्पतिः ।
त्वं । मे । धेनूनां । परितः । असि । पासि ॥

You are my mother the earth, and you are the heavens. You are my father Savitā, who is Truth incarnate. You are my Creator, guide, medicinal herb and inspirer of all my speech. You are all-enveloping and you are protecting me.

## अन्वयभाष्यम् ।

हे अग्ने ! त्वं मे माता इयं पृथिवी, उत असौ द्यौरसि, त्वं मे पिता सत्यधर्मा अप्रतिहतनिसर्गः सविता, त्वं मे धाता कर्ता पाकप्रभावात् कालः, प्रणेता प्रेरकः, वनस्पतिः ओषधिसत्त्वभूतः, त्वं मे धेनूनां वाचां नाथः इति शेषः, परितः असि सर्वव्यापकोऽसि, पासि रक्षसि च विश्वं इति शेषः, अग्नेः विश्वरूपस्तुतिरेषा भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh ! Agni, you are my mother, the earth, and the sky. You are my father, the Truth, which is by nature unconquerable. You are my Creator, the Time which matures, the guide and inspirer. You are my Vanaspati, the medicinal herb, and you are the lord of my speech. You are Omnipresent and you protect all. This is the praise of Viśva Rūpa—the Omnifarious.

## तृतीया ऋक् ।

त्वं मे पृथिव्यामविता गृहपति-
स्त्वं मे वाचो जनिता ब्रह्मणस्पतिः ।
त्वं मे प्राणास्त्वं पवित्रो दिवस्पति-
र्वैश्वानरस्त्वमिह तिष्ठसि लोके ॥ ॥ ३ ॥

पदपाठः— त्वं । मे । पृथिव्यां । अविता । गृहऽपतिः ।
त्वं । मे । वाचः । जनिता । ब्रह्मणः । पतिः ॥
त्वं । मे । प्राणाः । त्वं । पवित्रः । दिवः । पतिः ।
वैश्वानरः । त्वं । इह । तिष्ठसि । लोके ॥

You are my protector on earth. You are the house-holder or the master of the house, the Earth. You are Brahmaṇaspati, the generator of my speech and you are my prāṇas, or life-force. You are the sacred Lord of the Sky. You are established in this world, and are known as Vaiśvānara.

## अन्वयभाष्यम् ।

हे अग्ने ! त्वं मे पृथिव्यां अविता रक्षकः, गृहपतिः आहवनीयादिरूपत्वात्, त्वं मे वाचः जनिता जनयिता ब्रह्मणस्पतिः प्रणवरूपत्वात्, त्वं मे सर्वे प्राणाः मुख्यप्राणरूपत्वात्, मध्यमो हि अग्निः मुख्यप्राणरूपः वैद्युतत्वात्, पवित्रः दिवः अधिपतिः सूर्यश्च असि, इह लोके त्वं वैश्वानरो नाम तिष्ठसि, एतया ऋचा लोकत्रयाधिष्ठितः अग्निरभिष्टुतः इति ॥

COMMENTARY—SUMMARY TRANSLATION

You are my protector on earth. As Āhavanīya Agni etc., you are the master of the house. You are the generator of my speech, the Brahmaṇaspati, as you are the Praṇava ( Om ); you are all my life-force because, you are the chief of them all. Agni as lightning is the Lord of the mid-air and thus the chief of prāṇas. You are the sacred lord of the sky, the Sun. In this world, you are the Vaiśvānara, the guide. Thus, Agni the lord of all the three worlds is praised by this Ṛk.

## चतुर्थी ऋक् ।

अन्तर्हितः सन्नमृतो मर्त्येषु
यः साकं प्राणैः पशुषु विश्वेषु ।
वैश्वानरे अस्मिन् प्रति दधाति
सविता ज्योतिर्विश्वस्य दर्शयत् ॥ ४ ॥

पद्पाठः— अन्तः । हितः । सन् । अमृतः । मर्त्येषु
यः । साकं । प्राणैः । पशुषु । विश्वेषु ॥
वैश्वानरे । अस्मिन् । प्रति । दधाति ।
सविता । ज्योतिः । विश्वस्य । दर्शयत् ॥

You are certainly the Immortal, the indwelling one with the life-forces. You are in all mortal beings, human and non-human, in the whole universe. Savitā has placed in this Vaiśvānara, his all illumining Light.

## अन्वयभाष्यम् ।

अमृत: नाशरहित: य: मर्त्येषु मरणशीलेषु मनुष्येषु, किञ्च विश्वेषु पशुषु प्राणभृत्सु, प्राणै: साकं अन्तर्हित: सन् प्रसिद्ध: प्रत्यगात्मा सर्वान्तर्यामीति यावत्, अस्मिन् वैश्वानरे अन्तरात्मनि संवित्तये सविता स: असौ परम: पुरुष: दर्शयत् सर्वप्रकाशकं विश्वस्य सम्बन्धि परं ज्योति: प्रतिदधातीति ॥

॥ इति प्रथमेऽनुवाके आग्नेयं तृतीयं सूक्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Amṛta is immortal which means it never suffers destruction. You are the immortal essence in human beings and in all other creatures who die naturally. Pratyagātmā is generally known as the indwelling Soul. And Savitā has placed in this Vaiśvānara, the soul, his all-illumining light supreme for the illumination of beings.

Thus ends the third hymn in the first Section.

---

## अथ प्रथमेऽनुवाके आग्नेयं चतुर्थं सूक्तम् ।

**अनुवाक: १ । सूक्तम् ४ । ऋच: १-१० ।**

**अग्निरयं दश, दैवरातो वैश्वामित्र:, अग्नि:, जगती ।**

**Now the Agni Sukta, fourth in first Anuvaka**

**Section I - Hymn 4 — Riks 1 - 10** AGNI

This hymn beginning with 'Agnirayam' contains 10 Ṛks: Daivarāta Vaiśvāmitra is the Ṛshi: The god is Agni and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

अग्निरयं पुरुष: सन्नमृत: सोऽ-
न्वित: स्वां परमाममृतां वाचम् ।

वाच एव विश्वमिदं सञ्जातं
ज्योतिषाऽऽत्मा सोऽध्यग्नि: परीतश्रित: ॥ १ ॥

पद्पाठः— अग्निः । अयं । पुरुषः । सन् । अमृतः । सः ।
अनु । इतः । स्वां । परमां । अमृतां । वाचम् ॥
वाचः । एव । विश्वं । इदं । सं । जजान ।
ज्योतिषा । आत्मा । सः । अधि । अग्निः । परि । इतः । चितः ॥

This Agni is Purusha, the immortal: in combination with his own creation, namely immortal Vāk, well-known as the best, he created this universe from her, the Vāk. This Agni is the Ātmā Himself, the supreme and is recognised as such all over.

## अन्वयभाष्यम् ।

अयं अग्निः स्वय अमृतात्मा पुरुषः सन् सत्तामात्रः, सः स्वां आत्मीयां अमृतात्मिकां तां परां वाचं अन्वितः सन् तस्याः वाचः पराशक्तेरेव वाङ्मुखात् आदिसृष्टौ इदं परिदृश्यमानं विश्वं जगत् सञ्जजान उत्पादयामास ॥ "स पूर्वया निविदा कव्यताऽऽयोरिमाः प्रजा अजनयन्मनूनाम्"॥ (ऋ. मं. १–९६–२) इति मन्त्रवर्णात् तदेवाभ्राविितम् ॥ अपि च सः चितः परीतः चेतनात्मना सर्वत्रापि व्याप्तः, अत एव सोऽयमग्निः न केवलं भौतिकः अचेतनश्च भवति, यथा यावाँश्च अस्माभिः प्रत्यक्षं दृश्यते, अपि तु पर एव सः परोक्षः चेतनात्मव भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

This Agni is himself the immortal Purusha. As such, he is combined with his own immortal Vāk, who is famous as the best. From Vāk, the force par excellence, and through Vāk, at the beginning, he created this Universe, which we see all-round. The Ṛgveda says: "He created, through the first recitation of mantras these children of the Manus associated with Āyu" (Ṛg. I-96-2). Further, he is all pervasive by his activity. Therefore, this Agni is not merely physical fire, which has no knowledge whatsoever when seen by us in its limited form, but is Ātmā the ever-active Chetanā, who is not visible.

## द्वितीया ऋक् ।

अग्निरयं विश्वविज्ञातवेदाः स्व १-
विश्वान्येव भूतानि जातानि वेद ।
विश्वेषु यो जातेष्वन्तः स्वाविद्यते
स इदग्निर्विश्ववेदाः समिध्यते ॥ २ ॥

पदपाठ :– अग्निः । अयं । विश्वऽवित् । जातऽवेदाः ।
विश्वानि । एव । भूतानि । जातानि । वेद ।
विश्वेषु । यः । जु तेषु । अन्तरिति । समूऽविद्यते ।
सः । इत् । अग्निः विश्वऽवेदाः । सं । इध्यते ।।

This Agni is Omniscient and a Jāta-veda, Self-Luminous. He knows all and everything that is born. He exists in all that is born. He is Agni and has all kinds of knowledge. He is ever self-effulgent.

## अन्वयभाष्यम् ।

सोऽयमग्निः विश्ववित् सर्वज्ञः जगत्कारणत्वात्, स्वः स्वयम्प्रकाशरूपः, जातवेदाः नामतः रूपतः गुणतः कर्मतश्च, तस्येदमुपवर्णनम् भवति, येन सः इमानि विश्वानि भूतानि स्वात्मनः प्रजातानि वेद जानाति, तदेव जातवेदसः तस्य जातवेदस्त्वम्, तथैव पुनः सः एतेषु जातेषु भूतेषु अन्तः चिदात्मरूपेण संविद्यते नित्यं प्रतितिष्ठति, तस्मादेव स जातवेदाः इति सुष्टुतः ।।

"जन्मञ्जन्मन् निहितो जातवेदाः" इति हि तदनुश्रावणम् (ऋ. मं. ३-१-२१) तदेव तस्य जातवेदस्त्वम् ।।

सोऽयं जातवेदाः एव सन् अग्निः विश्ववेदाः सर्वज्ञानपूर्णः सर्वत्रा प्रदीप्यते ज्योतिरात्मस्वरूपेण इति ।।

COMMENTARY—SUMMARY TRANSLATION

This Agni knows all and everything and so, he is Omniscient, as he is the Creator of the whole universe. *Swaḥ*: self-effulgent. Therefore he is Jāta-veda (born with knowledge); by name, form, quality and function, he is that. As he knows all and everything which is born of himself, he is Jāta-veda. Likewise, he pervades all and everything as Chidātmā in the form of knowledge. Therefore, he is acclaimed as Jāta-veda. Being a Jāta-veda, he is Viśva-veda, full of all kinds of knowledge. He is self-effulgent in the form of light all over.

## तृतीया ऋक् ।

अग्निरयं वैश्वानरो विश्वथाऽऽततो
विश्वेष्वेव नरेष्वन्तः प्रति प्रविष्टः ।

अस्माकं य उदर्योऽन्तरः पचनः
स इदग्निर्विश्वं आत्मा समिज्यते ॥ ३ ॥

पदपाठः— अग्निः । अयं । वैश्वानरः । विश्वऽथा । आऽतत ः ।
विश्वेषु । एव । नरेषु । अन्तरिति । प्रति । प्रऽविष्टः ॥
अस्माकं । यः । उदर्यः । अन्तरः । पचनः ।
सः । इत् । अग्निः । विश्वः । आत्मा । सं । इज्यते ॥

This Agni is Vaiśvānara and is all pervasive. He has entered into the whole creation and all the men. That which is in our stomach as digestive power is Agni himself. He is the universal soul. He is worshipped as the soul of everything.

## अन्वयभाष्यम् ।

अयं अग्निः वैश्वानरः नाम्ना स्वेन रूपेण गुणेन कर्मणा च, विश्वथा सर्वथा आततः समन्ताद् व्याप्तः, बहिरपि तेजःस्वरूपेण, तदिदं सामान्यतः वैश्वानरस्य स्वरूपमाह, तथैव एतेषु विश्वेषु नरेषु अन्तः प्राणभृत्सु अन्तः शरीरे प्रविष्टः चेतनात्मरूपेण, तस्मात् सः वैश्वानरः इति प्रसिद्धः वेदोपनिषदादिषु, "न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव" इति (ऋ. मं. १०-५-७) मन्त्रवर्णादपि तदेव सिध्यति, अपि च अस्माकं विश्वेषां नराणां आन्तर्यः यः उदर्यः जाठराग्निः पचनः अन्नरसादिपरिपाककारणीभूतः पचनाग्निः, सोऽयं वैश्वानरो नामतः, स एव अयं विश्वात्मा इति समिज्यते पूज्यते, विश्वरूपः इति स्तूयते इति ॥

### COMMENTARY—SUMMARY TRANSLATION

By name, form, quality and function, he is Vaiśvānara. He is pervading all in every direction completely, even as external light. That is the common form of Vaiśvānara. Likewise, he has entered into all the living beings as the soul as evidenced by a Ṛk: "You do not know him who created all these and who is something within you" (Ṛg. X-5-7). Further, he who is in our stomach, responsible for all digestion of all we eat, is Vaiśvānara. It is he that is worshipped as the universal soul and is praised as Omnifarious.

## चतुर्थी ऋक् ।

अग्निरयं वैश्वानरो न आत्मा
हृदय्यो ३ न्तरमृतः प्रचेतनः ।

स प्रकेतुना ज्योतिषा प्रभास्वा-
नग्निः सोऽप्रकेतो विश्वस्य मूर्धनि ॥ ४ ॥

पदपाठ :– अग्निः । अयं । वैश्वानरः । नः । आत्मा ।
हृद्य्यः । अन्तरिति । अमृतः । प्रऽचेतनः ॥
सः । प्रऽकेतुना । ज्योतिषा । प्रऽभास्वान् ।
अग्निः । सः । अप्रऽकेतः । विश्वस्य । मूर्धनि ॥

This Agni is Vaiśvānara. He is our Ātmā, the soul within the heart. He is immortal and is knowledge itself. He shines with the light of intellect. He is Agni who is beyond vision and all supreme.

## अन्वयभाष्यम् ।

अयं अग्निः विश्वेषां अस्माकं नराणां अन्तर्यामी वैश्वानरः आत्मा प्रत्यग्रूपः हृद्य्यः हृदयसम्बन्धी आन्तर्यः अमृतः मरण-विकारादिरहितः दिव्यः प्रचेतनः चेतनात्मा प्रसिद्धो हि, सः प्रकेतुना प्रज्ञानेन ज्योतिषा प्रभास्वान् अन्तर्बहिश्च प्रकर्षेण प्रकाशकः, सः परमः परोक्षसिद्धः अग्निः विश्वस्य अस्य सर्वस्यापि जगतः मूर्धनि बहिः व्योमनि अन्तः शरीरे शीर्षे च स्वेन चेतनेन तेजसा च व्याप्तः, तथाऽपि अप्रकेतः ज्ञातुं अशक्यः ज्ञानादिकारणीभूतस्य बाह्यलिङ्गादेरभावात्, अत एव सूक्ष्मतमत्वात् अन्तरात्मत्वाच्चेति, सोऽयं बुध्यादीन्द्रियैरमेयः इति तदभिप्रायः ॥

### COMMENTARY—SUMMARY TRANSLATION

This Agni is within all of us human beings, as Vaiśvānara. He is our Ātmā who is in the heart. He is immortal, divine, indestructible. He is known as shining with knowledge. He shines without also. He is above all and transcendant. Externally in the sky and internally in the body, and especially in the head, he is full of light of knowledge. Even so he is beyond intellectual knowledge as there is nothing external indicating him—he being very subtle and innermost.

## पञ्चमी ऋक् ।

अग्निरयं भूतेषूदितो ज्योतिषा
भूतं योऽनु ज्वलति स्वं प्रतिमानम् ॥
यो भूतमभ्येति पचन्नुत दहन्
त्स इदग्निर्भूत आत्मा ज्योतिष्मान् परि ॥ ५ ॥

पदपाठः--- अग्निः । अयं । भूतेषु । उत्ऽइतः । ज्योतिषा ।
भूतं । यः । अनु । ज्वलति । स्वं । प्रति ऽ मानम् ॥
यः । भूतं । अभि । एति । पचन् । उत । दहन् ।
सः । इत् । अग्निः । भूतः । आत्मा । ज्योतिष्मान् । परि ॥

This Agni is found in all and in every element as light. He shines in every element, in accordance with its form. He pervades every element, maturing and burning it. He is verily Agni—the Bhūtātmā—full of light and above all.

## अन्वयभाष्यम् ।

सोऽयमग्निः सर्वेषु भूतेषु एतेषु अचेतनेषु आकाशादिषु स्वेन ज्योतिषा अभ्युदितः, यः तेजः परमाणुरूपेण स्वं निजं प्रतिमानं प्रतिमास्वरूपमिदं भूतं पृथिव्यादिरूपं भौतिकं सर्वं वस्तुजातं अनुसृत्य प्रज्वलति प्रत्यक्षं प्रकाशते, यश्च अयं अग्निः भूतं भूतजातं पचन् पाककर्मणा सूक्ष्मरूपेण सँस्कुर्वन्, अपि च दहन् दहनकर्मणा स्थूलेन च स्वरूपेण अभ्येति सर्वतः व्याप्नोति सूक्ष्मेण रूपेण च, सोऽग्निरेव ज्योतिर्मयः भूतात्मेति परि सर्वतश्च उपरि श्रेष्ठत्वेन वरीवर्तीति शेषः, तदेवाग्नेः दिव्यं स्वरूपमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

The light which exists in all the inactive elements like Ākāśa etc. is Agni. In his elemental form like a subtle atom, he glows in everything concrete like the earth etc., when he becomes visible. Further, he pervades all living beings, maturing them with his invisible existence, and burning them by his visible form. He is certainly Agni, full of light and he is Bhūtātmā. Being supreme, he is above all and transcendant.

## षष्ठी ऋक् ।

अग्निरयं यो हविर्भुग् देवतानां
वेदिषद् यो हविर्देवेभ्यो नयति ॥
विश्वं यस्मिन् हूयते हविर्ब्रह्मणा
स इदग्निर्दिव्य आत्मा प्रातिश्रुत्कः ॥ ६ ॥

पदपाठ :– अग्निः । अयं । यः । हविःऽभुक् । देवतानां ।
वेदिऽसत् । यः । हविः । देवेभ्यः । नयति ॥

विश्वं । यस्मिन् । हूयते । हविः । ब्रह्मणा ।

सः । इत् । अग्निः । दिव्यः । आत्मा । प्रातिश्रुत्ऽकः ॥

This is Agni who receives oblations intended for gods. He is in the Vedi ( seat of sacrifice ). He carries the oblation to the gods. Oblations are offered to him with mantras. He is certainly Agni, the divine. Verily he is Devatātmā. He listens to us. He is Prajāpati.

## अन्वयभाष्यम् ।

सोऽयमग्निरेव हविर्भुक् देव-मनुष्यादिभ्यः दत्तानां सर्वेषां हविषां भोक्ता, अत एव वेदिषत् वेद्यां आहवनीयादिरूपेण प्रतिष्ठितः सन् यः यजमानैः यज्ञकर्तृभिः दत्तं हुतं सर्वं हविः हविर्द्रव्यं देवेभ्यो नयति समर्पयति, तथैव अध्यात्मं सर्वेषां प्राणभृतां शरीरे अन्तर्हितः अग्निः वैश्वानरात्मकः हविर्भुक् भोक्तृस्वरूपो जीवात्मा प्राणाग्निहोत्ररूपेण दत्तं हविः तत्तद्देवेभ्यः प्रणयति, तर्पयति च तान् जीवात्मरूपान् देवान्, अतः एवं यस्मिन् अग्नौ ब्रह्मणा समर्पणार्थकेन स्वाहाकारान्तेन मन्त्रेण "अग्नये स्वाहा, इन्द्राय स्वाहा, प्राणाय स्वाहा" इत्यादिना विश्वं हविः हूयते, स एवाग्निः दिव्यः देवतात्मा प्रातिश्रुत्कः अस्माकं स्तुतिरूपां वाचं प्रतिशुश्रुवान् कः प्रजापतिः ब्रह्मात्मस्वरूपः सर्वदिगवस्थितः परमतेजोमयः सर्वदेवतात्मैव भवितुमर्हतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

This Agni is the enjoyer of all the oblations, offered by all gods, men etc. Therefore he sits in the place of sacrifice ( Vedi ) as Āhavanīya etc. As such, he receives all sacrifices, takes them and presents them to all gods. Individually ( adhyātmam ), he is in everybody as Agni, Vaiśvānara.

Havirbhuk, the individual soul as enjoyer delivers to the gods all oblations given in the form of Prāṇāgnihotra and pleases them, the respective gods and souls. Therefore, the oblations are given to Agni to be presented to the different gods with mantras, ending with Swāhā, as Agnaye swāhā, Prāṇāya swāhā etc. He is Agni the divine. He listens and responds to our praises. He is Prajāpati, the Brahma, the Creater. He is in all directions. He is all light and the soul of all gods.

## सप्तमी ऋक् ।

अग्निरयं देवो दिव्यः सन् सविता

स्वः१ सदनं स्वमधि द्योतते परि ॥

ज्योतिषाऽभि द्योतयतीह विश्वं
स इदग्निर्ज्योतिरात्मा भ्राजते तपन् ॥ ७ ॥

पदपाठः — अग्निः । अयं । देवः । दिव्यः । सन् । सविता ।
स्वरिति स्वः । सदनं । स्वं । अधि । द्योतते । परि ॥
ज्योतिषा । अभि । द्योतयति । इह । विश्वं ।
सः । इत् । अग्निः । ज्योतिःऽआत्मा । भ्राजते । तपन् ॥

This Agni is god. He is divine and is the Sun. He shines in his home the sky and all-round. He illumines the universe with light. That Agni certainly is Jyotirātmā who shines ever burning.

## अन्वयभाष्यम् ।

अयमग्निः पृथिवीसदनोऽपि मूलतः दिव्यः देवतात्मा द्युलोकस्थः सविता सवितृस्वरूपः तत्प्रसूतत्वात्, असौ विप्रकृष्टः यः दूरतो दृश्यते, स च स्वः प्रकाशकं द्युस्थानं स्वकीयं मूलस्थानं आदित्यमण्डलं अधिष्ठाय परितः सर्वेभ्योऽपि भुवनेभ्यः भूतेभ्यश्च उपरि द्योतते प्रकाशते, तथा स्वेन ज्योतिषा इदं विश्वं जगत् अभि सर्वतः द्योतयति प्रकाशयति, तस्मादेव सः ज्योतिरात्मेति स्तूयते सर्वैः, सोऽयमग्निरेव स्वयं ज्योतिरात्मा दिवि सर्वतश्च तपन् भ्राजते प्रदीप्यते इति ॥

COMMENTARY—SUMMARY TRANSLATION

Agni is no doubt on earth; but originally, he is divine and a god. He is Savitā, seen at a distance. He is in the sky, seated in his self-luminant and original home, the orb of the Sun. He shines beyond all worlds and beings. Further, by his light, he shines all round illuminating all; therefore, he is Jyotirātmā and is praised by all as such. He is indeed Agni, who is himself the Jyotirātmā. He burns and shines all round.

## अष्टमी ऋक् ।

अग्निरयं पार्थिवं रजः प्रति ऋतः
सन्नितो ज्योतिषाऽपो नयते दिवम् ॥
अमुतोऽसावप आ नयतीह भूयः
स इदग्निरात्मा भूमा दिव्यः स्वर्स्वान् ॥ ८ ॥

पद्पाठः— अग्निः । अयं । पार्थिवं । रजः । प्रति । ऋतः ।
सन् । इतः । ज्योतिषा । अपः । नयते । दिवम् ॥
अमुतः । असौ । अपः । आऽनयति । इह । भूयः ।
सः । इत् । अग्निः । आत्मा । भूमा । दिव्यः । सरस्वान् ॥

This Agni pervades the entire universe. Again from this world, as heat, he raises the water to the sky and brings down the water from there. It is only Agni ( who does this all ). He is the multitudinous Ātmā ( Bhūmātmā ). He is known as the preserver of wisdom.

## अन्वयभाष्यम् ।

सोऽयमग्निः मूलतः असौ सवितैव सन् पार्थिवं पृथिवीसम्बन्धि रजः भुवनं परमाणुरूपं च भूतं इदं शरीरं च प्रत्यृतः प्रति प्राप्तः सन्, इतः अस्मात् लोकात् पार्थिवं रजः तथा अपश्च ज्योतिर्मुखेन अमुं लोकं दिवं प्रति ऊर्ध्वं सन्नयते सम्प्रेषयति, ततश्च पुनः अमुतः अमुष्मात् लोकात् नीचैः वर्षणेन द्युलोकस्थाः ताः अपः पृथिवीं प्रति आनयति, सोऽयमग्निरेव भूमा महान् अखण्डः व्यापकः आत्मा इति ज्ञायते, तथा सरस्वान् रसवान् ज्ञानवान् इति च चितः गृहीतो ज्ञातश्च श्रुतिमुखेन, प्रत्यक्षतो वृष्ट्यादि दर्शनेन चेति ॥ अस्मिन् अर्थे दीर्घतमसः आर्षं मन्त्रदर्शनं भवति ॥

"समानमेतदुदकमुच्चैत्यवचाहभिः । भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः" इति ( ऋ. मं. १–१६४–५१ ), "दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि" इति च ( ऋ. मं. १–१६४–५२ ) ॥

## COMMENTARY—SUMMARY TRANSLATION

This Agni is originally Savitā, and he pervades the whole universe and this body which is like an atom ( when compared to the universe ). He transforms and takes up the dust and the water from this world into the sky and again rains them down. He is multitudinous Agni—who is infinite—the Bhūmātmā and possessor of all rasas ( fluids ) and knowledge and he has been known throughout Śruti.

The Ṛshi Dīrghatmas also has two mantras to this effect ( Ṛg. : I–164–51 & 52 ). The same water goes up and comes down ( in the form of rain ). Parjanya— the God of Rain-Indra etc. pleases the earth, and the fires on the earth please the sky ( 51 ). I invoke the Sun—the possessor of waters—who pleases all through rains which protect life ( 52 ).

## नवमी ऋक् ।

अग्निरयं विद्युता ज्योतिषेन्द्रोऽन्त-
रन्तरिक्षे पवते मरुत्वान् त्स्वरन् ॥
यो राजते पार्थिवं रजोऽनुविष्टः
सो अग्निर्ज्योतिष्मान् विद्युदद्भिश्चितः ॥ ९ ॥

पद्पाठ :– अग्निः । अयं । विऽद्युता । ज्योतिषा । इन्द्रः । अन्तरिति ।
अन्तरिक्षे । पवते । मरुत्वान् । स्वरन् ॥
यः । राजते । पार्थिवं । रजः । अनुऽविष्टः ।
सः । अग्निः । ज्योतिष्मान् । विऽद्युत् । अत्ऽभिः । चितः ॥

This Agni is Indra in the shape of light and lightning. He moves in the mid-air, roaring and moves with the Maruts. He enters this world and shines. He is Agni the Jyotirātmā. He is in the form of lightning and is to be recognised as such and is stored in the waters.

## अन्वयभाष्यम् ।

सोऽयमेव वैद्युतः अग्निः सन् इन्द्रः इति संस्तुतः, "त्वमग्न इन्द्रो वृषभः सतामसि" इति ( ऋ. मं. २–१–३ ) तदनुश्रवणात् ॥ विद्युता विद्युद्रूपेण ज्योतिषा अन्तरिक्षे मध्यमे लोके अन्तः मरुत्वान् मरुद्गणेन सहितः सन् तेन च मरुता संस्वरन् शब्दायमानः तत्रैव पवते, योऽयं पुनः अशनिमुखेन पार्थिवं रजः इमं लोकं परमाणुं च अनु प्रविष्टः सन् स्वयमपि साक्षात् अग्निरेव भवति, सोऽयं ज्योतिष्मान् अग्निरेव अद्भिः जलैरेव अस्मिन् लोके चितः विद्युद्रूपेण सङ्गृहीतः, तथैव सः इदानीमपि सङ्गृह्यते, सः वैद्युताग्निरिति सम्भाव्यते इति ॥

### COMMENTARY—SUMMARY TRANSLATION

This Agni is the fire of lightning. As Indra, he moves in the mid-air, as lightning and the light thereof. cf. " Oh Agni ! you are Indra, giver of all good." ( Ṛg. II-1-3 ). He moves there accompanied by Maruts. As thunderbolt, he comes down to this world and enters the earth and its particles and manifests himself as fire. He (Indra) is Agni—full of light ( Jyotishmān ). He is being recognised and collected by means of waters. He is known as the fire of lightning and respected as such.

## दशमी ऋक् ।

अग्निरयं रुद्रो वाचा मध्यमया रौति
स्वरन्त्याऽन्तरिक्षे यो बलीयान् ॥
मरुतां यः पिता प्रणेता प्राणानां
तद् रुद्रियं ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पदपाठ :– अग्निः । अयं । रुद्रः । वाचा । मध्यमया । रौति ।
स्वरन्त्या । अन्तरिक्षे । यः । बलीयान् ॥
मरुतां । यः । पिता । प्रऽनेता । प्राणानां ।
तत् । रुद्रियं । ज्योतिः । विश्वस्य । दर्शयत् ॥

This Agni is Rudra, who roars with the sounding madhymā (Parā, Pas'yantī, Madhyamā, Vaikharī) Vāk. He is in the mid-air and is strong. He is the father of Maruts and leader of Prāṇas (vital powers). The light of Rudra illumines the universe.

## अन्वयभाष्यम् ।

सोऽयमग्निरेव रुद्रः इति संस्तूयते, वैद्युतज्योतिर्योगात्, "त्वमग्ने रुद्रो असुरो महो दिवः" (ऋ. मं. २-१-६) इति मन्त्रवर्णात् यः खलु मध्यमे लोके अन्तरिक्षे अनवरतं स्वरन्त्या मध्यमया माध्यमिकया वैद्युत्या वाचा बलीयान् बलिष्ठो रौति शब्दायते अशनिमुखेन, "त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश" (ऋ॰ मं ४-५८-३) इति ऋङ्मन्त्रवर्णे तदनुश्रवणम् ॥

यः खलु मरुतां पिता जनकः जनयिता पालयिता च बहिः ब्रह्माण्डे, प्राणानां च प्रणेता प्रेरयिता सर्वेषां अन्तःशरीरे, "आ ते पितर्मरुतां सुम्नमेतु" (ऋ. मं. २-३३-१) इति च मन्त्रवर्णात्, "प्राणाद् वायुरजायत" (ऋ. मं १०-९०-१३) इति च तदनुश्रवणम्, तत् रुद्रियं रुद्रसम्बन्धि वैद्युतं ज्योतिः विश्वस्य अस्य समग्रस्यापि जगतः दर्शयत् प्रकाशकं भवति, तस्मात् तद् वैद्युताग्निस्वरूपं तत् परञ्ज्योतिः, तथा तत्परञ्ज्योतिःस्वरूपो रुद्र एवायमग्निरिति ॥

॥ इति प्रथमेऽनुवाके आग्नेयं चतुर्थं सूक्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Rudra is Agni himself. cf. "Agni, you are Rudra, divine light and giver of Prāṇas" (Ṛg. II-1-6). Rudra makes violent sound in the mid-air with

constantly sounding madhyamā Vāk which is lightning. That means he roars through thunder. cf. "Bound three-folded, he gives out good roars." (Ṛg. IV-58-3). He is known to be father and protector of Maruts. "Oh father of Maruts, may we get happiness from you?" (Ṛg. II-33-1). In the eternal world, he is the leader or inspirer of the Prāṇas. Cf. "From Prāṇa, Vāyu was born" (Ṛg. X-90-13). That light of Rudra—light of the lightning—illumines the whole world. Therefore, the light of lights (Param-jyoti) is Rudra himself, who is Agni himself.

Thus ends the fourth hymn in the first Section.

---

**अथ प्रथमेऽनुवाके आग्नेयं पञ्चमं सूक्तम् ।**

**अनुवाकः १ । सूक्तम् ५ । ऋचः १-१० ।**

**अग्निरयं पृथिवीः दश, दैवरातो वैश्वामित्रः, अग्निः, जगती ।**

**Now the Agni Sukta, 5th in the first Anuvaka**

**Section I—Hymn 5—Riks 1-10** AGNI

This Hymn beginning with "Agnirayam Pṛthivī" contains 10 Ṛks: Daivarāta Vaiśvāmitra is the Ṛshi: The god is Agni and the metre is Jagatī.

**अथ प्रथमा ऋक् ।**

अग्निरयं पृथिवीस्तिस्रः प्रकेतः
परि गच्छति ताः प्र णयत्यजस्रम् ॥
अग्निमेव तत् कृणुते स्वं ज्योतिषा
सो अग्निः परो ज्योतिरात्माऽधि चितः ॥ १ ॥

पदपाठः— अग्निः । अयं । पृथिवीः । तिस्रः । प्रऽकेतः ।
परि । गच्छति । ताः । प्र । नयति । अजस्रम् ॥
अग्नि । एव । तत् । कृणुते । स्वं । ज्योतिषा ।
सः । अग्निः । परः । ज्योतिःऽआत्मा । अधि । चितः ॥

This Agni constantly moves through the three worlds and pervades them. He moves them and makes them bright with his light. He is the great Agni, the Jyotirātmā. He is gathered together at the sacrifices in the form of fuel.

## अन्वयभाष्यम्।

सोऽयं ज्योतिरात्मा अग्निः पृथिवीः तिस्रः त्रिसङ्ख्याकाः, "तिस्रः पृथिवीरुपरि प्रवा दिवः" इति निर्देशात् लभ्यते (ऋ. मं १-३४-८), त्रीन् लोकान् प्रति अतते सातत्येन गच्छति कालपरिमाणतः, ताः परितः गच्छति, देशपरिमाणतः, ताः अजस्रं निरन्तरं प्रणयति सञ्चालयति स्वेन ज्योतिषा प्रेरयतीति यावत्, तेन तल्लोकत्रयं स्वं स्वकीयं भावयति साक्षादग्निमेव कुरुते, तेजसा परितप्तमयःपिण्डमिव सर्वमपि साक्षादग्निरूपमेव कर्तुं शक्नोति आत्मसात्करणतः इति अभिप्रायः, सोऽग्निः ज्योतिरात्मा चितः यज्ञादौ परिगृहीतः, तथा भौतिके पार्थिवे काष्ठादौ अरणिरूपे सङ्गृहीतः स्व-स्वाभीष्टयज्ञ-पाक-प्रकाशादिसिध्यर्थमिति ॥

### COMMENTARY—SUMMARY TRANSLATION

Agni in the form of Jyotirātmā, as mentioned in a Ṛk, "You flow through the three worlds" ( Ṛg. I–34–8 ), flows through and round the three worlds constantly and moves them. He inspires them to do so by his light. By the same light, he makes them his own, which means he makes them fiery, like a red hot ball of iron. He can do it by making them like himself. That Agni is Jyotirātmā. He is gathered in sacrifices as fuel. On the earth he is kindled with fuel etc., for sacrifice, cooking, light and so on, according to requirement.

## द्वितीया ऋक् ।

अग्निरयं पुरुषः सन् प्रचेतनः
पुरुषेष्वा सीदतीह पुरुष्वाधि ॥
आविरभूत् सन्नेक एव बहुधा
सो अन्तरस्मासु धीभिः परीतश्चितः ॥ २ ॥

पदपाठ :– अग्निः । अयं । पुरुषः । सन् । प्रऽचेतनः ।
पुरुषेषु । आ । सीदति । इह । पुरुषु । अधि ॥
आविः । अभूत् । सन् । एकः । एव । बहुधा ।
सः । अन्तरिति । अस्मासु । धीभिः । परि । इतः । चितः ॥

This Agni, as Purusha, is the activiser. He exists in all persons here. He is one only but manifests as many in myriad forms. He is inside us, surrounded by many means of knowledge and is known as such.

## अन्वयभाष्यम् ।

अत्र प्रचेतनः सोऽयमग्निरेव स्वयं चेतनात्मा पुरुषः सन् परुषु बहुषु सर्वेषु पुरुषेषु आ समन्तात् अधि सीदति प्रति तिष्ठति, सः वस्तुतः मूलतः स्वयं एक एव सन् बहुधा भावेन स्वरूपेण बहिः आविरभूत्, सः अस्माकं शरीरे अन्तः सर्वाभिः धीभिः व्याप्तः चेतनात्मस्वरूपेण, सोऽयं अन्तरात्मा स्वयं अग्निस्वरूप एव भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Here the activiser is Agni himself who is a Purusha, and is active himself. He dwells in many persons. But in fact, he is one only who manifests himself as many. He dwells within us as activiser surrounded by all means of knowledge. He is Agni himself.

## तृतीया ऋक् ।

अग्निरयं ब्रह्मा सदमृतं ब्रह्म
बृंहते ज्योतिषाऽभि विश्वथाऽऽत्मना ॥
विश्वमेतद् बृंहयति प्रचेतनः
सो अग्निर्बृहन् त्स्वधया प्रति चितः ॥ ३ ॥

पदपाठ :— अग्निः । अयं । ब्रह्मा । सत् । अमृतं । ब्रह्म ।
बृंहते । ज्योतिषा । आभि । विश्वऽथा । आत्मना ॥
विश्वं । एतत् । बृंहयति । प्रऽचेतनः ।
सः । अग्निः । बृहन् । स्वधया । प्रति । चितः ॥

This Agni is Brahmā; he is immortal. He is Brahma because he expands on all sides and in every way with his light. He makes the world also expand. He is the activiser. Agni is great. He is recognised as being everywhere.

## अन्वयभाष्यम् ।

अयमग्निरेव ब्रह्मा पृथिवीमधिष्ठितः बृहद्रूपेण इति श्रूयते, योऽयं ज्योतिर्मयः प्रत्यक्षो दृश्यते, "अग्निर्ब्रह्मा नृषदने विधर्ता" (ऋ. मं. ७-७-५) इति मन्त्रवर्णात्, तस्य अग्नेर्ब्रह्मत्वं गम्यते, सोऽयं सत् सत्स्वरूपं अमृतं सत्यं ब्रह्मैव प्रत्यक्षम्, स च विश्वथा सर्वप्रकारेण ज्योतिषा स्वेन आत्मनः ज्योतिःस्वरूपेण बृंहते वर्धते स्वयमेव, सः प्रचेतनः सन् एतद् अचेतनं विश्वं जगद् बृंहयति अभिवर्धयति, सः अयं अग्निरेव बृहन् महान् आत्मा स्वधया अन्नेन धिया वाचा च प्रति चितः प्रत्यक् चितः वागादि रूपया वृत्या सङ्गृहीतः सन् सर्वत्रापि अन्तः बहिश्च प्रकाशते इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Agni is Brahmā who is in the world and is known as the mighty one; so we hear about him who becomes visible being full of light. " Agni is Brahmā and lives in all dwellings" ( Ṛg. VII-7-5 ). He is all-existent, Satyam. He is immortal. He is visible Brahma. By all means, he grows by his light independently. He is the activiser and so he makes this inactive world expand. This is indeed Agni, the great. He grows bigger and bigger by offerings of food, service and praise. He is recognised within one's own self by speaking etc. He is everywhere, in and out.

## चतुर्थी ऋक् ।

अग्निरयं यज्ञो यज्ञपतिः परः
सन् यजमानो यो यजते प्रति यज्ञम् ॥
यो वाचा धीभिर्हविषा यज्ञेनान्तः
सो अग्निर्यष्टा प्रत्नथाऽऽत्मा पुरुषः ॥ ४ ॥

पदपाठः – अग्निः । अयं । यज्ञः । यज्ञऽपतिः । परः ।
सन् । यजमानः । यः । यजते । प्रति । यज्ञम् ॥
यः । वाचा । धीभिः । हविषा । यज्ञेन । अन्तरिति ।
सः । अग्निः । यष्टा । प्रत्नऽथा । आत्मा । पुरुषः ॥

This Agni is sacrifice and a great master of sacrifices. As sacrificer, he performs every sacrifice. He is to be worshipped in sacrifices by speech, intellect, and oblation. That Agni is the sacrificer, the oldest and self-pervading Ātmā and Purusha.

## अन्वयभाष्यम् ।

अस्मिन् लोके यज्ञः तपः–स्वाध्याय–ज्ञानमय–द्रव्यमयादिरूपेण बहुधा विततः सः सर्वः यज्ञोऽपि अग्निरेव, तस्य यज्ञसाधनीभूतत्वात्, तथा यज्ञपतिः यज्ञस्य अध्यक्षश्च अग्निरेव, यज्ञसञ्चालकत्वात्, तेन यज्ञेन प्राप्योऽपि अग्निरेव, तथा स्वयं यजमानोऽपि सन् यः खलु सर्वं यज्ञं ( स्वयमेव ) यजते, यश्च वाचा सर्वाभिरपि धीभिः अन्तरिन्द्रियैः तथा बाह्येन्द्रियैश्च, तथा बाह्यैः हविर्भिः भौतिकैः साधनैः दुग्ध-घृतादिभिश्च साध्येन द्रव्य-यज्ञेन च यजनीयः, सः अग्निरेव सर्वेभ्यः पुरुषेभ्यः प्रत्नतमः स्वयं यष्टा यज्ञकृदेव भवति, सेयं यज्ञपुरुषस्य अग्नेः विश्वरूपस्तुतिर्भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

In this world, sacrifice can be manifold, as Tapas, study, wisdom, offering etc. All that is Agni himself, because He is instrumental to all sacrifices. He is the Lord of sacrifice as well as the conductor of sacrifice. The result of sacrifice is also Agni. Though he is the sacrificer himself, it is he that conducts the complete sacrifice, with speech ( prayer ), with all means of knowledge, services, with senses internal and external, and with the physical offerings like milk, ghee etc. He is worshipable by the sacrifice to be performed. That Agni is the oldest of all deities as well as men. He is the sacrificer. This is the praise and description of Agni as Yajñapurusha, Viśvarūpa—the Omnifarious—in sacrifices.

## पञ्चमी ऋक् ।

अग्निरयं सुनीती सुपथाऽस्मान्
सुषुम्णैः सत्ये नयतु प्रणेता ॥
स सेनानीर्विश्वस्येह प्रचेतनः
सहस्वान् त्संहते प्रतिपदं बलम्        ॥ ५ ॥

पदपाठः— अग्निः । अयं । सुऽनीती । सुऽपथा । अस्मान् ।
सुऽसुम्नैः । सत्ये । नयतु । प्रऽनेता ॥
सः । सेनाऽनीः । विश्वस्य । इह । प्रऽचेतनः ।
सहस्वान् । सहते । प्रतिऽपदं । बलम् ॥

May Agni, the good leader guide us as the conductor, by proper paths to happiness and truth. He is the commander of all in this world. He knows and is powerful and at every step, he can stand all opposition.

## अन्वयभाष्यम् ।

अयं अग्निः सुनीती सुनीत्या प्रणयेन सुष्ठु नयनेन च सुषुम्णैः सुसुम्नैः सुसुखैः, "सुम्नं" इति सुखनाम, हेत्वर्थे तृतीया, "फलमपीह हेतुः" इति न्यायात् सुष्ठुसुखार्थं अस्मान् निजोपासनापरायणान् सुपथा सन्मार्गेण नयतु, सत्ये वस्तुनि सद्विषये च प्रेरयतु, "अग्ने नय सुपथा राये अस्मान्" ( ऋ. मं. १-१८९-१ ) इति मन्त्रवर्णेऽपि तदनुश्रवणं समानम्, तत्सुखस्य सुष्ठुत्वं तु सद्विद्याविषयकत्वात् निर्विषयकत्वात् आत्मविषयकत्वात् परमार्थविषयकत्वाच्च भवितुमर्हति, स एवाग्निः अस्माकं सर्वेषां प्राणभृतां प्रणेता जनयिता प्रेरयिता च, सः इह प्रपञ्चे अस्य विश्वस्य जगतः प्राणिनां सामान्यतः, सर्वेषां मनुष्याणां

च अथ विशेषतः बुद्धि-ज्ञान-विद्यादीनां प्रेरकः सन् अयमग्निरेव सेनानीः सेनाधिपतिरिव सर्वाभीष्टार्थसाधने अग्रणीर्भवति, सः स्वयं प्रचेतनः सन् सहस्वान् बलवान् सर्वप्रतिक्रियादि-समर्थः प्रतिपदं पदे पदे प्रतिक्षणं अन्येषां बलं परेषां प्रतिबलं च सहते अस्माकं रक्षार्थमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

By his good guidance which means by love and foresight, let Agni guide us to happiness. Let him conduct us by well-chosen paths towards Truth and help us to get it. " Oh ! Agni, take us to manifold wealth by well chosen ways" ( Ṛg. I-189-1 ). The happiness referred to herein is really manifold. It refers to the attainment of the Ātmā also which is the highest achievement. Agni is the father and inspirer of all beings in this world, generally of everybody and specially of man; it is Agni that actually inspires one to get knowledge and wisdom. He is like a commander, and he takes us to every desired object. He, being the activiser, is strong and can withstand the opposite forces.

## षष्ठी ऋक् ।

अग्निरयं प्रज्ञया सन् प्रचेतनो
विश्वमेतच्चकार सं सचेतसम् ॥
ब्रह्मणोऽण्डं पिण्डं यथाऽयसोऽग्निं
सो अग्निः प्रज्ञाता पुरुषो जातवेदाः ॥ ६ ॥

पदपाठः – अग्निः । अयं । प्रऽज्ञया । सन् । प्रऽचेतनः ।
विश्वं । एतत् । चकार । सं । सऽचेतसम् ॥
ब्रह्मणः । अण्डं । पिण्डं । यथा । अयसः । अग्निं ।
सः । अग्निः । प्रऽज्ञाता । पुरुषः । जातऽवेदाः ॥

This Agni is an activiser with sound knowledge. He activated the Universe—the egg of Brahma — like fire which heats an iron ball. That Agni is the knower and pervades the whole universe and he ( Purusha ) is one existing in all and knowing all.

## अन्वयभाष्यम् ।

सः स्वयं प्रचेतनः सन् अयमग्निः प्रज्ञया धिया संविदा च तदेतद् विश्वं अचेतनं जगत् प्रचेतसं सम्यक् चकार आत्मसात्करणेन सचेतनं करोति इति यावत्, तत्रायं प्रत्यक्ष-

सिध्दो दृष्टान्तः— यथा खलु अयमग्निः भौतिकः स्वसंसृष्टं अयःपिण्डं अचेतनं अग्निमेव करोति तद्वत्, तथैव ब्रह्मणः अण्डं अण्डभूतं इदं समग्रं ब्रह्माण्डं इदं पिण्डं अस्माकं शरीरं च स्वकीयेन केवलेन चेतनेन सचेतनं करोति इति पूर्वत्र अन्वयः, तस्मात् सोऽयमग्निः प्रज्ञात्मा प्रकृष्टज्ञानपूर्णः परमः पुरुषः जातवेदाः सर्वज्ञः एव भवितुमर्हति, न तु केवलं भौतिकः, नापि भौमः, यादृशः यावान् सर्वैरस्माभिः परिदृश्यते इति ॥

## COMMENTARY—SUMMARY TRANSLATION

The inactive world was activated by him as he is an activiser. He made it like himself. Here is an example which can be verified: The physical fire makes an iron ball as hot as itself when it comes into contact. He activated the *Aṇḍa*— the egg of Brahma, and *Piṇḍa*— our bodies also. He knows everything exceedingly well. He is the highest Purusha ( who fills everything ) and Jāta-vedas ( knower of all ).

## सप्तमी ऋक् ।

अग्निरयं मे आत्मा ह्रीदं शरीरं
पार्थिवं रज उतायं इवापृतः ॥
अग्निमेवेमं मामकृणोत् स्वमहं
स इदग्निर्ज्योतिष्मान् पुरुषश्चितः ॥ ७ ॥

पदपाठः – अग्निः । अयं । मे । आत्मा । हि । इदं । शरीरं ।
पार्थिवं । रजः । उत । अयःऽइव । आऽपृतः ॥
अग्निं । एव । इमं । मां । अकृणोत् । स्वं । अहं ।
सः । इत् । अग्निः । ज्योतिष्मान् । पुरुषः । चितः ॥

This Agni is my Ātmā. He pervades all atoms of the physical world, and even this body also. He made me like Agni, that is like himself. I am certainly that Agni, person full of light and all-pervasive.

## अन्वयभाष्यम् ।

सोऽयमग्निः मे मम आत्मा आन्तरः सन् पार्थिवं रजः इदं भुवनं तथा परमाणुं च अयः काष्ठ–लोष्ठादिकमपि यथा सर्वथा आपृतः व्याप्तः बहिः व्याप्नोति च, तद्वदेव इदं पार्थिवं शरीरमपि अन्तः व्याप्नोति, तेन च स्वकीयं मां इमं निजोपासकं आत्मसात्करणेन साक्षाद् अग्निमेव अकरोत्, तस्मात् सोऽयमहं अग्नेरेव समाश्रयणेन तदनुग्रहात् ज्योतिर्मयः पुरुषः चितः संवृत्तोऽस्मीति ॥

COMMENTARY—SUMMARY TRANSLATION

Agni is my inner Ātmā. So, he pervades in and out, this world, the atom, the minerals and similarly this body as well. He made me like himself. By his grace I have become Jyotirmaya— all light and all-pervasive.

## अष्टमी ऋक् ।

अग्निरयं सत्यो वाचा च ब्रह्मणा
समानेन रसेनाचितः सन् त्मना ॥
अमृतः स आत्मा तपसा परीतः
स इदग्निः संवित् स्वरसः सँस्वनः ॥ ८ ॥

पदपाठः— अग्निः । अयं । सत्यः । वाचा । च । ब्रह्मणा ।
समानेन । रसेन । आऽचितः । सन् । त्मना ॥
अमृतः । सः । आत्मा । तपसा । परि । इतः ।
सः । इत् । अग्निः । सम्ऽवित् । स्वऽरसः । सम्ऽस्वनः ॥

This Agni is Satya— the Truth. He is equated with the Soul, being in harmony with the Vāk-Brahma. He is certainly the Immortal Ātmā permeating everything by his brilliance. That Agni is right knowledge full of harmony ( Ātmānanda ) and sweet sound.

## अन्वयभाष्यम् ।

अयं अग्निः स्वयं सत्यः सन् ब्रह्मणा मन्त्ररूपया प्रत्यक्षब्रह्मात्मिकया वाचा सह समेन रसेन सामरस्येन त्मना आत्मना स्वात्मरूपेण आ समन्तात् अखिलैः प्राणिभिः उपचितः उपसङ्गृहीतः अन्तर्यामिस्वरूपेण प्राप्तः, सः अमृतात्मैव सन् स्वेन तपसा तेजसा तत्त्वत्रयात्मकेन परीतः सर्वत्र व्याप्तः, सोऽयं अग्निरेव संवित् सम्यग्ज्ञानस्वरूपः, स्वरसः आत्मानन्दरसस्वरूपः, संस्वनः स्वानुभावोद्गारात्मकः सम्यक् स्वरनादादि स्वरूपश्च भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

This Agni is truth. According to the Vāk-Mantra, Brahma is visible and is universally accepted as once own soul— the indweller. Being immortal he permeates by his Tapas everything. He is indeed Agni, Wisdom incarnate; he is full of harmony; he is replete with sweet sound which expresses itself out of self realisation.

## नवमी ऋक् ।

अग्निरयमप्स्व१न्तर्हितो ज्योतिषा
सो अ ऽद्भ्य एव जजानाभि विद्युता ॥
विद्युत एवापः प्रति प्रजज्ञिरेऽ-
मुमग्निमप्सुमन्तं समेधिरे ॥ ९ ॥

पदपाठ :— अग्निः । अयं । अप्ऽसु । अन्तरिति । हितः । ज्योतिषा ।
सः । अत्ऽभ्यः । एव । जजान । अभि । विऽद्युता ॥
विऽद्युतः । एव । आपः । प्रति । प्रऽजज्ञिरे ।
अमुं । अग्निं । अप्सुऽमन्तं । सं । एधिरे ॥

This Agni concealed or involved in waters, was reproduced as lightning from the waters themselves. Again the waters were reproduced from lightning, Agni thus became Apsumān ( having waters ) and was brought out.

## अन्वयभाष्यम् ।

अप्सु ज्योतिषा रूपेण अन्तर्हितः सन् स एवायं अग्निः ताभ्यः अद्भ्य एव विद्युता विद्युद्रूपेण अभितः ज्योतिःस्वरूपेण सञ्जजान आविर्बभूव, तथा तद् वैद्युतं ज्योतिरुत्पादयामास, तथा तस्याः एव विद्युतः सकाशात् ताः दिव्याः आपः प्रति प्रजज्ञिरे पुनः आविर्बभूवुः, तस्मात् अमुं वैद्युतं अग्निं अप्सुमन्तं एतन्नामानं समेधिरे अप्संहितमेव अभिवृद्धं प्रकाशयामासुः, अत एव सः " अप्सुमान् " इति वेदे श्रूयते, अत्र अलुप्तसप्तम्यन्तेन पदेन समस्तं इदं मतुप्प्रत्ययान्तं पदम् " अप्सुमान् " इति आर्षं छान्दसम्, " अग्नयेऽप्सुमते स्वाहा " इति सुस्पष्टं यजुर्मन्त्रवर्णं तथाऽनुश्रवणम् इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Conealed as light in the waters, this same Agni was produced as lightning all-round, from the waters themselves. Again from lightning, the heavenly waters were manifested. Therefore that Agni in the form of lightning-is known as Apsumān, as he came to light in the company of waters.

## दशमी ऋक् ।

अग्निरयं धामसु त्रिषु राजते
भूर्भुवः स्व१ महोभिः परीतैः ॥

तुरीयं तत् पदं परमं प्रति ऋतः
सो अग्निः परो ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पद्पाठ :– अग्निः । अयं । धामऽसु । त्रिषु । राजते ।
भूः । भुवः । स्वरिति स्वः । मह्ःऽभिः । परि । इतैः ॥
तुरीयं । तत् । पदं । परमं । प्रति । ऋतः ।
सः । अग्निः । परः । ज्योतिः । विश्वस्य । दर्शयत् ॥

This Agni shines in the three abodes, Bhūḥ, Bhuvaḥ, and Svaḥ surrounded by the three lights. ( Agni, Vāyu & Sūrya ) But he goes to the fourth abode, which is higher than these three. This Agni is Param Jyoti— the best light and he illuminates all.

## अन्वयभाष्यम् ।

अयमेवाग्निः "भूः भुवः स्वः" इति व्याहृतित्रयप्रतिपादितैः भुवनत्रयाधिष्ठितैः सर्वत्र व्याप्तैः त्रिभिः ज्योतिर्भिः अग्नि-वायु-सूर्यस्वरूपैः समस्तः संहितः सन् तेन ज्योतिस्त्रयरूपेण त्रिषु धामसु पृथिव्यन्तरिक्षद्युस्थानेषु राजते प्रकाशते, ततश्च तेभ्यः त्रिभ्यः अतिरिक्तः सन् स्वीयं तत् तुरीयं पदं परन्धामस्वरूपं प्रति उपगतः सन् सोऽग्निः परः विश्वस्यापि जगतः दर्शयत् प्रकाशकं परं ज्योतिः, तत्परञ्ज्योतिःस्वरूपोऽयमग्निः इति ॥

॥ इति प्रथमेऽनुवाके आग्नेयं पञ्चमं सूक्तं सम्पूर्णम् ॥

## COMMENTARY—SUMMARY TRANSLATION

This Agni exists in Bhūḥ, Bhuvaḥ and Svaḥ, the three worlds. He shines in the form of Agni, Vāyu and Āditya. The three worlds are Pṛthvi ( this world ), Antariksha ( the mid-air ) and Dyu ( sky ). Agni shines in all these abodes as the three deities. He goes beyond to the fourth abode, which is the highest and his own. This Agni in his fourth abode is the Param Jyoti— the light par excellence, who illuminates all and everything.

Thus ends the fifth hymn in the first Section.

अथ प्रथमेऽनुवाके षष्ठं मरुत्वदिन्द्रसूक्तम् ।

मरुत्वान् इन्द्रः ।

अनुवाकः १ । सूक्तम् ६ । ऋचः १-५ ।

यो विद्युता पञ्च, दैवरातो वैश्वामित्रः, मरुत्वान् इन्द्रः, जगती ।

**Now the Indra Sukta, 6th in the first Anuvaka**

**Section I—Hymn 6—Riks 1-5—MARUTVĀN INDRA**

This Hymn beginning with " Yo Vidyutā " contains five Ṛks: Daivarāta Vaiśvāmitra is the Ṛshi: the god is Marutvān Indra and the metre is Jagatī.

अथ प्रथमा ऋक् ।

यो विद्युता जगतामीष्टे पुरुषो
यो देवैर्विश्वैर्य उं सयुङ् मरुद्भिः ॥
आत्मन्वी स संप्राणश्चेततेऽन्तः
सेन्द्रो मरुत्वान् राजतीह स मध्यमः ॥ १ ॥

पद्पाठः— यः । विऽद्युता । जगताम् । ईष्टे । पुरुषः ।
यः । देवैः । विश्वैः । यः । ऊं इति । सऽयुक् । मरुत्ऽभिः ॥
आत्मन्वी । सः । सऽप्राणः । चेतते । अन्तरिति ।
सः । इन्द्रः । मरुत्वान् । राजति । इह । सः । मध्यमः ॥

He the great person rules over the three worlds. The Viśvedevas and Maruts are with him. He is the master of himself. As Prāṇa, he inspires all from within. He is Indra with the Maruts. He shines in the world and is the Lord of the mid-air.

अन्वयभाष्यम् ।

यः खलु परमः पुरुषः सर्वेषां जगतां प्रशास्ता सन् ईष्टे प्रभवति, यश्च विश्वैः देवैः वैश्वदेवगणैः सर्वैश्च देवैः देवगणैश्च सयुक् सहयुक्तः, तथा मरुद्भिः सह मरुद्गणेन च संयुक्तः सन् सः इन्द्रः पारमैश्वर्यादिसर्वगुणगणपरिपूर्णः पुरुषः मरुत्वान् इति वेदे संश्रूयते, " सजोषा इन्द्र सगणो मरुद्भिः" (ऋ. मं ३-४७-२) " मरुत्वाँ इन्द्र वृषभो रणाय" (ऋ. मं. ३-४७-१ ) इति मन्त्रवर्णात्, सः इन्द्रः आत्मन्वी आत्मवान् सर्वतन्त्रस्वतन्त्रः, सर्वेषां प्राणभृतां आत्मा, सप्राणः प्राणैः सहितः सर्वेषां अन्तः चेतते संस्फुरति चेतनात्मैव

सन् प्रतितिष्ठति, सः मरुत्वान् इन्द्र एव मध्यमः अन्तरिक्षाधिपतिः सर्वाध्यक्षः राजति राजा सन् प्रभवति इति यावत् ॥

अत्र "इरज्यति, क्षयति, पत्यति, राजति इति चत्वार ऐश्वर्यकर्माणः" इति ( निघण्टु २ - २१ ) निघण्टुवचनात् "राजति" इति परस्मैपदं राजा प्रभवतीत्यर्थकं क्रियापदम्, "इन्द्रो विश्वस्य राजति", इति सामऋङ्मन्त्रवर्णे स्पष्टं तदनुश्रवणम्, "इन्द्रो यातोऽवसितस्य राजा०सेदु राजा क्षयति चर्षणीनाम्" (ऋ.मं. १ - ३२ - १६ ) इति च तदर्थसमन्वयवचनम् ॥

## COMMENTARY—SUMMARY TRANSLATION

He is the great person and so rules as master, all the worlds. He is associated with the hosts of Viśvedevas and Maruts. He is Indra, full of wealth par-excellence. He is known as the lord united with Maruts, as the following Ṛks describe : " Indra, you are associated with gods and Maruts. " ( Ṛg. III–47–2 ) and " you are with Maruts " ( Ṛg. III-47-1 ). This Indra can do anything he likes. He holds in his grasp the Prāṇas of all beings. He glows within all as activity. This lord of Maruts, is Indra himself. He is the lord of the mid-air. As overlord, he is the King.

The four words Irajyati, Kshayati, Patyati, and Rājati indicate the kingly functions according to Nighaṇṭu ( 2-21 ) —the Vedic Dictionery. So Rājati, a predicate in parasmaipada, means ' Lords over '. " Indra is the King of all and everything ", says Sāma Veda and Ṛg. describes the same idea : " He is certainly the King of all. " ( Ṛg. I-32-16 ).

### द्वितीया ऋक् ।

यो वा मरुतां सखा सन् प्रचेतनो
यो देवो वशी राजते यथाकामम् ॥
योऽन्तर्धोत बहिर्धाऽऽत्मा ज्यायान्
त्सेन्द्रो मरुत्वान् राजतीह स मध्यमः ॥ २ ॥

पदपाठ :— यः । वा । मरुतां । सखा । सन् । प्रऽचेतनः ।
यः । देवः । वशी । राजते । यथाऽकामम् ॥
यः । अन्तःऽधा । उत । बहिःऽधा । आत्मा । ज्यायान् ।
सः । इन्द्रः । मरुत्वान् । राजति । इह । सः । मध्यमः ॥

He, the friend of the Maruts, is full of intelligence. He is independent and lords over all as he likes. He is the geat Âtmā who is immanent. He is the supreme Indra with the Maruts. He rules this world and is the lord of the mid-air.

## अन्वयभाष्यम् ।

यः खलु प्रचेतनः सन् पुरुषः मरुतां सखा इति वेदे प्रसिद्धः, यः देवः देवतात्मा वशी स्वतन्त्रः, यथाकामं स्वतन्त्रेच्छया राजते प्रकाशते, यः खलु अन्तर्धा आन्तर्यः तथा बहिर्धा बाह्यः आत्मा सबाह्याभ्यन्तरसमः सर्वात्मा पूर्णात्मा च, ज्यायान् सर्वेभ्यः ज्येष्ठः, श्रेष्ठः, सः मध्यमलोकाधिपतिः इन्द्रः मरुत्वान् मरुद्भिः सहितः सन् स्वयं राजति इति ॥

### COMMENTARY—SUMMARY TRANSLATION

He is full of intelligence. He is the friend of Maruts and is known in the Vedas as such. He is divine and independent. He is solely guided by his own will. He permeates everything in and out equally. He is the soul of all and of everything. He is the best of all. He is the Lord of the mid-air. That Indra who is with the Maruts lords over this world.

## तृतीया ऋक् ।

यो बहिर्धा विद्युता द्योतमानो
विश्वमेतत् प्रणयन् त्सुकेतुना ॥
योऽन्तर्धाऽऽत्मा प्राणभृतां ज्यायान्
त्सेन्द्रो मरुत्वान् राजतीह स मध्यमः ॥ ३ ॥

पदपाठ :— यः । बहिःऽधा । विऽद्युता । द्योतमानः ।
विश्वं । एतत् । प्रऽनयन् । सुऽकेतुना ॥
यः । अन्तःऽधा । आत्मा । प्राणऽभृतां । ज्यायान् ।
सः । इन्द्रः । मरुत्वान् । राजति । इह । सः । मध्यमः ॥

He shines out externally as lightning. He inspires and leads this Universe with sound intelligence. Internally, he is the great soul of all living beings. He is Indra with Maruts who rules over this world. He is the lord of the mid-air.

## अन्वयभाष्यम् ।

यः बहिर्धा ब्रह्माण्डे बहिस्तनः विद्युता बाह्येन वैद्युतेन ज्योतिषा द्योतमानः प्रकाशमानः चकासमानश्च सन् सुकेतुना प्राणेन प्रज्ञया च एतद् विश्वं जगत् प्रणयन्

प्रेरयन् राजति इष्टे, तथैव पुन: अन्तर्धा अन्तस्तन: सर्वान्तर्य: चेतन: आत्मा सर्वेषां प्राणभृतां देव-मनुष्य-पशु-पक्षिप्रभृतीनां ज्येष्ठ: अधिपति:, स: एतादृश: मध्यमलोकाधिपति: मरुत्वान् सन् राजतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

He shines as lightning outside and as life and intelligence inside; he inspires the whole Universe. Further, he is the inner-most soul, the intelligence. He is the greatest of all the divine and human beings, therefore the lord of all. He is Indra, the Lord of mid-air and rules this world with Maruts.

## चतुर्थी ऋक् ।

योे बहिर्धा विद्युता स्वरत्यन्तरिक्षे
जनयन् यो विदो वाचं परां परि ॥
योऽन्तर्धाऽऽत्मा विदं वदतीह वाचा
सेन्द्रो मरुत्वान् राजतीह स मध्यमः ॥ ४ ॥

पदपाठः – यः । बहिःऽधा । विऽद्युता । स्वरति । अन्तरिक्षे ।
जनयन् । यः । विदः । वाचं । परां । परि ॥
यः । अन्तःऽधा । आत्मा । विदं । वदति । इह । वाचा ।
सः । इन्द्रः । मरुत्वान् । राजति । इह । सः । मध्यमः ॥

He roars with thunder externally in the mid-air. He generates excellent sound everywhere in the sky. Internally, he is the soul and expresses his knowledge through Prāṇa, the vital force. He is Indra with the Maruts, the king of this world. He is the lord of the mid-air.

## अन्वयभाष्यम् ।

य: बहिर्धा ब्रह्माण्डे अन्तरिक्षे वहन् विद्युता वैद्युतेन तेजसा स्वरति शब्दायते, यश्च वियदि परित: विद: संविद: परां वाचं जनयन् स्वरति इति पूर्वत्र अन्वय:, अथवा आकाशे परां अखण्डां सूक्ष्मां वाचं ध्वनयन् प्रतिध्वनिरूपेण उच्चरन् प्रतितिष्ठति । य: अन्तर्धा सर्वेषां अन्त: शरीरे वाचा विदं संविदं अनुवदति मुख्यप्राणमुखेन, स: मध्यमलोकाधिपति: मरुत्वान् मरुत्सखा च सन् इन्द्र: राजति विश्वेषां जगतां प्रभवतीति ॥

## COMMENTARY--SUMMARY TRANSLATION

Externally, moving in the mid-air which is the Universe, he roars with thunder. In the vast sky, it is he that makes excellent sound; or, he lives in the sky, echoing the excellent indivisible and elemental sound. Internally, he expresses, through Prāṇa, all the knowledge he has. He is Indra, the lord of mid-air. He rules here with the Maruts.

## पञ्चमी ऋक् ।

यो नः परो यो द्रष्टा न सन्दृशेऽभूद्
यः सुसन्दृक् परमो विश्वदर्शतः ॥
सेन्द्रो मरुत्वान् राजतीह स मध्यमः
स उत्तमं ज्योतिर्विश्वस्य दर्शयत् ॥ ५ ॥

पदपाठः— यः । नः । परः । यः । द्रष्टा । न । सम्ऽदृशे । अभूत् ।
यः । सुऽसन्दृक् । परमः । विश्वऽदर्शतः ॥
सः । इन्द्रः । मरुत्वान् । राजति । इह । सः । मध्यमः ।
सः । उत्ऽतमं । ज्योतिः । विश्वस्य । दर्शयत् ॥

He is beyond us. He is the seer but himself unseen. He is the best seer as he sees all and everything and he is worthy of being seen. Indra with Maruts rules here and is the lord of mid-air. He is the light par-excellence and illuminates all and everything.

## अन्वयभाष्यम् ।

यः खलु नः अस्माकं परः अस्मभ्यं श्रेष्ठः, यश्च अस्माकं सबाह्याभ्यन्तरः द्रष्टा विश्वसाक्षी न सन्दृशे अभूत् द्रष्टुं दृष्टिगोचरो न भवति, यश्च पुनः सुसन्दृक् सम्यग् द्रष्टृतमः परमः सर्वेभ्यः विश्वदर्शतः सर्वेषामपि दर्शनीयः सर्वैरपि द्रष्टुं योग्यः साक्षात्काराार्हः सर्वद्रष्टेति अनुभावास्पदीभूतः इति भावः ॥ "सुसन्दृशं त्वा वयं मघवन् वन्दिषीमहि" ( ऋ. मं. १-८२-३ ) इति तदनुश्रवणम् । सः मध्यमलोकाधिपतिः मरुत्वान् इन्द्र एव पारमैश्वर्यपूर्णत्वात् उत्तमं सर्वेभ्यः श्रेष्ठतमं ज्योतिः विश्वस्य दर्शयत् प्रकाशकं भवति, तत्परञ्ज्योतिःस्वरूप एव इन्द्रः इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is above and beyond us and best of us. He sees us in and out. As universal witness, he sees all and everything but he himself is not seen by anybody. He is not seen with these eyes. Again, he is the best of the seers. Cf. "You deserve to be seen by one and all. Oh Maghavan, we bow to you" ( Ṛg. I-82-3 ). He is the lord of mid-air. He is with Maruts, he is certainly Indra, because he is full of the best wealth. He is the best light which illumines all. So, Indra is the light par-excellence.

---

अथ प्रथमेऽनुवाके सप्तमं इन्द्रवद्वायुसूक्तम् ।

इन्द्रवान् वायुः ।

अनुवाकः १ । सूक्तम् ७ । ऋचः १–५ ।

यो दिक्षु दशसु पञ्च, दैवरातो वैश्वामित्रः, इन्द्रवान् वायुः, जगती ।

**Now the Indra-Vayu Sukta, Seventh in the first Anuvaka.**

**Section I—Hymn 7—Riks 1-5—INDRAVAT-VĀYU**

This hymn beginning with "Yo dikshu daśasu" contains five Ṛks: Daivarāta Vaiśvamitra is the Ṛshi: the god is Indravat-Vāyu and the metre is Jagatī

अथ प्रथमा ऋक् ।

यो दिक्षु दशसु प्रीतो वियत्सु
पर्वते सहस्वानमृतोऽन्तरिक्षे ॥
स सप्राणः स आत्मन्वी चर्ततेऽन्त-
र्वायुः सहसेन्द्रवान् स मध्यमः ॥ १ ॥

पदपाठः— यः । दिक्षु । दशऽसु । प्रीति । इतः । वियत्ऽसु ।
पर्वते । सहस्वान् । अमृतः । अन्तरिक्षे ॥
सः । सऽप्राणः । सः । आत्मन्वी । चर्तते । अन्तरिति ।
वायुः । सहसा । इन्द्रऽवान् । सः । मध्यमः ॥

Indra-Vāyu pervades all the ten directions and moves about in the skies and is the most powerful one and is immortal. He is full of vitality and is independent. He inspires the inner life. He is the Lord of mid-air.

## अन्वयभाष्यम् ।

यः खलु दशसु दिक्षु दिगात्मकेषु वियत्सु आकाशेषु प्रत्यृतः प्रतिगतः तन्मर्यादया व्याप्तः सन् अमृतः देवतात्मा, "सैषा अनस्तमिता देवता यद्वायुः" इति च ब्राह्मणम्, सहस्वान् बलवान् अन्तरिक्षे स्वस्थाने पवते प्रवाति, सः सप्राणः विश्वप्राणशक्तिकः सन् सर्वेषां प्राणेन मुख्येन समन्वितः तथा सः — आत्मन्वी चेतनः आत्मवान् सर्वेषामन्तः शरीरे चेतते, येन सचेतनमिदं शरीरं भवति, सः मध्यमः मध्यमलोकाधिपतिः सहसा बलेन इन्द्रवान् इन्द्रेण युक्तः वायुः इन्द्रसखा इति वेदेषु प्रसिद्धः, "इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा । मन्दू समानवर्चसा" (ऋ. मं. १-६-७) इति तदनुश्रवणम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Indra-Vāyu pervades the skies in all the ten directions (the eight cardinal points and the above and the below). He is an immortal God as per Bṛhadāraṇyaka—"Vāyu is God who knows no destruction." ( Bṛ. Up.-1–5–22 ). He is strong. He blows in his own domain—the mid-air. He is Sa-prāṇa, as he is endowed with universal Prāṇa, which means that he is always with the Chief Prāṇa of all. He is Ātmanvī; he is with the soul or is independent of all. He makes the body a living one. He is a madhyama—the lord of mid-air. He is mighty and is in the company of Indra. He is reputed as a friend of Indra: "You are always found with Indra." ( Ṛg. I-6-7 ).

## द्वितीया ऋक् ।

यः सखा सन्निन्द्रस्य प्रति चेतते<br>
यो वा वशी चरतीह यथा कामम् ॥<br>
यो बहिर्धा प्राणो जगतां ज्यायान्<br>
वायुः सहसेन्द्रवान्त्स मध्यमः ॥ २ ॥

पदपाठः— यः । सखा । सन् । इन्द्रस्य । प्रति । चेतते ।<br>
यः । वा । वशी । चरति । इह । यथाऽकामम् ॥<br>
यः । बहिःऽधा । आत्मा । जगतां । ज्यायान् ।<br>
वायुः । सहसा । इन्द्रऽवान् । सः । मध्यमः ॥

Vāyu is the friend of Indra. He is his equal in activity. He is independent; he moves about as he likes. Externally, he is Prāṇa of the universe. He is senior. Vāyu is stronger with Indra. He is the dweller of the mid-air.

## अन्वयभाष्यम् ।

यः पुनः इन्द्रस्य तस्य सखा सन् मित्रभूतः प्रति तत्प्रतिसमानेन चेतसा चेतनेन मनसा सचेतनेन बलेन च वशी स्वतन्त्रः सन् इह अस्मिन् समग्रे प्रपञ्चे यथाकामं स्वातन्त्र्येण तथा अप्रतिहतगत्या च चरति सर्वत्र सञ्चरति व्याप्नोति, "आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः। घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम" इति (ऋ॰ मं. १०-१६८-४) मन्त्रवर्णं तदनुश्रवणं—यथा उपवर्णितम्, यश्च सर्वेषां जगतां बहिर्धा बाह्यः प्राणः ज्यायान् ज्येष्ठः, सः मध्यमलोकाधिष्ठाता वायुः सहसा इन्द्रवान् इन्द्रसहितः बलेन इन्द्रसमानो भवति, तद्योगादेव, तथा च उपवर्णितं मन्त्रवर्णं तयोः समानरूपत्वम्, "मन्दू समानवर्चसा" इति (ऋ. मं. १-६-७) ॥

### COMMENTARY—SUMMARY TRANSLATION

Again he is a friend of Indra. By activity, mind and strength, he is his equal. He is independent. So, with independence, without any hindrance, he moves everywhere: Cf. "This God moves about as he likes" (Ṛg. X-168-4). He is further the exterior Prāṇa ( as which he pervades everywhere ). He is the oldest. He dwells in the mid-air. By strength he is equal to Indra. Cf. "These two are always happy and are equal in splendour" (Ṛg. I-6-7). They are similar in form also.

## तृतीया ऋक् ।

यो बहिर्धा चरन् वायुरन्तरिक्षे
विद्युता यो निर्वहति क्रतुं विश्वम् ॥
योऽन्तर्धा प्राणः प्राणभृतां ज्यायान्
वायुः सहसेन्द्रवान् स मध्यमः ॥ ३ ॥

पदपाठः— यः । बहिःऽधा । चरन् । वायुः । अन्तरिक्षे ।
विऽद्युता । यः । निःऽवहति । क्रतुं । विश्वम् ॥
यः । अन्तःऽधा । प्राणः । प्राणऽभृतां । ज्यायान् ।
वायुः । सहसा । इन्द्रऽवान् । सः । मध्यमः ॥

Vāyu moves externally, in the mid-air. With lightning, he performs every work in the universe. He is the internal Prāṇa of living beings. He is senior and great along with Indra and dwells in mid-air.

## अन्वयभाष्यम् ।

यः अस्मिन् जगति बहिर्धा बाह्ये अन्तरिक्षे चरन् पवमानः वायुः, यश्च विद्युता ऐन्द्र-वैद्युत-तेजःशक्त्या विश्वं क्रतुं सर्वं कार्यं क्रियासत्त्वं निर्वहति सञ्चालयति, यश्च पुनः अन्तर्धा आन्तर्ये शरीरे सर्वेषां प्राणभृतां ज्येष्ठः प्राणः, सः मध्यमलोकं अधिष्ठितः वायुः सहसा बलेन इन्द्रवान् इन्द्रसहितो भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

In this world, the externally moving air is Vâyu. He does everything with the aid of the lightning of Indra. Again, he is the Chief Prāṇa of all those endowed with Prāṇa. He is located in the mid-air with strengh and he is in company with Indra.

## चतुर्थी ऋक् ।

यो बहिर्धा वहन् त्स्वरत्यन्तरिक्षे
ध्वनयन् परां व्योमनि प्रति वाचम् ॥
योऽन्तर्धाऽनु विदं वदतीह वाचा
वायुः सहसेन्द्रवान् त्स मध्यमः ॥ ४ ॥

पदपाठः— यः । बहिःऽधा । वहन् । स्वरति । अन्तरिक्षे ।
ध्वनयन् । पराम् । विऽओमनि । प्रति । वाचम् ॥
यः । अन्तःऽधा । विदम् । वदति । इह । वाचा ।
वायुः । सहसा । इन्द्रऽवान् । सः । मध्यमः ॥

He makes a mighty sound while moving externally in the mid-air. In the sky, there is echo of the sound excellent. He expresses the inner knowledge in words. He is Vâyu in the company of Indra. He dwells in mid-air.

## अन्वयभाष्यम् ।

यः बहिर्धा बहिर्भूते बाह्ये अन्तरिक्षे वहन् पवमानः सन् स्वरति शब्दायते योऽयं स्वरः अनुश्रूयते सर्वैः, यश्च वियति आकाशे परां अखण्डां सूक्ष्मां वाचं ध्वनयन् प्रतिध्वनिरूपेण नदयन् प्रतितिष्ठति । यः अन्तर्धा सर्वेषां अन्तःशरीरेऽपि पुनः मूर्धनि अनाहतनादरूपेण ध्वनयन्, तथा ततश्च तत्प्रतिध्वनिरूपेण मूलाधारात् तां परां वाचं प्रेरयन्, तयैव वाचा स्वीयां अन्तरात्मनः संविदं अनुवदति प्राणमुखेन इन्द्रेण अग्निना च, सः मध्यमः

अन्तरिक्षस्थो वायुः हृदिस्थः प्राणः सहसा बलेन इन्द्रवान् भवति, प्राणस्य च वायोः बलकर्मणा सोऽयं वायुः इन्द्रवान् इति गम्यते, यद् यद् वै बलकर्म इन्द्रस्यैव तद् भवितुमर्हतीति ॥

COMMENTARY—SUMMARY TRANSLATION

He makes sound when he moves externally in the mid-air. He echoes the whole sound in the sky. He lives in the body and in the head of everybody as Anāhata—the uncaused sound and its reflection in the Mūlādhāra. He inspires the Word, which expresses itself through Prāṇa, helped by Indra and Agni. He ( who does all this ) is Vāyu of the mid-air, who is in the heart ( of everybody ) as Prāṇa. He is strong and is always in the company of Indra. Prāṇa and Vāyu are names for strength. So, Indravān-Vāyu means work done with the help of Indra.

## पञ्चमी ऋक् ।

योन दृशेऽरमदर्शतो येनेदं
दर्शतं बभौ यो दर्शतोऽभूत् प्रति ।
वायुः सहसेन्द्रवान् स मध्यमः
स उत्तमं ज्योतिर्विश्वस्य दर्शयत् ॥ ५ ॥

पदपाठः— यः । न । दृशे । अरं । अदर्शतः । येन । इदं ।
दर्शतं । बभौ । यः । दर्शतः । अभूत् । प्रति ॥
वायुः । सहसा । इन्द्रऽवान् । सः । मध्यमः ।
सः । उत्ऽतमं । ज्योतिः । विश्वस्य । दर्शयत् ॥

He is not within sight and so is invisible. By him everything is seen. But he becomes visible through living beings. He is Vāyu with all might in the company of Indra. He dwells in mid-air. He is the best light which illumines the whole universe.

## अन्वयभाष्यम् ।

यः खलु दृशे द्रष्टुं न अरं न अलं न भवति, न शक्यः इति यावत्, अत एव सः अदर्शतः अदर्शनीयः रूपरहितत्वात्, "ध्राजिरेकस्य ददृशे न रूपम्" ( ऋ. मं. १-१६४-४४ ) "घोषा इदस्य शृण्विरे न रूपम्" (ऋ. मं. १०-१६८-४३) इति च तन्मन्त्रवर्णयोः वायोः तस्य नीरूपत्वोपवर्णनात्, तत्र "गतिरेकस्य दृश्यते न रूपम् मध्यमस्य" इति (नि. १२-२७-१) यास्कनिरुक्तवचनाच्च, येन च वायुना इदं अचेतनं विश्वं जगत् तथा इदं

शरीरं च दर्शतं दर्शनीयं भवत् सचेतनं बभौ सुशोभितं दर्शनार्हं बभूव, " वायुना वै गौतम तत्सूत्रेण सर्वाणि भूतानि संसृब्धानि भवन्ति " (बृ. उ. ३-८-९) इति च औपनिषदं ब्राह्मण वचनमपि एतदेव उपबृंहयति, अतः एव सः वायुः इन्द्रेण चेतनात्मना संहितः सन् तच्चेतना-सत्त्वद्वारा दर्शनीयः संवृत्तः, अन्यथा तं वायुं विना अस्य शरीरादेः अदर्शनापत्तिदर्शनाच्चेति, "यावदस्मिञ्छरीरे वायुस्तावदायुः" इति ब्राह्मणानुवचनम्, " वायवायाहि दर्शत " इति (ऋ. मं. १-२-१) मन्त्रवर्णे तदुपवर्णनम् ॥ अत्र च यास्कनिरुक्तम्—

"वायवायाहि दर्शत-दर्शनीय" इति (नि. १०-२-१), स च वायुः परमपुरुषस्य इन्द्रात्मनः चैतन्यप्राणसत्वरूपः एवेति श्रूयते, "प्राणाद् वायुरजायत" इति (ऋ. मं. १०-९०-१३) मन्त्रवर्णे तदुपवर्णनम्, सः मध्यमलोकाधिपतिः वायुः सहसा बलेन बलकर्मणा च इन्द्रवान् भवति । तथा च यजुः, "इन्द्रो मे बले श्रितः" इति (तै. यजुः), अत एव सः वायुः उत्तमं श्रेष्ठतमं विश्वस्य दर्शयत् सर्वावभासकं ज्योतिः, तत्परञ्ज्योतिःस्वरूप एव सः इन्द्रवान् वायुः इति ॥

॥ इति प्रथमेऽनुवाके सप्तमं इंद्रवद्वायुसूक्तं संपूर्णम् ॥

## COMMENTARY—SUMMARY TRANSLATION

It is certainly not possible to see him. So he is invisible because he has no form. Cf. " One can observe his going, but not his form. " ( Ṛg. I-164-44 ) and " One can hear him sound but not see his form." ( Ṛg. X-168-43 ). Again, Yāska in his Nirukta ( 12-27-1 ) says:— "The Madhyama has no form. This whole universe and this body were inactive without him and he made them active and beautiful. Cf. The Bṛhadāraṇyaka Upanishad elaborates the same........, " Gautama, Vāyu is the thread, and by him are all creatures held together." ( Bṛ. Up. III-8-9 ).

Therefore, Vāyu, though formless, becomes visible when he combines with Indra who is all activity; he is made visible by being active. Without Vāyu, this body etc. goes out of existence. Cf. " Life continues in the body only so long as the Vāyu is in it," says the Bṛhadāraṇyaka Upanishad. It is further explained in the mantra: " Oh Vāyu, be visible " ( Ṛg. I-2-1 ). ' Darśata is Darśaniya ' is what Yāska ( 10-2-1 ) says. That Vāyu is the activity of Indra, the Purusha par excellence, as denoted by mantra, " Vāyu was born of His Prāṇa." ( Ṛg. X-90-13 ). Vāyu is the lord of mid-air. He becomes associated with Indra, when he exhibits his might. Cf. " Indra lives in my might "— ( Taitti. Yaju. ). So Vāyu is the best light which illumines the whole universe. He is the light par excellence which lightens up all and everything. He is Vāyu, in association with Indra.

## अथ प्रथमेऽनुवाके अष्टमं मरुत्पितृरुद्रसूक्तम् ।

## मरुत्पिता रुद्रः ।

अनुवाकः १ । सूक्तम् ८ । ऋचः १-५ ।

यो रुद्रस्य सूनुः पञ्च, दैवरातो वैश्वामित्रः, मरुत्पिता रुद्रः, जगती ।

**Now the Marut-pitri-rudra Sukta, 8th in the first Anuvaka**

**Section I—Hymn 8—Riks 1-5**—RUDRA, THE FATHER OF MARUTS

This Hymn beginning with "Yo Rudrasya" contains five Ṛks: Daivarāta Vaiśvāmitra is the Ṛshi: the god is Rudra the father of Maruts; the metre is Jagatī.

### अथ प्रथमा ऋक् ।

यो रुद्रस्य सूनुर्मरुदन्तरिक्षे
प्रति चेतयते विश्वं पवमानः ॥
विश्वेष्वेव भूतेषु चेततेऽन्त-
र्मरुतां स पिता रुद्रो मध्यमः ॥ १ ॥

पदपाठः— यः । रुद्रस्य । सूनुः । मरुत् । अन्तरिक्षे ।
प्रति । चेतयते । विश्वं । पवमानः ॥
विश्वेषु । एव । भूतेषु । चेतते । अन्तरिति ।
मरुतां । सः । पिता । रुद्रः । मध्यमः ॥

Rudra's son Marut, moving in mid-air, animates the universe. He is the animator of all from within and of everything also. He is the father of Maruts. Rudra dwells in mid-air.

### अन्वयभाष्यम् ।

मध्यमे लोके अन्तरिक्षे निजे भुवने यत्र इन्द्रः वायुश्च सङ्गतौ सन्तौ सहैव सम्राजेते, तस्मिन्नेव मध्यमे स्थाने रोदस्योः सन्धौ रुद्रस्य भगवतः सूनुः पुत्रः मरुत् पवमानः सन् प्रवहन् विश्वं जगदिदं अचेतनं भूतं प्रति चेतयते प्रचेतयति, य एव खलु विश्वेषु भूतेषु अन्तः स्वेन प्रचेतनेन रूपेण चेतते स्फुरति, सः परोक्षसिद्धः सर्वान्तर्यामी मरुतां पिता जनयिता प्रतिपालयिता च सन् विश्वप्राणचितिशक्तिपूर्णः मध्यमलोकाध्यक्षः प्रभवति ॥ तथा च " आ ते पितर्मरुतां सुम्नमेतु "-इति ( ऋ. मं. २-३३-१ ) मन्त्रवर्णे रुद्रस्य मरुत्पितृत्वं अनुश्रूयते, व्यापकस्यापि वायोः — अर्थात् मरुतां तेषां जनकत्वं तु रुद्रस्य वैद्युतज्योतिःशक्तियोगात्

सङ्गच्छते, सर्वजगदधिपतेरपि भगवतः रुद्रस्य मध्यमलोकाधिपतित्वं च तस्य वैद्युतज्योतिः सत्त्वप्राधान्यादेव सिद्धम् इन्द्रस्येव सर्वेशितृत्वमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

Indra and Vāyu together rule mid-air. In that middle region where the Earth and Heaven meet, the son of Bhagavān Rudra, Marut ( Vāyu ) blows and animates this inanimate world. It is he that animates all beings dwelling therein with his animating capacity. He is an all-pervader and father of Maruts, as he begets and protects them. He is Rudra, the lord of mid-air and in him the universal life-force has its home.

The fact of Rudra being the father of Maruts is stated in a Ṛk: Cf. " Oh ! You, the father of Maruts, may your happiness shower on us." ( Ṛg. II-33-1 ). Rudra, in virtue of his being the light of lightning, is the father of Vāyu, or Maruts, the all-pervader. Rudra, though Lord of all and everything, is described as the Lord of mid-air on account of his light which is his strong point as in the case of Indra.

## द्वितीया ऋक् ।

यो विद्युताऽन्तरिक्षे समूळ्हो३ऽन्त
य एक एव सन् दशधाऽऽततान ॥
प्रभ्राजते यो दशसु दिक्ष्व१न्त-
र्मरुतां स पिता रुद्रो मध्यमः ॥ २ ॥

पदपाठः— यः । विऽद्युता । अन्तरिक्षे । समऽऊळ्हः । अन्तरिति ।
यः । एकः । एव । सन् । दशऽधा । आऽततान ॥
प्र । भ्राजते । यः । दशऽसु । दिक्षु । अन्तरिति ।
मरुतां । सः । पिता । रुद्रः । मध्यमः ॥

He is secretly hidden in mid-air as lightning; though only one within, he shines ten-fold in all the ten directions; and he dwells in Maruts as their father. He is Rudra who dwells in mid-air.

## अन्वयभाष्यम् ।

यः खलु विद्युता वैद्युतेन ज्योतिषा अन्तरिक्षे परमे व्योमनि सर्वेषां जगतां भुवनानां च नाभिस्थाने अन्तः सन्धिपदे समूळ्हः सम्यक्तरां निगूढः, यस्तु स्वयं एक एव सन्

दशधा दशविधेन विभूतियोगेन आ समन्तात् सर्वतः ततान स्वं ज्योतिः विस्तारयामास । यश्च पुनः दशसु दिक्षु चतस्रो दिशः, चतस्रः प्रदिशः, ऊर्ध्वा चाधरा मध्यं च इति प्रसिद्धासु अन्तः प्रभ्राजते, मध्ये विद्युद्रूपेण प्रतिष्ठितः सन् सूक्ष्मरूपेण अव्यक्तात्मना पूर्णः स्वयं राजते, सः मरुतां पिता रुद्रः मध्यमः मध्यमभुवनाध्यक्षः, अत एव सः एकादशात्मेति श्रूयते, "ये देवासो दिव्येकादश स्थ" इति ( ऋ. मं. १-१३९-११ ) स च रुद्रः विभूतियोगेन त्रेधा विततेन तत्त्वेन भौवनेन त्रिषु भुवनेषु एकादशात्मकः सिद्धः इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is hidden in mid-air, the best part of the sky, the mid-most point of the universe, as lightning. He is one only, but becomes ten-fold by his power and pervades the whole universe, shines and fills the ten directions. The eight directions, the above, the below and the middle also, are filled by him though he is invisible. He is the father of Maruts. He is the Lord of mid-air. Therefore he is known as 'Eleven-Souled' (Ekādaśātmā). Cf. "Which ye Gods are eleven in the Sky." ( Ṛg. I-139-11 ). That Rudra exists in eleven forms in all three worlds by his power and he is known as such (Ekādaśātmā).

## तृतीया ऋक् ।

यो अन्तर्धीभिरमृतश्चितो मर्त्यानां
यः पशूनां पतिरात्मा चाऽमृतानाम् ॥
यः प्राणैर्दशभिश्चेतते स्वप्रसूतै-
र्मरुतां स पिता रुद्रो मध्यमः ॥ ३ ॥

पदपाठः— यः । अन्तरिति । धीभिः । अमृतः । चितः । मर्त्यानां ।
यः । पशूनां । पतिः । आत्मा । च । अमृतानाम् ॥
यः । प्राणैः । दशऽभिः । चेतते । स्वप्रऽसूतैः ।
मरुतां । सः । पिता । रुद्रः । मध्यमः ॥

He who is recognised by seers and knowers as immortal and as Ātmā, as the master of man, beasts and gods, and who animates all and everything with his ten prāṇas, he lives in Maruts as their father. He is Rudra who dwells in mid-air.

## अन्वयभाष्यम् ।

यः सर्वेषां मर्त्यानां मरणशीलानां सचेतनानां मानवानां अचेतनानां भूतजातानां, तथा अमृतानां अमरणधर्मणां चेतनात्मनां देवानां, तथा पशूनां प्राणभृतां सर्वेषामपि

जन्तूनां ब्रह्मादिस्थावरान्तानां अन्त: चित: चैतन्यस्वरुपेण सङ्गृहीत: प्रतिष्ठित: इति यावत्, स: परोक्षसत्त्वसिद्ध: सर्वेषां पति: अध्यक्ष:, अमृत: क्षय–विकार–मरणादिविरहित: आत्मा अन्तर्यामीति यावत् । यश्च स्वप्रसूतै: स्वेन चेतनेन आत्मना प्रेरितै: दशभि: प्राणै: ज्ञानेन्द्रिय – कर्मेन्द्रियरूपै: चेतते स्वप्राण – शक्तियुक्तै: चैतन्यज्योति:किरणै: अन्तर्बहिश्च सर्वत्रापि सञ्चेष्टते, स: मरुतां पिता मध्यमलोकाधिपति: रुद्र: विश्वेषामपि प्रभवति ईशानसत्त्वेन इति ॥

COMMENTARY—SUMMARY TRANSLATION

He is recognised as being within all and everybody—the mortals, immortals and other creatures, as an animator. He is the master of all. He is deathless and he is Ātmā, the indweller. He quickens all and everything everywhere with the ten prāṇas, the five inner Jñānendriyas and the five outer senses, Karmendriyas. The ten Prāṇas are inspired by his own life-force and are rays of his own animating light. He is the force which works everywhere in and out. He is the father of Maruts. He is Rudra, the lord of mid-air.

## चतुर्थी ऋक् ।

यो विद्युता ज्योतिरात्माऽऽततान
योऽन्तर्धा दशधा प्रति प्राणैः समैः ॥
रुद्राणीभिः सह देवताभिः सधीभि-
र्मरुतां स पिता रुद्रो मध्यमः ॥ ४ ॥

पदपाठः- यः । विऽद्युता । ज्योतिःऽआत्मा । आऽततान ।
यः । अन्तःऽधा । दशऽधा । प्रति । प्राणैः । समैः ॥
रुद्राणीभिः । सह । देवताभिः । सऽधीभिः ।
मरुतां । सः । पिता । रुद्रः । मध्यमः ॥

He is Ātmā, the inner light who pervades in the form of lightning. He shines within as tenfold prāṇas which are equal to one another. They are his own forces—Rudrāṇis—who are accompanied by deites and by the power of intellects. He is the father of Maruts. Rudra is the dweller in mid-air.

## अन्वयभाष्यम् ।

य: विद्युता स्वशक्त्या मध्यमया स्वयं ज्योतिरात्मैव सन् सर्वत्रापि प्रति अतते व्याप्नोति, यश्च अन्तर्धा सर्वान्तरेऽपि दशधा दशविधेन विततै: समै: समानरूपै: सर्वै: प्राणै: रुद्राणीभि:

आत्मशक्तिभिः देवतात्मभिः सधीभिः बुद्धिशक्तिसहिताभिः सह सम्भ्राजमानः सः मरुतां पिता रुद्रः मध्यमलोकाधिपतिः विश्वस्यैव प्रभवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

He is Ātmā, the inner light which pervades everywhere. Within all and everybody, his own forces, Rudrāṇis, are manifested as ten prāṇas equal to one another, accompanied by gods and the projection of the intellect, with which he shines. He is father of Maruts, Rudra the lord of mid-air.

## पञ्चमी ऋक् ।

यः प्राणेषु चेतयिता चेततेऽन्त-
र्दिक्षु दशसु प्रति रौति चित्तिभिः ॥
मरुतां स पिता रुद्रो मध्यम-
स्तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ५ ॥

पदपाठः— यः । प्राणेषु । चेतयिता । चेतते । अन्तरिति ।
दिक्षु । दशऽसु । प्रति । रौति । चित्तिऽभिः ॥
मरुताम् । सः । पिता । रुद्रः । मध्यमः ।
तत् । परमं । ज्योतिः । विश्वस्य । दर्शयत् ॥

He who, as an inspirer, inspires the Prāṇas within, and roars in all the ten directions with powers of his knowledge, is the father of Maruts, Rudra, the dweller in mid-air. He is the light which lights up all and everything in the universe.

## अन्वयभाष्यम् ।

यः सर्वेषां अन्तः विद्यमानेषु दशसु प्राणेषु चेतयिता प्रेरयिता सन् स्वयं चेतते चेतनात्मरूपेण सञ्चेष्टते, तथा बहिरपि दशसु दिक्षु सन्तताभिः चित्तिभिः चेतनाशक्तिभिः रौति प्रतिध्वनिरूपेण शब्दायते, स्थूल-सूक्ष्म-स्वरनादादिना नदतीति यावत्, तदेव रुद्रस्य प्रधानं परं रुद्रत्वलक्षणमिति भावः, सः परोक्षसिद्धः मध्यमलोकाधिपतिः विश्वाध्यक्षः, तदेव विश्वस्यापि जगतः दर्शयत् सर्वावभासकं परमं ज्योतिरेव भवितुमर्हति तत्परञ्ज्योतिःस्वरूप एव भगवान् रुद्रः इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He, as a quickener, quickens the Prāṇas internally, which are in all and everybody. Like-wise, externally, in all the ten directions he roars with powers of his knowledge and echoes back finely and grossly in the form of voice, sound etc. That is the characteristic of Rudra as Rudra. He is there always as an invisible force. He is, though a lord of mid-air, the lord of all and everything. That is the light which illumines all and everything. It is the excellent light which is the light par excellence, the Bhagavān Rudra.

अत्रायं विशेषः—

तस्य एकादशात्मनः रुद्रस्य भगवतः तत् परमं तात्त्विकं स्वरूपं अन्यत्र विशिष्टं अनुश्रूयते, तथा हि "प्रभ्राजमानानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि" (तै. आ.) "प्रभ्राजमानीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि" (तै. आ.) इत्यादिकमारभ्य पूर्वाद्यासु अष्टसु दिक्षु तथा ऊर्ध्वा-अधरा-मध्यमासु च इत्येवं एकादशसु दिक्षु प्रतिष्ठितानां "रुद्राणां एकादशानां रुद्राणीनां च तच्छक्तिरूपाणां पृथक् पृथक् तत्तद्विशिष्टस्वरूपतत्त्वबोधिकाभिः विशिष्टसञ्ज्ञाभिः तदेकादशात्मकं ज्योतिःस्वरूपतत्त्वं समर्थितं अनुश्रूयते ॥

ताश्च सञ्ज्ञाः एताः प्रसिद्धाः (१) प्रभ्राजमानाः, (२) व्यवदाताः, (३) वासुकिवैद्युताः, (४) रजताः, (५) श्यामाः, (६) कपिलाः, (७) लोहिताः, (८) अतिलोहिताः, (९) ऊर्ध्वाः, (१०) अवपतन्तः, (११) वैद्युताः इति च, एताः सञ्ज्ञाः तच्छक्तीनां रुद्राणीनामपि समाना एव भवन्ति ॥

तथा त्रिषु भुवनेषु तेषां एकादशानां रुद्राणां प्रतिष्ठानात् एकस्यैव तस्य रुद्रस्य त्रयस्त्रिंशद्देवतात्मकत्वं प्रतिज्ञायते, तथा च प्रसिद्धः ऋङ्मन्त्रवर्णः —" ये देवासो दिव्येकादश स्थ पृथिव्या मध्येकादश स्थ ॥ अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥" इति (ऋ. मं. १-१३९-११) ॥ तद्वदेव रुद्रस्य तस्य सर्वान्तःसंस्थितिरपि उपस्तूयते, "अन्तरिच्छन्ति तं जने रुद्रं परोमनीषया । गृभ्णन्ति जिह्वया ससम्" इति (ऋ.. मं. ८-७२-३) ॥

तस्य रुद्रस्य सर्वान्तर्यस्य अन्तर्यामिस्वरूपस्य प्राणात्मता उपदिश्यते, तथा एकादशात्मता च ॥ "दशेमे पुरुषे प्राणाः, आत्मैकादशः" इति (तै. यजुः) ॥

एवमेव रुद्रपुत्रस्य मरुद्रूपस्य वायोरपि अन्तरिक्षाधिपतित्वमनुश्रूयते, "वायुर्वा अन्तरिक्षस्याध्यक्षः" इति (तै. ब्रा.) ॥ तथा तस्य अन्तरिक्षगृहपतित्वमपि, "वायुर्वै गृहपतिः सोऽन्तरिक्षलोकस्य गृहपतिः" इति (ऐ. ब्रा.) ॥

एवमेतस्मिन् अर्थे वायोः वस्तुतत्त्वे ऋङ्मन्त्रवर्णः "आत्मा देवानां भुवनस्य गर्भो यथा वशं चरति देव एषः ॥ घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम"

इति (ऋ.मं. १०–१६८–४)॥ अत एव वायोः प्रत्यक्षब्रह्मरूपत्वं औपनिषदेन तत्त्वेन उपदिश्यते॥ "नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्" इति (तै. शी. उ. १)॥

॥ इति प्रथमेऽनुवाके अष्टमं रुद्रसूक्तम् ॥

॥ इति त्रिदैवत्यः प्रथमोऽनुवाकः सम्पूर्णः ॥

Here is something of special importance regarding Rudra.

The essential form of the Rudra deity is specially described in Taittirīya Āraṇyaka as "the refulgent Rudra as shining by his own light." He is pervading the eight quarters as well as the regions above, below and in the middle. He is accompanied by eleven Rudrāṇīs or consorts in the form of powers. The following names are well-known :—( 1 ) The Refulgent; (2) The All-spreading; ( 3 ) The Lightning of Indra; ( 4 ) The Silvery One; ( 5 ) The Darkish One; ( 6 ) The Jet Black One; (7) The Red One; ( 8 ) The Ruddiest One; ( 9 ) The Upward-going One; ( 10 ) The Descending One; and ( 11 ) The Lightning-like One. The names of accompanying Rudrāṇīs are corresponding to these ones.

Since these eleven Rudras pervade the three worlds, they are thirty-three in all. But they are forms of one Rudra only. "The gods performed Yajña with the eleven Rudras each on the earth, in the heavens, and in the mid-air—thus thirty-three Rudras in all" ( Ṛg. I–139–11 ). Similarly, the Rudra who is in the innermost recesses of things is praised in the Ṛgveda ( Ṛg. VIII–72–3 ).

The Rudra who is in the heart of everything is described in Taittirīya as being the eleventh, that is the Soul in each person, while the ten others are the ten vital airs which keep man living.

Similarly, Vāyu in the form of Marut who is the son of Rudra is described in Taittirīya as the presiding deity of the mid-air. He is called in Aitareya Brāhmaṇa, as Gṛhapati, the Lord of the Household. Ṛgveda ( Ṛg. X–168–4 ) praises the Vāyu as the soul of the gods and the sacrificer offers oblations to him. In the Taittirīya Upanishad, Vāyu is described as Pratyaksha Brahma, i.e., as Brahma himself or Brahma incarnation.

Thus ends the eighth hymn in the First Section.

Thus ends the First Section dedicated to three deities.

अथ द्वितीयः सारस्वतोऽनुवाकः ।

अनुवाकः २ । सूक्तम् १ । ऋचः १-१२ । वाक् ।

प्रथमं वाक्सूक्तम् ।

वाचं देवीं द्वादश, दैवरातो वैश्वामित्रः, वाक् , अनुष्टुप् ।

THE ṚSHI IS DAIVARĀTA

**Now this the Second Section ( Anuvaka ) concerns Sarasvati**
**Section II : Hymn 1 : Riks 1–12—VĀK**
**I Hymn is on *Vāk*.**

This Hymn beginning with 'vācham devīm' contains twelve Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Vāk is the goddess, Anushṭup is the metre.

अथ प्रथमा ऋक् ।

वाचं देवीमृतवतीमनु ब्रवीमि मनसा
या देवी ब्रह्मणस्पतेरेकपदी या बृहती ॥ १ ॥

पदपाठः— वाचं । देवीं । ऋतऽवतीं । अनु । ब्रवीमि । मनसा ।
या । देवी । ब्रह्मणः । पतेः । एकऽपदी । या । बृहती ॥

The goddess Vāk is truthful and I speak of her with all my mind. She is the one indivisible, unmanifested and infinite power of Brahmaṇaspati.

अन्वयभाष्यम् ।

या देवी ब्रह्मणस्पतेः कार्यकारणसम्बन्धात्, या एकपदी नानात्वहीना, बृहती अखण्डा अव्यक्तमानसशब्दरूपत्वात्, तां मनसा कर्त्रा आविष्कृतां इति अध्याह्रियते तृतीया-सामर्थ्यात्, अत एव ऋतवतीं वाचं देवीं अनु ब्रवीमि, न मनसि एकं वचसि एकं ममेति ॥

COMMENTARY—SUMMARY TRANSLATION

The goddess or power of Brahmaṇaspati is related to him as cause ( Brahmaṇaspati ) and effect ( Vāk ). She has no plurality and therefore Ekapadī ( of one single form ). She is Bṛhatī, is infinite ; as Vāk or manifested word, she can be heard only by the mind. Here *manasā* means by mental power. This means that speech when manifested by mental power is perceived as the word. I express in words what is mentally truthful. The gist is that there is perfect coordination **between mind and speech.**

## द्वितीया ऋक् ।

छन्दोभिस्ते सरस्वत्यास्त्रीणि पदान्याहितानि ॥
गायत्रं पदं प्रथमे छन्दसि प्रातः सवने ॥ २ ॥

पदपाठः – छन्दःऽभिः । ते । सरस्वत्याः । त्रीणि । पदानि । आऽहितानि ॥
गायत्रं । पदं । प्रथमे । छन्दसि । प्रातःऽसवने ॥

Sarasvatī, when she appears in some Vedic poetry, has three forms and the Gāyatrī metre is used at morning sacrifices.

## अन्वयभाष्यम् ।

ते सरस्वत्याः छन्दोमय्याः छन्दोभिः गायत्री-त्रिष्टुब्-जगतीभिः पदानि त्रीणि आहितानि, तान्यन्वाह प्रातःसवने यज्ञीये कर्मणि प्रथमे छन्दसि च गायत्रं नाम पदमिति ॥

COMMENTARY—SUMMARY TRANSLATION

Sarasvatī, the Goddess of Speech, is metrical in form. Gāyatrī, Trishṭup and Jagatī metres are her three feet. The metre Gāyatrī, her first foot is used at the time of the morning sacrifice.

## तृतीया ऋक् ।

त्रैष्टुभं तद् द्वितीये माध्यन्दिने यत् सवने ।
जागतं पदं तृतीये सवने पुनश्छन्दसि ॥ ३ ॥

पदपाठः – त्रैष्टुभं । तद् । द्वितीये । माध्यन्दिने । यत् । सवने ।
जागतं । पदं । तृतीये । सवने । पुनरिति । छन्दसि ॥

The ( second foot ) Trishṭup metre is used at the mid-day sacrifice, and Jagatī is the third foot or metre used at the time of the evening sacrifice.

## अन्वयभाष्यम् ।

माध्यन्दिने सवने छन्दसि च द्वितीये यत् पदं तद् वै त्रैष्टुभं नाम, तृतीये सवने छन्दसि च पुनः यत् पदं तत् जागतं नामेति ॥

COMMENTARY—SUMMARY TRANSLATION

During the mid-day sacrifice the Trishṭup metre ( foot ) is used, and at the evening sacrifice the metre Jagatī is used.

## चतुर्थी ऋक् ।

पदं पृथिव्यामाग्नेयमैन्द्रं पदमन्तरिक्षे ।
पदं दिवि त आदित्यमृग्भिर्यजुर्भिः सामभिः ॥ ४ ॥

पदपाठ :– पदम् । पृथिव्याम् । आग्नेयम् । ऐन्द्रम् । पदम् । अन्तरिक्षे ।
पदम् । दिवि । ते । आदित्यम् । ऋक्ऽभिः । यजुःऽभिः । सामऽभिः ॥

Your foot on earth is in the form of Agni; in mid-air in the form of Indra; and in the sky in the form of Āditya. These are represented by Ṛgveda, Yajurveda and Sāmaveda.

## अन्वयभाष्यम् ।

पृथिव्यां आग्नेयं पदं ऋग्भिः सम्पद्यते इति शेषः । अन्तरिक्षे यजुर्भिः ऐन्द्रं पदं, दिवि आदित्यं पदं सामभिः ते भवन्तीति ॥

### COMMENTARY—SUMMARY TRANSLATION

On the earth, your foot is Agni as represented by Ṛgveda. In mid-air, your foot is Indra, as represented by Yajurveda. In the sky, your foot is Āditya as represented by Sāmaveda.

## पञ्चमी ऋक् ।

वक्तुः समात्मनो वाचः प्रवहन्त्यास्ते पराच्याः ।
चत्वारि मनसा साकं पदानि तानि हितानि ॥ ५ ॥

पदपाठ :– वक्तुः । सम् । आत्मनः । वाचः । प्रऽवहन्त्याः । ते । पराच्याः ।
चत्वारि । मनसा । साकम् । पदानि । तानि । हितानि ॥

As you (Sarasvatī) issue out as speech from the self of the speaker, all your four feet (three are already mentioned and the fourth is the power of the individual) are associated together in the mind.

## अन्वयभाष्यम् ।

आदौ–छन्दोभिः त्रीणि पदानि उक्तानि, त्रीणि वेदैः, त्रीणि ज्योतिर्भिः, तानि त्रिविधानि पारिभाषिकाण्येव, अधिविद्य-अधिज्योतिषादितात्त्विकार्थप्रयुक्तानि च भवितुमर्हन्ति यथाश्रुतानि ॥

अथ वस्तुतः सरस्वत्याः पदान्याह— आत्मनः वक्तुः सकाशात् सम्प्रवहन्त्याः पराच्याः पराङ्मुखायाः ते वाचः मनसा साकं चत्वारि तानि पदानि हितानि धृतानि, यानि वक्ष्यामः, तानि एतानि तु अध्यात्मतत्त्वप्रयुक्तानि भवन्तीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Your three metrical feet are mentioned heretofore by three metres namely Gāyatrī, Trishtup and Jagatī, by three Vedas and by three sources of light (Agni, Indra, Āditya). These three are technical terms, Adhi-Vidya (pertaining to knowledge), Adhi-Jyautisha (pertaining to light) etc. Issuing out from the self of the speaker, your four feet are associated with the mind, and are invested with spiritual qualities.

## षष्ठी ऋक् ।

वैश्वानरेऽस्मिन् निहितमेकं पदमिदं वाचः ।
परं प्राणेष्वन्तरिक्षे वैश्वानरेण यत् पुनः ॥ ६ ॥

पदपाठ :– वैश्वानरे । अस्मिन् । निऽहितम् । एकम् । पदम् । इदम् । वाचः ।
परम् । प्राणेषु । अन्तरिक्षे । वैश्वानरेण । यत् । पुनरिति ॥

The one foot of Vāk is grounded in this Vaiśvānara (the living self) as subtle word; the second is grounded in the Prānas (vital powers) in the mid air (i. e., in the inmost space).

## अन्वयभाष्यम् ।

अस्मिन् वैश्वानरे जीवात्मनि निहितं सूक्ष्मवाग्रूपतया समष्ट्या प्रतिष्ठापितं इदं वाचः एकं पदं, पुनः वैश्वानरेण जीवात्मना अन्तरिक्षे अन्तराकाशे प्राणेषु वैद्युतेषु निहितं यत्—तत् परं द्वितीयं पदमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

In this Vaiśvānara (the individual soul) is located the first step of Vāk, in the form of subtle word which includes everything expressible and expressed. Again in this Vaiśvānara (the individual soul) Vāk places her second foot in the vital powers, in the form of something like lightning.

## सप्तमी ऋक् ।

तत् प्राणैः पुनः स्वारितं मूर्ध्नि स्वराङ्गैस्तृतीयम् ।
इदं ते पदं तुरीयमनु ब्रवीमि जिह्वया ॥ ७ ॥

पदपाठ :— तत् । प्राणैः । पुनरिति । स्वरितम् । मूर्ध्नि । स्वरत्ऽभिः । तृतीयम् ।
इदम् । ते । पदम् । तुरीयम् । अनु । ब्रवीमि । जिह्वया ॥

Vāk places or locates her third step in the head ( brain ) with the vital airs. Then I express with my tongue your fourth step which is speech.

## अन्वयभाष्यम् ।

स्वरद्भिः प्राणैः पुनः मूर्ध्नि सङ्कल्पस्थाने स्वरितं तत् तृतीयं पदं, ते तुरीयं इदं पदं जिह्वया अनुब्रवीमि, तृतीयं पदमनुल्लङ्घ्यैवेति ॥

### COMMENTARY—SUMMARY TRANSLATION

The sound-making Prānas in the head ( brain ) are the place of the third foot of Vāk. That is the place of the will of man. Without violating the truth of the third step, I proclaim the fourth step ( Turīa or transcedental ).

## अष्टमी ऋक् ।

रसवती त्वं चन्द्रमसो रसैः प्रवहतो दिवि ।
सवितुः स्वरतस्तपसा वाक् त्वं स्वरवती स्वरैः ॥ ८ ॥

पदपाठ :— रसऽवती । त्वम् । चन्द्रमसः । रसैः । प्रऽवहतः । दिवि ।
सवितुः । स्वरतः । तपसा । वाक् । त्वम् । स्वरऽवती । स्वरैः ॥

You are full of the sweetness of the moon who moves in the skies. You are the Vāk ( sound ) of Savitā who makes sound on account of his Tapas ( austerities ). You are full of sounds and are therefore called Svaravatī.

## अन्वयभाष्यम् ।

दिवि मूर्ध्नि—द्यौर्हि मूर्धा अध्यात्मम्, प्रवहतः चन्द्रमसः मनोरूपस्य रसैः त्वं रसवती, मनसा विप्रतिषिद्धानि कपटवचनानि विषप्रायाणीति यावत्, संवादीनि तु अमृतं वहन्तीति "दैवरातो" मन्यते, तपसा नित्येन स्वरतः सवितुः मुख्यप्राणस्य—मुख्यं हि प्राणं सवितारमामनन्ति विभूतिप्रस्तावे, तस्य स्वरैः हे वाक् ! त्वं स्वरवती च भवसि, यः खलु मुख्यप्राणे तिष्ठन् वाग्व्यापारं करोति तस्यैव वचने सावित्रः परमवीर्यवत्तरः स्वरः स्फुटः स्यादिति ॥

### COMMENTARY—SUMMARY TRANSLATION

The head is the sky ( in the individual ). There, the moon, the mind, moves about: By his ( moon's ) essence, Vāk becomes sweet. " All deceitful

statements are poison and all truthful ones are like nectar " so says Daivarāta. The chief vital air in man is like the sun who makes sound on account of Tapas ( heat ). This is borne out in the Section dealing with Vibhūti or power. Oh ! Vāk, you are articulate through the power of the sun. He who speaks with a firm basis in the Chief Prāṇa or vital air, speaks powerfully.

## नवमी ऋक् ।

नमस्ते देवि संस्रव चन्द्रमसेह मूर्धनि ।

रसं पिबामि जिह्वया सरस्वत्यास्तव वाचः ॥ ९ ॥

पदपाठः– नमः । ते । देवि । सम्ऽस्रव । चन्द्रमसा । इह । मूर्धनि ।

रसम् । पिबामि । जिह्वया । सरस्वत्याः । तव । वाचः ॥

Salutation to you, Oh Goddess ! move along with the moon in this head of mine. May I have the pleasure of drinking with my tongue, the sweet juice of your speech !

## अन्वयभाष्यम् ।

हे देवि ! नमस्ते, इह मूर्धनि अन्तः चद्रमसा रसात्मना सह संस्रव, मानसे स्फूर्ति अनेन याचते, सरस्वत्याः स्फूर्तिविशेषात् संस्रवन्त्याः इति नदीसाम्यात् एवमुक्तम्, तव वाचः रसं वाक्यसङ्घातरूपं जिह्वया पिबामि आत्मतृप्तेः तद्ग्रसेन तुष्यन् वदामीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Goddess, salutation to you. Please move about in this brain of mine along with the moon, the sweet one. The seer requests for inspi ration. Sarasvatī is always like the stream of sweetness and the source of inspiration. I shall drink with my tongue the sweet juice of your speech. That will give me supreme satisfaction.

## दशमी ऋक् ।

नमस्ते देवि संस्वर नमस्तेऽस्तु स्वरवत्यै ।

जिव्हायां स्वर मेधयां स्वरेण ब्रह्मणस्पतेः ॥ १० ॥

पदपाठः– नमः । ते । देवि । सम्ऽस्वर । नमः । ते । अस्तु । स्वरऽवत्यै ।

जिव्हायाम् । स्वर । मेधया । स्वरेण । ब्रह्मणः । पतेः ॥

Salutation to you, Oh Goddess of Speech ! Please speak, salutation to you, who has the power of speech or sound. Please speak through my tongue words full of intelligence of Brahmaṇaspati and charged with the power of expression.

## अन्वयभाष्यम् ।

हे देवि ! नमस्ते संस्वर सम्यक्स्वर, स्वरवत्यै ते नमः अस्तु, मेधया साकं ब्रह्मणस्पतेः प्रणवस्य मुख्यात् प्राणात् प्रणवो नातिरिच्यते, तस्य स्वरेण जिह्वायां स्वर, वाचि शक्तिं अनया याचते इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Goddess ! Salutations to you. Please speak with sweetness and power. I bow to you who are the source of speech. Brahmaṇaspati is Praṇava Mantra and the Lord of Life. Please speak with the power and sound of the Lord of Life through my tongue. The seer prays for power in his own speech.

## एकादशी ऋक् ।

या त्वं देवी देवजुष्टा प्रेषिता मनसा स्वयम् ।
चक्षुषा दृष्टं प्रत्यृतां तां त्वामृतवर्तीं विदुः ॥ ११ ॥

पदपाठ :— या । त्वम् । देवी । देवऽजुष्टा । प्रऽइषिता । मनसा । स्वयम् ।
चक्षुःऽभ्याम् । दृष्टम् । प्रति । ऋताम् । ताम् । त्वाम् । ऋतऽवतीम् । विदुः ॥

Oh Goddess ! You who are inspired by the power of your own mind are worshipped by gods. You speak what is seen by the eyes. It is truth. People know that you are truthful.

## अन्वयभाष्यम् ।

मनसा स्वयं प्रेरिता या त्वं देवजुष्टा देवपूजिता, निश्चयेषु एष निर्देशः, या च चक्षुर्भ्यां दृष्टं अर्थं अनुसंवदति, अनुवादेष्वेष निर्देशः, तां त्वां मनसा प्रेरितां दृष्टानुवादिनीं च ऋतवतीं सत्यात्मिकां वाचं विदुः, अत्र मनसा वाचा च योगात् ऋतं सत्यं चेति उभयविधत्वं वाचः सत्यस्य च गम्यते इति ॥

COMMENTARY—SUMMARY TRANSLATION

You are inspired by your own mind; and you are worshipped by Gods. This is a definite indication about truthfulness. To speak in words what is seen with the eyes is the very definition of truthfulness. To be inspired and to speak what is seen with one's eyes is considered to be truthfulness. There is full concord between the thought and the word.

## द्वादशी ऋक् ।

सरस्वति यत् परमं पदं दिवि ते स्वरन्त्याः ।
आश्रावय तदु मह्यं ज्योतिर्विश्वस्य दर्शयत् ॥ १२ ॥

पदपाठ :– सरस्वति । यत् । परमम् । पदम् । दिवि । ते । स्वरन्त्याः ।
आऽश्रावय । तत् । ऊम् इति । मह्यम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! May I have the privilege of knowing the highest place in heaven which you, who are the Goddess of Speech, occupy, a place which is like the light of the universe.

## अन्वयभाष्यम् ।

हे सरस्वति ! दिवि द्युलोके स्वरन्त्याः ते यत् परमं अखण्डं पदं तत् मह्यं आश्रावय, किम्भूतम्–दर्शयद् विश्वस्य ज्योतिः तद्रूपं पदमिति, उः पादपूरणे भवति इति ॥

॥ इति द्वितीयेऽनुवाके प्रथमं वाक्सूक्तम् ॥

COMMENTARY—SUMMARY TRANSLATION

Your word illuminates. You are eternal and your place in the highest heavens is full of light.

Thus ends the first hymn in the Second Section.

---

अथ द्वितीयेऽनुवाके द्वितीयं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् २ । ऋचः १–८ । सरस्वती ।

नमस्ते देवि सरस्वति अष्टौ, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, second in the Second Anuvaka**

**Section II, Hymn 2, Riks 1 – 8** – SARASVATĪ

This Hymn beginning with "Namaste Devi"; contains eight Ṛks, Daivarāta Vaiśvāmitra is the Ṛshi, Sarasvatī is the goddess and Jagatī is the metre.

## अथ प्रथमा ऋक् ।

नमस्ते देवि सरस्वति त्वं नेत्री
माया विश्वस्यैव जनित्री माता ॥

संविदा पुरुषं स्वमनु स्वरन्ती
वाग् विदा प्रतिमा पुरुषस्य पूर्णा ॥ १ ॥

पदपाठ :— नमः । ते । देवि । सरस्वति । त्वम् । नेत्री ।
माया । विश्वस्य । एव । जनित्री । माता ॥
सम्ऽविदा । पुरुषम् । स्वम् । अनु । स्वरन्ती ।
वाक् । विदा । प्रतिऽमा । पुरुषस्य । पूर्णा ॥

Salutations to you, Goddess Sarasvati. You are the guide, the measure, the mother who brought forth the universe. You who are full of wisdom follow your own Spirit through your power of speech. You are spirit personified.

## अन्वयभाष्यम् ।

हे देवि! देवतात्मिके! सरस्वति! ते तुभ्यं नमः, त्वं विश्वस्य सर्वस्यैवास्य जगतः नेत्री प्रणेत्री अग्रणीः सञ्चालिकेति यावत्, माया प्रमात्री प्रमाणभूता प्रत्यक्षा जनित्री जनयित्री माता साक्षात् जननी इति सुप्रसिद्धा, अत्र "जनिता मन्त्रे" (पा- सू. ६, ४, ५३) इति सूत्रात् "जनिता" इत्यस्य स्त्रीप्रत्ययान्तस्य रूपं "जनित्री" इति, "जनयित्री" इति अर्थे, सा त्वं संविदा सम्यग् ज्ञानेन स्वं पुरुषं परमं आत्मानं अनुस्वरन्ती सती वागात्मिका सर्वेभ्यः परा वाचकशक्तिः तस्य पुरुषस्य पूर्णा समाना तेन तुल्या प्रतिमानभूता प्रतिमा प्रत्यक्षा तनूः भवति, एतेन तस्य परमात्मनः परोक्षस्य वागेव साक्षात् मूर्तिमती परमा शक्तिरिति सिध्यतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh great Goddess Sarasvati, salutations to you. You are the leader and guide of this whole universe. You are the measure of this world and the very standard set in this world. You are the birth-giving mother of the universe. You with your sound wisdom give expression to your highest Ātmā (the inmost spirit) by means of Vâk or speech. You are the personification of the Ātman or spirit. Vāk is the visible embodiment of the highest spirit, Paramātmā, though he is invisible.

## द्वितीया ऋक् ।

सरस्वति त्वं रसेन साम्नाऽऽत्मानं
पुरुषं स्वं ब्रह्माणमन्वेषि सत्यम् ॥

ब्रह्मैवानु प्रभवस्यय इवाग्नि-
वाग् विदा प्रतिमा ब्रह्मणः सा परा ॥ २ ॥

पदपाठ :- सरस्वति । त्वम् । रसेन । साम्ना । आत्मानम् ।
पुरुषम् । स्वम् । ब्रह्म । सम् । अनु । एषि । सत्यम् ॥
ब्रह्म । एव । अनु । प्रऽभवसि । अयःऽइव । अग्निः ।
वाक् । विदा । प्रतिऽमा । ब्रह्मणः । सा । परा ॥

Oh Sarasvati ! you stand united in full harmony with your Ātman or Purusha, which is the Truth or Brahma. You become one with Brahma himself like iron which becomes one with fire when heated. You are indeed the personification of Brahma, the Great.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं साम्ना समेन रसेन स्वमेव आत्मानं सन्तं परमं पुरुषं तं ब्रह्म ब्रह्मस्वरूपं सत्यं सत्यात्मकं समन्वेषि तत्समन्वयेन सामरस्येन प्रतितिष्ठसि, तत्रायं दृष्टान्त:— यथा अग्निना समन्वितं अय: स्वयमपि अग्निरेव भवति, तद्वत् त्वमपि तत्पूर्णात्मकसत्यब्रह्मवस्तुसमन्वयेन प्रत्यक्षं ब्रह्मैव सती सर्वत्र प्रभवसि ब्रह्मशासनरूपत्वाद् वेदवाचः, तस्मात् हे वाक् ! सा त्वं तस्य परब्रह्मण: पूर्णं प्रतिमानं तत्समानं तुल्यं प्रमाणं प्रत्यक्षं हि तत्प्रतीकमेव असि इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you who are similar to Ātman in essence, unite with the Truth, the Purusha which is Brahma, the eternal. You are one with Him. For example, iron becomes fire itself when heated. So, you too become Brahma. Therefore, you are in fact Brahma in the visible form. You are His equal in every way. You are His very image.

## तृतीया ऋक् ।

सरस्वति त्वं प्रत्यक्षं ब्रह्म सती
परमेवानु स्वरसि ब्रह्म सत्यम् ॥
प्रत्यगेवानु तत् स्वयं भवसि त्वं
वाग् विदा प्रतिमा ब्रह्मणः सा परा ॥ ३ ॥

पद्पाठ :— सरस्वति । त्वम् । प्रत्यक्षम् । ब्रह्म । सती ।
परम् । एव । अनु । स्वरसि । ब्रह्म । सत्यम् ॥
प्रत्यक् । एव । अनु । तत् । स्वयम् । भवसि । त्वम् ।
वाक् । विदा । प्रतिऽमा । ब्रह्मणः । सा । परा ॥

Oh Sarasvati ! you being Brahma himself, you utter his name as Brahma, as Truth. By doing so, you become Brahma himself. Vāk, you are indeed the personification of Brahma, the Great.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं प्रत्यक्षं स्वयं ब्रह्मेव सती,—अथवा ब्रह्मजाया सती तत् परं परोक्षमेव नित्यसिद्धं सत्यं ब्रह्म अनुस्वरसि अनुवदसि ब्रह्म इति सञ्ज्ञया यथार्थम्, तत् सत्यं वस्तु नामरूपाद्यतीतमपि ब्रह्म इति नाम्ना वाचैव प्रसिद्धिं नीतं इति भावः, अत एव तत् परं ब्रह्मैव अनुसृत्य त्वमपि तत् प्रत्यक् प्रत्यगात्मरूपं भवसि, तस्मात् हे वाक्! सा त्वं वाङ्माता तस्य परब्रह्मणः पूर्णा समाना प्रमाणभूता प्रतिमा असि इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are yourself Brahma who is personified in you. You are like the faithful wife of Brahma who brings Brahma to us; you repeat his name who is beyond the reach of the senses. Brahma is no doubt Eternal and has no name or form. He is known as Brahma, which is a ‘ word ’. Therefore, like Him who is beyond the senses, you express Him in words and become another Brahma. Therefore, you, Mother Vāk, are his equal. You become like Him.

## चतुर्थी ऋक् ।

सरस्वति त्वं ब्रह्म साक्षादभिधा-
स्त्वे हितं त्वदाविरभूत् तद् विश्वथा ॥
या सती जाया ब्रह्मणस्पतेः सतो
वाग् विदा प्रतिमा ब्रह्मणः सा परा ॥ ४ ॥

पद्पाठ :— सरस्वति । त्वम् । ब्रह्म । साक्षात् । अभिऽधाः ।
त्वे । इति । हितम् । त्वत् । आविः । अभूत् । तत् । विश्वऽथा ॥
या । सती । जाया । सतः । ब्रह्मणः । पतेः ।
वाक् । विदा । प्रतिऽमा । ब्रह्मणः । सा । परा ॥

Oh Sarasvati ! you are said to be that Brahma who is not perceptible, because that Brahma is in you. Through you, Brahma became manifest in the form of the universe. You are the wife or the power of Brahmaṇaspati. You are, indeed, the personification of Brahma, the Great.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं नामरूपादिरहितं निर्गुणं इति श्रुतं तत्—परोक्षं परं वस्तु ब्रह्म इति प्रत्यक्षं अभिधाः अभिहितवती, अतः तद् ब्रह्मवस्तु त्वे त्वयि हितं अन्तर्हितं वाच्यार्थ-रूपेण, तस्मात् त्वत् त्वत्तः तद् ब्रह्म विश्वथा विश्वरूपेण आविरभूत् प्रादुर्बभूव, या त्वं ब्रह्मणस्पतेः सतः तस्य सद्वस्तुनः परमपुरुषस्य परब्रह्मणः जाया शक्तिः सती वागेव प्रसिद्धा तस्य ब्रह्मणः प्रत्यक्षसिद्धा परा प्रतिमा इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you have said that Brahma is perceptible, though He has no name or form. That Brahma is in you in the form of word. Further, it is through you that Brahma became manifest in the form of this universe. You are as it were the wife or the power of that eternal Brahmaṇaspati. Vāk, you are that indeed. You are indeed the direct means of knowing Him.

## पञ्चमी ऋक् ।

सरस्वति त्वं बृहती सम्परीता
ब्रह्मैवानु प्रत्येषि परमे व्योमन् ॥
भूयः प्रत्याऽऽयसि ब्रह्म तद् वाचा
वाग् विद्रा प्रतिमा ब्रह्मणः सा परा ॥ ५ ॥

पदपाठः— सरस्वति । त्वम् । बृहती । सम् । परि । इता ।
ब्रह्म । एव । अनु । प्रति । ऋता । परमे । विऽओमन् ॥
भूयः । प्रति । आऽअयसि । ब्रह्म । तत् । वाचा ।
वाक् । विद्रा । प्रतिऽमा । ब्रह्मणः । सा । परा ॥

Oh Sarasvati ! you are the great one; you are all-pervasive, and are filling the high skies like Brahma, and are along with Him. In fact, you lead us to Brahma through true words. You are indeed the personification of Brahma, the Great.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं बृहती महती सम्परीता सर्वतः व्याप्ता सती परमे व्योमन् व्योमनि निजे धामनि पूर्णं ब्रह्मैव अनुलक्ष्य सम्यक्तया प्रत्यृता प्राप्ता, अत एव तत् परं सद् ब्रह्म भूयः भूयोभावेन प्रत्याययसि परेभ्यः प्रति बोधयसि स्वया वाक्छक्त्या ज्ञापयसि, अतः सा प्रसिद्धा वागेव तस्य ब्रह्मणः प्रत्यक्षप्रमाणभूता परा प्रतिमा इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are great, like the one who pervades the high sky. That is your abode. You go towards Brahma and are united with Him. So you can teach others the secret of eternal Brahma. By the power of your expression, you lead us to Brahma. You are well-known as Vāk. You are indeed the perfect means of knowing Him.

## षष्ठी ऋक् ।

सरस्वति त्वं ब्रह्मचोदनी चित्तिः
सा सतीयं ब्रह्मणैव प्रचोदिता ॥
रसेन साम्ना प्रति चोदयासि ब्रह्म
वाग् विदा प्रतिमा ब्रह्मणः सा परा ॥ ६ ॥

पद्पाठ :— सरस्वति । त्वम् । ब्रह्मऽचोदनी । चित्तिः ।
सा । सती । इयम् । ब्रह्मणा । एव । प्रऽचोदिता ॥
रसेन । साम्ना । प्रति । चोदयासि । ब्रह्म ।
वाक् । विदा । प्रतिऽमा । ब्रह्मणः । सा । परा ॥

Oh Sarasvati ! you are as it were the great inspirer of Brahma. Being that, you are in your turn inspired by Him. Being His equal in essence, you inspire all like Him in your turn. Vāk, you are indeed the personification of Brahma, the Great.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं ब्रह्मचोदनी ब्रह्मणः प्रेरयित्री परा चित्तिः चिच्छक्तिरूपा, तस्मात् सा त्वं तेन ब्रह्मणा ब्रह्मात्मनैव प्रचोदिता प्रेरिता सती साम्ना रसेन तत्सामरस्येन तद् ब्रह्म प्रति चोदयसि प्रति प्रेरयसि, अत एव त्वं "ब्रह्मचोदनी" इति वेदे प्रसिद्धा श्रूयसे, तथा च ऋङ्मन्त्रवर्णः — "यां पूषन् ब्रह्मचोदनीमारां बिभर्ष्याघृणे ॥ तया समस्य हृदयमारिख

किकिराकृणु " इति (ऋ. मं. ६-५३-८) ॥ तस्मात् सा वागेव तस्य ब्रह्मणः विदा संविदे तत्प्रतिबोधे समर्था प्रतिमा परमा प्रमाणभूतेति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you inspire ( in us ) the truth about Brahma. You are indeed inspired by Him. Being equal in essence and being equated with Him, you inspire Him. Therefore, you are known as Brahmachodanī in the Veda: " Pūshan, you have Vāk, who is Brahmachodanī." (Ṛg. VI-53-8.) You are indeed that Vāk, you are the direct means who can help His realisation. Unto Him, you are the witness.

## सप्तमी ऋक् ।

सरस्वति त्वमिह विश्वथाऽऽत्मना
ब्रह्मैवासि साक्षात् तदुं विश्वरूपम् ॥
परमेवानु स्वरसि ज्योतिषा चिता
वाग् विदा प्रतिमा ब्रह्मणः सा परा ॥ ७ ॥

पदपाठः— सरस्वति । त्वम् । इह । विश्वऽथा । आत्मना ।
ब्रह्म । एव । असि । साक्षात् । तत् । ऊं इति । विश्वऽरूपम् ॥
परम् । एव । अनु । स्वरसि । ज्योतिषा । चिता ।
वाक् । विदा । प्रतिऽमा । ब्रह्मणः । सा । परा ॥

Oh Sarasvati! on account of your all-pervasiveness, you are like Brahma. You are manifest in the form of the universe itself. You express Him by the light of your knowledge. You are indeed the personification of Brahma the Great.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं इह अस्मिन् प्रपञ्चे विश्वथा सर्वथा आत्मना सर्वात्मना सर्वभावेन साक्षात् प्रत्यक्षं तद् ब्रह्मैव त्वं असि, यदिदं विश्वरूपं विश्वरूपेण विततं, वाच एवेदं सर्वं वैभवं इति भावः, अतः चिता ज्योतिषा चैतन्येन तेजसा च तत् परं ब्रह्मैव अनुस्वरसि अनुस्वाररूपेण उच्चरसि, तस्मात् सा परा वागेव विदा ज्ञानेन—ज्ञानाय च तस्य ब्रह्मणः

पूर्णा प्रतिमा प्रमाणभूतं प्रतीकम्, पूर्णबिन्दुरूपस्य पूर्णात्मकस्य ब्रह्मणः वाचकं सत् प्रतीकं तत् वाक्स्वरस्वरूपं अनुस्वारात्मकमेव भवितुमर्हतीति भावः, वाग्विभूतिरेवेदं विश्वमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! here in this world, by all means you are indeed the manifest Brahma. That is evident by your being all over the universe. You manifest the imperceptible Brahma, whom you only indicate, just as an 'anusvāra' or the sign of a dot on a letter indicates the sound but has no independent meaning. You are indeed that Vāk, who is beyond the reach of the senses, you are indeed a verifiable image of Him who is full like a perfect point.

## अष्टमी ऋक् ।

सरस्वति त्वं प्रतिरूपा ब्रह्मणो
यदु दृश्यते यदु श्रूयते यदुच्यते ॥
वाच एव सत्यं रूपमिदं विश्वं
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठः— सरस्वति । त्वम् । प्रतिऽरूपा । ब्रह्मणः ।
यत् । उँ इति । दृश्यते । यत् । उँ इति । श्रूयते । यत् । उच्यते ॥
वाचः । एव । सत्यम् । रूपम् । इदम् । विश्वम् ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you are the very image of Brahma. All that is seen, heard, and expressed is Brahma, is Vāk. This whole universe is the true form of Vāk. Vāk, or the Word, or the power of speech is the light of the flame which illuminates or gives us knowledge of the universe.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं तस्य परब्रह्मणः प्रतिरूपा सर्वस्वभावेन स्वयं ब्रह्मस्वरूपा असि, अतः अस्मिन् प्रपञ्चे यद् यत् खलु प्रत्यक्षं परिदृश्यते, यद् यत् पुनः प्रत्यक्षं परोक्षं अपरोक्षं च श्रूयते, तथैव अपरोक्षादिकं यद् यद् वाचा उच्यते तदेतत् सर्वमपि वाच एव सत्यं प्रधानं रूपं भवति, परब्रह्मणस्तु तदेतत् सर्वमपि अप्रधानं गौणं गुणभूतं, तस्य नाम-रूप-गुण-क्रियादिरहितत्वात्, तस्मात् सा परा वागेव विश्वस्य सर्वस्य अस्य जगतः दर्शयत् अवभासकं परं ज्योतिः, तत्परञ्ज्योतिःस्वरूपा वागिति ॥

॥ इति द्वितीयेऽनुवाके द्वितीयं सरस्वतीसूक्तं समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the reflection or the image of that Brahma who is imperceptible. By all means you are the Brahma. Whatever is perceived directly or indirectly as the universe is known through words or the power of speech. Therefore, all this is known only through Vāk. It is Satya, the Truth. So far as Brahma, the imperceptible, is concerned, whatever is perceptible is but secondary; because He has no name, form, quality or function. You are Vāk, who like light gives all knowledge.

Thus ends the Second hymn in the Second Section.

---

## अथ द्वितीयेऽनुवाके तृतीयं सरस्वतीसूक्तम्

अनुवाकः २ । सूक्तम् ३ । ऋचः १-८ । सरस्वती ।

सरस्वति त्वं पुरुषे अष्टौ, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, third in the Second Anuvaka**

**Section II, Hymn 3, Riks 1-8** - SARASVATĪ

This third hymn beginning with "Sarasvati tvam purushe" contains eight Ṛks. Daivarâta Vaiśvâmitra is the Ṛshi, Sarasvatī is the goddess and Jagatī is the metre.

### अथ प्रथमा ऋक् ।

सरस्वति त्वं पुरुषे स्व आत्मनि
संहितोप स्वेन रसेन समेन ॥
संविदा क्रतुना ज्योतिषा चित्तिभि-
स्तावती वाक् प्रपूर्णा यावान् पुरुषः ॥ १ ॥

पदपाठ :- सरस्वति । त्वम् । पुरुषे । स्वे । आत्मनि ।
सम्ऽहिता । उप । स्वेन । रसेन । समेन ॥
सम्ऽविदा । क्रतुना । ज्योतिषा । चित्तिऽभिः ।
तावती । वाक् । प्रऽपूर्णा । यावान् । पुरुषः ॥

Oh Sarasvati ! you are one with your Lord in your own heart on account of your love which is equal to that of your Lord. Vāk is as full of the faculties of knowledge, will-power and light as the Purusha ( the Supreme Person ) Himself.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं स्वे पुरुषे निजे पत्यौ स्वे आत्मनि अन्तर्यामिणि समेन स्वेन रसेन तत्समानेन स्वरसेन प्रेम्णा तत्सामरस्येन उपसंहिता तादात्म्येन सम्मिलिता असि, अत: संविदा सम्यग् ज्ञानेन क्रतुना कर्मणा क्रियासत्त्वेन ज्योतिषा तेजःस्वरूपेण चित्तिभिः चेतनाशक्तिभिश्च स: परम: पुरुषः यावान् यावत्परिमाणतः पूर्णः व्यापक: स्वत:सिद्धोऽस्ति, तस्य पराशक्तिरूपा त्वं वागपि स्वयं तावती पूर्णैव भवसि, तेन पुरुषात्मना तादात्म्ययोगादिति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are united with your Lord, the inner Self, on account of your love and sense of harmony equal in every respect to that of your Lord. Further, by sound intelligence, will-power and light of knowledge, you are as extraordinarily perfect as the excellent Purusha, who is all-pervasive and independent. You are, therefore, His Parā-Śakti, supreme power.

## द्वितीया ऋक् ।

सरस्वति त्वं ब्रह्मणि स्वे पुरुषे चित्तिः
सुभद्रा सा विश्ववित् सुसन्दृक् ॥
सत्येन प्रचेतनेनोत सत्त्वेन
तावती वाक् प्रपूर्णा यावान् पुरुषः ॥ २ ॥

पदपाठ :— सरस्वति । त्वम् । ब्रह्मणि । स्वे । पुरुषे । चित्तिः ।
सुऽभद्रा । सा । विश्वऽवित् । सुऽसन्दृक् ॥
सत्येन । प्रऽचेतनेन । उत । सत्त्वेन ।
तावती । वाक् । प्रऽपूर्णा । यावान् । पुरुषः ॥

Oh Sarasvati ! being united with your Lord Brahma, by your knowledge and activity, you are full of the power to do good. You are omniscient and can see everything. Oh Vāk, you are as true and as full of energy and power as the Lord Himself.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं स्वे निजे ब्रह्मणि ब्रह्मात्मके पुरुषे अधिपतौ संहिता सती चित्तिः चेतनाशक्तिः सुभद्रा मङ्गलमयी बलीयसी च, विश्ववित् सर्वज्ञानशक्तिः, सुसन्दृक् सम्यग्दर्शन-क्रियाशक्तिः, सत्येन अविनाशित्वादिधर्मेण प्रचेतनेन उत सत्त्वेन च सत्त्वगुणेन सत्तया च सः पुरुषः यावान् सन्ततः पूर्णोऽस्ति, हे वाक् ! त्वमपि तावत्येव सर्वैः भावैः गुणैश्च स्वयं पूर्णाऽसि तद्योगेनेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! being one with your Lord Brahma, by your knowledge and activity, you are Subhadrā, full of the power to do good. You are all-knowing and all-seeing. Oh Vāk, you are as eternally true, full of energy and power as the Purusha Himself since you are one with Him.

## तृतीया ऋक् ।

सरस्वति त्वं ब्रह्म ब्रह्मणस्ते पतिः
पुरुषस्तमनु स्वरन्ती रसेन ॥
ब्रह्मणस्पतिं छन्दसा प्रति सम्भृता
तावती वाक् प्रपूर्णा यावद् ब्रह्म परम् ॥ ३ ॥

पदपाठ :— सरस्वति । त्वम् । ब्रह्म । ब्रह्मणः । ते । पतिः ।
पुरुषः । तम् । अनु । स्वरन्ती । रसेन ।
ब्रह्मणः । पतिं । छन्दसा । प्रति । सम्ऽभृता ।
तावती । वाक् । प्रऽपूर्णा । यावत् । ब्रह्म । परम् ॥

Oh Sarasvati ! you are Brahma Himself. Brahma who is your Lord, is the Supreme Purusha. You praise the Brahmaṇaspati with love and song, namely by Vedic compositions and you know Him. Vāk is as full of powers as the great Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं प्रत्यक्षं ब्रह्म श्रोत्रेन्द्रियगोचरत्वात्, तस्याः ते ब्रह्मणः ब्रह्मरूपायाः तव पतिः स परमः पुरुषः, तं परमात्मानं छन्दसा वेदेन स्वररसेन च सम्भृता सम्प्राप्ता, तथा तं ब्रह्मणस्पतिं तत्सञ्ज्ञकं सर्ववेदाध्यक्षं प्रति रसेन प्रेम्णा अनु संसरन्ती अनु गायन्ती च सा वाक् तावती प्रपूर्णा व्यापका भवति, यावत् खलु तत् परं ब्रह्म परिपूर्णं स्वतःसिद्धं नित्यमेव अस्ति इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you are the manifest Brahma, as you are perceptible to the ear. The Lord Brahma is Purusha, the pervader par excellence. Vāk praises the Brahmaṇaspati ( that is the Lord Brahma, the Supreme Person ) by Vedic songs and knows Him. She has all the faculties of the Brahma.

## चतुर्थी ऋक् ।

सरस्वति त्वं प्रतिरूपा ब्रह्मणः
सत्यमेव प्रति नदसीह विश्वम् ॥
अनु वाचा नदयसि ब्रह्म चित्ती
तावती वाक् प्रपूर्णा यावद् ब्रह्म परम् ॥ ४ ॥

पदपाठ :– सरस्वति । त्वम् । प्रतिऽरूपा । ब्रह्मणः ।
सत्यम् । एव । प्रति । नदसि । इह । विश्वम् ॥
अनु । वाचा । नदयसि । ब्रह्म । चित्ती ।
तावती । वाक् । प्रऽपूर्णा । यावत् । ब्रह्म । परम् ॥

Oh Sarasvati! you are a second Brahma. You declare that this world is true. You redeclare by words the existence of Brahma. Vāk, you are full to the same extent as Brahma who is the greatest.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं तस्य परब्रह्मणः प्रतिरूपा सर्वस्वरूपा सती तस्मादुत्सृष्टं इदं विश्वं सत्यमेव तद्रूपं नदसि ब्रह्मप्रतिरूपं श्रावयसि वेदादिमुखेन, तत् स्वकीयं परं ब्रह्म स्वयैव वाचा अनुनादयसि ब्रह्मादिशब्देन तथा दिव्येन प्रणवादिरूपेण निनदेन अक्षरेण च, तस्मात् तत् परं ब्रह्म यावत् प्रमाणकं पूर्णं भवति तावत्येव तस्य वागपि स्वयं तादात्म्येन तत्समन्विता सती सर्वात्मना परिपूर्णा प्रभवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you being almost as great as Brahma, you declare that this world which was created by Him, is as real as Brahma; you do so through the Veda. Further, you announce your Lord by divine ( Divya ) words, such as Brahma and so on. You are as perfect as Brahma, because of your identity and association with Him in every respect.

## पञ्चमी ऋक् ।

सरस्वति त्वं प्रतिरूपा विश्वस्य
विश्वं यदुच्चरसि ज्योतिषा चिता ॥
विश्वमेव वाचा प्रति भासयसे
तावती वाक् प्रपूर्णा यावद् ब्रह्म परम् ॥ ५ ॥

पदपाठः— सरस्वति । त्वम् । प्रतिऽरूपा । विश्वस्य ।
विश्वम् । यत् । उत्ऽचरसि । ज्योतिषा । चिता ॥
विश्वम् । एव । वाचा । प्रति । भासयसे ।
तावती । वाक् । प्रऽपूर्णा । यावत् । ब्रह्म । परम् ॥

Oh Sarasvati ! you are as it were, the universe itself. You speak of this universe with the light of knowledge. And you illuminate this universe with words. You are as full and perfect as Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं विश्वस्य अस्य जगतः अपि प्रतिरूपा तत्तन्नामात्मना सन्तता, स्वेन ज्योतिषा सद्रूपेण चिता चेतनाशक्त्या यत् खलु विश्वं एतत् उच्चरसि सर्वेषां प्रादुर्भावार्थम्, तेन स्वेन वाङ्मुखेनैव विश्वं इदं प्रतिभासयसे प्रकाशयसि, वाचैव विश्वं प्रकाशते इति भावः । तस्मात् तत् परं ब्रह्म वस्तु यावत् पूर्णं तावत्येव तस्य वागपि सर्वात्मना पूर्णा तादात्म्ययोगेनेति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are as it were the second universe. You are invested with the power of words. You express this world in words and with your words you make the world known. "The world is known by words." Vāk is as perfect and full as Brahma, since she is identified with Him.

## षष्ठी ऋक् ।

सरस्वति त्वं सती विश्वरूपाऽऽत्मन्
विश्वतस्तपसा तेजसाऽऽतता ॥
आत्मानमेवाग्निमं नदसि प्रति
तावती वाक् प्रपूर्णा यावद् ब्रह्म परम् ॥ ६ ॥

पद्पाठ :– सरस्वति । त्वम् । सती । विश्वरूऽपा । आत्मन् ।
विश्वतः । तपसा । तेजसा । आऽतता ॥
आत्मानम् । एव । अनु । इमम् । नद्सि । प्रति ।
तावती । वाक् । प्रऽपूर्णा । यावत् । ब्रह्म । परम् ॥

Oh Sarasvati ! you are the wife of Brahma in the form of this universe. You pervade everything and are everywhere with your Tapas ( heat ) and Tejas ( light ). You express in words the inner Ātman. Vāk is as full and perfect as Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं परमे तस्मिन् आत्मनि वाचकात्मिका विश्वरूपा सती विश्वतः अत्र बहि: ब्रह्माण्डे अन्तरपि च सर्वेषां शरीरे तेजसा तपसा च आतता व्याप्ता सती स्वं निजं इमं चेतनात्मानं प्रतिनदसि शब्दायसे सूक्ष्मस्फुरणरूपेण, तस्मात् तत् परं ब्रह्म यावत् पूर्णं सर्वगुणक्रियादिभिः, सा परा वागपि तावत्येव सर्वात्मना परिपूर्णा सती प्रतितिष्ठतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! being in the Ātman and everywhere in the universe, you pervade all things with your Tapas ( power of concentration ) and Tejas ( light of knowledge ). You express the Ātman in the form of your vibrations. You are as full of all attributes as Brahma Himself.

## सप्तमी ऋक् ।

सरस्वति त्वं परमे तता चित्ती
व्योमन् न प्रति पद्यसे पराऽऽचिता ॥
अपदी त्वमपादो ब्रह्मणः सत-
स्तावती वाक् प्रपूर्णा यावद् ब्रह्म परम् ॥ ७ ॥

पद्पाठ :– सरस्वति । त्वम् । परमे । तता । चित्ती ।
विऽओमन् । न । प्रति । पद्यसे । परा । आऽचिता ॥
अपदी । त्वम् । अपादः । ब्रह्मणः । सतः ।
तावती । वाक् । प्रऽपूर्णा । यावत् । ब्रह्म । परम् ॥

Oh Sarasvati ! you pervade the infinite sky with intelligenee. Being imperceptible in the form of knowledge like the Brahma, you are not visible. Being associated with Reality which is without any name, form or function, you too seem to be without name and form. Vāk, you are as perfect and full as Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं चित्ती चित्या परमे व्योमन् व्योमनि तता व्याप्ता सती सूक्ष्मतमेन अव्यक्तनादब्रह्मरूपात्मना नित्यसिद्धाऽसि, तथाऽपि ब्रह्मवस्तुवत् परा परोक्षा चिता केवलेन चेतनात्मना अन्तर्हिता च सती न प्रतिपद्यसे बाह्यदृष्टिभिः, सर्वतोऽस्माद् व्यतिरिक्तत्वात् सा त्वं अपदः सतः ब्रह्मवस्तुनः तस्य सम्बन्धात् तादात्म्ययोगात् त्वं वागपि अपदी गुणरूपादिरहितत्वात्, तस्मात् तत् परं ब्रह्मवस्तु अन्वयेन व्यतिरेकेणापि यावत् पूर्णं तावत्येव तस्य वागपि त्वं पूर्णा तदात्मिकैवेति भावः, अत्रेदं रहस्यम्—नामरूपादि-पूर्णे ब्रह्मणि तदन्वयेन तद्वागपि स्वयं नामरूपात्मिकैव भवति, तथैव ब्रह्मणि तस्मिन् नामरूपादिरहिते तु तद्योगेन सा नामरूपादिगुणरहिता वागपि मौनरूपा भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! with your intelligence you fill the high sky in the form of the subtle sound, the Nāda Brahma, which is hardly perceptible. You are eternal. Like Brahma, you are also imperceptible because you are pure knowledge and not at all visible to the external eye. You are beyond this universe. On account of your intimate relation with the nameless, the Reality, the Brahma, you are also without attribute or form or function. So, by being associated with but beyond the universe, you are as full and perfect as Brahma.

The plain meaning is, Brahma has name and form when manifest. At that time, Vāk also has name and form. When not manifest, Brahma is without them. She also at that time is without them likewise. Being always united with Him, Vāk assumes whatever name or form Brahma assumes.

## अष्टमी ऋक् ।

सरस्वति त्वं पुरुषे स्वे परमे

समेन स्वेन रसेनाहिताऽऽत्मनि ॥

अपदी साऽनभिधा प्रति राजसे

वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठ :— सरस्वति । त्वम् । पुरुषे । स्वे । परमे ।
समेन । स्वेन । रसेन । आऽहिता । आत्मनि ॥
अपदी । सा । अनाभिऽधा । प्रति । राजसे ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you are united with the Supreme Person and reside in him in love and in full harmony. Vāk is without any name, form or attribute but shines like Him without a name. Vāk is the most brilliant of lights. She illumines the whole world.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं स्वे निजे परमे पुरुषे परमात्मनि स्वेन समेन रसेन सामरस्येन योगेन आहिता संसृष्टा असि, अत: सा त्वं अपदी गुणादिपदेन चिन्हेन रहिता, अन–भिधा नामरहिता सती प्रति राजसे प्रत्यगात्मनि परमे ब्रह्मणि लीयसे, तस्मात् सा त्वं परा *वाक् परमा देवतात्मैव सती विश्वस्यैवास्य जगत: दर्शयत् प्रकाशकं ज्योति:, तत्पर-*ञ्ज्योति:स्वरूपैव परा वाक् इति सर्वात्मना सङ्गच्छते इति ॥

॥ इति द्वितीयेऽनुवाके तृतीयं सरस्वतीसूक्तं समाप्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you dwell in the Parama Purusha, on essence being the same and on account of your love. You are without any form or attribute. You are nameless too. You are merged and are one with the inner Ātman, Brahma, the great. You are the invisible Vāk, par excellence. Being Ātman, you illumine the whole universe. You are the most powerful light. You are Vāk, the invisible.

Thus ends the Third hymn in the Second Section.

## अथ द्वितीयेऽनुवाके चतुर्थं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् ४ । ऋचः १-११ । सरस्वती ।

सरस्वति त्वं ज्योतिषा एकादश, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, fourth in Second Anuvaka**

**Section II, Hymn 4, Riks 1-11** – SARASVATĪ.

This Hymn beginning with "Sarasvati tvam jyotishā" contains eleven Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Sarasvatī is the godess and Jagatī is the metre.

### अथ प्रथमा ऋक् ।

सरस्वति त्वं ज्योतिषा चेतमाना
ब्रह्मणा ब्रह्म तपसा संविदाना ॥
सत्या त्वममृता त्वमक्षरा परा
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ १ ॥

पदपाठः– सरस्वति । त्वम् । ज्योतिषा । चेतमाना ।
ब्रह्मणा । ब्रह्म । तपसा । सम्ऽविदाना ॥
सत्या । त्वम् । अमृता । त्वम् । अक्षरा । परा ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati ! you are animated by divine light Being united with Brahma, you know Brahma by Tapas. You are true, immortal and imperishable. You are indeed the great Vāk; you are, through your knowledge, the mother of the universe, and you prove the existence of Brahma.

### अन्वयभाष्यम् ।

हे सरस्वति ! त्वं शब्दरूपाऽपि ज्योतिषा ज्योतिःस्वरूपेण ब्रह्मणा सद्वस्तुना चेतमाना, तथा स्वेन तपसा अन्तर्विमर्शात्मकेन तत् परं वस्तु संविदाना जानती च सती सत्या सत्यस्वरूपा अमृता नाशविकारादिरहिता अक्षरा अक्षरब्रह्मात्मिका नामरूपादिभिः सत्यादिगुणैश्च पूर्णा सा वाक् वाचकशक्तिस्वरूपा सती ब्रह्मणः विदा संविदा संविदे च माता प्रमात्री, तथा विश्वस्यास्य जगतः योनिः कारणभूता प्रमाणभूता भवतीति ॥

अत्र "वागष्टमी ब्रह्मणा संविदाना" "वाग्घि अष्टमी ब्रह्मणा संवित्ते" इति च (बृ. उ. २-२-३) औपनिषदो मन्त्रवर्णः तद्ब्राह्मणानुवचनं च प्रमाणोदाहरणम्, तथा "गौरीर्मिमाय सलिलानि तक्षती० | सहस्राक्षरा परमे व्योमन् ||" इति "तस्याः समुद्रा अधि विक्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः || ततः क्षरत्यक्षरं तद् विश्वमुप जीवति" इति च (ऋ. मं. १-१६४-४१-४२) प्रसिद्धं ऋङ्मन्त्रद्वयं प्रधानं प्रमाणपदं निर्वहति इति ||

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! though you are in the form of words, being united with Brahma, you are animated by Him. By your Tapas (concentration) you understand or know Brahma. You are Satya, true and eternal. You are imperishable. You are full of virtues of Satya etc. You are the measure of Brahma. Likewise, you are the origin and proof of this universe. In the Upanishads, it is said that " Vāk is the eighth Gouri ( Mādhyamikā Vāk ) who creates all the worlds, all essences, measures them within herself; this means she bore the worlds in the form of expression " ( Bṛ. Up. II-2-3 ). "From her all the oceans ( all the worlds of all essences ) flow and through her all the directions and all living beings draw their living. The Brahma, the imperishable condescends to assume multifarious forms and the whole universe lives depending on the Vāk " ( *Ṛg. I-164-41-42* ).

### द्वितीया ऋक् ।

सरस्वति त्वं प्रतिमात्रा ब्रह्मणो
वाचा विश्वमन्तर्धत्से ब्रह्म बीजम् ॥
प्रसूषे ब्रह्मणा विश्वं प्रचोदिता
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ २ ॥

पद्पाठ :– सरस्वति । त्वम् । प्रतिऽमात्रा । ब्रह्मणः ।
वाचा । विश्वम् । अन्तरिति । धत्से । ब्रह्म । बीजम् ॥
प्रऽसूषे । ब्रह्मणा । विश्वम् । प्रऽचोदिता ।
वाक् । विदा ! माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati ! you are equal to Brahma. As Word, you contain within you the universe. You contain the seed of Brahma also. Inspired by Him, you give birth to the universe. You are Vāk, the mother of the universe and you are the proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं ब्रह्मण: सद्वस्तुन: प्रतिमात्रा मात्रया समाना वाचा निजया वाचकशक्त्या विश्वं इदं जगत् अन्तः आत्मनि धत्से नामरूपात्मकं सर्वं धारयसि, तथा विश्वबीजात्मकं ब्रह्म च स्वान्तः सन्दधासि, निजमन्तरात्मकं इति भाव: ॥ तेन ब्रह्मणा प्रचोदिता प्रेरिता सती विश्वं इदं प्रसूषे, वाचः सकाशादेव अस्य विश्वस्य प्रसव: जननं प्रेरणं चेति यावत् ॥ अतः सा वागेव ब्रह्मणो माता प्रमात्री प्रमाणभूता तदस्तित्वादिबोधे, तथा विश्वस्यास्य जगतस्तु योनिः कारणभूता प्रसवित्री मातेति ॥ अत्र स "पूर्वया निविदा कव्यताऽऽयोरिमाः प्रजा अजनयन् मनूनाम्" इति (ऋ. मं. १-९६-२) ऋङ्मन्त्रवर्णः तदुपोद्बलको भवति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you are equal in measure to Brahma in everything. Certainly as Word you contain in yourself the universe which is manifest as name and form. Likewise, you hold in yourself Brahma, the seed of the universe. You bring forth, being directed by Him, this universe. It is from Vāk (the word) only that this universe is born and animated. Therefore the proof of Brahma is Vāk only, the only help by which to know Him. She is also the mother of this universe. See Ṛg. I-96-2.

## तृतीया ऋक् ।

सरस्वति त्वं माया प्रथमा माता
प्रति मिमीषे ब्रह्म चिताऽभिधा ॥
प्रत्यक्षं ब्रह्म सती ब्रह्मणा सम्मिता
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ ३ ॥

पदपाठ :— सरस्वति । त्वम् । माया । प्रथमा । माता ।
प्रति । मिमीषे । ब्रह्म । चिता । अभिऽधा ॥
प्रत्यक्षम् । ब्रह्म । सती । ब्रह्मणा । सम्ऽमिता ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati! you are Māyā, the first Śakti. As the first measurer, you measure out Brahma with your animating power and call him Brahma

( the great ). You are Brahma, the manifest, as you are associated with Him. You are Vāk, through your knowledge you are the mother of the universe and proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं माया आदिमा इन्द्रशक्तिः, " इन्द्रो मायाभिः पुरुरूप ईयते " ( ऋ. म. ६-४७-१८ ) इति मन्त्रवर्णात् ॥ अत एव प्रथमा माता प्रमात्री वागेव, तस्मात् चिता चेतनाशक्त्या तत् परं ब्रह्म प्रति मिमीषे स्वमानेन प्रमाणभूतेन, अभिधा अभिधया ब्रह्म इति तत्सञ्ज्ञया प्रमाणयसीति ॥ अतः त्वं प्रत्यक्षं ब्रह्मैव सती तेन परमेण ब्रह्मणा सम्मिता तत्समाना, सा वागेव ब्रह्मणः विदा संविदे च माता प्रमात्री, तथा विश्वस्य अस्य जगतः योनिः कारणभूता प्रसवित्री माता इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are Māyā, the first Indraśakti. Cf. " Indra moves in many forms on account of his Māyā " ( Ṛg. VI-47-18 ). Therefore, she is the first measurer of all things. With your animation or expressive power ( Ādiśakti ) you measure Him as you are as big as He and you name Him as Brahma. Therefore, you are indeed Brahma, the manifest and as such you are equated with Him. It is through Vāk only that we can measure Brahma. Likewise, she is the originator and mother of this universe.

## चतुर्थी ऋक् ।

सरस्वति त्वं सती ब्रह्म साक्षात्
परमन्तर्हितं ब्रह्म प्रज्ञानं त्वयि ॥
आविरभूत् तद् वाचो विश्वथा ब्रह्म
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ ४ ॥

पदपाठ :— सरस्वति । त्वम् । सती । ब्रह्म । साक्षात् ।
परम् । अन्तरिति । हितम् । ब्रह्म । प्रऽज्ञानम् । त्वयि ॥
आविः । अभूत् । तत् । वाचः । विश्वऽथा । ब्रह्म ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati ! you are the manifest Brahma and Brahma is contained in you as Prajñāna, profound wisdom. Brahma manifested Himself in omnifarious forms through you. You are Vāk, the mother of the universe and proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं साक्षात् ब्रह्मैव सती राजसे इति शेषः ॥ अत एव प्रज्ञानरूपं तत् परं ब्रह्म त्वयि वाक्सत्त्वायां अन्तर्हितम् गुप्ततया प्रतिष्ठितम्, तस्मात् त्वत्तः वाचः पराशक्तेः सकाशात् विश्वथा विश्वरूपेण तद् ब्रह्म स्वयं आविरभूत् सृष्टेः आदितः प्रादुर्बभूव इति तस्मात् हे वाक् ! सा त्वं ब्रह्मणो माता तदाविर्भावहेतुत्वात्, तथा तस्य विदा— तत्प्रज्ञानाय साधनभूतत्वात्, तथैव विश्वस्यापि जगतः त्वं योनिः प्रसवित्री इति ॥

### COMMENTARY--SUMMARY TRANSLATION

Oh Sarasvati ! you are Brahma Himself and you shine as such. Therefore, Brahma, the great shines in and through you. He is hidden in you as profound wisdom. Therefore, through you, the invisible Vāk, he manifests Himself as the manifold universe at the beginning of creation. It is Vāk only that can be the measure of Brahma because it is through Vāk that He manifested Himself and again it is through her instrumentality as profound wisdom that He can be realised. Likewise, she is the mother of the universe.

## पञ्चमी ऋक् ।

सरस्वति त्वं विश्वस्यास्य प्रसूत्यै
तद् वृणुषे ब्रह्म पूरुषं पतिम् ॥
संविदा स्वं भावयसि प्रतिरूपं
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ ५ ॥

पदपाठः— सरस्वति । त्वम् । विश्वस्य । अस्य । प्रऽसूत्यै ।
तत् । वृणुषे । ब्रह्म । पुरुषम् । पतिम् ॥
सम्ऽविदा । स्वम् । भावयासि । प्रतिऽरूपं ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati ! to give birth to this universe, you accept Brahma, the pervader, as your Lord. By your intelligence you know Him as being like yourself. You are the mother of this universe and proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं विश्वस्यापि अस्य जगतः प्रसूत्यै प्रसवार्थं स्वं पुरुषं परं ब्रह्मात्मकं पतिं चेतनात्मानं वृणुषे स्वीकरोषि इति भावः, तथा संविदा तं स्वं प्रतिरूपं सगुणं सर्वगुणपूर्णं भावयसि, निर्गुणं निर्विशेषमपि तत् परं ब्रह्म वाचैव सगुणं सविशेषं सम्भाव्यते, प्रतिबुध्यते च इति यावत् , ततः सा वागेव ब्रह्मणो माता तस्य विदा संविदे च प्रमात्री सती विश्वस्यापि जगतः अस्य प्रसवित्री योनिः कारणभूता इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! to mother this universe you accept as your Lord the Supreme Brahma. By your intelligence, you transform the Brahma who is without form and attributes into an embodied being full of attributes. He is in essence attributeless and without individuality ( Nirviśesha ). you make him an individual and full of attributes. The incognizable becomes cogniza- ble when associated with you. Therefore, you are indeed the measure of Brahma. You are the mother of this universe and proof of Brahma.

## षष्ठी ऋक् ।

सरस्वति त्वं ब्रह्मणे स्वमात्मानं
संविदाऽर्पयसि ब्रह्म सङ्गमध्यै ॥
च्यावयसि ब्रह्मचितिं प्रति त्वयि
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ ६ ॥

पदपाठ :— सरस्वति । त्वम् । ब्रह्मणे । स्वम् । आत्मानम् ।
सम्ऽविदा । अर्पयसि । ब्रह्म । सम् । गमध्यै ॥
च्यावयसि । ब्रह्मऽचितिम् । प्रति । त्वयि ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati ! through your intelligence, you offer yourself to Brahma to be united with Him. You attract unto yourself His animating power. You are Vāk, the mother of this universe and the proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं तस्मै स्वस्मै परस्मै ब्रह्मणे ब्रह्मात्मने स्वपतये स्वं सर्वस्वं निजं आत्मानमपि संविदा समर्पयसि, तत्परमानन्दानुभावार्थं च तद् ब्रह्म वस्तु सङ्गमध्यै

सङ्गन्तुम् इति, अत्र "तुमर्थे से सेनसे" इति (पा. सू. ३-४-९) गमधातोः तुमुन् अर्थे अध्यै प्रत्ययान्तं पदं छान्दसम्, तथा ब्रह्मचितिं ब्रह्मणः चेतनाशक्तिं त्वयि वाचि प्रति च्यावयसि प्रत्यञ्चि समाकर्षयसि जगद्बीजरूपेण सङ्गृण्हासि, अतः हे वाक्! सा त्वं ब्रह्मणः माता प्रमात्री विदा— तत्संविदे च प्रमाणभूता, तथा विश्वस्य जगतः अपि प्रसवित्री योनिः कारणभूता इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! to Brahma, the great, who is your husband, you offer your all to unite with Him entirely (the word ending in 'Adhyai' means an infinitive, Panini, 3-4-9). Likewise, His animating power, you attract to yourself, in the form of the seed of this universe. So, you are Vāk, the measure of Brahma and the mother of this universe.

## सप्तमी ऋक् ।

सरस्वति त्वं संविदा कामेनोत
कर्मणा पूर्णा पुरुषस्य चित्तिभिः ॥
विश्वविद् विश्वकामा त्वं विश्वकर्मा
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ ७ ॥

पदपाठ :– सरस्वति । त्वम् । सम्ऽविदा । कामेन । उत ।
कर्मणा । पूर्णा । पुरुषस्य । चित्तिऽभिः ॥
विश्वऽवित् । विश्वऽकामा । त्वम् । विश्वऽकर्मा ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati! in knowledge, in the power of desire and in the power to act, you are full of the powers of Brahma. You are all-knowing, all-desiring and all-doing. You are Vāk, mother of the universe and proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं संविदा सम्यग् ज्ञानेन ज्ञानशक्त्या कामेन इच्छया कर्मणा क्रियाशक्त्या च पूर्णा, तथा पुरुषस्य तस्य चित्तिभिः चेतनाशक्तिभिः अपि पूर्णा, अत एव त्व विश्ववित् सर्वज्ञानशक्तिपूर्णा, विश्वकामा सर्वकामनाशक्तिपूर्णा, विश्वकर्मा सर्वक्रियाशक्तिपूर्णा च सती ब्रह्मवस्तुसमाना भवसि इति यावत्, तस्मात् हे वाक्! सा त्वं ब्रह्मणो माता प्रमात्री

विदा—संविदे हेतुभूता, तथा विश्वस्यास्य जगतः योनिः प्रसवित्री च इति ॥ अत्रायं विशेषः —सा वागेव विश्वस्य माता जननी, तथा ब्रह्मणः विदा-संविदे च योनिः तद्विज्ञानकारणीभूता प्रत्यक्षप्रमाणरूपा च वागेव भवितुमर्हति तस्मात् सा माता इत्यपि योजयितुं शक्यम्, तेन "शास्त्रयोनित्वात्" इति (ब्र. सू. १-१-३) सूत्राधिकरणार्थः सङ्गच्छते इति ॥ तथा च शारीरकं भाष्यवचनम् — "अथवा यथोक्तं ऋग्वेदादिशास्त्रं योनिः कारणं प्रमाणं तस्य ब्रह्मणो यथावत् स्वरूपाधिगमे, शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्म अधिगम्यते इत्यभिप्रायः" इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! in knowledge, in the power of desire, in the power to act, you are full of His faculties. You are full of the power of knowing, power of desiring, and power of doing everything; and so, you are His equal in everything. Therefore, you are indeed, Vāk, the measure of Brahma and the mother of all this universe.

## अष्टमी ऋक् ।

सरस्वति त्वमदितिः परं व्योम
वाचाऽवं शिष्टं त्वयि विश्वमेतत् ॥
ब्रह्मणा गर्भे विश्वं तदु धत्से बीजं
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ ८ ॥

पदपाठः— सरस्वति । त्वम् । अदितिः । परम् । विऽओम ।
वाचा । अवं । शिष्टम् । त्वयि । विश्वम् । एतत् ॥
ब्रह्मणा । गर्भे । विश्वम् । तत् । ऊम् इति । धत्से । बीजम् ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati ! you are Aditi ( the Mother ) and the sky beyond. This whole universe dwells in you in the form of Word ( even before creation ). From Brahma you receive in your womb the seed of this universe. You are Vāk, the mother of the universe and proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं परमव्योमात्मिका अदितिः आदिमाता, अतः त्वयि अखण्डात्मिकायां अदितौ परमे व्योमनि एतद् विश्वं जगत् वाचैव वाग्रूपेणैव अवशिष्टं सृष्टेः प्रागपि

नाममात्रेण अवशिष्टं बभूव इति यावत्, ब्रह्मणा तेन प्रेरिता सती नामात्मकं तद् विश्वबीजं बीजरूपं विश्वं वा निजे गर्भे बिभर्षि, तस्मात् हे वाक् ! सा त्वं ब्रह्मण: विदा—संविदे च माता प्रमात्री, तथा विश्वस्यास्य जगतो योनिस्वरूपा प्रसवित्री च भवसि इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the supreme sky and Aditi, the original mother. So, in you Aditi, the visible and the invisible sky and this universe dwell as word, and remain as word only, even before creation. The universe was with you as word only. Directed by Brahma, you bear in your womb, the universal seed in the form of word. That word is the embryo of this universe. Therefore, you are the measure of Brahma and the mother of this universe.

## नवमी ऋक् ।

सरस्वति त्वं धात्री विश्वस्य नाभि-
र्वाच एव विश्वमाविरिदं बभूव ॥
वाचा विश्वं जीवत्युप वाचं प्रैति
वाग् विदा माता विश्वस्य ब्रह्मणो योनिः ॥ ९ ॥

पदपाठ :– सरस्वति । त्वम् । धात्री । विश्वस्य । नाभिः ।
वाचः । एव । विश्वम् । आविः । इदम् । बभूव ॥
वाचा । विश्वम् । जीवति । उप । वाचम् । प्र । एति ।
वाक् । विदा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati ! you are the mother, bearing within yourself this universe; and you are the navel of this universe. This universe manifested itself by and through word only. By word it lives and at the end it enters into the word. You are Vāk, the mother of the universe and proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं विश्वस्य जगत: अस्य धात्री धरित्री धारयित्री च नाभि: मूला आधारशक्तिरूपा, तस्मात् वाच एव सकाशात् इदं विश्वं आदिसृष्टौ आविर्बभूव इति श्रूयते, तथा तया वाचैव परया शक्त्या इदं विश्वं जीवति, सम्प्रति आ प्रलयं च इत: परं वाग्रसेनैव प्राणिति जीविष्यति च, तथा पुनरन्ते इदं सर्वं जगत् वाचं स्वां स्वां सञ्ज्ञात्मिकां उपैति

वाचमेव प्रतिप्रविशति, तदेवास्य नामावशेषत्वमिति भावः, तस्मात् सा वागेव ब्रह्मणो माता विद्रा—ज्ञानेन ज्ञानार्थं च प्रमात्री, तथा विश्वस्यास्य जगतः योनिः प्रसवित्री इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you create this universe, and you are the cause of its maintenance. You are the central force. Therefore, we hear that the first creation was from Vāk. From the very force of Vāk which is superior to all, the universe comes into being, lives now and in future, till its dissolution; it lives being fed by the essence of the Word. Again at last, this whole universe will crumble and get reabsorbed into the very word out of which it came and will remain by name only ( Nāmāvaśesha ). So, it is the word that is the measure of Brahma and the mother of this universe.

## दशमी ऋक् ।

सरस्वति त्वं भर्त्री विश्वस्य बीज-
माविर्हितं तद् वाचा प्राणभृदेतत् ॥
पद्यते विश्वं प्रत्यभिधां स्वां वाचं
वाग् विद्रा माता विश्वस्य ब्रह्मणो योनिः ॥ १० ॥

पद्पाठ :— सरस्वति । त्वम् । भर्त्री । विश्वस्य । बीजम् ।
आविः । हितम् । तत् । वाचा । प्राणऽभृत् । एतत् ॥
पद्यते । विश्वम् । प्रति । अभिऽधाम् । स्वाम् । वाचम् ।
वाक् । विद्रा । माता । विश्वस्य । ब्रह्मणः । योनिः ॥

Oh Sarasvati! you are the supporter of the universe. The universe in the form of word and meaning is manifested by you. This universe merges into the Word which is its name. You are Vāk, the mother of the universe and proof of Brahma.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं विश्वस्य जगतः भर्त्री धारयित्री, ततः विश्वस्य बीजरूपं नामरूपात्मकं एतत् प्राणभृदेव सत् विश्वं वाचैव आविर्हितम् प्रकटितम्, अतः इदं विश्वं स्वां स्वां निजां अभिधात्मिकां वाचमेव प्रतिपद्यते प्राप्नोति, तस्मात् सा वागेव ब्रह्मणो माता विद्रा ज्ञानेन प्रमात्री, तथा विश्वस्यास्य जगतः प्रसवित्री योनिः योनिस्थानीया मातृत्वसत्त्वपरिपूर्णा भवति इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the supporter and protector of this univere and it carries on by your power. Further, this universe, in its seed-form, which is name and form, is bearer of Prāṇa—animation. This universe came into being by Word only. At its dissolution, it is gathered back into its own name, which is again the Word. Therefore, you are indeed the measure of Brahma and the mother of this universe.

## एकादशी ऋक् ।

सरस्वति त्वं माता देवता परा
संविदा कामेन कर्मणा प्रपूर्णा ॥
विश्वविदं मां कुरु स्वं विश्वशक्तिं
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ११ ॥

पदपाठ :– सरस्वति । त्वम् । माता । देवता । परा ।
सम्ऽविदा । कामेन । कर्मणा । प्रऽपूर्णा ॥
विश्वऽविदम् । माम् । कुरु । स्वम् । विश्वऽशक्तिम् ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you are the Mother, the Goddess Supreme. You are full of knowledge ( Jñāna ), will to desire ( Kāma ) and action ( Karma ). Make me all-knowing and all-powerful like you. You are Vāk, the light par excellence which illumines the universe.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं माता, अत एव परा देवतात्मा असि, तस्मात् संविदा ज्ञानशक्त्या कामेन इच्छाशक्त्या कर्मणा क्रियाशक्त्या च त्वं पूर्णा असि, अत एवं त्वां प्रति याचे — मां त्वत्सुतं विश्वविदं सर्वज्ञं सर्वतत्त्ववेत्तारं तथा विश्वशक्तिं सर्वक्रियाकर्तृत्वशक्तियुक्तं कुरु सम्भावय, यतः सा त्वं परा वागेव विश्वस्य अस्य जगतः दर्शयत् प्रकाशकं ज्योतिः, तत्परञ्ज्योतिःस्वरूपा त्वं वाङ् माता इति ॥

॥ इति द्वितीयेऽनुवाके चतुर्थं सरस्वतीसूक्तम् समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the mother, the greatest goddess and are possessed of all possible powers, namely of intelligence, of will, and of action. You are the light which illumines the whole universe. The universe in known to us only on account of your power of knowing.

Thus ends the Fourth hymn in the Second Section.

---

अथ द्वितीयेऽनुवाके पञ्चमं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् ५ । ऋचः १–८ ।

सरस्वति त्वं प्रतीची अष्टौ, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, fifth in Second Anuvaka**

**Section II, Hymn 5, Riks 1–8–SARASVATĪ.**

This hymn beginning with 'Sarasvati tvam pratīchī' contains 8 Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Sarasvatī is the goddess and the metre is Jagatī.

अथ प्रथमा ऋक् ।

सरस्वति त्वं प्रतीची ब्रह्मणाऽऽत्मऽ–
श्रिता स्फुरसि ज्योतिषा संविदाना ॥
अननूच्याऽस्वराऽनिनदाऽनाहता
वाग् विदा प्रतिमाऽन्तर्ब्रह्मणः पूर्वा ॥ १ ॥

पद्पाठ :– सरस्वति । त्वम् । प्रतीची । ब्रह्मणा । आत्मन् ।
चिता । स्फुरसि । ज्योतिषा । सम्ऽविदाना ॥
अननूच्या । अस्वरा । अनिनदा । अनाहता ।
वाक् । विदा । प्रतिमा । अन्तरिति । ब्रह्मणः । पूर्वा ॥

Oh Sarasvati ! you are an introvert. Being united with Brahma, you shine within the inner-most souls of all with intelligence and light. You are inexpressible, soundless, vibrationless and you are uncaused by anything else. You are Vāk, the very primal form of the inner Bramha as consciousness.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं प्रतीची प्रत्यङ्मुखा सती ब्रह्मणा सह आत्मन् सर्वेषां अन्तरात्मनि चिता चेतनया ज्योतिषा च स्वयं संविदाना ज्ञानशक्तिप्रधाना सती स्फुरसि सञ्चेष्टसे, तस्याः इदं वास्तवं स्वरूपम्–अननूच्या वचनादिव्यापाररहिता, अस्वरा स्वरादिशून्या, अनिनदा नादादिसूक्ष्मध्वनिनाऽपि विरहिता, अनाहता आघातादिक्रियामन्तरेणाऽपि स्वतःसिद्धा, ब्रह्मात्मवत् इति, हे वाक्! सा त्वं ब्रह्मणः परमस्य आत्मनः अन्तः अन्तरङ्गात्मिका, विदा संविदा पूर्वा सर्वेभ्योऽपि प्राचीना अत एव प्रधाना प्रथमा च प्रतिमा प्रतीकरूपा तनूः असि इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! as an introvert ( introspective ) united with Brahma who is full of knowledge, you shine in the inner souls of all. This is your original state, in which you are inexpressible, that is incapable of being expressed in words. In that condition you have no sound whatever. You are not caused by any other agency. You are that Vāk, you are the first form of Brahma, who is consciousness itself.

## द्वितीया ऋक् ।

सरस्वति त्वं ब्रह्मणश्चितोदिता
नदतः प्रति ज्योतिषा नदस्यन्तः ॥
अक्षरं तदीं खे नदति ब्रह्म साक्षाद्
वाग् विदा प्रतिमाऽन्तर्ब्रह्मणः पूर्वा ॥ २ ॥

पद्पाठ :– सरस्वति । त्वम् । ब्रह्मणः । चिता । उत्ऽइता ।
नदतः । प्रति । ज्योतिषा । नदासि । अन्तारिति ॥
अक्षरम् । तत् । ईम् इति । खे । नदति । ब्रह्म । साक्षात् ।
वाक् । विदा । प्रतिऽमा । अन्तरिति । ब्रह्मणः । पूर्वा ॥

Oh Sarasvati ! you manifest yourself by His power of animation. He creates sound by His power of light and you reflect it back in the soul. The invisible Brahma creates the sound ĪM in the sky. You are Vāk, the very primal form of the inner Brahma as consciousness.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं तस्य ब्रह्मवस्तुनः चिता चेतनया शक्त्या उदिता सती नदतः शब्दायमानस्य तस्य ज्योतिषा सर्वेषां अन्तः प्रति नदसि प्रतिध्वनिरूपेण शब्दायसे इति यावत्, तत् परं ब्रह्म खे आकाशे साक्षात् नदति तव अव्यक्तवाग्रूपेण ध्वनति, तस्मात् सा वागेव तस्य ब्रह्मणः अन्तरङ्गरूपा विदा— संविदा सम्पन्ना सर्वेभ्योऽपि पूर्वा आन्तरतमा अभिधात्मिका प्रथमा पूर्णा प्रतिमा प्रत्यक्षा मूर्तिरेवेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are born by His power of animation and you take the form of sound. He makes sound by His power of light and you reflect it. That invisible Brahma creates sound in the form of names of things. You are in fact His full image or the visible form; Brahma is full of intelligent consciousness and you are His very reflection.

## तृतीया ऋक् ।

सरस्वति त्वमीं ब्रह्मचिता प्रति
स्फुरस्यरं सत्तमा सत्तया परि ॥
साम्ना स्वरस्यनु तपसा रसेन
वाग् विदा प्रतिमाऽन्तर्ब्रह्मणः पूर्वा ॥ ३ ॥

पदपाठः— सरस्वति । त्वम् । ईम् इति । ब्रह्मऽचिता । प्रति ।
स्फुरसि । अरम् । सत्ऽतमा । सत्तया । परि ॥
साम्ना । स्वरसि । अनु । तपसा । रसेन ।
वाक् । विदा । प्रतिऽमा । अन्तरिति । ब्रह्मणः । पूर्वा ॥

Oh Sarasvati ! you in the form of ĪM, vibrate by the animation of Brahma. Being the most truthful, you reflect Brahma in toto in the form of sound. By being in full harmony with Brahma and by your Tapas, you echo Brahma. You are Vāk; you are the very primal form of Brahma who is consciousness itself.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं 'ई' इति तत् परं ब्रह्म ब्रह्मरूपा सती चिता चेतनया सत्तमा अत्यन्तं सत्यस्वरूपा च सती सत्तया परि परितः अरं अलं पूर्णतया प्रति स्फुरसि, तथा स्वेन साम्ना

समानेन रसेन तत्सामरस्येन तपसा अनु स्वरसि स्वरात्मना स्वे पदे स्वः पदे परमे व्योमनि सदैव सञ्चरसि, हे वाक्! सा त्वं तस्य ब्रह्मणः विद्रा संविद्रा अन्तः आन्तर्या गुह्या पूर्वा प्रतिमा असि इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you in the form of ĪM, are certainly that great Brahma. By your animating power, you are the most truthful. On account of that, you reflect Him completely. Further, by your being in harmony with Brahma and by your Tapas, you always follow Him with your sound in the highest sky, which is your own region. You are indeed, Vāk, the secret and full primal image of Brahma.

## चतुर्थी ऋक् ।

सरस्वति त्वं परमे विद्युताऽन्त-
र्व्योमनि स्वरसीन्द्रचितिमजस्रम् ॥
सा दिव्या वीणा समीं नदति ब्रह्म
वाग् विद्रा प्रतिमा पुरुषस्य पूर्वा ॥ ४ ॥

पद्पाठः— सरस्वति । त्वम् । परमे । विऽद्युता । अन्तरिति ।
विऽओमनि । स्वरसि । इन्द्रऽचितिम् । अजस्रम् ॥
सा । दिव्या । वीणा । सम् ! ईम् इति । नदति । ब्रह्म ।
वाक् । विद्रा । प्रतिऽमा । पुरुषस्य । पूर्वा ॥

Oh Sarasvati! you are moving in the inner sky in the form of sound by the power of lightning; that is the mighty power of Indra. That is the divine lute which Brahma plays upon. That is ĪM. You are indeed that Vāk, the primal image of the primeval Purusha.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं स्वस्थाने परमे व्योमनि अन्तः गुप्तरूपेण अनुस्वारतः विद्युता विद्युच्छक्त्या इन्द्रचितिं इन्द्रस्य पारमैश्वर्यपूर्णस्य परमात्मनः चेतनां अजस्रं अनवरतं अविच्छेदेन स्वरसि उच्चरसि, सेत्र दिव्या वीणा 'ईं' इति चिन्नादानुकरणरूपेण तत् परं ब्रह्म वस्तु सम्यक् नदति अव्यक्तात्मना शब्दायते, तेनैव पुनः अव्यक्तेन निनदेन ब्रह्मणः सत्तां

प्रकाशयति प्रकटयति प्रति बोधयतीति यावत्, तस्मात् सा वागेव तस्य ब्रह्मात्मनः इन्द्रस्य इन्द्रात्मनः परमपुरुषस्य विदा संविदा ज्ञानशक्त्या प्रधाना पूर्वा सर्वेभ्यः प्राचीनतमा प्रतिमेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you in your original home-region, the high sky, create the primary sound without interruption by the power of lightning of Indra. That lightning is the divine lute. Brahma plays well upon it but he does it in an inaudible way. By that inaudible sound, Brahma's existence is indicated and manifested. You are indeed the full image of Brahma, and on account of your power of knowledge, you are the soul of the Great Person (Parama Purusha) who is the soul of Indra, the soul of Brahma.

## पञ्चमी ऋक् ।

सरस्वति त्वमीं प्रति मन्त्रयसे ।
ब्रह्म हृदाऽन्वमृतं पुरुषं सत्यम् ॥
बोधयसि प्रति वाचा प्रज्ञानं स्वं
वाग् विदा प्रतिमा पुरुषस्य पूर्वा ॥ ५ ॥

पदपाठ :- सरस्वति । त्वम् । ईम् इति । प्रति । मन्त्रयसे ।
ब्रह्म । हृदा । अनु । अमृतम् । पुरुषम् । सत्यम् ॥
बोधयसि । प्रति । वाचा । प्रऽज्ञानम् । स्वम् ।
वाक् । विदा । प्रतिऽमा । पुरुषस्य । पूर्वा ॥

Oh Sarasvati ! you repeat the mantra ĪM most heartily, which is Brahma the immortal, all-pervading, eternal Truth. You teach your deep knowledge through words. You are indeed Vāk, the primal image of the primeval Purusha.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं तत् परं ब्रह्म 'ई' इति मन्त्रयसे, तथा प्रति प्रत्युत तत्सम्मन्त्रणेन छन्दसा मन्त्रवत् आचरसि,–प्रजपसि इति भावः, तत ब्रह्म, अक्षरं अनु अनुसृत्य अमृत अनन्तं सत्यं पुरुषं बोधयसि परेभ्यः ज्ञापयसि, तथैव सूक्ष्मया तया परया वाचा स्वं निजं स्वानुभावसिद्धं प्रज्ञानं प्रति बोधयसि सर्वेभ्यः, तदेवेदं वाचः स्वतः सिद्धं मरमं सामर्थ्यं,–

यत् परोक्षस्यापि अर्थस्य साक्षात् समर्थनम्, अत एव सा वाक् वाचकशक्तिरूपा सती तस्य ब्रह्मात्मनः परमपुरुषस्य विदा संवित्प्रधाना सर्वेभ्यः पूर्वा प्राचीनतमा सञ्ज्ञात्मिका प्रथमा प्रतिमा इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you repeat the mantra ĪM which is Brahma. Following that Brahma, the immortal, infinite, eternal Purusha, you teach the Truth. Likewise, through very subtle words, you convey your sound knowledge to all. That is your innate capacity which manifests itself in giving the knowledge of Him who is beyond the senses. Therefore, you are Vāk, the interpreting power. She is the first expression of Brahma and is of the nature of full intelligence.

## षष्ठी ऋक् ।

सरस्वति त्वं भूतेषु विश्वेष्वा
देवेष्वात्मसूत दिव्येषु धामसु ॥
ज्योतिषैवानु स्वरसि प्रति भद्रा
वाग् विदा प्रतिमा पुरुषस्य पूर्वा ॥ ६ ॥

पद्पाठ :– सरस्वति । त्वम् । भूतेषु । विश्वेषु । आ ।
देवेषु । आत्मऽसु । उत । दिव्येषु । धामऽसु ॥
ज्योतिषा । एव । अनु । स्वरसि । प्रति । भद्रा ।
वाक् । विदा । प्रतिऽमा । पुरुषस्य । पूर्वा ॥

Oh Sarasvati! you move in the form of sound in all things, in the universes, in all divine beings, in all individual souls and in divine regions in the form of light only. You are indeed the auspicious Vāk, the primal image of the primeval Purusha.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं विश्वेषु भूतेषु एतेषु प्रत्यक्षेषु आकाशादिषु सर्वेषु देवेषु परोक्षसिद्धेषु तथा आत्मसु अपरोक्षेषु आन्तर्येषु जीवेषु उत दिव्येषु धामसु भूर्भुवः स्वः प्रभृतिषु भुवनेषु अपि आ समन्तात् सर्वतः ज्योतिषा स्वरूपेण भद्रा मङ्गलमयी बलीयसी च सती प्रति प्रतिध्वनिरूपेण अनुस्वरसि शब्दायसे, अतः हे वाक्! त्वं तस्य पुरुषस्य संवित्प्रधाना सर्वतः प्रथमा पतिमा इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! the auspicious one, you move vigorously in all things that are visible in all divine beings that are invisible and in the divine regions like the sky, in the form of your light which pervades all-round. You move as sound which is the echo of Brahma. You are indeed Vāk, the primal image of Purusha. Intelligence is your characteristic.

सप्तमी ऋक् ।

सरस्वति त्वं सुतर्मा नौः सुशर्मा
नौरिवास्माँस्तारयसीह पारम् ॥
त्वं तारा सती त्वं सन्तरणी परा
वाग् विदा प्रतिमा पुरुषस्य पूर्वा ॥ ७ ॥

पदपाठ :– सरस्वति । त्वम् । सुऽतर्मा । नौः । सुऽशर्मा ।
नौःऽइव । अस्मान् । तारयसि । इह । पारम् ॥
त्वम् । तारा । सती । त्वम् । सम्ऽतरणी । परा ।
वाक् । विदा । प्रतिऽमा । पुरुषस्य । पूर्वा ॥

Oh Sarasvati ! you are a good ferry boat. You give us happiness by taking us across to the other bank. You help us to cross over. You are the best boat. You are indeed Vāk, the primeval image of the primeval Purusha.

अन्वयभाष्यम् ।

हे सरस्वति ! त्वं सुतर्मा सुष्ठुतारयित्री नौः नौका, सुशर्मा सुष्ठु सुखकरी सती अस्मान् सर्वान् प्राणभृतः नौरिव नौकेव पारं तारयसि इह परं पारं नयसि इति यावत्, अत एव त्वं तारा नामतो रूपतः गुणतः क्रियया च तत्तदनुरूपेण सती सत्स्वरूपा त्वं सन्तरणी तारका परा समर्था सर्वत्र प्रभवसि, तस्मात् सा त्वं वागेव पुरुषस्य तस्य ज्ञानप्रधाना प्रथमा प्रतिमा इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are a good boat which takes us over to the other side of life and gives us happiness. You help us to cross over this life to the other bank that is beyond life, like a good boat. Therefore, you are real Tārā, one who takes us to the other side; you are Tārā by name, form, nature and function. You bring us final release. Therefore, you are indeed Vāk, the primal image of primeval Purusha.

## अष्टमी ऋक्

सरस्वति त्वं वस्तु विश्वतस्परं
ब्रह्मेत्येवाभि धत्से शक्त्या स्वया ॥
प्रमात्री त्वं प्रतिमा माता ब्रह्मणो
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठ :— सरस्वति । त्वम् । वस्तु । विश्वतः । परम् ।
ब्रह्म । इति । एव । अभि । धत्से । शक्त्या । स्वया ॥
प्रऽमात्री । त्वम् । प्रतिऽमा । माता । ब्रह्मणः ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you are all-pervading. With your power of expression, you give us the knowledge of that which is beyond the universe, namely Brahma. You are His proof, you are His image, you are His measure. You are indeed Vāk, the light that illumines the universe.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं विश्वतः अस्मात् सर्वस्मात् परि उपरि परतः परोक्षतया प्रतिष्ठितम्, तथा परितः सर्वतः अत्र व्याप्तम्, तत् परं अप्रत्यक्षमपि सद् वस्तु शक्त्या सामर्थ्येन वाचकत्वसत्त्वेन युक्ता पूर्णा सती ब्रह्म इति शब्देन अभिधत्से सञ्ज्ञापयसि, तस्मात् हे वाक् ! सा त्वं ब्रह्मणः परोक्षस्यापि तस्य सद्वस्तुनः प्रमात्री प्रमाणभूता, प्रतिमा प्रतीकरूपा माता तद्विज्ञानादिसत्त्वाभ्युदयकारणभूता सा परा वागेव विश्वस्य अस्य दर्शयत् प्रकाशकं ज्योतिः, तथा तत्परञ्ज्योतिःस्वरूपा वाक् इति च तस्याः सरस्वत्याः वाग्देवतायाः पराशक्तेः परमं मातृत्वस्वरूपतत्त्वं नित्यं वस्तुसिद्धमिति ॥

॥ इति द्वितीयेऽनुवाके पञ्चमं सरस्वतीसूक्तम् समाप्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you who are full of expressive power, declare the Thing beyond this universe as Brahma. Though the Thing is beyond the reach of the senses, you express It in words as Brahma. You possess such power. Therefore, you are the proof of that invisible Thing. You are Brahma's image; you are Mātā–the source of knowledge leading to Him. You are that invisible Vāk, the light par excellence, that illumines all.

Thus ends the fifth hymn in the second Section.

## अथ द्वितीयेऽनुवाके षष्ठं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् ६ । ऋचः १-११ ।

सरस्वति त्वं छन्दसा एकादश, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, sixth in Second Anuvaka**

**Section II, Hymn 6, Riks 1-11-SARASVATĪ**

This Hymn beginning with 'Sarasvati tvam Chhandasā' contains eleven Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Sarasvatī is the goddess and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

सरस्वति त्वं छन्दसा छन्दस्वती
स्वरवती साम्ना तेजसा तेजस्वती ॥
ज्योतिरेवानु स्वरसिच्छन्दः परं
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ १ ॥

पदपाठः— सरस्वति । त्वम् । छन्दसा । छन्दस्वती ।
स्वरऽवती । साम्ना । तेजसा । तेजस्वती ॥
ज्योतिः । एव । अनु । स्वरसि । छन्दः । परम् ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati ! you are one with poetical metres and so you are full of metrical form. Being one with the Sāma ( Sāma Veda ) sounds, you are full of songs. You are brilliant, being one with brilliance. Through the use of metre, you are as it were giving expression to the light of knowledge. Oh Vāk, by your knowledge, you are Brahma and the very source of all knowledge.

### अन्वयभाष्यम् ।

हे सरस्वति ! त्वं छन्दसा गायत्रादिना संहिता सती छन्दस्वती मन्त्रात्मिका भवसि, तथा स्वयं नित्यसिद्धा इति भावः, साम्ना सामस्वरेण स्वरवती इति प्रसिद्धा, तेजसा युक्ता तेजस्वती ज्योतिर्मयी, अतः तत् ज्योतिरेव अनुसृत्य छन्दः गायत्रादिकं अनुस्वरसि, तथैव तत् छन्दः अनुसृत्य तेन छन्दोमुखेन तत् परं ज्योतिरपि अनु स्वरसि इति भावः, तस्मात् हे वाक् ! सा त्वं विदा ज्ञानेन वरं वरणीयं श्रेष्ठं ब्रह्म, अतः सर्वस्याः संविदः योनिः कारण-भूता प्रसवित्री वागेव भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! being associated with the metres Gāyatrī and others, you are metre itself. You are full of song, being yourself one with Sāma. You are full of brilliance, being one with it. You follow the light of knowledge and you compose and utter metres. Likewise, following the metres, you express through them the light divine, though it is invisible. So, you who are the Vāk, are certainly Brahma and the mother of all knowledge.

## द्वितीया ऋक् ।

सरस्वति त्वं परो वेदः संविदा
छन्दसा च ब्रह्मणा त्वं विश्ववेदाः ॥
वाचा वेदयसे ब्रह्मोत विश्वं
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ २ ॥

पदपाठ :— सरस्वति । त्वम् । परः । वेदः । सम्ऽविदा ।
छन्दसा । च । ब्रह्मणा । त्वम् । विश्वऽवेदाः ॥
वाचा । वेदयसे । ब्रह्म । उत । विश्वम् ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati ! on account of your deep knowledge you are the great Veda. On account of your handling of metres and your knowledge of Brahma, you are omniscient. You let us know the unseen Brahma through words and also give the knowledge of the universe which is seen. Oh Vāk, by your knowledge, you are Brahma and the very source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं संविदा ज्ञानशक्त्या परः श्रेष्ठः वेदः वेदस्वरूपा छन्दसा गायत्रादिना तत्संहितेन ब्रह्मणा परमेण वस्तुना मन्त्रेण च त्वं वाग् देवतात्मा विश्ववेदाः सर्वज्ञा सर्वज्ञान-सत्त्वपूर्णा असि, तस्मात् तया वाचा परोक्षं तद् ब्रह्मवस्तु वेदयसे बोधयसि, तथा विश्वं इदं प्रत्यक्षसिद्धं ज्ञापयसि, अतः हे वाक् ! सा त्वं विदा वरं वरणीयं श्रेष्ठं प्रत्यक्षं ब्रह्मैव सती सर्वस्याः अपि संविदः कारणभूता प्रभवसीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you by the power of knowledge are the great Veda. By your knowledge of mantra and metres, you are omniscient. Therefore, you

are able to teach about the invisible Brahma, the Thing Supreme and also about the visible universe by means of words. Through knowledge, Vāk certainly is Brahma and the source of knowledge also.

## तृतीया ऋक् ।

सरस्वति त्वमृग्भिऋक्वती सती
सामवती साम्ना यजुषा यजुष्मती ॥
रसेन ब्रह्मणाऽऽत्मना रसवती
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ ३ ॥

पदपाठ :— सरस्वति । त्वम् । ऋक्ऽभिः । ऋक्वती । सती ।
सामऽवती । साम्ना । यजुषा । यजुष्मती ॥
रसेन । ब्रह्मणा । आत्मना । रसऽवती ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati ! you are Ṛkvatī, that is one with Ṛks, i. e. Ṛgveda Mantras, Sāmavatī with Sāma Mantras and Yajushmatī with Yajurveda Mantras. You are full of joy as you are one with Brahma and Ātma, the Soul. Oh Vāk, by your knowledge you are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं ऋग्भिः संहिता सती ऋक्वती सिद्धा, साम्ना गीतिस्वरादिना युक्ता सामवती सम्पन्ना, तथा यजुषा सह योगेन यजुष्मती संवृत्ता, एवं सा वागेव मूलतः स्वयं एकरूपाऽपि येन येन संयुज्यते तत्तत्स्वरूपैव भवतीति सम्पद्यते, रसेन प्रेम्णा संविद्रसेन आनन्दप्रशान्त्यादिना, तथा ब्रह्मणा व्यापकेन आत्मना आन्तयण चेतनेन वस्तुना च सङ्गता सती तत्तद्रससत्त्ववती तथा ब्रह्मण्वती आत्मन्वती च भवति, तस्मात् सा वागेव प्रत्यक्षब्रह्मरूपा सती विदा ज्ञानेन ज्ञानाय च वरं वरणीयं ब्रह्मैव सत् सर्वस्याः अपि संविदः योनिः प्रसवित्री भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you with Ṛks i. e. Ṛgveda Mantras are Ṛkvatī, with Sāma Mantras you are Sāmavatī, and in association with Yajurveda Mantras you are Yajushmatī. Thus Vāk has the capacity to become that with which

she is associated. By love and bliss of knowledge, you are one with Brahma, the pervader, and also with the individual soul. You thus become Brahmaṇvatī and Ātmanvatī. Therefore, Vāk is Brahma in the visible form and she is the source of all knowledge.

## चतुर्थी ऋक् ।

सरस्वति त्वं निनदो विश्वतस्परि
भूतान्यनु ध्वनयसि प्रति स्वयम् ॥
उत तन्त्रीषु दुन्दुभावनु नदसि
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ ४ ॥

पदपाठ :– सरस्वति । त्वम् । निऽनदः । विश्वतः । परि ।
भूतानि । अनु । ध्वनयसि । प्रति । स्वयम् ॥
उत । तन्त्रीषु । दुन्दुभौ । अनु । नदसि ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati ! you are the fine and indistinct sound. You pervade the whole universe. You yourself give the voice, that is the power to speak, to all in the universe. You express yourself also through the string-instruments, drums etc. Oh Vāk, by your knowledge you are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं निनदः स्वयं अव्यक्तनादब्रह्मस्वरूपा "णद् अव्यक्ते शब्दे" (भ्वा. ५-९) इति धात्वर्थयोगसिद्धा, विश्वतः सर्वस्मात् परि उपरि परितश्च अनु भूतानि निजानुभूतानि अर्थजातानि भूतानि आकाशादीनि च अनुसृत्य प्रतिध्वनयसि प्रतिध्वनिरूपेण प्रकाशसे प्रकाशयसि च तानि इति भावः ॥ उत च तन्त्रीषु वीणादिषु दुन्दुभौ डमरुप्रभृतिषु च अनुनदसि अभिव्यज्यसे, अतः हे वाक् ! सा त्वं विदा वरणीयं प्रत्यक्षं ब्रह्म, तथा सर्वस्यापि ज्ञानस्य योनिः प्रसवित्री कारणीभूता माता इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the inaudible sound itself. You are everywhere, above and also around. You give expression to what you experience. Further, you are heard as sound in string-instruments, drums etc. You are indeed Vāk, Brahma the most excellent and the very cause of knowledge.

## पञ्चमी ऋक् ।

सरस्वति त्वमीं नदसीह गुह्यं
ज्योतिषाऽऽत्मन्यन्तर्हिता परा धीभ्यः ॥
तत् ते सत्यं गुह्यं नामोत मन्त्रो
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ ५ ॥

पदपाठ :— सरस्वति । त्वम् । ईं इति । नदसि । इह । गुह्यम् ।
ज्योतिषा । आत्मनि । अन्तरिति । हिता । परा । धीभ्यः ॥
तत् । ते । सत्यम् । गुह्यम् । नाम । उत । मन्त्रः ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati! you express the secrets of this universe as ĪM. You are in the form of light of knowledge hidden in the Ātma, beyond the powers of the intellect. Your name ĪM is indeed real, though secret. It is in the form of a mantra. Oh Vāk, by your knowledge you are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं 'ईं' इति स्वरं तथा अक्षरं तद्वाच्यं वस्तु च इह भुवने ब्रह्माण्डे गुह्यं नदसि अव्यक्तशब्दब्रह्ममुखेन गुप्तरूपेण शब्दायसे, तथा ज्योतिषा वैद्युताग्निरूपेण अस्माकं सर्वेषां प्राणभृतां आत्मनि अन्तः चेतनात्मनि अन्तर्हिता गुप्ता सती धीभ्यः सर्वेन्द्रियवृत्तिभ्यः परा आन्तरतमा प्रतितिष्ठसि, अतः ते तव तत् ईं इति स्वरात्मकं एकाक्षरं गुह्यं गुप्तं सत्यं वास्तविकं नाम अभिधानं, मन्त्रः इति वेदे प्रसिद्धम्, तस्मात् हे वाक्! सा त्वं विदा वरणीयं अवलम्बनार्हं ब्रह्मैव असि, अतः सर्वस्याः संविदः प्रसवित्री कारणभूता माता इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you say ĪM. That is a secret sound, and signifies the Thing Supreme. In this universe you manifest yourself as Word. Likewise, you are as lightning in all of us. You are dwelling in the innermost hearts of all even beyond the powers of intellect. You are in the form of one lettered ĪM which is your secret and true name in the Veda. You are indeed Vāk, the Brahma, the best; you can be relied upon as the instrument of all knowledge.

## षष्ठी ऋक् ।

सरस्वति त्वमीं सदनु स्वरन्ती
ब्रह्म प्र णौष्योमिति ब्रह्मणाऽऽत्मनि ॥
अक्षरं तद् ब्रह्मणो बीजं विश्वस्य
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ ६ ॥

पद्पाठ :– सरस्वति । त्वम् । ईम् इति । सत् । अनु । स्वरन्ती ।
ब्रह्म । प्र । नौषि । ओम्ऽइति । इति । ब्रह्मणा । आत्मनि ॥
अक्षरं । तत् । ब्रह्मणः । बीजम् । विश्वस्य ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati ! you are ĪM, and you express the truth. You praise Brahma by the mantra OM within yourself. That letter is Brahma and is the seed of the universe. Oh Vâk, by your knowledge you are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं सत् सत्यस्वरूपं ईं इत्यनुकरणात्मकं ईङ्काररूपं स्वरं अनुसृत्य स्वरन्ती शब्दायमाना सती तत् परं ब्रह्म प्रणौषि प्रस्तौषि, ओमिति प्रसिद्धेन ब्रह्मात्मकेन मन्त्रेण आत्मनि स्वस्मिन्नेव अन्तः तत् प्रस्तौषीति पूर्वत्र अन्वयः, तत् अक्षरमेव ब्रह्मणो वाचकं विश्वस्यास्य जगतः बीजं मूलबीजरूपम्, तस्मात् सा वागेव विदा ज्ञानेन तथा ज्ञानार्थं च वरणीयं प्रत्यक्षं ब्रह्म, तस्मात् सर्वासां संविदां प्रसवित्री योनिः कारणभूता वागेव भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! following the Truth, you say ĪM. It is all praise of Brahma, the invisible. By that well-known mantra OM, you signify Brahma within yourself. That syllable is significant of Brahma, and further it is the original seed of this universe. You are Vâk, you express Bramha, the source of all knowledge.

## सप्तमी ऋक् ।

सरस्वति त्वमक्षरं ब्रह्म सत्यं
नैव क्षरसि ब्रह्मणा चिता परा ॥

तत् परमं प्रति बोधयसि च्छन्दसा
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ ७ ॥

पदपाठ :— सरस्वति । त्वम् । अक्षरम् । ब्रह्म । सत्यं ।
न । एव । क्षरसि । ब्रह्मणा । चिता । परा ॥
तत् । परमम् । प्रति । बोधयसि । छन्दसा ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati! you are Brahma, the indestructible and the true one in all respects. You are one with Brahma and you never move away from Him. You express the great truth of Brahma by metrical composition. Oh Vāk, you by your knowledge are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं अक्षरं वाच्यवाचकोभयसत्त्वपूर्णं परं अक्षरात्मकं सत्यात्मकं च ब्रह्म, नाम्ना रूपेण गुणेन धर्मेण कर्मणा च सरस्वत्याः अक्षरत्वं अनेन द्योत्यते, ब्रह्मणा चिदात्मना समन्विता सती त्वं नैव क्षरसि न विपरिणमसे स्वरूपेण, त्वं तत् स्वं आत्मीयं परमं ब्रह्मवस्तु प्रति प्रपादयसि वाचकत्वसामर्थ्यात्, याथार्थ्येन तत् समर्थयसीति भावः ॥ तस्मात् हे वाक्! सा त्वं विदा वरणीयं प्रत्यक्षं ब्रह्मैव स्वयं सती सर्वेषां ज्ञानानां प्रसवित्री कारणीभूता माता भवसीति ॥ अस्मिन्नर्थे उदाहृतं प्रमाणं इतः पूर्वमेव ॥ "गौरीर्मिमाय सलिलानि तक्षती" "सहस्राक्षरा परमे व्योमन्" इति "तस्याः समुद्रा अधि विक्षरन्ति ततः क्षरत्यक्षरम्" इति च ( ऋ. मं. १-१६४-४१-४२ )

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! on account of the intimate connection between both the expressible and the expression, you are Brahma itself, which is the indestructible truth. It is indicated that Sarasvatī is Aksharā ( that which never deteriorates ) in name, form, quality and function. You are always with Brahma, the very essence of intelligence and you are never separate from Him. You express Him by the imfinite capacity to express which you possess. Therefore, you are indeed Vāk, the manifest Brahma and you are the cause of all knowledge. The corroborative evidence is already quoted earlier ( " Gaurīrmimāya etc." Ṛg. I-164, 41 & 42 ).

## अष्टमी ऋक् ।

सरस्वति त्वमक्षरं सत् परमं
विश्वान्येवाक्षराणि त्वत् क्षरन्ति ॥
विश्वथा ब्रह्म वाचः संविदः क्षरति
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ ८ ॥

पदपाठः– सरस्वति । त्वम् । अक्षरम् । सत् । परमम् ।
विश्वानि । एव । अक्षराणि । त्वत् । क्षरन्ति ॥
विश्वऽथा । ब्रह्म । वाचः । सम्ऽविदः । क्षरति ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati ! you are the indestructible great truth. All these universes come out ( are expressed ) of you as well as all knowledge. Brahma the inexpressible is expressed in the form of the universes by your power of intelligence. Oh Vāk, you by your knowledge are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं स्वयं परमं अक्षरं वस्तु सदेव असि, तस्मात् त्वत् त्वत्तः विश्वानि अक्षराणि क्षरन्ति आविर्भवन्ति, तथा त्वत्तः एव सर्वाः संविदोऽपि क्षरन्ति वाङ्मुखेनैव सर्वेषां ज्ञानानां आविर्भावः इत्यर्थः ॥ तथा वाचः सकाशादेव ब्रह्म क्षरति अक्षरं निर्गुणमपि तद् ब्रह्म वस्तु वाचैव सगुणतामुपैतीति यावत्। वाचः एव विश्वमपि इदं क्षरति उत्पद्यते, तस्मात् सा वागेव ज्ञानेन वरणीयं ब्रह्म, अतः सर्वेषामपि सर्वस्मिन् अर्थे वागेव अवलम्बनार्हा सर्वस्याः अपि संविदः हेतुभूता सा वागेव भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you are the indestructible great truth. The universes issue from you because you alone can express them. All knowledge dawns through intelligence, words and speech. Even Brahma who is without name and form assumes them when manifested by speech as the universe. Vāk or speech is the source therefore of all knowledge.

## नवमी ऋक् ।

सरस्वति त्वं ज्योतिषा सदक्षरं
विश्वमेतत् क्षरति त्वदर्थतोऽभि ॥
क्षरद् विश्वं तदनु त्वं न क्षरसीह
वाग् विदा वरं ब्रह्म संविदो योनिः ॥ ९ ॥

पदपाठः— सरस्वति । त्वम् । ज्योतिषा । सत् । अक्षरम् ।
विश्वम् । एतत् । क्षरति । त्वत् । अर्थतः । अभि ॥
क्षरत् । विश्वम् । तत् । अनु । त्वम् । न । क्षरसि । इह ।
वाक् । विदा । वरम् । ब्रह्म । सम्ऽविदः । योनिः ॥

Oh Sarasvati ! you are the eternal flame of intelligence and are indestructible. This universe issues forth from you as meaning proceeds from the word. This universe is perishable but you remain imperishable. Oh Vāk, you by your intelligence are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं ज्योतिषा ज्योतिरात्मना सत् सत्यरूपं अक्षरं वस्तु सदेव असि, तस्माद् वाचकायाः त्वत् त्वत्तः त्वत्सकाशात् साक्षात् पदार्थरूपेण एतद् विश्वं क्षरति प्रजायते, तदिदं विश्वं क्षरत् क्षयोन्मुखं वस्तु अनुसृत्य त्वं इह सर्वस्यापि मूलबीजरूपा सती नैव क्षरसि न नश्यसि, नापि विपरिणमसे, निजरूपेण नाम्ना अवशिष्यसे इति यावत्, तस्मात् हे वाक् ! मातः सा त्वं विदा वरणीयं प्रत्यक्षं ब्रह्म, सर्वस्यापि ज्ञानस्य कारणमिति, वागेव सर्वज्ञान-प्रकाशकं आन्तर्यं परं करणमिति सम्पद्यते इति ॥

COMMENTARY--SUMMARY TRANSLATION

Oh Sarasvati ! you are the imperishable flame of intelligence. Universes issue forth from you like meanings from words. While universes perish, you, their source, are imperishable. It is by expressing in words that you create universes and everything in them. The word is the creator.

## दशमी ऋक् ।

सरस्वति त्वं प्रतिष्ठा विश्वस्येह
नाम्नैव वाचा शिष्यते विश्वं परि ॥
ज्योतिषा त्वदुदेति तद् वाचः पुन-
र्वाग् विदा वरं ब्रह्म संविदो योनिः ॥ १० ॥

पदपाठ :– सरस्वति । त्वम् । प्रतिऽस्था । विश्वस्य । इह ।
नाम्ना । एव । वाचा । शिष्यते । विश्वम् । परि ॥
ज्योतिषा । त्वत् । उत् । एति । तत् । वाचः । पुनरिति ।
वाक् । विदा । वरम् । ब्रह्म । संविदः । योनिः ॥

Oh Sarasvati ! you are the foundation or substratum of this universe. Evidently, it is in the form of words that the universe remains in a latent form ( even after physical destruction ). The universe again springs forth from the word by the power of your intelligence. Oh Vāk, you by your intelligence are Brahma and the source of all knowledge.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं विश्वस्यास्य जगतः प्रतिष्ठा आस्पदीभूता, तस्मात् सर्वमेतत् जगत् अन्ततः नाम्ना स्व-स्व-सञ्ज्ञात्मिकया वाचैव परिशिष्यते, विश्वस्य उपसंहृतावपि वागेव अवशिष्यते, यत् खलु नामशेषत्वमभ्युपैतीति प्रसिद्धम्, अथ पुनः प्रजायमानं सत् तदिदं विश्वं त्वत्तः वाच एव उदेति, ज्योतिषा ज्योतिर्मुखेनेति, तस्मात् सा वागेव विदा वरणीयं ब्रह्म, तथा सर्वस्या अपि संविदः प्रसवित्री योनिः मातृस्थानीयेति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the substratum of this universe, being responsible for it. Therefore, all this universe, even after destruction, continues in a subtle form as word, in the form of a symbol. Even when the universe ceases to exist, Vāk survives, which means that finally everything lives by name only. Again this whole universe rises from you, the word, by the power of light. Vāk is certainly the Brahma, the source of knowledge.

## एकादशी ऋक् ।

सरस्वति त्वं ब्रह्म सतीह साक्षाद्
अमृतं तत् सत्यं पूर्णमक्षरं परम् ॥
अक्षरं त्वत् क्षरति ब्रह्म विश्वथा
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ११ ॥

पदपाठ :– सरस्वति । त्वम् । ब्रह्म । सती । इह । साक्षात् ।
अमृतम् । तत् । सत्यम् । पूर्णम् । अक्षरम् । परम् ॥
अक्षरम् । त्वत् । क्षरति । ब्रह्म । विश्वऽथा ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you are Brahma Himself in this universe; you are the immortal and the truthful and the perfect one. Brahma, the imperishable, issues in the form of the universe from you. Vāk is the supreme light of intelligence which illumines the whole universe.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं इह लोके साक्षात् प्रत्यक्षं ब्रह्मैव सती अमृतं, अक्षरं, सत्यं इत्येवमादिलक्षणं तत् पूर्णं परमं ब्रह्मैव प्रति प्राप्तासि, त्वत् त्वत्तः वाचः एव तदक्षरं परं ब्रह्म विश्वथा विश्वतोरूपेण क्षरति नामरूपात्मना आविर्भवति । तस्मात् हे वाक् ! मातः ! सा त्वं परा वागेव विश्वस्यास्य जगतः दर्शयत् प्रकाशकं परं ज्योतिः, तत्परञ्ज्योतिः-स्वरूपा वाग् भवतीति ॥

॥ इति द्वितीयेऽनुवाके षष्ठं सरस्वतीसूक्तम् समाप्तम् ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! in this world you are evidently Brahma, the eternal in manifestation. You are truthful, immortal, imperishable. You are the one who attain Brahma, the perfect one. This Brahma, the invisible and imperishable assumes on account of you, omnifarious forms in this universe. Vāk is the light par excellence which illumines all and everything.

Thus ends the Sixth hymn in the Second Section.

---

## अथ द्वितीयेऽनुवाके सप्तमं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् ७ । ऋचः १-८ ।

सरस्वति त्वं व्याहरसीह अष्टौ, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, seventh in Second Anuvaka**

**Section II, Hymn 7, Riks 1-8 - SARASVATĪ**

This hymn beginning with ' Sarasvati tvam vyāharasiha ' contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Sarasvatī is the goddess and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

सरस्वति त्वं व्याहरसीह तिस्रो
भूर्भुवः स्वरिस्तपसा ज्योतिषा वाचः ॥
ताभिरिमाँल्लोकाञ्जनयसि त्रीन्
वाग् विदा प्रतिमानं विश्वस्याधि बीजम् ॥ १ ॥

पदपाठ :– सरस्वति । त्वम् । विऽआहरसि । इह । तिस्रः ।
भूः । भुवः । स्व१रिति स्वः । तपसा । ज्योतिषा । वाचः ॥
ताभिः । इमान् । लोकान् । जनयसि । त्रीन् ।
वाक् । विदा । प्रतिऽमानम् । विश्वस्य । अधि । बीजम् ॥

Oh Sarasvati ! you give expression to three words: Bhūḥ, Bhuvaḥ and Svaḥ, through the power of your tapas, light and speech. By them, you create these three worlds. You are Vāk, the measure and seed of this universe on account of your intelligence.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं स्वयं परा वाग् देवतात्मा सती आत्मनः तपसा ज्योतिषा च सह स्वीयाः वाचः तिस्रः व्याहरसि उच्चरसि, याः खलु " भूः भुवः स्वः " इति यजुर्मन्त्रात्मिकाः वेदे प्रसिद्धाः, ताभिरेव तिसृभिः व्याहृतिभिः इमान् पृथिवी – अन्तरिक्षं द्यौः इति त्रीन् लोकान् भुवनरूपान् जनयसि, व्याहृतेरुच्चारमात्रेण, " स भूरिति व्याहरद् भुवमसृजत " इत्यादि ब्राह्मणम्, तस्मात् सा वागेव विदा विश्वस्य जगतः प्रतिमानं समानं प्रमाणात्मकम्, तथा मूलं बीजं करणात्मकम्, अधि अधिष्ठानभूतं च भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! though you are yourself the transcendent Vāk, by your tapas and light, you give expression to the words Bhūḥ, Bhuvaḥ and Svaḥ, the Yajurmantras well known in the Vedas. By them, i. e., by mere uttering the mantras ( vyāhṛti ), you create these three worlds, this world, mid-air and sky. There is an authority in the Brāhmaṇa literature: " He said Bhūḥ and created this world. " Certainly, it is Vāk, the evidence of this universe and its fundamental seed.

## द्वितीया ऋक् ।

सरस्वति त्वममूं परिता दिवं-
मिमां पृथिवीं मध्यममन्तरिक्षम् ॥
ज्योतिष्मती राजते ज्योतिर्भिस्त्रिभि-
र्वाग् विदा प्रतिमानं विश्वस्याधि बीजम् ॥ २ ॥

पदपाठ :— सरस्वति । त्वम् । अमूम् । परि । इता । दिवम् ।
इमाम् । पृथिवीम् । मध्यमम् । अन्तरिक्षम् ॥
ज्योतिष्मती । राजते । ज्योतिःऽभिः । त्रिऽभिः ।
वाक् । विदा । प्रतिऽमानम् । विश्वस्य । अधि । बीजम् ॥

Oh Sarasvati ! you pervade the sky, this earth and the mid-air which is between them. You who are full of light shine in the three worlds. You are Vāk, the evidence and seed of this world.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं अमूं विप्रकृष्टां दिवं उत्तमां परीत्य व्याप्ता, उत अपि च इमां अवमां महीं, तथा मध्यमं तयोः सन्धिरूपं अन्तरिक्षं च व्याप्ता, तेन तद्भुवनत्रयाधिष्ठितैः त्रिभिः ज्योतिर्भिः सह अग्नि-विद्युत्-सूर्यरूपैः संहिता सती राजसे, अत एव त्वं ज्योतिष्मती इति प्रसिद्धा वेदे, तस्मात् हे वाक् ! सा त्वं अस्य विश्वस्य जगतः प्रतिमानं समानं मानात्मकं बीजं कारणम्, तथा अधि अधिकरणरूपं च स्वयं भवसीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you pervade the high sky and this world below and the mid-air in between. You shine with three lights in these three worlds. The lights are Agni, Vidyut and Sūrya – fire, lightning and sun. You are reputed as Jyotishmatī. You are Vāk, the evidence and seed of this universe.

## तृतीया ऋक् ।

सरस्वति त्वं दिवि श्रिता तपन्तं
तममुं सवितारमुत्तमं ज्योतिः ॥
सावित्री त्वं स्वरवती समुत्तमा
वाग् विदा प्रतिमानं विश्वस्याधि बीजम् ॥ ३ ॥

पदपाठ :— सरस्वति । त्वम् । दिवि । श्रिता । तपन्तम् ।
तम् । अमुम् । सवितारम् । उत्ऽतमम् । ज्योतिः ॥
सावित्री । त्वम् । स्वरऽवती । सं । उत्ऽतमा ।
वाक् । विदा । प्रतिऽमानम् । विश्वस्य । अधि । बीजम् ॥

Oh Sarasvati ! you resort to the great shining sun in the high sky. You are Sāvitrī, full of sound and you are the best. You are Vāk, the evidence and seed of this universe.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं दिवि तपन्तं तं स्वीयं अमुं सवितारं उत्तमं ज्योतिः ज्योतिरात्मानं श्रिता सती सावित्री सवितुः नाम-रूप-गुण-क्रियादिभिः सम्पन्नतरा स्वयमपि उत्तमा उत्तम-लोकाधिराज्ञी राजसे, तथा स्वरवती च सती प्रकाशसे, तस्मात् हे वाक्! सा त्वं अस्य विश्वस्य जगतः प्रतिमानं तुल्यं मानरूपं अधिष्ठानात्मकं च बीजं च स्वयं भवसीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you resort to that Sun, who is close to you. You shine with Him. You have His name, form, quality, function and other attributes. You shine as the queen of the high skies. You are Vāk, the evidence of the fundamental seed of this universe.

## चतुर्थी ऋक् ।

सरस्वति त्वं भुवि श्रिता ज्वलन्तं
तमिममग्निमवमं ज्योतिः स्वकम् ॥
अग्नायीयमवमा ज्योतिष्मती
वाग् विदा प्रतिमानं विश्वस्याधि बीजम् ॥ ४ ॥

पदपाठः– सरस्वति । त्वम् । भुवि । श्रिता । ज्वलन्तम् ।
तम् । इमम् । अग्निम् । अवमम् । ज्योतिः । स्वकम् ॥
अग्नायी । इयम् । अवमा । ज्योतिष्मती ।
वाक् । विदा । प्रतिऽमानम् । विश्वस्य । अधि । बीजम् ॥

Oh Sarasvati ! you resort to this burning fire here on earth, and you become the wife as it were, of Agni ( Agnāyī ) the earthly light. You are Vāk, the evidence and seed of the universe.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं अस्यां भुवि प्रत्यक्षं ज्वलन्तं स्वीयं इमं अवमं अधस्तनं ज्योतिः-स्वरूपं अग्निं श्रिता सती इयं अग्नायी अग्निजाया शक्तिः ज्योतिष्मती भवसि, अत्र आग्नेयं ज्योतिरेव वाचः स्वीयं रूपं भवति, "मुखादिन्द्रश्चाग्निश्च" ( ऋ॰ मं. १०-९०-१३ ), "मुखादग्निरजायत" (शु. य. सं. ३० ), "मुखाद् वाग् वाचोऽग्निः" (ऐ. उ. १-१-४ ), "अग्निर्वाग् भूत्वा मुखं प्राविशत्" (ऐ. उ. १-२-४ ) इति च ऋङ्मन्त्रवर्णः औपनिषदं वचनं च प्रमाणम् ॥ तस्मात् सा वागेव विदा अस्य विश्वस्य प्रतिमानं समानं प्रमाणभूतं अधिष्ठानात्मकं मूलं बीजं च भवतिति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you resort to Agni in this world, who is burning before our eyes. He is lowest among lights. You become Agnāyī, the wife or power of Agni. Here, the light of Agni is itself Vāk and so she assumes her own form. It is said, "from the mouth (of Brahma) Indra and Agni were born" (Ṛg. X-90-13), "from the mouth, Agni was born" (Śuk. Yaj. Sam. 30), "from the mouth Vāk and from Vāk Agni was born" (Ait. Up. 1-1-4), "Agni having assumed the form of speech entered the mouth" (Ait. Up. 1-2-4). It is Vāk, that is the evidence.

## पञ्चमी ऋक्।

सरस्वति स्वरसि त्वमिन्द्रेण प्रति
सङ्गच्छसे ज्योतिषाऽन्तरिक्षे चिता ॥
इन्द्राणी त्वं मध्यमा विद्युदमृता
वाग् विदा प्रतिमानं विश्वस्याधि बीजम् ॥ ५ ॥

पदपाठ :— सरस्वति। स्वरसि। त्वम्। इन्द्रेण। प्रति।
सम्। गच्छसे। ज्योतिषा। अन्तरिक्षे। चिता।
इन्द्राणी। मध्यमा। विऽद्युत्। अमृता।
वाक्। विदा। प्रतिऽमानम्। विश्वस्य। अधि। बीजम् ॥

Oh Sarasvati! you make sounds along with Indra and you join him as the light of lightning in the mid-air. You become Indrāṇī, the lightning and you are immortal in the mid-air. You are Vāk, the evidence and seed of this universe.

## अन्वयभाष्यम्।

हे सरस्वति! त्वं मध्यमे भुवने अन्तरिक्षे तदध्यक्षेण इन्द्रेण सह प्रति- स्वरसि प्रतिध्वनिरूपेण शब्दायसे, ज्योतिषा वैद्युतेन चिता चेतनेन च संगृहीता सती तेन सङ्गच्छसे, अतः त्वं मध्यमा विद्युद्रूपा अमृता देवतात्मिका इन्द्राणी तन्नामरूपादिभिः सम्पन्ना इन्द्रशक्तिः, तस्मात् सा वागेव विदा ज्ञानेन अस्य विश्वस्यापि जगतः प्रतिमानं तुल्यं मानात्मकं अधिष्ठानरूपं बीजं च भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you echo the sound of Indra in the mid-air. As lightning, you join him and so, you are a goddess of mid-air. You are immortal.

You are Indrāni, by name, form and the power of Indra. You are Vāk, the evidence and seed as well as the basis of this universe.

षष्ठी ऋक् ।

सरस्वति त्वं पवसे सह मरुता
पवमानेन सहसाऽन्तरिक्षे ॥
स्वरेण प्रति पर्येषि विश्वतो
वाग् विदा प्रतिमानं विश्वस्याधि बीजम् ॥ ६ ॥

पद्पाठ :– सरस्वति । त्वम् । पवसे । सह । मरुता ।
पवमानेन । सहसा । अन्तरिक्षे ।
स्वरेण । प्रति । परिऽएषि । विश्वतः ।
वाक् । विदा । प्रतिऽमानम् । विश्वस्य । अधि । बीजम् ॥

Oh Sarasvati! you blow with the blowing god Marut with great power in the mid-air. You pervade the universe with sound. You are Vāk, the evidence and seed of this universe.

अन्वयभाष्यम् ।

हे सरस्वति! त्वम् अन्तरिक्षे पवमानेन प्रवहता मरुता सह सहसा बलेन पवसे प्रवासि, तेन च प्रतिस्वरेण विश्वतः पर्येषि व्याप्नोषि, वायुना सहैव सस्वरा वागपि सर्वत्रापि प्रचलतीति भावः, तस्मात् सा वागेव विदा—विश्वस्य जगतः प्रतिमानं मानरूपं अधिष्ठानं बीजरूपं चेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! you blow fiercely in the mid-air with the blowing god Marut. You fill the universe with sound. Along with Vāyu, Vāk also moves all round. It is Vāk, which is the evidence and seed and the basis of this universe.

सप्तमी ऋक् ।

सरस्वति त्वं रुद्रेण विद्युतोप
संहिता स्वरसीह स्वथेनान्तः ॥
रुद्राणी मध्यमा गौरी गरीयसी
वाग् विदा प्रतिमानं विश्वस्याधि बीजम् ॥ ७ ॥

पद्पाठ :- सर॑स्वति । त्वम् । रु॒द्रेण॑ । वि॒ऽद्युता॑ । उ॒त ।
सम्ऽहि॑ता । स्वर॒सि । इ॒ह । र॒थेन॑ । अ॒न्तरि॑ति ॥
रु॒द्राणी । म॒ध्यमा । गौ॒री । ग॒रीयसी॑ ।
वाक् । वि॒दा । प्र॒तिमा॑नम् । विश्व॑स्य । अधि॑ । बीज॑म् ॥

Oh Sarasvati! resorting to Rudra, you along with lightning become the cause of sound. You are Rudrānī of the mid-air. You are the great Gaurī. You are Vāk, the evidence and seed of the universe.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं अन्तरिक्षे रुद्रेण अन्तरिक्षाध्यक्षेण विद्युता वैद्युतेन ज्योतिषा च संहिता सती स्वेन रुतेन स्वरेण स्वरसि, तेन सा त्वं रुद्राणी मध्यमा माध्यमिका गौरी नाम्ना गरीयसी गुणेन गुरुतमा, तस्मात् सा वागेव विदा विश्वस्यापि जगतः अधिष्ठानं बीजं च भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! resorting to Rudra, the lord of mid-air, and united with lightning, you cause sound to be produced. Then you become Rudrānī, the power of Rudra of the mid-air. You are Gaurī by name and superior by quality. Vāk is the proof and seed, the basis of this universe.

## अष्टमी ऋक्

सर॑स्वति॒ त्वं ति॒सृभि॑र्व्याहृ॑तिभिः
सं॒हि॑तो॒त ऋ॒ग्भिर्य॒जुर्भिः॒ साम॑भिः ॥
अ॒ग्निमु॒तेन्द्र॑मादि॒त्यं च॒ प्रत्यृ॒ता
वाक् प॑र॒मा ज्योति॒र्विश्व॑स्य दर्शयत् ॥ ८ ॥

पद्पाठ :- सर॑स्वति । त्वम् । ति॒सृऽभिः॑ । व्याहृ॒तिऽभिः॑ ।
सम्ऽहि॑ता । उ॒त । ऋ॒क्ऽभिः । य॒जुःऽभिः॑ । साम॑ऽभिः ॥
अ॒ग्निम् । उ॒त । इन्द्र॑म् । आ॒दि॒त्यम् । च॒ । प्रति॑ । ऋ॒ता ।
वाक् । प॒र॒मा । ज्योति॑ः । विश्व॑स्य । द॒र्शय॑त् ॥

Oh Sarasvati! you are associated with the three Vyāhṛtis—Bhūḥ, Bhuvaḥ and Svaḥ, and further with the three Vedas, Ṛk, Yajus and Sāma. You are one with Agni, Indra and Āditya. You are the great Vāk, the light par excellence, that illumines the universe.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं " भूः भुवः स्वः " इति तिसृभिः प्रसिद्धाभिः व्याहृतिभिः संहिता, उत च " ऋग्भिः यजुर्भिः सामभिः " इति त्रय्या विद्यया युक्ता छन्दस्वती भवसि, तथा अग्निं इन्द्रं आदित्यं च प्रति सङ्गतासि तेजस्वती भवसि, एवं सा त्वं परा वागेव विश्वस्यास्य जगतः प्रकाशकं ज्योतिः, तथा तत्परञ्ज्योतिःस्वरूपा सा वागिति ॥

॥ इति द्वितीयेऽनुवाके सप्तमं सरस्वती सूक्तम् समाप्तम् ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are associated with the three Vyāhṛtis ( Bhūḥ, Bhuvaḥ and Svaḥ ) and ( the three Vedas ), Ṛk, Yajus and Sāma. You are one with the gods Agni, Indra and Āditya. You are Vāk, the light that illumines everything in the universe.

Thus ends the Seventh hymn in the second Section.

---

## अथ द्वितीयेऽनुवाके अष्टमं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् ८ । ऋचः १-९ ।

**सरस्वति त्वमात्मनः नव, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।**

**Now the Sarasvati Sukta, eighth in Second Anuvaka**

**Section II, Hymn 7, Riks 1-9**-SARASVATĪ

This Hymn beginning with 'Sarasvati tvamātmanaḥ, contains nine Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Sarasvatī is the goddess and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

सरस्वति त्वमात्मनः सती सत्या
परमे हिता समा सति त्वमात्मनि ॥
समेन ज्योतिषा रसेनोता चित्ती
वाग् विद्रा माता विश्वस्यात्मनः परा ॥ १ ॥

पदपाठ :- सरस्वति । त्वम् । आत्मनः । सती । सत्या ।
परमे । हिता । समा । सति । त्वम् । आत्मनि ॥
समेन । ज्योतिषा । रसेन । आऽऊता । चित्ती ।
वाक् । विद्रा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati ! you being utterly truthful are the wife or Śakti of the Ātman. You are one with the great Ātman and equal to Him. You are one with Him on account of your having the same light as that of the Spirit. You, Vāk, being full of intelligence, are the very measure and mother of the universe and of the great Ātman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं सत्या सत्यात्मिका आत्मनः सर्वान्तर्यस्य चेतनरूपस्य सती जाया शक्तिरूपा परमे आत्मनि सति सत्स्वरूपे समा समाना हिता अन्तर्हिता समेन रसेन सामरस्येन ज्योतिषा चिता चैतन्यज्योतिःशक्त्या च ओता सम्मिलिता असि, अतः सा वागेव विदा ज्ञानेन हेतुना विश्वस्य जगतः तथा आत्मनः परा माता प्रमात्री प्रेरयित्री च भवतीति, अत्र विश्वस्य प्रसवितृत्वेन प्रेरयितृत्वेन च वाचः तन्मातृत्वम्, आत्मनस्तु प्रमातृत्वेनैवेति विवेकः ॥ तदेतत् परं मातृत्वं वाचः संवित्प्रधानसत्त्वयोगेनेति विशेषः, तदेतन्मातृत्वतत्त्वं वाग्देवतायाः एव परमं नित्यसिद्धमिति ॥

### COMMENTARY—SUMMARY TRANSLATION

On Sarasvati ! you are truth and the wife and the power of Ātman, the innermost spirit and the very source of existence. Being equal to the Ātman in having light and power and spiritual strength, you are one with Him. You are Vāk which measures and moves the Ātman, and you are the mother of this universe.

## द्वितीया ऋक् ।

सरस्वति त्वं मात्री प्रचोदिताऽऽत्मना
चित्तिभिः प्रजनित्री भूतानां योनिः ॥
वाचा मात्रया विश्वं भूतं सुषुवे
वाग् विदा माता विश्वस्यात्मनः परा ॥ २ ॥

पदपाठः— सरस्वति । त्वम् । मात्री । प्रऽचोदिता । आत्मना ।
चित्तिऽभिः । प्रऽजनित्री । भूतानाम् । योनिः ॥
वाचा । मात्रया । विश्वम् । भूतम् । सुषुवे ।
वाक् । विदा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati ! you are the measure of all. Being inspired by the Ātman, and in virtue of your powers of intelligence, you create all creatures and are their very source. By the subtle power of speech you gave birth to

the universe. Vāk is the measure and the invisible mother of the universe and the measure of the great Ātman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं तस्य आत्मनः मात्री प्रमात्री सती तेन आत्मना निजेन चेतनेन प्रचोदिता प्रेरिता सती चित्तिभिः चेतनाशक्तिभिः सर्वेषां भूतानां प्रजनित्री प्रजनयित्री योनिः कारणभूता तत्प्रसवहेतुभूतेति यावत्, अत्र " जनिता मन्त्रे " इति ( पा. सू. ६-४-५३ ) सूत्रात् अस्मिन् मन्त्रे " प्रजनित्री " इति रूपं आर्षं छान्दसम् स्त्रीलिङ्गान्तम्, सा वागेव शब्दब्रह्मरूपा आकाशतन्मात्रात्मिका आकाशादीनां महाभूतानां मूलभूता इति तस्याः सर्वभूतजनयितृत्वम्, तया मात्रया आकाशतन्मात्रारूपया वाचा विश्वं एतद् भूतं भूतजातं सुषुवे ससर्ज सरस्वतीति अध्याहार्यम्, तस्मात् सा वागेव विदा ज्ञानशक्त्या विश्वस्य जगतो माता परा श्रेष्ठतरा, अत एव तज्जनकस्य चेतनात्मनः प्रमात्री च स्वयं भवति। विश्वजनन्या वाचैव तदधिपतेः जगत्पितृत्वं प्रति मीयते, तेन तादात्म्ययोगादिति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the measure of that Ātman. You are inspired by Him who is the very source of all animation. By the various powers of intelligence you produce all the elements in this universe. Vāk, who is Brahma in the form of sound, is the essence of Ākāśa ( Ākāśa Tanmātrā ) or ether. Vāk is the generator of all elements, such as sky etc. She is the mother of the whole universe. The sound is the essence of Ākāśa and with it, she gave birth to all the elements in the universe. She is the measure of the universe and the evidence of Ātman.

## तृतीया ऋक् ।

सरस्वति त्वं सती जज्ञे समग्रे
ज्योतिरात्मा मात्रया वाचश्चिता ॥
ब्रह्मणो दृक् प्रथमा व्योम तत् परमं
वाग् विदा माता विश्वस्यात्मनः परा ॥ ३ ॥

पदपाठ :— सरस्वति । त्वम् । सती । जज्ञे । सम् । अग्रे ।
ज्योतिः॰आत्मा । मात्रया । वाचः । चिता ॥
ब्रह्मणः । दृक् । प्रथमा । विऽओम । तत् । परमम् ।
वाक् । विदा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati ! you are truth itself and you were born before anything else. You are full of the light of intelligence. You, being born as the essence of elements, were Brahma's first power of sight and also the sky which is the region of sound. Vāk, you, by your intelligence, are the very measure of the universe and of the great Ātman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं सती सत्यरूपा अग्रे आदिसृष्टौ सर्वेभ्यः भूतेभ्योऽपि पूर्वं आकाशादपि प्रथमतः व्योमतन्मात्रात्मिका वाक् सञ्जज्ञे आविर्बभूव इति, प्रथमैकवचनान्तक्रियापदसामर्थ्यादध्याहार्यम्, सा सरस्वती स्वयं ज्योतिःस्वरूपा चेतनात्मा च सती आकाशतन्मात्रया निजया वाचा चिता चेतनाशक्त्या तद्रूपेण सञ्जज्ञे इति पूर्वत्र अन्वयः, अतः सा वागेव सतः सदात्मनः प्रथमा दृक् आदिमा दृष्टिः उन्मेषरूपा चिन्मात्रोदिता, तदेव परमं व्योम वाचः परं आस्पदीभूतं भवति, तस्मात् विश्वादिमत्त्वात् सा वागेव विश्वस्य जगतः परा माता जनयित्री आत्मनः प्रमात्री च भवितुमर्हति विदा संविदा योगात् तस्याः वाचः ब्रह्मात्मविश्वादिमातृत्वं स्वतः सिद्धमेवेति सम्पद्यते ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are always existing as truth. Before the creation of any elements, even before the sky, the sound ( Vāk ) was created. She is herself full of light. She was born as sound, the subtle essence ( tanmātrā ) of the sky. So, Vāk became the first sight, the opening of the eyelids of Brahma. Being born first, earlier than the universe, she is the invisible mother of the universe and the measure or evidence of Ātman.

## चतुर्थी ऋक् ।

सरस्वति त्वं मात्रया चित्या समोता
बहिर्धा व्योमन् पवमाना सहोर्जा ॥
पवमानेन समं परीता चिता
वाग् विदा माता विश्वस्यात्मनः परा ॥ ४ ॥

पदपाठ :– सरस्वति । त्वम् । मात्रया । चित्या । समा । आऽऊता ।
बहिःऽधा । विऽओमन् । पवमाना । सह । ऊर्जा ॥
पवमानेन । समम् । परि । इता । चिता ।
वाक् । विदा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati! being the essence of all animation, you pervade all space externally. On account of your blowing fiercely, you are with the Marut (the god of winds). You are Vāk, the mother of the universe and the measure of Átman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं चित्या मात्रया निजया चैतन्यमात्रया व्योमन् व्योमनि आकाशे बहिर्धा बाह्यमर्यादया समा समाना ओता व्याप्ता, ऊर्जा बलेन सह पवमाना प्रवहन्ती सती तत्रैव पवमानेन प्रवहता मरुता प्राणसत्त्वेन समं चिता चेतनया परीता परितः सर्वतो व्याप्ता, तस्मात् सा वागेव विदा योगात् विश्वस्य जगतः माता परमा, तथा आत्मनश्च प्रमात्री भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! by your being the essence of all animation, externally you pervade all space. By blowing strongly you are equal to Marut, the presiding deity of wind and the vital airs. You are Vāk, the mother of the universe and the measure of Átman.

## पञ्चमी ऋक् ।

सरस्वति त्वं मात्रया तेजसो वाचः
सम्भासाऽऽदित्येनाहिता यद् रूपेण ॥
उत्सृष्टं तेजः स्वमा विवेश वाचा
वाग् विदा माता विश्वस्यात्मनः परा ॥ ५ ॥

पदपाठ :— सरस्वति । त्वम् । मात्रया । तेजसः । वाचः ।
सम् । भासा । आदित्येन । आऽहिता । यत् । रूपेण ॥
उत्ऽसृष्टं । तेजः । स्वम् । आऽविवेश । वाचा ।
वाक् । विदा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati! on account of the power of light and speech, you are one with the sun. The light which burst forth in the form of speech pervaded the universe. Vāk, on account of intelligence, is the mother of the universe and the evidence of Átman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं सद्वस्तुनः चेतनात्मनः तेजसः वाचश्च मात्रया रूपतन्मात्रया शब्द-तन्मात्रया च भासा प्रकाशेन च आदित्येन तत्प्रकाशेन च यत् परेण रूपेण आहिता सर्वतः

व्याप्ता, तथा स्वेन आत्मना उत्सृष्टं प्रसूतं तत् तेजः वाचा वाग्रूपेण सम्यक् आविवेश, सा वागेव अस्य विश्वस्य जगतः परा माता प्रसवित्री आत्मनः प्रमात्री च विदा योगेन भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! being invested with the essence of light and sound, you are one with the essence of the sun and his rays. You pervade all round. Vāk has entered the light of the sun and also the light emitted from the innermost soul. Vāk is the mother of this universe and the measure of Ātman.

## षष्ठी ऋक् ।

सरस्वति त्वं मात्रयाऽपां प्राणानां
विद्युता चेन्द्रेणाहिता सं रसेन ॥
उत्सृष्टास्ता अप आ विवेश प्राणै-
र्वाग् विदा माता विश्वस्यात्मनः परा ॥ ६ ॥

पदपाठः— सरस्वति । त्वम् । मात्रया । अपाम् । प्राणानाम् ।
विऽद्युता । च । इन्द्रेण । आऽहिता । सम् । रसेन ॥
उत्ऽसृष्टाः । ताः । अपः । आऽविवेश । प्राणैः ।
वाक् । विदा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati ! being invested with the subtle measure of waters, and of the vital airs ( prānas ), and being one with the lightning of Indra and all his subtle essence, you parvade everything. Vāk entered the essence of the liquid elements along with the vital airs. Vāk is the mother of the universe and the measure of Ātman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं अपां प्राणानां च मात्रया रस-स्पर्शतन्मात्रया, विद्युता वैद्युतेन ज्योतिषा तदधिष्ठात्रा इन्द्रेण तद्दैवतेन तद्रसेन च समाहिता सर्वतो व्याप्ताऽसि, तथा आत्मनः वाचः च सकाशात् उत्सृष्टाः प्रसूताः ताः अपः सरसाः सतीः प्राणैः वायुसत्त्वैः सह सा वाक् आविवेश, तस्मात् सा वागेव विश्वस्य माता प्रसवित्री, आत्मनः प्रमात्री च विदा ज्ञानसत्त्वयोगेन भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! being invested with the essence of waters or the liquid element and the vital airs ( rasa and sparśa tanmātrā ) and with Indra, the lord of lightning, you pervade the universe. Vāk entered the waters which burst forth from the innermost soul of herself. So, Vāk pervades all that is full of life. Vāk is the mother of the universe and the measure of Ātman.

## सप्तमी ऋक् ।

सरस्वति त्वं मात्रया मनसो धृतेः
सोमेनाहिता सौम्यैः सरसैरन्नैः ॥
उत्सृष्टां तां महीं मनसाऽऽविवेश
वाग् विदा माता विश्वस्यात्मनः परा ॥ ७ ॥

पदपाठ :— सरस्वति । त्वम् । मात्रया । मनसः । धृतेः ।
सोमेन । आऽहिता । सौम्यैः । सऽरसैः । अन्नैः ॥
उत्ऽसृष्टाम् । ताम् । महीम् । मनसा । आऽविवेश ।
वाक् । विदा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati ! being invested with the subtle essence of the mind and intellect and being one with Soma ( the moon ) and his peaceful juicy food ( his rays and light ) you pervade all-round. Along with mind, Vāk entered the earth which issued from the Ātman. Vāk is the mother of the universe and is the measure of Ātman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं मनसः धृतेः धियश्च मात्रया मर्यादया सोमेन दिव्येन मनोऽधिपतिना रसात्मना सौम्यैः सोमदैवत्यैः सरसैः रससहितैः अन्नैः प्राणसञ्जीवनीयैः आहिता सम्मिलिताऽसि, तथा आत्मनः सकाशात् उत्सृष्टां आविष्कृतां तां इमां महीं सा वागेव सह मनसैव मानसेन सत्त्वेन आविवेश प्राविशत्, तस्मात् सा वागेव विश्वस्य जगतः माता जनयित्री, तथा आत्मनः प्रमात्री च संविदा योगाद् भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you, along with your mind and intellect, are one with Soma, the moon and his juicy food in the form of his rays. You enter the projected universe with your mind. Vāk is the mother of the universe and the measure of Ātman.

## अष्टमी ऋक् ।

सरस्वति त्वं ज्योतिषाऽनु त्रिभि-
स्तेजसाऽद्भिर्भूम्या विश्वं भूतं प्रति ॥
मात्रया चिता त्रिवृताऽन्तः परीता
वाग् विदा माता विश्वस्यात्मनः परा ॥ ८ ॥

पदपाठः— सरस्वति । त्वम् । ज्योतिषा । अनु । त्रिऽभिः ।
तेजसा । अत्ऽभिः । भूम्या । विश्वम् । भूतम् । प्रति ॥
मात्रया । चिता । त्रिऽवृता । अन्तरिति । परि । इता ।
वाक् । विदा । माता । विश्वस्य । आत्मनः । परा ॥

Oh Sarasvati ! you pervade the whole universe. You do so by your illumined soul, which inspires the three elements, light, water and earth ( the essence of these three ) in their triple combinations. Vāk is the mother of the universe and the evidence of Ātman.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं ज्योतिषा ज्योतिरात्मना सह अनु अन्विता सती त्रिभिः तेजसा अद्भिः पृथिव्या च इति एतैः भूतैः इदं विश्वं भूतजातं चिता मात्रया चिन्मात्रया त्रिवृतं त्रिवृत्कृतं इदं परीता व्याप्ता, सर्वत्रापि अनुस्यूता असि, तस्मात् सा वागेव विदा संविद्योगेन अस्य विश्वस्य जगतः माता प्रसवित्री, तथा आत्मनः प्रमात्री च भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you, in the form of illumined soul, pervade the whole of the universe. Tejas ( light ), waters ( the essence of liquids ), and the earth ( the essence of solids ), by the process of triple combination ( trivṛtkaraṇa ) have transformed themselves into the manifest universe. You have pervaded all these by your subtle form. Vāk as the mother of the universe and the measure of Ātman.

## नवमी ऋक् ।

सरस्वति त्वं ब्रह्मणस्पतेर्वाच-
आत्मनो विसृष्टं प्रति विश्वरूपम् ॥
अनु विश्वं भूतमेतद् विश्वरूपा
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ९ ॥

पदपाठ :– सरस्वति । त्वम् । ब्रह्मणः । पत्युः । वाचः ।
आत्मनः । विऽसृष्टं । प्रति । विश्वऽरूपम् ॥
अनु । विश्वम् । भूतम् । एतत् । विश्वऽरूपा ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! this universe was created by the power of speech of Brahma, your consort. You too followed the creation of this universe by the power of expression. Vāk is the great light which illumines the universe.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं ब्रह्मणः तव पत्युः आत्मनः परस्मात् सकाशात् वाचः वाङ्मुखात् उच्छ्वासतः विसृष्टं आविष्कृतं भूतं विश्वरूपं एतद् विश्वं अनुसृत्य सा वागपि स्वयं प्रति प्रातिमुख्येन त्वं विश्वरूपा बभूविथ इति अर्थात् सिध्यति, वागेव विश्वं वाचकशक्त्या निरूपयति, तथा रूपयति च वाच्यार्थात्मना इति भावः । तस्मात् सा वागेव विश्वरूपा सती विश्वस्यापि जगतः परा माता जनयित्रीति माता, तथा विश्वजनकस्य जगत्पितुः स्वस्य पत्युः चेतनात्मनः परमपुरुषस्य परब्रह्मणः प्रमात्री प्रमाणभूता तदवबोधाय, अत एव सा वागेव विश्वस्य जगतः दर्शयत् प्रकाशकं परमं ज्योतिः, तथा तत्परञ्ज्योतिःस्वरूपा सा वाग् भवतीति ॥

॥ इति द्वितीयेऽनुवाके अष्टमं सरस्वतीसूक्तम् समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! following the omnifarious universe created by Brahmaṇaspati, you too have become omnifarious. Vāk also assumed as many forms as are existing in the universe by her power of expression. Vāk is manifold. She is the light par excellence, which illumines everything.

Thus ends the eighth hymn in the second Section.

---

## अथ द्वितीयेऽनुवाके नवमं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् ९ । ऋचः १–८ ।

सरस्वति त्वं हृदि अष्टौ, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, ninth in Second Anuvaka**

**Section II, Hymn 9, Riks 1-8** - SARASVATĪ.

This hymn beginning with "Sarasvati tvam hṛdi" contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Sarasvati is the goddess and the metre is Jagatī.

## अथ प्रथमा ऋक् ।

सरस्वति त्वं हृदि प्रतीची चित्ती
आत्मानमध्योतानु प्रत्यञ्चं सन्तम् ॥
ज्योतिरात्मैव प्रचेतना साऽभवद्-
वाग् विदा मिथुनं हृदाऽऽत्मनोऽध्यरम् ॥ १ ॥

पदपाठः— सरस्वति । त्वम् । हृदि । प्रतीची । चित्ती ।
आत्मानम् । अधि । आऽउता । अनु । प्रत्यञ्चम् । सन्तम् ॥
ज्योतिःऽआत्मा । एव । प्रऽचेतना । सा । अभवत् ।
वाक् । विदा । मिथुनम् । हृदा । आत्मनः । अधि । अरम् ॥

Oh Sarasvati ! having entered the introvert Ātman ( pratyagātmā ) existing in every heart, you are one with that Ātman. You have become the life-giving light of knowledge. Oh Vāk, by your power of consciousness you are completely identified with the heart, like a veritable couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं हृदि सर्वेषां प्राणभृतां अस्माकं अन्तर्हृदये प्रतीची प्रत्यङ्मुखा सती चित्ती चित्त्या चेतनाशक्त्या प्रत्यञ्चं प्रत्यग्रूपं सन्तं सत्स्वरूपं आत्मानं चेतनसत्त्वं अनु अनुसृत्य अधि अधिष्ठाय च तस्मिन् एव तत्समाना ओता व्याप्ता सती स्वयमपि ज्योतिरात्मा ज्योतिःशरीरा तदेकात्मिका प्रचेतना सा वागपि बभौ स्वयंप्रकाशसत्त्वैव अभूत्, सच एव तेन तादात्म्ययोगात् इति भावः ॥ तस्मात् सा वागेव विदा संविदा ज्ञानप्रकाशनकलया हृदा हृदयेन तत्समभावेन च आत्मनः अधि अधिकृतं सर्वाधिष्ठानभूतं आध्यात्मकं पूर्णं मिथुनं युग्मं तादात्म्ययोगसंसृष्टम्, अत एव अरम् अलंभावपूर्णम्, एतेन तयोः वागात्मनोः परं दाम्पत्यसत्त्वं प्रतिज्ञायते इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! having entered the introvert ( having the power of introspection ) Ātman, the pratyagātmā, existing in the heart of every creature, you have turned inwards and are abiding with that Ātman. The Ātman is full of intelligence on account of this process. Vāk is accepted as the equivalent of Ātman. Vāk is identified with the Ātman as if Vāk and Ātman are a couple. The seer indicates that Vāk and Ātman are like wife and husband.

## द्वितीया ऋक् ।

सरस्वति त्वं प्रतीची या प्रतीच
आत्मनः सुसन्दृक् सती चित्तिः ॥
प्रत्यङ् समेन संहिताऽऽत्मन् रसेन
वाग् विदा मिथुनं हृदाऽऽत्मनोऽध्यरम् ॥ २ ॥

पदपाठ :– सरस्वति । त्वम् । प्रतीची । या । प्रतीचः ।
आत्मनः । सुऽसन्दृक् । सती । चित्तिः ॥
प्रत्यङ् । समेन । सम्ऽहिता । आत्मन् । रसेन ।
वाक् । विदा । मिथुनं । हृदा । आत्मनः । अधि । अरम् ॥

Oh Sarasvati ! you are one with the Ātman whose eyes are turned inwards and who is in the heart of all. You are the power of real insight which is in the Ātman and you are in harmony with the essence of things. Oh Vāk, by your power of consciousness you are identified with the heart like a veritable couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं प्रतीचः आत्मनः सर्वेषामन्तःप्रतिष्ठितस्य प्रत्यगात्मनः प्रतीची प्रत्यङ्मुखा चेतनाशक्तिः चित्तिः सती तस्य सुसन्दृक् दृक्सत्त्वस्वरूपा जाया च सती प्रत्यङ्–तस्मिन् प्रत्यञ्चि आत्मन् अन्तरात्मनि समेन रसेन सामरस्येन तादात्म्ययोगेन संहिता सम्मिलिता भवसीति शेषः, तस्मात् सा वागेव तस्य आत्मनः परमं पूर्णं मिथुनं भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the power of the introvert soul and as such you are the power of the soul's insight. Being like a wife, you are united with the soul and are identical with it. Vāk is indeed like the mate of the soul.

## तृतीया ऋक् ।

सरस्वति त्वमात्मानमनु प्रत्यञ्चं
स्फुरस्यहश्चिता प्रकेतुना धिया ॥
इयमन्तरनु स्वरन्ती पराऽऽत्मन्
वाग् विदा मिथुनं हृदाऽऽत्मनोऽध्यरम् ॥ ३ ॥

पदपाठ :— सरस्वति । त्वम् । आत्मानम् । अनु । प्रत्यञ्चम् ।
स्फुरसि । अहम्ऽचिता । प्रऽकेतुना । धिया ।।
इयं । अन्तरिति । अनु । स्वरन्ती । परा । आत्मन् ।
वाक् । विदा । मिथुनं । हृदा । आत्मनः । अधि । अरम् ।।

Oh Sarasvati ! you enter the introvert Ātman who is in the heart of all, and you are the inspirer of the self-consciousness of the individual, on account of your power of intelligence. Oh Vāk, by your power of consciousness, you are identified with the heart like a veritable couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं प्रत्यञ्चं अन्तरात्मानं चेतनसत्त्वं सर्वान्तरं अनुसृत्य प्रकेतुना प्रज्ञानेन धिया च सर्वेषां प्राणभृतां अन्तःशरीरे हृदये अहञ्चिता अहमिति चेतनेन सत्प्रत्ययेन स्फुरसि, अत्र अन्तरात्मनः अहं अस्मीति स्फुरणमेव वाचः मूलं परमं सत्त्व-स्वरूपमिति भावः, तमिमं स्वात्मानं अनुसृत्य स्वरन्ती आत्मनि अन्तः विदा संविद्रूपेण गुप्ता सा परा वागेव हृदयेन तद्भावेन सम्मिलितं अध्यात्मकं पूर्णं मिथुनमिति ।।

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! having entered the inward-looking soul who is in all, you with knowledge and intellect, become the cause of the I–consciousness. Here, it is meant that the very self-consciousness of the individual is certainly due to the existence of Vāk. It is because of the power of speech that each person is able to say 'I'. The invisible Vāk is the equivalent of Ātman and they are one like mates.

## चतुर्थी ऋक् ।

सरस्वति त्वं संविदा चेतमाना
सम्भृताऽऽत्मानं स्वमनु वक्षि सत्यम् ।।
वाचमेवानु द्योततेऽध्ययमात्मा
वाग् विदा मिथुनं हृदाऽऽत्मनोऽध्यरम् ।। ४ ।।

पदपाठ :— सरस्वति । त्वम् । सम्ऽविदा । चेतमाना ।
सम्ऽभृता । आत्मानम् । स्वम् । अनु । वक्षि । सत्यम् ।।
वाचम् । एव । अनु । द्योतते । अधि । अयं । आत्मा ।
वाक् । विदा । मिथुनं । हृदा । आत्मनः । अधि । अरम् ।।

Oh Sarasvati ! being animated by the power of consciousness, you enable the soul to speak the truth. The soul expresses the truth only on account of you, who are the power of speech. Oh Vāk, by your power of consciousness, you are identified with the heart like a veritable couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं संविदा ज्ञानसत्त्वेन चेतमाना सती स्वं चेतनात्मानं तं प्रति ऋता प्रतिगता प्रत्यङ्मुखेन सम्प्राप्ता स्वयमपि संविदाना सती सत्यं नित्यसिद्धं तं स्वीयं आत्मानं अनु वक्षि समर्थयसि, अनुवदसीति यावत् , सोऽयं अन्तरात्माऽपि पुनः तां स्वप्रेरितां वाचमेव अनुसृत्य स्वयमभिद्योतते प्रकाशते तद्वाङ्मुखेनैव, अन्येषां प्रत्ययगोचरो भवति इत्यर्थः, तस्मात् सा वागेव विदा संवित्सत्त्वयोगेन हृदा तदनुरूपेण समभावेन च आत्मनः तादात्म्ययोगसम्पन्नं अध्यात्मतत्त्वेन सिद्धं पूर्णं मिथुनं भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! inspired by the power of knowledge you enter the Ātman turned inwards. You declare the Ātman as existing ( true ). Again, the same Ātman who is inside expresses himself being inspired by Vāk. He expresses to others through Vāk. Vāk is one with the Ātman as wife and husband.

## पञ्चमी ऋक् ।

सरस्वति त्वं परमा देवताऽऽत्मा
सती परमेण समाऽऽत्मनाऽऽतता ॥
चित्तिभिः प्रति सम्मिता स्व आत्मनि
वाग् विदा मिथुनं हृदाऽऽत्मनोऽध्यरम् ॥ ५ ॥

पदपाठ :– सरस्वति । त्वम् । परमा । देवता । आत्मा ।
सती । परमेण । समा । आत्मना । आऽतता ॥
चित्तिऽभिः । प्रति । सम्ऽमिता । स्वे । आत्मनि ।
वाक् । विदा । मिथुनम् । हृदा । आत्मनः । अधि । अरम् ॥

Oh Sarasvati! you are the greatest deity. You are equal to the great Ātman and replete with the powers of Ātman and you are one with the Ātman. Oh Vāk, by your power of consciousness, you are identified with the heart like a veritable couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं परमा सर्वेभ्योऽपि श्रेष्ठतमा परा देवता, तथा आत्मा च चेतनात्मिकाऽसि, सेयं प्रत्यक्षाऽपि प्रत्ययैकावगम्येन परमेण परोक्षेण आत्मना व्यापकेन समा समाना असि, सा त्वं स्वे निजे परमे तस्मिन् आत्मनि चित्तिभिः चेतनाशक्तिभिः चेतना-संविद्-इच्छा( भावना )क्रियाशक्तिभिः सम्मिता समाना समन्विता असि, तस्मात् सा वागेव विदा ज्ञानशक्त्या संवित्प्रधाना सती हृदा तत्समभावेन युक्ता आत्मनः तस्य परमस्य मिथुनं अधिष्ठानात्मकं अरं पूर्णम्, आत्मना सह युगलीभूता सा परा वागिति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are the greatest God. Though manifest, you are one with the Ātman who is invisible but who pervades everything. You are replete with the power of animation. The powers are Chetanā ( animation ), Saṁvid ( consciousness ), Ichhā ( feeling of desire ), and Kriyā ( power to do ). Vāk is firmly rooted in the Ātman and is the source of strength.

## षष्ठी ऋक् ।

सरस्वति त्वं परमं पूरुषं त-
मात्मानं स्वं स्वयमेकमेव सन्तम् ॥
सुषुवे या बहुधा प्रचोदिताऽऽत्मना
वाग् विदा मिथुनं हृदाऽऽत्मनोऽध्यरम् ॥ ६ ॥

पदपाठः— सरस्वति । त्वम् । परमम् । पूरुषम् । तम् ।
स्वम् । आत्मानम् । स्वयम् । एकम् । एव । सन्तम् ॥
सुसुवे । या । बहुधा । प्रऽचोदिता । आत्मना ।
वाक् । विदा । मिथुनम् । हृदा । आत्मनः । अधि । अरम् ॥

Oh Sarasvati ! being inspired by the Ātman you manifested the Pūrusha ( the supreme person ) in manifold forms; you manifested the Pūrusha who is existing independently and who is one without a second. Oh Vāk, by your power of consciousness, you are identified with the heart like a veritable couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं तं परमं परोक्षसिद्धं पूरुषं स्वं स्वीयं आत्मानं स्वयं स्वेन रूपेण सत्त्वेन च ऐकमेव सन्तं या वाक् तेनैव आत्मना प्रेरिता सती तं बहुधा भावेन सुषुवे

प्रकाशयामास, एकस्यैव आत्मनः तस्य बहुधा प्रकाशने हेतुभूता सा परा वागेवेति भावः । तस्मात् सा परा वागेव विदा ज्ञानशक्त्या प्रधाना हृदयेन तदनुभावेन च सर्वेषां अन्तरात्मनः तस्य परमपुरुषस्य अध्यात्मतत्त्वेन पूर्णं मिथुनम्, वाक्-आत्मा च नित्यसिद्धं युगलमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! Purusha ( the Supreme Person ) is always one and independent as well as invisible. Inspired by the Ātman, you manifested the Purusha in various ways. This means, Vāk, the power of speech, is the main cause of manifesting the One as Many. Vāk is certainly equivalent to Ātman. Vāk and Ātman are the couple spiritually united with each other in perfect harmony.

## सप्तमी ऋक् ।

सरस्वति त्वदाविर्हितं ज्योतिषा
निविष्टा चित्तिभिः स्वमात्मानं सन्तम् ॥
इमं जीवयसीह स्वेन रसेन
वाग् विदा मिथुनं हृदाऽऽत्मनोऽध्यरम् ॥ ७ ॥

पदपाठ :— सरस्वति । त्वत् । आविः । हितम् । ज्योतिषा ।
निऽविष्टा । चित्तिऽभिः । स्वम् । आत्मानम् । सन्तम् ॥
इमम् । जीवयसि । इह । स्वेन । रसेन ।
वाक् । विदा । मिथुनम् । हृदा । आत्मनः । अधि । अरम् ॥

Oh Sarasvati ! it is due to your power that the Ātman who abides with his several faculties ( chetanā etc. ) is manifested and is full of light. You by your essence make the sentient beings live and breathe. Oh Vāk, by your power of consciousness, you are identified with the heart like a veritable couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वत् त्वत्तः तत्परमात्मचेतनाया एव वाक्छक्तेः सकाशात् आविर्हितं प्रादुर्भूतं, ज्योतिषा स्वरूपेण तेजसा प्रकाशितं स्वं निजं अन्तरात्मानं तं आन्तरतमं सन्तं चित्तिभिः चेतनादिशक्तिभिः निविष्टा प्रति प्रविष्टा सती इमं जीवात्मानं अस्माकं आन्तरं स्वेन रसेन वाग्रसेन संविन्मयेन इह अस्मिन् लोके शरीरे च जीवयसि प्राणयसि, तदिदं वाचः सत्त्वम्, " तस्याः समुद्रा अधि वि क्षरन्ति तेनं जीवन्ति प्रदिशश्चतस्रः । ततः क्षरत्यक्षरं तद्

विश्वमुपजीवति" इति (ऋ. मं. १-१६४-४२) इत्यादि मन्त्रवर्णेऽपि तदेतदेवानुश्रावयति ॥ तस्मात् सा वागेव विदा संविदा प्रधाना हृदा तदनुभावेन पूर्णा अधि अध्यात्मतत्त्वाभ्युदीर्णा सती आत्मन: चेतनस्य अरं अन्यूनं पूर्णं परं मिथुनं युगलं युगलीभूता इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! on account of your power, the great Ātman was made manifest as light. You enter the great Ātman who is your own through your powers like knowledge etc. You give life to the individual creatures as well, in this world. That you do by your essence. Cf. " From Vāk, the oceans are born and the four intermediate quarters exist on account of Vāk. The whole universe lives by the power of Vāk." ( Ṛg. I–164–43 ).

## अष्टमी ऋक् ।

सरस्वती त्वं यज्ञो यज्ञपत्नीह
धारयसे तं यज्ञं यजमाना विश्वम् ॥
पुरुषं स्वं यज्ञपतिं यजसे रसेन
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठ :– सरस्वती । त्वम् । यज्ञः । यज्ञऽपत्नी । इह ।
धारयसे । तम् । यज्ञम् । यजमाना । विश्वम् ॥
पुरुषम् । स्वम् । यज्ञम् । यज्ञऽपतिम् । यजसे । रसेन ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you are the sacrifice and ( on account of your being a helper ) the wife of the sacrificer. You maintain the sacrifice in this universe. By your essence, you worship your Lord ( the Supreme Person ), the master of sacrifice and the all-pervading spirit. Vāk is the supreme light which illumines everything in the universe.

## अन्वयभाष्यम् ।

सा परा वाग् देवतात्मा सरस्वती रसवती संविदादिसर्वरसप्रपूर्णा त्वं यज्ञः स्वयं यज्ञस्वरूपा यज्ञधाननेयनादिरूपा चिन्मयी सकलयज्ञसाधनीभूतत्वाद् वाचः, अत एव यज्ञपत्नी यज्ञस्य पालयित्री, सर्वहुदादियज्ञे यजमानस्य तस्य परमपुरुषस्य यज्ञसहकारिणी स्वयमपि तं यज्ञं यजमाना सती विश्वं यज्ञं धारयसे, तेन यज्ञेन च विश्वं जगदपि धारयसे बिभर्षि पोषयसि च, " यज्ञं वष्टु धियावसुः ", " यज्ञं दधे सरस्वती ", इति च ( ऋ. मं. १-३-

१०-११ ) ऋङ्मन्त्रवर्णयोरपि तथैवोपवर्णनात् सङ्गच्छते वागेव सर्वयज्ञसन्धारिणी इति ॥ अतः स्वं निजं यज्ञपतिं तं परमं पुरुषं रसेन स्वेन वाग्रसेन संविदानन्दादिरसेन च यजसे अर्हयसि तथा समन्वेषि, तस्मात् सा परा वागेव परमपुरुषेण तेन ब्रह्मणा सर्वान्तरात्मना च मिथुनीभूता सती विश्वस्य जगतः अस्य दर्शयत् प्रकाशकं परं ज्योतिः, तत्परञ्ज्योतिः-स्वरूपैव सा परा वागिति सिध्यति, तथा वागात्मनोः सत्त्वपूर्णं तत् परं मिथुनत्त्वसिध्दं तत्त्वमिति ॥

॥ इति द्वितीयेऽनुवाके नवमं सरस्वती सूक्तम् समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Sarasvatī is the Goddess of Speech. She is all bliss. She is herself the sacrifice. Sacrifice yields fruit on account of Sarasvatī. You ( Sarasvatī ) are the instrument of sacrifice. So you are the protectress of sacrifice. You help the supreme Purusha in every way, in performing Yajña ( sacrifice ). "Sarasvatī performed Yajña" etc. ( Ṛg. I–3, 10–11 ). You perform the sacrifice and maintain all sacrifices. And you maintain the universe by sacrifice. You worship your Lord, the master of sacrifice, with your essence or bliss, that is Ānanda, and you are one with the Supreme Spirit. So, you are Supreme Vāk which illumines all this universe, the light par excellence.

Thus ends the Ninth hymn in the Second Section.

---

## अथ द्वितीयेऽनुवाके दशमं सरस्वतीसूक्तम् ।

**अनुवाकः २ । सूक्तम् १० । ऋचः १-८ ।**

**सरस्वति त्वं वैश्वानरेण अष्टौ, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।**

**Now the Sarasvati Sukta, tenth in Second Anuvaka**

**Section II, Hymn 10, Riks 1 - 8** - SARASVATĪ

This hymn beginning with "Sarasvati tvam Vaiśvānareṇa" contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Sarasvatī is the goddess and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

सरस्वति त्वं वैश्वानरेण तेजसा-
ऽऽग्नेयेनात्मानं समिता चेतसोऽन्तः ॥
अग्नायी स्वरसि ज्योतिष्मती चित्ती
वाग् विदा मिथुनं हृदाऽऽत्मनोऽधि पूर्व्यम् ॥ १ ॥

पदपाठः— सरस्वति । त्वम् । वैश्वानरेण । तेजसा ।

आग्नेयेन । आत्मानम् । सम्ऽइता । चेतसः । अन्तरिति ॥

अग्नायी । स्वरसि । ज्योतिष्मती । चित्ती ।

वाक् । विदा । मिथुनम् । हृदा । आत्मनः । अधि । पूर्व्यम् ॥

Oh Sarasvati ! through Vaiśvānara i. e. the fiery principle in all beings, you are united with the Ātman who is within all creatures. You are the consort of Agni, the God of Fire and you by your power of light give expression to words. Vāk, by the powers of consciousness, is wholly one with the Ātman and both are from the beginning a perfect couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं वैश्वानरेण सर्वप्राणिसम्बन्धिना तेजसा आग्नेयेन आन्तर्येण जाठरेण चेतसः चेतनात् अन्तः अन्ततः आत्मानं सर्वान्तरं अन्विता अनुगता सती अग्नायी अग्निजाया चित्ती चित्त्या आत्मज्योतिषा सङ्गता ज्योतिष्मती त्वमपि ज्योतिर्मयी सम्पन्ना बभौ इति, अतः तया आत्मचेतनया स्वरसि शब्दायसे अन्तःस्फुरणेन, तस्मात् सा वागेव विदा चेतनासंविदादियोगेन हृदा तदनुभावेन हृद्य्येन च आत्मनः अधि आत्मचेतनाधिष्ठितं अरं पूर्णं तत्समानं मिथुनं तादात्म्ययोगेन सम्मिलितं नित्यसिद्धं तद्युगलमिति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! Vaiśvānara is the inner fire in all living beings. Being one with that inner principle of fire in all, you are united with the Ātman. You are, as it were, the wife of Agni. You express yourself in the form of words on account of your powers of inner intelligence. Vāk is equal to Ātman and abiding in His energy. Being identical with Him you ( Vāk and Ātman ) are perfect mates.

## द्वितीया ऋक् ।

सरस्वति त्वं ज्योतिषा वायव्येन

सन्नियच्छसि प्राणं प्रणयस्यन्तः ॥

वाचमेवानुवक्ति सहसाऽयं प्राणो

वाग् विदा मिथुनं हृदा प्राणस्याधि पूर्व्यम् ॥ २ ॥

पदपाठः— सरस्वति । त्वम् । ज्योतिषा । वायव्येन ।

सम् । नि । यच्छसि । प्राणम् । प्रऽनयासि । अन्तरिति ॥

वाचम् । एव । अनु । वक्ति । सहसा । अयम् । प्राणः ।
वाक् । विदा । मिथुनम् । हृदा । प्राणस्य । अधि । पूर्व्यम् ॥

Oh Sarasvati! you invest all beings with life through your power of the wind-principle. This life expresses itself in the form of words. Vāk, on account of its powers of consciousness, is from the beginning one with the life-principle and forms a perfect couple.

## अन्वयभाष्यम् ।

हे सरस्वति! त्वं वायव्येन वायुसम्बन्धिना ज्योतिषा मध्यमेन वै तेन तेजसा प्राणं विश्वप्राणसत्त्वं सन्नियच्छसि सम्यक्तया नियमयसि, तथा सर्वेषां अन्तः हृदये प्रणयसि प्रेरयसि, सोऽयं प्राणः वाचमेव स्वां स्वसंहितां तां सहसा बलेन अनुवक्ति अनु ब्रवीति वैखरीमुखेन, तस्मात् सा वागेव विदा ज्ञानशक्त्या हृदा भावनासत्त्वेन च मिलितं प्राणस्य अधिकृतं पूर्व्यं प्राचीनं परागवृत्तिसत्त्वेन च युक्तं आध्यात्मकं मिथुनं युगलीभूतमिति भावः, एतेन वाक्-प्राणयोः मिथुनत्वं द्योत्यते इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! having control of the principle of wind, i.e. Vāyu, you inspire Prāṇa, the life-principle in all hearts. This Prāṇa speaks or gives expression to words. Vāk is one with the Ātman and forms a couple with Ātman on account of identity with the life-principle.

## तृतीया ऋक् ।

सरस्वति त्वं तेजसाऽऽदित्येनान्त-
मनो नि यच्छसि प्रचेतसाऽऽत्मनि ॥
वाचमेवानु वक्ति चेतयत् तन्मनो
वाग् विदा मिथुनं मनसोऽधि पूर्व्यम् ॥ ३ ॥

पदपाठः— सरस्वति । त्वम् । तेजसा । आदित्येन । अन्तरिति ।
मनः । नि । यच्छसि । प्रऽचेतसा । आत्मनि ॥
वाचम् । एव । अनु । वक्ति । चेतयत् । तत् । मनः ।
वाक् । विदा । मिथुनम् । मनसः । अधि । पूर्व्यम् ॥

Oh Sarasvati! on account of the light of the sun which you have, and through your power, you invest the Ātman (the self) with mental powers. The mind being inspired expresses itself in the form of speech. Vāk, by the powers of consciousness forms a perfect couple with the mind from the very beginning.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं आदित्येन अमुना दिव्येन तेजसा अन्तः सर्वेषां अन्तर्हृदये आत्मनि चेतनात्मके प्रचेतसा वारुणेन रसात्मना प्रचेतनेन च मनः कामना-भावना-कल्पनादिसत्त्वकं अन्तःकरणं नियच्छसि नियमयसि, तथा तया परया वाचैव चेतयत् सचेतनं सत्प्रेरकं च भवत् तां वाचमेव चेतयत् प्रतिप्रेरयत् वाचं अनुवक्ति, तत्र च अन्तरात्मना प्रेरितां तां वाचमेवमनु बहिरनुब्रवीति इति भावः, तस्मात् सा वागेव विदा संविच्छक्तियोगेन सिद्धा मनसः अधिष्ठानरूपं तत्समानं युग्मम्, एवं अन्योऽन्यप्रतिष्ठा-सत्त्वयोगेन तयो वाङ्मनसयोः प्राचीनं अध्यात्मतत्त्वसिद्धं परागवृत्तिप्रयुक्तं च तन्मिथुनत्वं इति ॥ अत्र औपनिषदः शान्तिमन्त्रोऽपि ऐवमेवार्थं उपदिशति—"वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम्" इति (ऐ. उ. शां.मं.) ॥

### COMMENTARY--SUMMARY TRANSLATION

Oh Sarasvati! having the celestial light of Āditya, i. e. the sun, and by means of the power of intelligence you invest the mind with powers. The mind is full of desire, thought, determination etc. The mind, activated by Vāk, expresses in words. Vāk is united perfectly with the mind. Vāk and mind are like mates.

## चतुर्थी ऋक् ।

सरस्वति त्वमादित्येनात्मानं
स्वं समेषि तेजसा चेतनेनाधि ॥
सावित्री साम्ना चेतते स्वरेणान्त-
र्वाग् विदा मिथुनं हृदाऽऽत्मनोऽधि पूर्व्यम् ॥ ४ ॥

पदपाठ :— सरस्वति । त्वम् । आदित्येन । आत्मानम् ।
स्वम् । सम्ऽएषि । तेजसा । चेतनेन । अधि ॥
सावित्री । साम्ना । चेतते । स्वरेण । अन्तरिति ।
वाक् । विदा । मिथुनम् । हृदा । आत्मनः । अधि । पूर्व्यम् ॥

Oh Sarasvati! you are one with Āditya, the sun, through your own power of intelligence. Being invested with the power of the sun, you vibrate in the heart in the form of sweet sound. Vāk is a perfect mate with the inner heart from the very beginning.

## अन्वयभाष्यम्।

हे सरस्वति! त्वं आदित्येन दिव्येन तेजसा स्वं निजं आत्मानं प्रचेतनं सन्तं चेतनेन स्वेन तत्सरूपेण अन्वेषि, समन्वितासि, अत एव सा वागदेवता सावित्री सवितुः योगात् सम्पन्ना, सा साम्ना समेन स्वरेण सर्वेषां अन्तः हृदये चेतते स्फुरति, तस्मात् सा वागेव विदा संवित्प्रधाना हृदा तदनुभावेन च आत्मनः अधिकृतं पूर्व्यं सर्वतः आदिमं मिथुनं युगलम्, वाग्-आत्मनो तत् मिथुनत्वमनादिसिद्धम् इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati! by being one with the celestial glory of Āditya, the sun, you are one with the Ātman. Vāk is Sāvitrī because she is related to Savitṛ the sun. Vāk bursts forth in words in the hearts of all. Vāk is one with the Ātman and is perfectly united with the Ātman from eternity.

## पञ्चमी ऋक्।

सरस्वति त्वं रुद्रेण ज्योतिषेन्द्रेण  
प्राणमन्वेषि प्रणयंस्यन्तः स्वरैः ॥  
वाचमेवानु चेततेऽयं प्राणो  
वाग् विदा मिथुनं प्राणस्याधि पूर्व्यम् ॥ ५ ॥

पदपाठः— सरस्वति। त्वम्। रुद्रेण। ज्योतिषा। इन्द्रेण।  
प्राणम्। अनुऽएषि। प्रऽनयंसि। अन्तरिति। स्वरैः ॥  
वाचम्। एव। अनु। चेतते। अयम्। प्राणः।  
वाक्। विदा। मिथुनम्। प्राणस्य। अधि। पूर्व्यम् ॥

Oh Sarasvati! you who are one with Rudra (the god of the skies), and also one with Indra (the god of lightning) reside in the hearts of all as life. You inspire that life with your inner voice. This life gives power to the faculty of speech. Vāk is one with the life-principle from the very beginning.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं रुद्रेण अन्तरिक्षाध्यक्षेण तैवतेन ज्योतिषा विद्युदात्मना इन्द्रेण च मध्यमेन प्राणं सर्वेषां जगतां प्राणसत्त्वं अन्वेषि समन्विताऽसि, स्वीयैः स्वरैः अन्तर्हृदये तं प्राणं प्रणयसि प्रेरयसि, सोऽयं प्राणः तां वाचमेव परामनुसृत्य चेतते चेष्टते सत्राह्याभ्यन्तरीयगमनागमनक्रियासत्त्वयोगेन, प्राणस्य क्रियाशक्तिप्राधान्यं प्रत्यक्ष-सिद्धमेव भवति, तस्मात् सा वागेव विदा ज्ञानशक्त्या योगेन प्राणस्य अधिकृतं अध्यात्म-तत्त्वसिद्धं पूर्व्यं मिथुनं युगलमिति ॥ तदेतत् तत्त्वान्तरेण वाक् प्राणयोर्मिथुनत्वं सूक्ष्मं दिव्यं अधिदैवतसत्त्वविशिष्टं भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! having the light of Rudra, the lord of the skies and having the light of Indra, who is the lord of the mid-air, you are one with the essence of universal Prāṇa, the life-principle within the heart. This Prāṇa is active in the wake of Vāk. Vāk is perfectly paired with Prāṇa. Vāk and Prāṇa are united perfectly from the beginning.

## षष्ठी ऋक् ।

सरस्वति त्वं रसेन सोमेनान्ने-
मनोऽन्वेषि वैश्वानरेणाग्निना ॥
वाचमेवानु प्रति चेतते मनो
वाग् विदा मिथुनं मनसोऽधि पूर्व्यम् ॥ ६ ॥

पदपाठः— सरस्वति । त्वम् । रसेन । सोमेन । अन्नेन ।
मनः । अनुऽएषि । वैश्वानरेण । अग्निना ॥
वाचम् । एव । अनु । प्रति । चेतते । मनः ।
वाक् । विदा । मिथुनं । मनसः । अधि । पूर्व्यम् ॥

Oh Sarasvati ! you are one with the mind, along with the sweet Soma (the divine juice) and food. You are one with the mind through the inner fire or heat called Vaiśvānara. The mind follows the inspiration of the power of speech. Vāk, through her power of intelligence, is united from the beginning with the mind.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं रसेन दिव्येन सोमेन रसात्मना तथा तेन सौम्येन शान्तिसत्त्वपूर्णेन रसेन च, अन्नेन प्राणसञ्जीवनीयेन सौम्येनैव सोमदेवताकेन मनः अन्तःकरणं इच्छा-

भावनादिशक्तिकं मानसं सत्त्वं समन्वेषि, तथा आन्तर्येण वैश्वानरेण उदर्येण अग्निना अन्नरसादिपरिपाकहेतुना त्वं युज्यसे, तच्च मनः पुनः तां वाचमेव अनुसृत्य प्रति चेतते सर्वेषां अन्तर्हृदये चेष्टते तया परया वाचा प्रेरितं सत् तत् मनःस्वव्यापारे वाचः उच्चारादि-विषये सङ्कल्पादिविषये च प्रवर्तते इति भावः, तस्मात् सा परा वागेव विदा ज्ञानशक्त्या योगेन सिद्धा सती मनसः अधिकृतं पूर्व्यं प्राचीनं तत्समानं मिथुनं युगलीभूतमिति ॥ तदेतत् वाङ्-मनसयोः तत्त्वान्तरेण समर्थितं अधिदैवतं अध्यात्मं च मिथुनत्वं भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! through the celestial essence of Soma and the various foods, you enter and become one with the mind which has the power of desire, feeling etc. Likewise, through Vaiśvānara fire which is responsible for digestion of foods, you stay in the body. The mind, following Vāk, becomes active in the heart of all. The mind is inspired by Vāk. Vāk certainly is coupled with the mind; mind is equal with Vāk in every respect. Vāk and mind are united as one being from the very beginning of time.

## सप्तमी ऋक् ।

सरस्वति त्वं वाचा प्राणैर्मनसा
त्रिवृतोत भूतैर्ज्योतिभिः शरीरैः ॥
विश्वास्तनूः समितोत प्रति विश्वं
वाग् विदा मिथुनं हृदाऽऽत्मनोऽधि पूर्व्यम् ॥ ७ ॥

पदपाठ :- सरस्वति । त्वम् । वाचा । प्राणैः । मनसा ।
त्रिऽवृता । उत । भूतैः । ज्योतिःऽभिः । शरीरैः ॥
विश्वाः । तनूः । सम्ऽइता । उत । प्रति । विश्वम् ।
वाक् । विदा । मिथुनम् । हृदा । आत्मनः । अधि । पूर्व्यम् ॥

*Oh Sarasvati !* you are indivisibly one and are a combination of the power of speech, of vital breath, and of mind ( this is the combination in the individual self ). In the universe, you parade in the form of a combination of the elements, the subtle powers and the material forms. Vāk, through her power of intelligence, is united from the beginning with the Ātman like a perfect couple.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं वाचा ज्ञानशक्तिप्रधानया, प्राणैः क्रियाशक्तिप्रधानैः मनसाकामना-भावना-कल्पनादिशक्तिप्रधानेन अन्तःकरणेन च एतैः सह सह सम्मिलितैः तेजोजलान्नात्मकैः भूतैः त्रिभिः करणैः च त्रिवृता त्रिवृतीभूता अर्थात् त्रिवृत्करणेन सिद्धा सा समष्टिरूपा भवसि, तथैव त्रिभिः ज्योतिर्भिः अग्नीन्द्रसूर्यस्वरूपैः तथा शरीरैः स्थूल-सूक्ष्म-कारणरूपैश्च त्रिवृता सती इमाः विश्वाः प्राणभृतां तनूः सर्वाणि शरीराणि परीता व्याप्ता, अपि च विश्वमेतत् समग्रेण अभिव्याप्ता असि, तस्मात् सा परा वागेव विदा संविदात्मिकया शक्त्या संहिता सती हृदा तदनुभावेन च सिद्धा आत्मनः विश्वात्मनः मिथुनं तदधिष्ठितं पूर्व्यं युगलमिति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you, by the power of speech characterised by knowledge, by your vital powers ( power of action ), and by the powers of the mind (such as desire, feeling and imagination ), abide in all beings. In the material universe, light, water and physical matter are the forms you assume. These are basic things which by the process of triplication ( trivṛtkaraṇa ) take multitudinous forms. All these are pervaded by you, i. e., by Vāk or the power of speech.

## अष्टमी ऋक् ।

सरस्वती त्वं सती मिथुनमात्मन्
करणैर्विश्वैश्चित्ती विश्वथाऽध्यन्तः ॥
अयं यावाँश्चितस्तावती परीता
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठ :— सरस्वती । त्वम् । सती । मिथुनम् । आत्मन् ।
करणैः । विश्वैः । चित्ती । विश्वऽथा । अधि । अन्तरिति ॥
अयम् । यावान् । चितः । तावती । परि । इता ॥
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you are one with the inner soul, like a couple in full harmony. You are in the heart of all and in the universe as well with your faculties such as intellect etc., with senses of knowledge and action, and with all other powers. You are as infinitely pervasive as the power of consciousness. Vāk is the greatest power of knowledge which illumniates the whole universe.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती नाम्ना स्वरूपेण च सिद्धा ज्ञान-वाग्प्रसादिना पूर्णा आत्मन् आत्मनि केवले चेतनस्वरूपे परमपुरुषे मिथुनं मिथुनीभूता दम्पतीसत्त्वा सती विश्वैः करणैः बुध्यादिभिः सर्वेन्द्रियैः विश्वथा सर्वप्रकारेण चित्ता चेतनया अन्तः सर्वेषामपि प्राणभृतां अन्तःशरीरे अधि अध्यात्मसत्त्वोदिते—अयं चेतनः सर्वान्तरात्मा यावान् यावता परिमाणेन निजैः गुण–क्रियादिभिः चितः सञ्चितः व्याप्तः प्रतितिष्ठति, तावती तावत्यैव मर्यादया सा इयं वागपि परीता तत्समाना सती अध्यास्ते, तस्मात् सा परा वागेव तेन परमेण आत्मना मिथुनीभूता सती विश्वस्यापि जगतः दर्शयत् प्रकाशकं ज्योतिः, तत्परञ्ज्योतिःस्वरूपैव सा परा वाग् भवतीति ॥

॥ इति द्वितीयेऽनुवाके दशमं सरस्वतीसूक्तम् समाप्तम् ॥

COMMENTARY—SUMMARY TRANSLATION

Oh revered Sarasvati ! by your name as well as form, you are coupled with Ātman. As such, with all the senses, intellect etc. you pervade the bodies of all living beings. You pervade everything as extensively as the active Ātman. Vāk is equal to the Ātman in every respect; she is as pervasive as He. Therefore, it is certainly Vāk, coupled with the Ātman, which is the light par excellence that illumins the whole universe.

Thus ends the Tenth hymn in the second Section.

---

**अथ द्वितीयेऽनुवाके एकादशं सरस्वतीसूक्तम् ।**

**अनुवाकः २ । सूक्तम् ११ । ऋचः १–९ ।**

**सरस्वती त्वं स्वरवती नव, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।**

**Now the Sarasvati Sukta eleventh in Second Anuvaka**

**Section II, Hymn 11, Riks 1-9-SARASVATĪ.**

This hymn beginning with "Sarasvatī tvam Svaravatī" contains nine Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Sarasvatī is the goddess and the metre is Jagatī.

## अथ प्रथमा ऋक् ॥

सरस्वती त्वं स्वरवती व्योमन् परीता
श्रोत्रं तेजसाऽन्वेषि चेतसा दिग्भिः ॥

श्रुतमेवानु वक्षि सत्यमुतानृतं
वाग् विदा मिथुनं श्रोत्रस्याधि पूर्व्यम्  ॥ १ ॥

पदपाठः– सरस्वती । त्वम् । स्वरऽवती । विऽओमन् । परि । इता ।
श्रोत्रम् । तेजसा । अनुऽएषि । चेतसा । दिक्ऽभिः ॥
श्रुतम् । एव । अनु । वक्षि । सत्यम् । उत । अनृतम् ।
वाक् । विदा । मिथुनम् । श्रोत्रस्य । अधि । पूर्व्यम् ॥

Oh Sarasvati! you are endowed with the essence of subtle sound and have filled the whole sky. You enter the ear with the power of the mind and of the four quarters. Whatever is heard by the ear, you express in words, be it truth or untruth. Vāk on account of intelligence is indeed the mate of the ear from the beginning.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती रसवती ज्ञान-प्राणादिमूलभूतसञ्जीवनीयसर्वरसपूर्णा स्वरवती स्वरसहिता च ज्ञानादिरसोद्गारसत्त्वयुक्ता च सती व्योमन् व्योमनि परीता व्याप्ता शब्दतन्मात्रात्मिका, चेतसा मनसा सह सचेतनेन तेजसा च दिग्भिः दिक्सम्बन्धिनीभिः दिग्देवताभिः सशक्तिभिः सह श्रोत्रं अन्तरिन्द्रियं आकाशात्मकं दिग्रूपं स्वीयं बाह्यं भौवनं भौतिकं च स्थानं शब्दतन्मात्रास्पदीभूतं पदं अन्वेषि प्राप्नोषि, श्रोत्रेण दिगात्मकेन सङ्गच्छसे इति भावः, अतः तेन श्रोत्रेन्द्रियेण श्रुतं सत्यं यथार्थं अनृतं अयथार्थं च सर्वमपि अनुवक्षि वाचैव अनुवदसि, तस्मात् सा वागेव श्रवणकर्मणि श्रोत्रेण सह मिथुनं युगलीभूतम्, विदा ज्ञानशक्त्या योगात्, तथा अधि सर्वार्थाधिष्ठानरूपं तद्वागर्थयोर्विज्ञाने मूलभूतं पदम्, पूर्व्यं प्रथमं सर्वविषयेभ्यः प्राचीनम्, अनेन वाक्छ्रोत्रयोः मिथुनत्वं प्रतिपाद्यते सामर्थ्यात् स्वतः सिद्धम् ॥ अत्र श्रोत्रेन्द्रियं आकाशात्मकमिति न्यायविदां भौतिकदृशां अर्वाचीनानां च मतम्, दिगात्मकमेव श्रोत्रं इति वैदिकं औपनिषदं च तत्त्वम् ॥ "कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद् दिशः" इति (ऐ. उ. १-४) औपनिषदं ब्राह्मणवचनम् ॥ "दिशः श्रोत्रात्" (ऋ. मं. १०-९०-१४) इति ऋङ्मन्त्रवर्णः ॥ तथा "दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्" इति च ब्राह्मणम् (ऐ. उ. २-४) ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī full of the essence of knowledge, of life and of everything. You being the essence of sound, have filled the sky. With the help of the active mind and the powers of the gods presiding over the quarters, you enter the earth which partakes of the essence of the sky

and the four quarters. All that is your own region. That means you are one with the ear. So, whatever is heard, be it truth or untruth, you express in words. So, she is the very basis of hearing, she is one with the ear. Vāk is one with the principle of hearing from eternity. That is, speech and the power to hear are inseparable. They have meaning for each other and for the world only when both are there.

## द्वितीया ऋक् ।

सरस्वती त्वं विद्युता स्पृशन्ती त्वचं
चेतसाऽन्वेषि सम्प्राणेन वायुना ॥
स्पृष्टं तद् वक्षि साक्षादुत पृष्ठतो
वाग् विदा मिथुनं तत् त्वचोऽधि पूर्व्यम् ॥ २ ॥

पदपाठ :– सरस्वती । त्वम् । विऽद्युता । स्पृशन्ती । त्वचम् ।
चेतसा । अनुऽएषि । सम् । प्राणेन । वायुना ॥
स्पृष्टम् । तत् । वक्षि । साक्षात् । उत । पृष्ठतः ।
वाक् । विदा । मिथुनम् । तत् । त्वचः । अधि । पूर्व्यम् ॥

Oh Sarasvati ! having first touched the skin with your lightning-like power, you generate the sense of touch with the help of the mind and the wind-principle full of vitality. So, you are able to express in words about any kind of touch whether it is direct or indirect. Vāk on account of its intelligence is primevally a mate of the sense of touch.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती रसवती सती विद्युता वैद्युतेन तेजसा त्वचं त्वगिन्द्रियं स्पृशन्ती सती चेतसा मनसा सचेतनेन प्राणेन आन्तरेण, वायुना बाह्येन च त्वचं समन्वेषि त्वगिन्द्रियेण, सङ्गच्छसे, अतः साक्षात् प्रत्यक्षं त्वचि स्पृष्टं वस्तुजातं, उत पृष्ठतः अप्रत्यक्षमपि संस्पृष्टं वाचैव वक्षि अनुवदसि, तस्मात् सा वागेव विदा ज्ञानशक्त्या संहिता सती स्पर्शनकर्मणि त्वचः त्वचा सह सम्मिलितं सत् मिथुनं युगलं भवति, तदपि अधि अध्यात्मतत्त्वप्रयुक्तं पूर्व्यं सर्वानुभवसिद्धमेवेति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! Venerable one, you are full of every essence. By the power which is like lightning, you touch the skin and become cognisant of that touch. You became aware of the sense of touch with the help of the internal

vital air ( Prāṇa ) and the external air ( Vāyu ). Therefore, whether the touch is from before or from behind, you are able to express the same in words. Vāk certainly is one with the skin in the act of touching. Vāk and the sense of touch in the living skin are identical.

## तृतीया ऋक् ।

सरस्वती त्वं तेजस्वती सरूपा
तेजसा चक्षुरन्वेषि सं सूर्येण ॥
दृष्टमेवानु वक्षि सर्वं सरूपं
वाग् विदा मिथुनं चक्षुषोऽधि पूर्व्यम्  ॥ ३ ॥

पदपाठ :— सरस्वती । त्वम् । तेजस्वती । सऽरूपा ।
तेजसा । चक्षुः । अनुऽएषि । सम् । सूर्येण ॥
दृष्टम् । एव । अनु । वक्षि । सर्वम् । सऽरूपम् ।
वाक् । विदा । मिथुनम् । चक्षुषः । अधि । पूर्व्यम् ॥

Oh Sarasvati ! you are full of brilliance and have a beautiful form. You enter the eye with the help of the light of the sun. You are able to express in words all that you see and all that has form. Vāk, on account of intelligence, is one with the eye from the beginning.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसवती सती तेजसो योगेन सम्पन्ना तेजस्वती तेजोमयी इति प्रसिद्धाऽसि, " तेजोमयी वाक्," इति ( छां. उ. ६ ) तदनुश्रवणम्, अतः त्वं सरूपा च सती सर्वेषां अन्तरात्मनि तेजसा स्वेन दिव्येन सूर्येण ज्योतिरात्मना सह संहिता च सती चक्षुः दृगिन्द्रियं समन्वेषि, अतः तेन चक्षुषा दृष्टं सर्वमपि वस्तुजातं अनु वक्षि वाचैव वाङ्मुखेन अनुवदसि, यत् खलु सत्यमित्युच्यते लोके वेदे च, यदिह चक्षुषा प्रत्यक्षं दृश्यते तदपि सत्यमित्येव ज्ञायते, " चक्षुर्वै सत्यम्, चक्षुर्वै विचक्षणम् विद्येनेन पश्यतीति " " तस्मात् पश्यन्तमाहुरद्राक्षीरिति सयदि अदर्शमित्याह तत् सत्यं भवति " इति च औपनिषदं ब्राह्मणानुवचनम् ( ऐ. ब्रा. ), " चक्षुर्वै ब्रह्मेति० चक्षुषा वै सम्राट् पश्यन्तमाहुरद्राक्षीरिति, स आहाद्राक्षमिति तत् सत्यं भवति " इति (बृ. उ. ४–१–४) ॥ तस्मात् सा वागेव रूपादिप्रतीक्षणे तदर्थानुवादे च चक्षुषा सह संसृष्टा सती तन्मिथुनत्वं प्राप्नोति, तदपि विदा ज्ञानशक्त्या योगेन अधिष्ठितं पूर्व्यं प्राचीनं अध्यात्मतत्त्वसिद्धं भवति । एतेन वाक्चक्षुषोः मिथुनत्वं गम्यते ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are full of every essence. You are full of brilliance. You have a good form. You enter into all hearts with your own light with the help of the brilliant sun who presides over the sense of sight. Whatever objects are seen, you can express in words. Whatever is seen with one's own eyes is considered as truth. Cf. " The person who has seen with his own eyes is asked: Have you seen with your own eyes ? To which he says: yes. Then it is looked upon as truth." Guru Yājñavalkya tells this to King Janaka, Bṛhad-Āraṇyaka ( IV-I-4 ). " The eye itself is truth, " because man sees with his eyes in a special way ( Ait. Brāhmaṇa ). Here it may be pertinent to refer to every sense being two-fold, the internal and the external. They are referred to as ' sense within ' ( tanmātra ) and the physical organ without. Vāk in the process of seeing the forms becomes one with the eye. Vāk and the eye may be said to be inseparably one, as seeing and expressing what is seen have to be identical.

## चतुर्थी ऋक् ।

सरस्वती त्वं रसवती हिताऽप्सु
जिह्वां प्रचेतसाऽन्वेषि रसेनाद्भिः ॥
जिह्वयैवानुवक्षि स्वदितं रसं
वाग् विदा मिथुनं जिह्वाया अधि पूर्व्यम् ॥ ४ ॥

पदपाठ :– सरस्वती । त्वम् । रसऽवती । हिता । अप्ऽसु ।
जिह्वाम् । प्रऽचेतसा । अनु । एषि । रसेन । अत्ऽभिः ॥
जिह्वया । एव । अनु । वक्षि । स्वदितम् । रसम् ।
वाक् । विदा । मिथुनम् । जिह्वायाः । अधि । पूर्व्यम् ॥

Oh Sarasvati ! you are the repository of all tastes and your home is in the waters ( liquids ). You enter the tongue with the help of the mind and along with the taste of the waters. You can express in words the taste enjoyed by the tongue. Vāk on account of intelligence is one with the tongue and the union is from the beginning.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसवती रसात्मिका सती बहिः अप्सु हिता प्रतिष्ठिताऽसि, तथा आत्मनि शरीरे च प्रचेतसा वरुणेन वारुणेन अद्भिः जलेन दिव्येन च अन्तः शीर्षण्येन रसेन जिह्वां रसास्पदीभूतां अन्वेषि, प्राप्नोषि, ततश्च जिह्वया तया सरसया

स्वदितं भक्षितं आस्वादितं सर्वं रसं जिह्वया वाचा रसनया सहयोगेन अनु वक्षि तत्तद्रसानुभवेन सिद्धं रसज्ञानं अनुवदसि माधुर्यादिगुणसत्त्वपूर्णम्, तस्मात् हे सरस्वति ! सा वागेव त्वं रसानामास्वादने तदनुवदने च विदा ज्ञानशक्त्या सिद्धा सती अधि अध्यात्मतत्त्वसिद्धं पूर्व्यं प्राचीनं सर्वानुभवसिद्धं मिथुनं युगलीभूतमिति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are yourself the principle of taste ( Rasa ). You are residing in waters both in their subtle essence and in their physical form. You are one with the celestial essence of Varuṇa ( the god of waters ). You are one with the tongue. Whatever the tongue tastes, you are able to utter in the form of words. Vāk, in the act of tasting and expressing it, is one with the tongue. This union is beginningless.

## पञ्चमी ऋक् ।

सरस्वती त्वं मिता सोमेन सूर्येण
नासां चेतसाऽन्वेष्यश्विभ्यां गन्धैः ॥
गन्धमेवानु वक्षि नासाभ्यां घ्रातं
वाग् विदा मिथुनं नासयोरधि पूर्व्यम् ॥ ५ ॥

पदपाठ :– सरस्वती । त्वम् । मिता । सोमेन । सूर्येण ।
नासाम् । चेतसा । अनुऽएषि । अश्विऽभ्याम् । गन्धैः ॥
गन्धम् । एव । अनु । वक्षि । नासाभ्यां । घ्रातम् ।
वाक् । विदा । मिथुनम् । नासयोः । अधि । पूर्व्यम् ॥

Oh Sarasvati ! you are full of the power of Soma ( the moon-god) and Sūrya ( the sun-god ). With the help of the mind and the Aśvins ( i. e. the power of the Sun and the Moon ) you enter the nose with various odours. You express in words the odours which are smelt by the nose. Vāk on account of intelligence is one with the nostrils from the beginning.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसवती सती सोमेन दिव्येन रसात्मना सर्व रसाधिदेवतेन, तथा सूर्येण ज्योतिरात्मना सर्वतेजोऽधिदैवतेन च युक्ता च सती अश्विभ्यां सोमसूर्यरूपाभ्यां ज्योती-रसात्मकाभ्यां गन्धैश्च सह चेतसा सचेतनेन मनसा च नासां अन्वेषि घ्राणेन्द्रियं प्राप्नोषि, तद्विज्ञानसत्त्वेन, अत एव ताभ्यां नासाभ्यां घ्रातं सर्वं सुगन्धि दुर्गन्धं च

अनुवक्षि वाङ्मुखेन अनुवदसि, तस्मात् सा वागेव गन्धाघ्राणने तदनुवादविषये च नासायाः मिथुनं युगलीभूतम्, तच्च विदा ज्ञानशक्तियोगेन सिद्धं अध्यात्मकं प्राचीनं करणमिति । एतेन वाङ्-नासिकयोः मिथुनत्वं समर्थ्यते ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are yourself the essential taste of things. You are one with Soma, i. e., the moon who is full of celestial essences. You are one with Sūrya, the sun, the lord of all light. With the help of the Aśvin gods, who are Soma and Sūrya, and with the help of the mind, you enter the nose in the form of various odours. So, whatever the nose smells, you can express in words. Vāk, who is one with the nose in the act of smelling has been from the beginning inseparably associated with the nostrils.

## षष्ठी ऋक् ।

सरस्वती त्वं चोदयन्ती धियं स्वां
विश्वा धियोऽन्वेषि चेतसा सवित्रा ॥
प्रज्ञातं तदनु वक्षि सर्वं धीभि-
र्वाग् विदा मिथुनं धियां संविदां पूर्व्यम् ॥ ६ ॥

पदपाठः— सरस्वती । त्वम् । चोदयन्ती । धियम् । स्वाम् ।
विश्वाः । धियः । अनुऽएषि । चेतसा । सवित्रा ॥
प्रऽज्ञातम् । तत् । अनु । वक्षि । सर्वम् । धीभिः ।
वाक् । विदा । मिथुनं । धियां । सम्ऽविदाम् । पूर्व्यम् ॥

Oh Sarasvati ! you inspire your own intellect, i. e., the universal intellect. With the help of the mind and the sun-like light of knowledge you enter the intellects of all. You express in words whatever is known to all intellectual minds. Vāk is indeed one with the intellects and consciousness of all. This union has been there from of old.

## अन्वयभाष्यम् ।

हे भगवति! त्वं सरस्वती स्वयं प्रज्ञानादिरससत्त्वा सती स्वां स्वसम्बन्धिनीं धियं प्रज्ञां सर्वेषामन्तरात्मनि चोदयन्ती प्रेरयन्ती च सती चेतसा सचेतनेन मनसा च सह सवित्रा दिव्येन ज्योतिरात्मना च साकं विश्वाः धियः सर्वाणि धीन्द्रियाणि अन्वेषि व्याप्नोषि, अत एव सर्वासु धीषु वागेकैव अनुस्यूतेति सम्पद्यते, तेन च ताभिरेव धीभिः प्रज्ञातं ज्ञानरूपेण

स्वीकृतं सर्वं वस्तु विषयादिजातं अनुवक्षि वाङ्मुखेनैव अनुवदसि, तस्मात् सा वागेव तासां धियां संविदां च मिथुनं पूर्व्यं प्राचीनं प्रत्यक्तनं च स्वत:सिद्धमेव परं तद् युगलं भवति, तदपि विदा ज्ञानशक्तियोगादेव वाच:, एतेन सर्वेषामपि धीन्द्रियाणां वाचा सह मिथुनत्वं-गम्यते ॥ अस्मिन् अर्थे ऋङ्मन्त्रवर्ण: एव प्रत्यक्षं प्रमाणम्, "महो अर्ण: सरस्वती प्रचेतयति केतुना। धियो विश्वा विराजति" इति (ऋ. मं. १-३-१२), "शं सरस्वती सह धीभिरस्तु" इति च (ऋ. म. ७-३५-११) ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī. You are full of the essence of supreme knowledge. You inspire all the souls. With the help of an active mind, and of god Savitā in the form of celestial light, you activise all the organs of knowledge. Vāk is one with all the projections of intellect. Further, whatever is known to the intellect, whether it is concrete or abstract, you are able to express in words. Certainly, Vāk is united with intellect and knowledge. The union is ancient and self-evident. In this respect, attention is invited to Ṛg. I-3-12, which says, " Sarasvatī is like a big ocean. She inspires and impregnates all intellects with knowledge, and shines. " This is verifiable at every stage.

### सप्तमी ऋक् ।

सरस्वती त्वं विश्वकर्मा कर्मभि:
सह प्राणै: पर्येषि करणैर्विश्वै: ॥
कृतमेवानु वक्षि सर्वं चेतसा
वाग् विदा मिथुनं प्राणस्याधि पूर्व्यम् ॥ ७ ॥

पदपाठ :– सरस्वती । त्वम् । विश्वऽकर्मा । कर्मऽभि: ।
सह । प्राणै: । परिऽएषि । करणै: । विश्वै: ॥
कृतम् । एव । अनु । वक्षि । सर्वम् । चेतसा ।
वाक् । विदा । मिथुनम् । प्राणस्य । अधि । पूर्व्यम् ॥

Oh Sarasvati ! on account of your works, you are the performer of all works in the universe. You pervade the whole universe with the help of the vital airs ( prāṇas ) and instruments of action ( organs of action, the Karmendriyas ). With the help of the mind you express in words whatever is done. Vāk on account of the power of intelligence is one with the power of action from the beginning.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती ज्ञानरूपा सती कर्मभिः सर्वैः युक्ता विश्वकर्मा सर्वकर्मसमर्था भवसि, तथा विश्वैः सर्वैः कर्मेन्द्रियरूपैः प्राणैः सर्वेन्द्रियाधिष्ठानभूतैः मुख्यप्राणसत्त्वैः सह पर्येषि परितः सर्वतः व्याप्नोषि, अतः तैः सर्वेन्द्रियैः कृतं सर्वं कर्मजातं चेतसा मनसा सचेतनेन सह वाङ्मुखेनैव अनुवदसि, तस्मात् विदा ज्ञानशक्तियोगात् सा वागेव सर्वकर्मकरणविषये तत्कर्मोच्चारणविषये च प्राणस्य अध्यात्मकं प्राचीनं मिथुनम्, एतेन सर्वैः कर्मेन्द्रियैः तन्मूलभूतेन प्राणेन वाचः पूर्व्यं सर्वतः प्रथमं मिथुनत्वं स्वतः सिद्धम् ॥ अर्थात् वक्-पाणि-पाद-पायु-उपस्थरूपेषु कर्मेन्द्रियेषु पञ्चसु वाच एव प्राथम्यमस्तीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! the Venerable one, you are the very essence of knowledge; at the same time, you are capable of all works. Again you are one with all the senses and vital airs which make all actions possible. So, whatever is done by all the senses, you can express in words as you are simultaneously associated with the active mind. Therefore, in respect of doing all the works in the universe, Vāk is one with the vital airs and senses which are instrumental in performing all actions. Vāk is of primary importance.

## अष्टमी ऋक् ।

सरस्वती त्वं वेत्तारमात्मानं स्व-
मात्मना प्रचितं स्वं प्रज्ञानं सर्मम ॥
सर्वमेवानु वक्षि जिह्वया रसेन
वाग् विदा मिथुनं रसनायाः पूर्व्यम् ॥ ८ ॥

पदपाठ :– सरस्वती । त्वम् । वेत्तारम् । आत्मानम् । स्वम् ।
आत्मना । प्रऽचितम् । स्वम् । प्रऽज्ञानम् । सर्मम् ॥
सर्वम् । एव । अनु । वक्षि । जिह्वया । रसेन ।
वाक् । विदा । मिथुनं । रसनायाः । पूर्व्यम् ॥

Oh Sarasvati ! you express in words with your sweet tongue, the knowledge of the Ātman who knows himself and you also express all the essential knowledge gathered by you. Vāk, on account of intelligence, is the mate of the tongue from the beginning.

## अन्वयभाष्यम् ।

हे भगवति! त्वं सरस्वती स्वयं ज्ञानादिरसात्मिका सती वेत्तारं प्रज्ञातारं स्वं निजं आत्मानं प्रचेतनस्वरूपं, तथा आत्मना तेन स्वेन च प्रचितं सर्वेन्द्रियद्वारा सङ्गृहीतं स्वं स्वीयं समं समानभावसिद्धं परमं च सर्वं प्रज्ञानं जिह्वया सरसया वाचा रसेन वाग्रसेन दिव्येन स्वेन अनुभावादिरूपेण अनु वक्षि वाचैव अनुवदसि, तस्मात् सा वागेव विदा संवित्प्रधानया शक्त्या सर्वज्ञानादिप्रकाशने तथा स्वानुभूतवस्तूपदेशादिषु रसनाया: मिथुनं मिथुनीभूतम्, पूर्व्यं सर्वेभ्योऽपि प्राचीनं तत् वाच: रसनया मिथुनत्वम्, एतेन वाग्-रसनयोः आध्यात्मकं संवित्सत्त्वपूर्णं विशिष्टं मिथुनत्वं स्वत: सिद्धं प्रतीयते इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī, the deity of knowledge. So, you express in sweet words the Ātman, the knower as well as whatever is gathered by yourself as knowledge and experience through all the senses. Therefore, it is certainly Vâk, who is intimately associated with the tongue in respect of gathering all knowledge and in communicating the same to others. The union of Vāk and the tongue is the oldest. This establishes the self-evident union of Vāk and the tongue which is spiritual.

## नवमी ऋक् ।

सरस्वती त्वं प्राणैरुत धीभिश्च
समं वसन्ती न संसृष्टा तैर्विश्वैः ॥
ब्रह्मणा स्वेन सता संहिताऽऽत्मना
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ ९ ॥

पदपाठ :– सरस्वती । त्वम् । प्राणैः । उत । धीभिः । च ।
सम्म् । वसन्ती । न । सम्ऽसृष्टा । तैः । विश्वैः ॥
ब्रह्मणा । स्वेन । सता । सम्ऽहिता । आत्मना ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! you dwell with the vital airs ( prāṇas ) and all the intellectual faculties but you are never touched or affected by any of them. You are one with Brahma who is your own Self and the real truth. Indeed Vāk is the supreme light that illumines everything in the universe.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती ज्ञानचेतनादिसर्वरसपूर्णा सती आन्तर्यैः बाह्यैश्च सर्वैः प्राणैः प्राणसत्त्वैः धीभिः ज्ञानादिशक्तिभिः धीन्द्रियैश्च समं साकं संवसन्ती नित्यसिद्धाऽपि तैः विश्वैः करणैः वस्तुविषयादिभिः तद्ग्राहकैः इन्द्रियैश्च नैव संसृष्टा न तावन्मात्रया परिक्लृप्ता असि, अपि तु स्वेन आत्मीयेन ब्रह्मणा पूर्णेन वस्तुना सता सत्येन आत्मना परमेण संसृष्टा तत्सामरस्ययोगेन पूर्णा सर्वेभ्यः परा अतिरिक्ता अन्वयेन व्यतिरेकेण च ब्रह्मात्मना समाना सा परा वाक् सदैव भवतीति भावः ॥ अस्मिन् अर्थे ऋङ्मन्त्रवर्ण एव प्रत्यक्षं स्वतः सिद्धं प्रमाणम्। "यावद् ब्रह्म विष्ठितं तावती वाक्" इति (ऋ. मं. १०–११४–८) ॥ तदुपव्याख्यानरूपं ऐतरेयाणां आरण्यकं ब्राह्मणवचनं च भवति, "यत्र क्व च ब्रह्म तद् वाक्, यत्र वा वाक् तद् वा ब्रह्मेत्येतदुक्तं भवति" इति (ऐ॰ आ. १-३-८), "अष्टमीं नानुषजति० तस्माद् वाक् सह प्राणैः समायतना सती अननुषक्ताऽसदिति" इति च वाचः सर्वेभ्यः प्राणेभ्यः अतिरिक्तत्वं अनुश्रूयते ॥ एतस्मिन्नेवार्थे औपनिषदं मन्त्रब्राह्मणानुवचनम्–"तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदाना" इति औपनिषदः श्लोकः (बृ. उ. २-२-३), "प्राणा वा ऋषयः प्राणानेवैतदाह। वागष्टमी ब्रह्मणा संविदानेति वाग्वि–अष्टमी ब्रह्मणा संवित्ते" इति च तदुपव्याख्यानम् (बृ. उ. २-२-३) ॥ अत्र ब्रह्मात्मना संहिता वागेव सम्यग्ज्ञानसत्त्वेत्यर्थः सम्पद्यते, तथा सा च सप्तप्राणेभ्यः परा आन्तरतमा वागेव अष्टमी इति च प्रतिज्ञायते, तस्मात् सा परा वागेव विश्वस्य जगतः दर्शयत् प्रकाशकं ज्योतिः, तत्परञ्जोतिः स्वरूपैव सा परा वाग् भवतीति ॥

॥ इति द्वितीयेऽनुवाके एकादशतमं सरस्वतीसूक्तम् समाप्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī. You are full of the essence of all knowledge as well as of the principle of vitality. As such, you are externally connected with the vital airs (prāṇas) within and without, and with all the powers of knowledge. But you are not in the least affected by those things. Neither the things in the universe which are the objects of our senses nor the knowledge conveyed by the senses affects you who are the supreme instrument of all knowledge. You are always with Brahma, who is full and perfect in every way, and who is ever existent. You are quite identical with Him and are superior to and beyond all other things. "Vāk is co-extensive with Brahma" (Ṛg. X–118–4). This is further borne out by Aitareya Āraṇyaka almost in the form of an elaboration of what is said above, "Wherever there is Brahma there is Vāk and wherever there is Vāk there is Brahma" (Ai. Ār. 1-3-8). Vāk dwells with Prāṇa and the senses, but it is quite unaffected by

all these contacts. Again, the Upanishad, "On the banks of it, there were seven Ṛshis and the eighth was Vāk; they conversed with Brahma." ( Bṛh. Up. II-2-3 ). The Ṛshis here are the Prāṇas.

It is the supreme power of speech, Vāk, which is the light par excellence, that illumines all and everything in the universe.

Thus ends the Eleventh hymn in the second Section.

---

## अथ द्वितीयेऽनुवाके द्वादशतमं सरस्वतीसूक्तम् ।

अनुवाकः २ । सूक्तम् १२ । ऋचः १–१२ ।

सरस्वती त्वं ब्रह्मजाया द्वादश, दैवरातो वैश्वामित्रः, सरस्वती, जगती ।

**Now the Sarasvati Sukta, Twelfth in Second Anuvaka**

**Section II, Hymn 12, Riks 1–12 -** SARASVATĪ.

This hymn beginning with "Sarasvatī tvam Brahmajāyā" contains twelve Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Sarasvatī is the goddess and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

सरस्वती त्वं ब्रह्मजाया साम्ना यद्
रसेनान्वभवोऽन्तर्ब्रह्मणस्पतेः ॥
मातेव मां रसं तं पाययात्मनो
वाग् विदा परमा पुरुषस्य माता ॥ १ ॥

पद्पाठ :– सरस्वती । त्वम् । ब्रह्मऽजाया । साम्ना । यत् ।
रसेन । अनु । अभवः । अन्तरिति । ब्रह्मणः । पतेः ॥
माताऽइव । माम् । रसम् । तम् । पायय । आत्मनः ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! being one with Brahma, you are as it were, the wife of Brahma. Being in perfect harmony, you have experienced the happiness of union with Brahma who is your lord. Like a loving mother, enable me to taste the delight of oneness with the Ātman. Vāk being full of intelligence is the mother of the great Purusha ( the supreme person ).

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसात्मा रसदेवता च ब्रह्मजाया ब्रह्मसती निर्गुणस्य निर्विषस्यापि परब्रह्मण: पत्नीव स्थिता, अत एव त्वं प्रत्यक्षं ब्रह्मैव भवसि, तद्धर्मात्मकत्वात्, तेन ब्रह्मणा सह साम्ना रसेन सामरस्ययोगेन ते तव ब्रह्मणस्पतेः प्रत्यक्षब्रह्मण: स्वस्यैव अधिपतेः तस्य परमपुरुषस्य त्वत्पते: योगेन परमानन्दरससत्त्वं यत् खलु त्वं अन्वभव: अनुभूतवती तं स्वानुभूतं रसं परमस्य आत्मनः सद्रसं संविद्रसं वाग्रसं च निजं मातेवसुतं इत्यध्याह्रियते सामर्थ्यात्, त्वत्सुतं पुत्रवत् संवृत्तं मां इमं पायय धापय, यतः सा त्वं वागेव सर्वस्यापि पुरुषस्य माता जननी, परमपुरुषस्य च मात्री प्रमाणभूतेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī, the essence of delight. As such you are the wife of Brahma who is himself attributeless but all delight. You are evidently Brahma, the visible form of reality. You are His equal by being identical with Him in happiness. By being united with Brahma who is your lord, you experiencc the same supreme bliss as He. Like a mother, kindly feed me as if I were your son. Vāk is the supreme measure of the perfect Purusha.

## द्वितीया ऋक् ।

सरस्वती त्वं सती ब्रह्मयोगेन
यंयं प्रापिबो रसं ब्रह्मणस्पतेः ॥
मातेव मां रसेनाप्यायय स्वेन
वाग् विदा परमा पुरुषस्य माता ॥ २ ॥

पदपाठ :– सरस्वती । त्वम् । सती । ब्रह्मऽयोगेन ।
यम्ऽयम् । प्र । अपिबः । रसम् । ब्रह्मणः । पतेः ॥
माताऽइव । माम् । रसेन । आऽप्यायय । स्वेन ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! you are in communion with Brahma himself, and as such, you have drunk deep of the delight of Brahma. Verily like a mother, feed me to my full satisfaction with the delight which is now yours. Vāk is the measure and the mother of the Supreme Purusha in virtue of having the power of intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसवती शान्त्यानन्दादिरसमयी तथा प्रत्यक्षं ब्रह्मैव सती योगेन परमेण ब्रह्मणा तादात्म्येन, ब्रह्मणस्पते: तस्य यंयं रसं प्रापिबः आनन्दादिरसं

पीतवती, तेन स्वेन स्वानुभूतेन रसेन संविन्मयेन तत्प्रापकेन वाग्रसेन च माता इव सुतं मातृवत् मां आप्यायय सन्तर्पय, यतः सा वागेव पुरुषस्य परमा माता भवतीति ॥ अनया ऋषिः वाग्रसं ब्रह्मात्मरसं च सरस्वतीं प्रति याचते, एवं तत्तदर्थानुसन्धानेन तत्तत्कामनया भावनया च एतासामृचां ध्यान-जपादिविनियोगेन वक्ष्यमाणेन तेन वैदिक-तान्त्रिकादिकल्पानुसारेण यजनादिना च स्वं स्वं सदभीष्टमर्थं साधयितुं शक्यमिति प्रतिज्ञायते ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarsavatī, who are one with Brahma and full of delight. By your supreme union with the manifest as well as the unmanifest Brahma, you enjoy his highest delight. You now feed me with that happiness which you have enjoyed. That happiness is in the form of knowledge which takes one to Brahma. Vāk is the supreme mother of all. The delight of Brahma is sought after by the Ṛshi through the good offices of Vāk, the goddess of speech. The process of attaining the highest delight through the grace of Vāk is by an earnest desire to attain the goal followed by the use of mantras, meditation, worship, offering oblations, Vaidik and Tāntrik rites and so on.

## तृतीया ऋक् ।

सरस्वती त्वं ब्रह्मणाऽऽत्मनाऽऽप्लुतं
धिया वाचा संविदा क्रतुना स्तन्यम् ॥
मातेव मां वत्सं धापय स्वं रसं
वाग् विदा परमा पुरुषस्य माता ॥ ३ ॥

पदपाठ :– सरस्वती । त्वम् । ब्रह्मणा । आत्मना । आऽप्लुतम् ।
धिया । वाचा । सम्ऽविदा । क्रतुना । स्तन्यम् ॥
माताऽइव । माम् । वत्सम् । धापय । स्वम् । रसम् ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! You are full of all the powers of Brahma. The powers of Brahma consist of intellect, faculty of expression, knowledge and will to action. All these are like mother's milk. Feed me, who am like your son, with all these powers. Vāk is the measure and the mother of the Supreme Purusha, in virtue of having intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसात्मा सती ब्रह्मणा परमेण आत्मना चेतनेन चिद्रसात्मना आप्लुतं आर्द्रीकृतं परिपूरितं च, प्रज्ञया प्रज्ञानशक्त्या वाचा शब्दशक्त्या संविदा

ज्ञानशक्त्या क्रतुना स्वात्मसत्त्वेन कर्मणा च आप्लुतं समृद्धं स्तन्यं तव वाग्रसेन स्वाहा-स्वधाकारादिना सत्त्वेन पूर्णं स्वं रसं आत्मीयं रसं माता इव मातृवत् सिद्धा त्वं वाङ्माता सुतं पुत्रमिव स्थितं मां धापय पायय, यतः सा त्वं वागेव पुरुषस्य सर्वस्यापि परमा श्रेष्ठतमा हिततमा माता प्रसवित्री पालयित्री च असि, परमात्मनस्तु प्रमात्री भवसीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī full of the mother's milk in the form of all the powers of Brahma. He is the very source of all intellect, the power of all expression, the power of knowledge and of the will to act. Like a mother you should feed me with all powers. You alone have them as you are one with Brahma.

## चतुर्थी ऋक् ।

सरस्वती त्वं वत्सं धापयन्ती मां
सत्यं तत् प्रगाय यद् भवस्यनु स्वयम् ॥
भूयस्तदनु गायन्ती लालयच्छन्दसा
वाग् विदा परमा पुरुषस्य माता ॥ ५ ॥

पदपाठ :— सरस्वती । त्वम् । वत्सं । धापयन्ती । मां ।
सत्यं । तत् । प्र । गाय । यत् । भवसि । अनु । स्वयम् ॥
भूयः । तत् । अनु । गायन्ती । लालय । छन्दसा ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! You are like my mother feeding me at your breast. Kindly express the truth of your experience in song. While singing the same in a metrical form fondle me who am your child. Your are indeed Vāk, the measure and mother of the Supreme Purusha. That you are in virtue of intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वति रसात्मा सती त्वत्सुतं मां इमं धापयन्ती स्वीयं स्तन्यं रसं पाययन्ती सती यत् स्वयं अनुभवसि तत् स्वानुभवसिद्धं सत्यं वस्तु तथा तद्रससत्त्वं च प्रगाय सरसं सस्वरं च समुच्चारय गीतिरूपेण अनुस्वर इति भावः, तथा भूयः पुनः पुनरपि अनुगायन्ती तदेव अनुस्वरन्ती सती छन्दसा वेदेन गायत्र्यादिना मन्त्रेण स्वरसेन प्रेमभावेन मां लालय लालनेन प्रतिपालय, यतः सा त्वं वागेव पुरुषस्य परमा हिततमा माता, प्रणयित्री प्रणयेन प्रतिनेत्री च साक्षात् जननीति, अनया ऋचा ऋषिः सरस्वतीं प्रति प्रेमरसं याचते, मातृवात्सल्यपूर्णम, तथा पुत्रवात्सल्यसमुदीर्णमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī, who are full of delight. I am your son and so feed me with the happiness which you enjoy. Sing in a delightful way about the supreme Truth which has been realised by you. Again and again, while singing the poetical song of Truth delightfully and with love, fondle me, your child. Vāk is the most beneficial mother and the guide of all. Thus the Ṛshi begs of the mother Sarasvatī to feed him with truthful poetry.

## पञ्चमी ऋक् ।

सरस्वती त्वं धापयन्ती मामनु
गायन्त्यनु कारयन्त्यनु स्वरन्तम् ॥
प्रति गायय च्छन्दसा मे हृदा वाचा
वाग् विदा परमा पुरुषस्य माता ॥ ५ ॥

पदपाठ :— सरस्वती । त्वम् । धापयन्ती । माम् । अनु ।
गायन्ती । अनु । कारयन्ती । अनु । स्वरन्तम् ॥
प्रति । गायय । छन्दसा । मे । हृदा । वाचा ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! while feeding me and singing and chanting the song, make me also chant the same with a full heart in the form of words and metrical poetry. You are indeed Vāk, the measure and mother of the Purusha. You are so, on account of the power of intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं सत्य-हित-प्रेमादिरसात्मा सती निजं रसं मां धापयन्ती, तमेव पुनः अनुगायन्ती च सती, त्वदनुकरणपरं त्वत्स्वरमेव अनुसृत्य तं स्वमुखेन अनुस्वरन्तं मां इमं अनु कारयन्ती ममापि मुखेन पुनः पुनरुच्चारयन्ती सुस्वरेण स्वरसेन च अनुशीलयन्ती तथा शिक्षयन्ती च सती मम हृदा मनसा सद्भावेन वचसा वाचा च छन्दसा छन्दोमुखेन प्रति गायय तच्छन्दोमयं मन्त्रमेव गायत्र्यादिच्छन्दसा संहितं सामस्वरादिना तद्गायनमपि कारय इति भावः, यतः सा त्वं वागेव पुरुषस्य परमा हिततमा परमार्थरसप्रदा माता असि इति । एवं निश्चयेन सद्भावनया सच्छ्रद्धया च तदर्थमेव त्वां प्रार्थयामीति, ऋषेरयं परमादरानुभावो भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī, full of delight and you are my feeder. You sing about Brahma. I am your son emulating you. Please make me chant with all my heart whatever you sing. Let all that be expressed in words set in metres. They are the mantras in the form of Sāma chants. Vāk is the mother of all. She can bestow happiness of the best kind.

## षष्ठी ऋक् ।

सरस्वती त्वं रसेन सत्त्वेन स्वेन
सह च्छन्दसा मामन्वाविशात्मना ॥
छन्द एवानु गाय हृदा गाययान्त-
र्वाग् विदा परमा पुरुषस्य माता ॥ ६ ॥

पदपाठ :— सरस्वती । त्वम् । रसेन । सत्त्वेन । स्वेन ।
सह । छन्दसा । माम् । अनु । आऽविश । आत्मना ॥
छन्दः । एव । अनु । गाय । हृदा । गायय । अन्तरिति ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! enter into me with your whole essence, your ecstatic delight and all, in the form of metrical compositions. Make me sing the same with a full heart. Vāk is the mother and measure of the Supreme Purusha on account of the power of knowledge.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसमयी सती स्वेन निजेन सत्त्वेन रसेन आनन्देन सर्वसारभूतेन वाग्रसेन प्रेमरसेन च छन्दसा वेदेन सस्वरेण मन्त्रेण आत्मना चेतनस्वरूपेण सह मां इमं वागुपासकं त्वद्भक्तं अन्वाविश प्रविश, तथा तत् सस्वरं छन्दः छन्दोमयं मन्त्रमेव अनुगाय समभावान्वितेन सामस्वरादिना, तथा तवैव वाचा मामपि गायय, मम हृदा मुखेनापि तद्गायनं कारय इति भावः, यतः सा त्वं वागेव पुरुषस्य परमा प्रकृष्टा हिततमा माता मातेव पुत्रलालन-पालनादिप्रियेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable one, you are Sarasvatī, full of pure delight. Enter into me with all your ecstacy which is the essence of all being. Enter me in the form of mantra, properly composed in a metrical form. Please chant the well-accented notes of the Sāma in harmony with my heart. Make me also chant the same.

## सप्तमी ऋक् ।

सरस्वती त्वं हृदयेन ब्रह्मणो
यद् बभूव प्रहृष्टं हृदयं तव ॥
तेन मे हृदयं योजयात्मनोऽन्त-
र्वाग् विदा परमा पुरुषस्य माता ॥ ७ ॥

पदपाठ :— सरस्वती । त्वम् । हृदयेन । ब्रह्मणः ।
यत् । बभूव । प्रऽहृष्टम् । हृदयम् । तव ॥
तेन । मे । हृदयम् । योजय । आत्मनः । अन्तरिति ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! being one with Brahma, your heart is full of the joy of Brahma. Make my inner heart full of that joy of yours. Vāk is the measure and the mother of the supreme Purusha in virtue of intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं स्वयं सरस्वती रसात्मैव असि, तथा ब्रह्मणः परमात्मनः हृदयेन तेन सह योगेन तव हृदयं यत् प्रहृष्टं बभूव, तेनैव परमात्मरसप्रहृष्टेन तव हृदयेन आत्मनः तव अन्तः चेतने ममापि हृदयं योजय तेन प्रहर्षयेति भावः, यतः सा त्वं वागेव पुरुषस्य परमा श्रेष्ठतमा माता असि इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Venerable Sarasvati, you are the very essence of all joy. You are one with the Supreme Self. Your heart is delighted by being one with Bramha. Make my heart one with yours and make it enjoy what you yourself enjoy.

## अष्टमी ऋक् ।

सरस्वती त्वं रसेन स्वेन विदा
ब्रह्मणाऽऽत्मनो मां कृधि प्रवेत्तारम् ॥
ब्रह्मविदं मां कृधि सन्दृशमृषिं
वाग् विदा परमा पुरुषस्य माता ॥ ८ ॥

पद्पाठ :– सरस्वती । त्वम् । रसेन । स्वेन । विदा ।
ब्रह्मणा । आत्मनः । माम् । कृधि । प्रऽवेत्तारम् ॥
ब्रह्मऽविदम् । माम् । कृधि । सम्ऽदृशम् । ऋषिम् ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! make me a knower of the Ātman or the Supreme Self by means of your intelligence, the intellectual power, the delight and the gift of poetry, all of which you have in abundance. Make me one who knows Brahma, like the Ṛshi or seer. Vāk is the measure and the mother of Purusha, in virtue of the power of intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसात्मा सानन्द-संवित्स्वरूपा असि, अत एव त्वां प्रति याचे, स्वेन निजेन रसेन दिव्येन वाग्रसेन विदा ज्ञानेन ब्रह्मणा प्रत्यक्षब्रह्मरूपेण मन्त्रेण च मां इमं आत्मनः सर्वान्तरात्मनः प्रवेत्तारं प्रज्ञातारं कुरु सम्भावय अनुग्रहेण, तथा मां इमं त्वदुपासकं ब्रह्मविदं सन्दृशं सम्यग्दर्शिनं ऋषिं मन्त्रदृशं च कुरु सम्भावय, "यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्" ( ऋ. मं १०-१२५-५ ) इति मन्त्रमुखेन कृतां निजां प्रतिज्ञां सत्यमन्त्रां कुरुष्व इति ऋषिः प्रार्थयते, यतः सा त्वं वाक् एव पुरातना परमा श्रेष्ठतमा पुरुषस्य माता असि इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Venerable Sarasvati, you are yourself the soul of all delight and knowledge incarnate. Therefore, I make this humble request. By means of your power of speech and knowledge and mantra make me a good knower of Ātman. I am your devotee and so, make me one who knows Brahma like a good seer, a seer of Vedic mantras. " Whomsoever I like and love, I would make him an ' ugra ', the best one; I would make him a Brahma; I would make him a Ṛshi and I give him the best brain " ( Ṛg. 10–125–5 ). This is the promise of Brahma. Here is a prayer to Brahma or Sarasvatī to make good that promise.

## नवमी ऋक् ।

सरस्वती त्वं छन्दसा ब्रह्मणाऽन्तः
संविदा ब्रह्मणस्तपसाऽऽत्मनि ॥
द्रष्टारं कुरु च्छन्दसां मामृषिं
वाग् विदा परमा पुरुषस्य माता ॥ ९ ॥

पदपाठ :— सरस्वती । त्वम् । छन्दसा । ब्रह्मणा । अन्तरिति ।
सम्ऽविदा । ब्रह्मणः । तपसा । आत्मनि ॥
द्रष्टारम् । कुरु । छन्दसाम् । माम् । ऋषिम् ।
वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! you inspire my inner self so that I can be the seer of mantras in metres. Inspire me with metrical knowledge, deep insight and endow me with the power of tapas (austerity). You are indeed Vāk, the supreme measure and mother of Purusha on account of intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं संविद्रूपा सती छन्दसा गायत्रादिना ब्रह्मणा मन्त्रेण छन्दः संहितेन आत्मनि अन्तः परिशीलितेन तपसा ब्रह्मात्मनः साक्षात्कारहेतुभूतेन केवलेन विमर्शेन ब्रह्मणः सद्वस्तुनः संविदा सम्यग्ज्ञानेन छन्दसां मन्त्राणां द्रष्टारं साक्षात्कारेण अन्तःश्रवणेन तत्प्रासारं ऋषिं मां कुरु सम्भावय, अनया स्वस्य ऋषित्वं याचते ब्रह्मात्मनः साक्षात्कारेण, मन्त्रदर्शनेन च, यतः सा त्वं वाग्देवतैव पुरुषस्य परमा श्रेयस्करी निःश्रेयसप्रदा हिततमा माता असीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Venerable Sarasvati, you are yourself knowledge incarnate. So, make me a seer of mantras in various metres like Gāyatrī, endow me with inner knowledge and tapas which leads to the realisation of Brahma. Make me a Ṛshi who can utter the mantras after hearing them within his own heart. This is a prayer to Sarasvatī to make the devotee a Ṛshi or a seer.

## दशमी ऋक् ।

सरस्वती त्वं पुरुषे स्वे परमे
यद् वा श्रद्धत्से यथा विश्वथाऽऽत्मना ॥
सत्येन श्रद्धापयास्मै प्रति मह्यं
वाग् विदा परमा पुरुषस्य माता ॥ १० ॥

पदपाठ :— सरस्वती । त्वम् । पुरुषे । स्वे । परमे ।
यत् । वा । श्रत् । धत्से । यथा । विश्वऽथा । आत्मना ॥

सत्येन । श्रत् । धापय । अस्मै । प्रति । मह्यम् ।

वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarasvati ! just as you have supreme faith in your Lord, endow me with the same kind of faith in the Lord. You are indeed Vāk, the supreme measure and mother of Purusha in virtue of intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं रसमयी आनन्दात्मिका प्रेमस्वरूपा सती स्वे निजे परमे पुरुषे यथा येन प्रकारेण विश्वथा आत्मना सर्वप्रकारेण सर्वात्मना च यत् खलु त्वं श्रद्दत्से श्रद्धां भक्तिं धारयसे, तथा तया विधयैव अस्मै त्वदुपासकाय वाङ्मातृभक्तिपरायणाय मह्यं मदर्थं श्रद्धापय श्रद्धां उत्पादय, यतः सा त्वं वाग्देवतैव पुरुषस्य परमा पूज्या श्रेष्ठतमा माता भवसि इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable Sarasvati ! you are the very soul of delight and you are love incarnate. You have supreme faith in every way and with all your heart in your Lord. Let me, your devotee, have the very same kind of faith in the Supreme Being.

## एकादशी ऋक् ।

सरस्वती त्वं सत्यं हितं परमं

मह्यमादिश ब्रह्म ब्रह्मणाऽऽत्मानम् ॥

ऋजुना मां सुपथा साम्ना प्र णय

वाग् विदा परमा पुरुषस्य माता ॥ ११ ॥

पदपाठ :– सरस्वती । त्वम् । सत्यम् । हितम् । परमम् ।

मह्यम् । आऽदिश । ब्रह्म । ब्रह्मणा । आत्मानम् ॥

ऋजुना । माम् । सुऽपथा । साम्ना । प्र । नय ।

वाक् । विदा । परमा । पुरुषस्य । माता ॥

Oh Sarsavati ! teach me by means of mantras the Brahma, the Truth and that which is highly beneficial. Lead me by a straight and well-laid path. You are indeed Vāk, the supreme measure and mother of Purusha, in virtue of your intelligence.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती ज्ञानादिसर्वशक्तिपूर्णा, अतः एव त्वां प्रति याचे सर्वमेतत् सत्त्वम् परमार्थफलं सतत्त्वम् , तथा हि—सत्यं यथार्थं शाश्वतं नित्यं वस्तुतत्त्वम् धर्मं च, परमं हितं हिततमं परं ब्रह्म पूर्णं वस्तु, तथा आत्मानं तव मम च सर्वेषामपि अन्तरात्मानं मह्यं मदर्थं ब्रह्मणा मन्त्रेण आदिश शासनरूपया वाचा उपादिश-बोधय, तथा ऋजुना सरलेन निष्कण्टकेन च सुपथा सन्मार्गेण साम्ना समभावेन समाधानेन च मां इमं प्रणय प्रेरय, समुन्नय, यतः सा त्वं वागेव पुरुषस्य परमा हिततमा पूज्या माताऽसि इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Venerable Sarasvati ! you are full of all powers, like Jñāna ( knowledge ) and others. Therefore, I request you to show me the way to truth and to the supreme benefit, as well as Brahma. Show me by means of mantras the Brahmātmā who is in you and me and all. Instruct me by correct directions. Likewise, by straight and a safe well-laid path, lead me quietly to the highest goal.

## द्वादशी ऋक् ।

सरस्वति त्वं भावय मां सुतं ते
ब्रह्मणे वाचे ब्रह्मणस्पतये नमः ॥
नि धेहि ब्रह्मणाऽऽत्मन्यन्तः सन्दृशं
वाक् परमा ज्योतिर्विश्वस्य दर्शयत् ॥ १२ ॥

पदपाठः— सरस्वति । त्वम् । भावय । माम् । सुतम् । ते ।
ब्रह्मणे । वाचे । ब्रह्मणः । पतये । नमः ॥
नि । धेहि । ब्रह्मणा । आत्मनि । अन्तरिति । सम्ऽदृशम् ।
वाक् । परमा । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Sarasvati ! accept me as your own son. Salutation to Brahma, to Vāk and to Brahmaṇaspati, your Lord the Supreme Purusha. Plant me in your own good self and invest me with the power of mantras and inner knowledge. You are indeed Vāk, the light par excellence which illumines everything in this universe.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं विश्वमाता सती मां इमं स्वं निजं सुतं भावय आत्मीयभावेन त्वत्सुतेषु योजय—अनुगृहाण वाचे, ब्रह्मणे तुभ्यं प्रत्यक्षब्रह्मरूपायै, तथा तव अधिपतये ब्रह्मणस्पतये च नमः परमपुरुषाय अस्तु, तथा मां अन्तः सन्दृशं सम्यग्दर्शिनं सम्भाव्य च ब्रह्मणा मन्त्रेण प्रज्ञानेन च आत्मनि त्वयि तथा सर्वान्तर्यामिणि परमात्मनि निधेहि संस्थापय, ब्रह्मात्मनिष्ठं स्वयं अनुभावय आत्मसात्करणेनेति भावः ॥ यतः सा त्वं परा वागेव विश्वस्य अस्य समग्रस्यापि प्रपञ्चस्य जीवजातस्य च दर्शयत् अवभासकं ज्योतिः, तत्परञ्ज्योतिःस्वरूपा सा परा वाग् देवतात्मा माता विश्वमातृत्वसत्त्वसम्पन्ना प्रभवति इति ॥

॥ इति द्वितीयेऽनुवाके द्वादशतमं सरस्वतीसूक्तं समाप्तम् ॥

॥ इति द्वितीयः सारस्वतोऽनुवाकः सम्पूर्णः ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Venerable Sarasvati ! you are the mother of the whole universe. Accept me as your own son and count me among your sons. Salutations to Brahma, to you who are the visible Brahma and to Brahmaṇaspati, the Lord Supreme. Make me a good seer and one with deep insight who can know the All-Pervader through a mantra. You are the light par excellence, the goddess of Speech Supreme which can illumine and express everything in the universe.

Thus ends the Twelfth hymn in the second Section.

Thus ends the Second Section dedicated to Sarasvatī.

## अथ तृतीयः ब्राह्मणस्पत्यः अनुवाकः ।

## अनुवाकः ३ । सूक्तम् १ । ऋचः १-८ । ब्रह्मणस्पतिः ।

## प्रथमं ब्रह्मणस्पतिसूक्तम् ।

ब्रह्मणस्पतिर्ब्रह्मणा अष्टौ, दैवरातो वैश्वामित्रः, ब्रह्मणस्पतिः, जगती ।

THE ṚSHI IS DAIVARĀTA

**Now this the Third Section ( Anuvaka ) concerns Brahmanaspati**
**Section III : Hymn 1 : Riks 1-8-BRAHMAṆASPATI.**
**I Hymn is on** *Brahmaṇaspati.*

This hymn beginning with 'Brahmaṇaspatir Brahmaṇā' contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Brahmaṇaspati is the god and the metre is Jagatī.

## अथ प्रथमा ऋक् ।

ब्रह्मणस्पतिर्ब्रह्मणाऽऽत्मञ्जुहोति
ब्रह्म विश्वेषु भुवनेष्वाहितं यत् ॥
स इमा विश्वा भुवनाऽभि पश्यति
स इदं जज्ञानः स उ वेद विश्वम् ॥ १ ॥

पदपाठ :– ब्रह्मणः । पतिः । ब्रह्मणा । आत्मन् । जुहोति ।
ब्रह्म । विश्वेषु । भुवनेषु । आऽहितम् । यत् ॥
सः । इमा । विश्वा । भुवना । अभि । पश्यति ।
सः । इदं । जज्ञानः । सः । ऊम् इति । वेद । विश्वम् ॥

Brahmaṇaspati sacrifices or merges himself like an oblation, in himself, by uttering 'Brahma' which word pervades all these worlds. He visualises and sees all these worlds. Since he is the creator he knows them all.

## अन्वयभाष्यम् ।

अथात्र विश्वेषु भुवनेषु सर्वतः आहितं समन्तात् व्याप्तं यत् स्वयं विश्वैककारणरूपेण सर्वत्रापि अनुस्यूतं विततं ब्रह्म विश्वरूपं भवति, "सर्वं खल्विदं ब्रह्म" इति च औपनिषदं ब्राह्मणम् ( छां. उ. ३-१४-१ ). तथा कार्यरूपेण विस्तृतं तदिदं सर्वमपि ब्रह्मरूपं जगत् प्रलयान्ते ब्रह्मणस्पतिः ब्रह्मणः वेदस्य ज्ञानस्य तथा शब्दब्रह्मणः वाग्रूपस्य च अधिपतिः सः परोक्षसत्त्वसिद्धः केवलं चेतनात्मा परमः पुरुषः ब्रह्मणा जगद्बीजात्मकेन शब्दब्रह्मरूपेण मन्त्रेण आत्मन् स्वे चेतने आत्मनि स्वस्मिन् जुहोति समर्पयति हवनरूपेण, आत्मनः सकाशाद् वाचकशब्दशक्तिमुखतः वाक्सत्त्वात् प्रसृतं इदं विश्वं आत्मन्येव पुनः

शब्दमुखेनैव प्रत्युपसंहरतीति भावः ॥ सः ब्रह्मणस्पतिः इमानि विश्वानि भुवनानि तानि आत्मनि अन्तः उपसंहृतान्यपि अभि अभितः विश्वतो रूपेण पश्यति आत्मनि पूर्वं बीजरूपेण अवशिष्टम्, पश्चात् कार्यरूपेण विश्वतो मुखेन विस्तृतम्, तथैव पुनः आत्मनि उपसंहृतं च विश्वं तत्साक्षिभूतः सन् जानाति, स एव इदं विश्वं जज्ञानः उत्पादयन्—आविष्कुर्वन् स्वयं विश्वतो रूपेण आविर्भवन् सः तदिदं विश्वं वेद जानाति, तस्मात् सः सर्वजगत्सृष्टि-स्थिति-प्रत्युपसंहाराधिष्ठानभूतः सर्वज्ञः सर्वशक्तिमाँश्च भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Brahma pervades all these worlds as he is the cause of all. Cf. " All this is Brahma " ( Ch. Up. III - 14 - 1 ). Further, as it has emerged from Brahma this expansive universe is Brahma only. This is gathered back, at the time of each dissolution by Brahmaṇaspati, the lord of Vāk, who is Veda, the knowledge, and Brahma in the form of Śabda, the word-power. He is Chetana or the principle of consciousness. By means of Brahma, i. e., the mantra in the form of Śabda-Brahma, which is the cause of the universe, Brahmaṇaspati sacrifices or merges ( like an oblation offered in the sacrificial fire ) in himself, that which has come out from him in the form of the word. He reabsorbs everything into himself. Brahmaṇaspati, sees everything which he has absorbed into himself, in the form of cause and effect ( as cause it exists in him, and as effect it expands as the universe ). He sees both of them because, he is the witness, Sākshi, who is not interested in either. He knows all this because he creates all this Therefore he it is, who is the repository where the creation, maintenance and dissolution of this universe occur. Brahmaṇaspati, the primal Cosmic Energy creates everything through word power. Thus goes on the Cosmic Cycle. He is omniscient and omnipotent.

## द्वितीया ऋक् ।

ब्रह्मणस्पतिर्जनिता जायमानो
विश्वा ब्रह्माणि धमति सँरराणः ॥
दिवा पृथिव्या स इदमन्तरिक्षे
ब्रह्मणस्पतिः समीं ब्रह्मणाऽधमत् ॥ २ ॥

पदपाठ :– ब्रह्मणः । पतिः । जनिता । जायमानः ।
विश्वा । ब्रह्माणि । धमति । सम्ऽरराणः ॥
दिवा । पृथिव्या । सः । इदम् । अन्तरिक्षे ।
ब्रह्मणः । पतिः । सम् । ईम् इति । ब्रह्मणा । अधमत् ॥

Brahmaṇaspati is the Creator and the self-created. While taking form he roars and breathes forth loudly all the sounds and words and mantras, throughout the heavens, the sky and the earth. Brahmaṇaspati breathed out this universe as the mantra 'Īm.'

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः जनिता विश्वस्यास्य जगतः जनयिता सन्, तथा जायमानः स्वयमपि विश्वतो रूपेण आविर्भवन् प्रकाशमानश्च सन् संरराणः विश्वविभवार्थं स्वस्य परया वाचा संस्वरन्, विश्वाविश्वानि ब्रह्माणि छन्दोमयानि मन्त्रात्मकानि तत्तद्बीजात्मकशब्दजातानि धमति धमनवत् चेतनाशक्तेः उच्छ्वासतः फूत्कारतः शब्दायते ॥ सः ब्रह्मणस्पतिः दिवा उपरितनया आकाशात्मिकया पृथिव्या अधस्तनया च भस्त्रायाः पक्षद्वयरूपाभ्यां द्यावापृथिवीभ्यां "ईं" ईमित्यनुकरणात्मकेन ब्रह्मणा गुप्तप्रणवात्मकेन मन्त्ररूपेण अक्षरेण शब्दरूपेण नादब्रह्मणा अन्तरिक्षे इदं दृश्यमानं विश्वं जगत् समधमत् धमनतः उच्छ्वासतः स्वयमेव तत् उत्ससर्ज, अस्मिन् अर्थे ऋङ्मन्त्रवर्णोऽपि अस्ति "ब्रह्मणस्पतिरेता सङ्कर्मार इवाधमत्। देवानां पूर्व्ये युगेऽसतः सदजायत" इति (ऋ. मं. १०-७२-२) ॥ एतेन तस्य ब्रह्मणस्पतेः चेतनाशक्तेः वाक्स्वरस्य धमनतः असतः इव विद्यमानस्य जगतः आविर्भावः आदिसृष्टौ बभूवेति सिध्यतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Brahmasṇaspati is the creator of this universe. While he was being born that is, while he was expanding himself into this universe, he roared with his supreme word-power for this expansion; his roar issued forth in the form of all the composed Ṛks and their seed-letters. His breathing out was loud. Brahmaṇaspati used the sky and the earth as the sides of bellows. He created the 'Īm' sound, the onamopoetic syllable, the secret Praṇava 'Īm', the sound-form of Brahma. And he created this visible universe in mid-air by this 'Īm' mantra. Cf. "Brahmaṇaspati forged this universe like a black-smith blowing the bellows. In the former ages of gods, existence came out of non-existence." (Ṛg. X-72-2).

## तृतीयी ऋक् ।

ब्रह्मणस्पतिर्यन्मधुना रसेन
योयुपद् विश्वा भुवनानि सन्त्मना ॥
स इद् विश्वस्मा अमृते सम्मदाय
जीवातवे बृहते विश्वसंसदे ॥ ३ ॥

पदपाठ :— ब्रह्मणः । पतिः । यत् । मधुना । रसेन ।
योयुपत् । विश्वा । भुवनानि । सम् । त्मना ॥
सः । इत् । विश्वस्मै । अमृते । समऽमदाय ।
जीवातवे । बृहते । विश्वऽसंसदे ॥

Brahmaṇaspati invested all the worlds with sweet joy, and with a soul ( consciousness ). He invested them with life and knowledge for attaining immortality, and Brahmaṇaspati who is competent to bestow the highest abode to all.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः स्वयं परोक्षः सन् यत् यस्मात् कारणात् विश्वानि भूतानि अचेतनानि त्मना आत्मना—चेतनेन वस्तुना तथा स्वेन मधुना विश्वप्रियेण रसेन ज्ञानेन आनन्दादिना च सं सम्यक्तया योयुपत् संयोजयामास—सचेतनं सञ्चेतनं च सम्भावयामास इति भावः ॥ सः इत् स एव विश्वस्मै अस्मै जगते अमृते अमृतत्वार्थं सम्मदाय प्रहर्षाय परमानन्दादिरसानुभवार्थं जीवातवे सञ्जीवनार्थं च, तथा बृहते बृहत्तराय सदर्थाय परमार्थाय विश्वसंसदे विश्वास्पदार्थं च अलं पर्याप्तं भवतीति तदभिप्रायः, तस्य ब्रह्मणस्पतेरेव ज्ञान-क्रिया-चेतनानन्दादिकया चित्कलया इमानि सर्वाणि भूतानि चेष्टन्ते हृष्यन्ति जीवन्ति अमृतत्वं च प्राप्नुवन्तीति भावः ॥

### COMMENTARY—SUMMARY TRANSLATION

He is Brahmaṇaspati, the great unseen cause from whom all derive the power of consciousness and happiness so universally loved. It is he certainly who endows all with everything for becoming immortal and happy beyond measure. Brahmaṇaspati alone is competent to bestow the heavens or the great abode to all. The gist of all this is that all these beings can be active, enjoy, live and be immortal if they can even share an iota of Jñana ( knowledge ), kriyā ( activity ), chetana ( consciousness ) and ānanda ( joy ) of Brahmaṇaspati.

## चतुर्थी ऋक् ।

यो देवानां देवतमः सन्दधाति
दशे विश्वस्मै सुमतिं चेकितानः ॥
अग्रे यज्ञानां वरूथं तमग्रियं
ब्रह्मणस्पतिं ब्रह्मणा सन्दुवस्य ॥ ४ ॥

पदपाठ :— यः । देवानाम् । देवऽतमः । सम् । दधाति ।
दृशे । विश्वस्मै । सुऽमतिम् । चेकितानः ॥
अग्रम् । यज्ञानाम् । वरूथम् । तम् । अग्रियम् ।
ब्रह्मणः । पतिम् । ब्रह्मणा । सम् । दुवस्य ॥

Brahmaṇaspati is the highest of the gods; he is in possession of all sound knowledge, so that all the beings in the world may be able to get it from him. Therefore, Brahmaṇaspati, who is foremost in promoting sacrifices and who is the greatest among gods should be served by uttering mantras.

## अन्वयभाष्यम् ।

यः ब्रह्मणस्पतिः देवानां देवतात्मनां अग्निसूर्यादीनां देवतमः श्रेष्ठतमः परमः सर्वदिव्यसत्त्वपूर्णः, सर्वेषामपि देवानां परमं दैवतमिति यावत्, चेतितानः जानानः स्वयं सर्वज्ञः प्रज्ञानरूपः सन् विश्वस्मै जगते सर्वस्मै जीवजाताय च दृशे दृष्टुं सर्वान्तरात्मवस्तुसाक्षात्कारार्थं सुमतिं सम्यग्ज्ञानं ज्ञानविज्ञानार्हां चिच्छक्तिसमर्थां सन्मतिं च सन्दधाति उपासकेभ्यः दान्तुं सन्धारयति ददाति च सदनुग्रहेण, अतः अग्रं श्रेष्ठं प्रथमं सन्तं यज्ञानां ज्ञान-भावनाकृतिरूपाणां सर्वेषां यज्ञसत्त्वानां वरूथं अभिवर्धकं अग्रियं अग्रे स्थितं अग्रपूजार्हं तं तादृशं परोक्षसिद्धं ब्रह्मणस्पतिं ब्रह्मणा प्रत्यक्षशब्दब्रह्मरूपेण मन्त्रेण सन्दुवस्य परिचर उपास्व इत्युपदेशः अत्र "दुवस्यतिः परिचरणकर्मा" इति यास्कनिरुक्तम् ॥ "यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य (ऋ. मं• ५-४२-११)" इति ऋङ्मन्त्रवर्णं तदनुश्रवणं सर्वतः प्रधानम् ॥

### COMMENTARY—SUMMARY TRANSLATION

He is the greatest of gods; He is himself superior to all gods. He is himself an all-knower. He holds within himself all knowledge so that he may give that knowledge to his devotees. So, he is the best and the first of all gods. He is the promoter of 'yajña' or sacrifice in the form of Jñana (knowledge), Bhāvanā (feeling) and Kriyā (action). He is in the front rank and deserves all honour. Such is Brahmaṇaspati. Though he is not visible, serve and worship him with mantra which is Brahma itself in the form of 'word'. Cf. In Yāska's Nirukta 'Duvasyatiḥ' means service. So also see Ṛgveda 5-42-11.

## पञ्चमी ऋक् ।

ब्रह्मणस्पतेर्यदु कत्वमग्रियं
सत्यधर्मन् विश्वस्मै सर्वतातये ॥

तद् विश्वेषाममृतानां दिवस्परि
जीवातवे सम्मधुनोऽमृतं भुवत् ॥ ५ ॥

पद्पाठ :- ब्रह्मणः । पतेः । यत् । ऊम् इति । कर्त्वम् । अग्रियम् ।
सत्यऽधर्मन् । विश्वस्मै । सर्वऽतातये ॥
तत् । विश्वेषाम् । अमृतानाम् । दिवः । परि ।
जीवातवे । सम् । मधुनः । अमृतम् । भुवत् ॥

Brahmaṇaspati's first and foremost action for Satya ( truth ) and Dharma ( law ) for the welfare of the universe and for the betterment of all was performed in the highest sky, beyond the grasp not only of the mortals but of the immortals also. It is eternal and the sweetest of all.

## अन्वयभाष्यम् ।

हे सत्यधर्मन् नित्यसिद्धसत्यस्वभाव अथवा लुप्तसप्तम्यन्तं पदं सत्यधर्मणि सत्यधर्मार्थं सत्यधर्माणां मध्ये वा, विश्वस्मै जगते विश्वहितार्थं वा सर्वतातये सर्वपुरुषार्थसिद्धये च ब्रह्मणस्पते: तस्य तव यत् अग्रियं श्रेष्ठतमं प्रथमं कर्त्वं कर्तव्यं कृतं कृत्यमस्ति, तत् विश्वेषां एतेषां मनुष्यादीनां सर्वेषां प्राणिनां अमृतानां देवानां एवं सर्वेषां जीवानां दिवः लोकत्रयादपि परि उपरि परतः परितश्च उच्चतरं व्याप्त्या जीवातवे नित्यं सञ्जीवनाय मधुनः प्रियात् सर्वस्मात् रसादपि अमृतं अमृतवत् शाश्वतं सुखशान्तिरसप्रदं सं भुवत् समभवदिति ॥ तस्य ब्रह्मणस्पते वेदमुखेन कृतं सर्वात्मना सम्पन्नं सर्वज्ञानसत्त्वप्रकाशनमेव सर्वेषां जीवानां प्रज्ञानाय सञ्जीवनाय अमृतत्वादिपरमार्थाभ्युदयायैव कारणं परममास्पदं बभूवेति ॥

COMMENTARY—SUMMARY TRANSLATION

Satyadharma may be taken as a vocative or a locative without suffix. It means that Satya and Dharma are his very nature. For the welfare of the world and for the highest realisation, Brahmaṇaspati did something. It was the best and first of his actions. That action was beyond all these mortal creatures and all the immortal ones. It has the power to give life to all. Further, it is sweeter than the sweetest of things. It is sweet like ambrosia, eternal and pleasant. The gist is that the first action of Brahmaṇaspati, namely creation of the Vedas, is the prime instrument for promoting all knowledge, giving all life and immortality to all the beings in this universe.

## षष्ठी ऋक् ।

ब्रह्मणस्पतेर्ब्रह्मणा संविदाना
ब्रह्मेदं विश्वं दधाति ब्रह्म भूमं ॥

ब्राह्मणासस्ते अमृतासो भवन्ति

सन्दुहानाः सुध्यो ३ मधु महस्परि ॥ ६ ॥

पदपाठ :- ब्रह्मणः । पतेः । ब्रह्मणा । सम्ऽविदानाः ।

ब्रह्म । इदम् । विश्वम् । दधति । ब्रह्म । भूम ॥

ब्राह्मणासः । ते । अमृतासः । भवन्ति ।

सम्ऽदुहानाः । सुऽध्यः । मधु । महः । परि ॥

Those who know Brahmaṇaspati through the mantra, which is the word giving the knowledge of Brahmaṇaspati, sees this universe as Brahma and attains Brahma which is immortal and infinite. Those wise men who know Brahma shed all around great joy or sweet beatitude.

## अन्वयभाष्यम् ।

ब्रह्मणस्पतेः तस्य ब्रह्मणा वेदेन ज्ञानेन मन्त्ररूपेण च संविदानाः तत् परं वस्तुतत्त्वं अनुभूत्या सम्यक् स्वं निजं जानानाः इदं प्रत्यक्षसिद्धं विश्वरूपं ब्रह्म, तथा भूम ब्रह्म भूमात्मकं आनन्दरसस्वरूपं परमं ब्रह्म दधति धारयन्ति सामरस्येन अनुसन्दधतीति यावत्, ते त एव ब्राह्मणासः ब्राह्मणाः ब्रह्मविदः सुध्यः सुधियः बुद्धियोगेन सिद्धाः सन्तः परि परितः महः महत्तरं तेजोमयं मधु प्रियं अमृतं परब्रह्मतत्त्वानुभावानन्दरसं सन्दुहानाः सम्यक् प्रकाशनेन सर्वत्र सर्वेभ्यः वितरन्तः अमृतासः स्वयं अमृतात्मानः मुक्तपुरुषाः भवन्तीति ॥ अस्मिन्नर्थे प्रसिद्धार्थोऽयं ऋङ्मन्त्रवर्णः—"यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ॥ कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव" (ऋ. मं. ९-११३-११) इति ॥ अत्र इन्द्रात्मनः ब्रह्मणस्पतेरेवेदं परमं सत्त्वमिति ऋषिरयं योगेन सम्पश्यतीति हृदयम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Those that become wise by the knowledge of mantras and the knowledge of Brahmaṇaspati, attain the visible Brahma in the form of the universe and also the Brahma invisible, Brahma beyond the visible universe. Those wise men, shed all around them the illuminating essence of knowledge; they become the Brahma; the knowers of Brahma become immortal and they are souls who have attained salvation.

## सप्तमी ऋक् ।

ब्रह्मणस्पतिमीयुषीं वाचमेतां

प्रतीची विप्राः सन्धिया शृणोतन ॥

छन्दस्स्तुभमृक्वतीं जगतीं यदीं
वाचं धिया कृणुते ब्रह्मणस्पतिः ॥ ७ ॥

पदपाठ :- ब्रह्मणः । पतिम् । ईयुषीम् । वाचम् । एताम् ।
प्रतीचीम् । विप्राः । सम् । धिया । श्रृणोतन ॥
छन्दःऽस्तुभम् । ऋक्वतीम् । जगतीम् । यत् । ईम् इति ।
वाचम् । धिया । कृणुते । ब्रह्मणः । पतिः ॥

You, wise men listen attentively to this Vāk or speech which seeks to express Brahmaṇaspati himself. He through his own power of intellect gives shape to this Vāk or word. It is in the form of Ṛks which are in Jagatī metre.

## अन्वयभाष्यम् ।

ब्रह्मणस्पतिं तं परमं पुरुषं ईयुषीं प्राप्तकामां एतां मन्त्रात्मिकां प्रतीचीं प्रत्यङ्मुखां प्रत्यगात्मस्वरूपां च परां वाचं हे विप्राः ! मेधाविनः ज्ञानिनः ! यूयं धिया बुद्ध्या अन्तर्मुखया सं श्रृणोतन सम्यक्तया श्रृणुत, यत् यस्मात् कारणात् छन्दस्स्तुभं छन्दसः स्तवनरूपां वेदात्मिकां ऋक्वतीं ऋग्रूपां ऋङ्मन्त्रलक्षणसम्पन्नां गायत्र्यादिवैदिकच्छन्दोनिबन्धनसिद्धां जगतीं द्वादशाक्षरसहितैः चतुर्भिः पादैः संहितां ईं एनां परां वाचं सः ब्रह्मणस्पतिरेव सर्वेषां मूलाधारे प्रतिष्ठितः सन् धिया बुद्ध्या प्रज्ञानेन च कृणुते कुरुते स्वयमेव सूक्ष्मरूपेण प्रेरयतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

This Vāk in the form of mantra, desires to express Brahmaṇaspati. It has turned inward to do so. She is herself as it were the second Ātma of Brahmaṇaspati. This supreme Speech, you the wise ones, hear with attention, because she is in the form of Veda full of the characteristics of Ṛgveda. She shares all metrical beauties of Gāyatrī etc. She appears in Jagatī metre, with twelve syllables a line and has all the four lines. This supreme Vāk was given life and shape by Brahmaṇaspati, who is in the Mulādhāra ( the solar plexus ) in the body. It is endowed with intellect and highest knowledge. Brahmaṇaspati inspires Vāk in the form of fine vibrations.

## अष्टमी ऋक् ।

ब्रह्मणस्पतेरयंः समिदं गृणाति
श्रदस्मै दधानोऽमृतं नाम गुह्यम् ॥

तस्येदु विश्वमिदं भवाति भद्रं

ब्रह्म तदीञ्ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पद्पाठः— ब्रह्मणः । पतेः । यः । सम् । इदम् । गृणाति ।

श्रत् । अस्मै । दधानः । अमृतम् । नाम । गुह्यम् ॥

तस्य । इत् । ऊम् इति । विश्वम् । इदम् । भवाति । भद्रम् ।

ब्रह्म । तत् । ईमिति । ज्योतिः । विश्वस्य । दर्शयत् ॥

For him only, who believes in Him and praises Him with the secret and eternal name of Brahmaṇaspati, the mystic symbolic word Īm, this universe is rendered wholly auspicious. That Brahma in the form of Īm is the resplendent light which illumines all in the universe.

## अन्वयभाष्यम् ।

यः उपासकः ब्रह्मविद्यासाधनपरायणः साधकः अस्मै सत्यात्मने ब्रह्मणस्पतये श्रद्धानः श्रद्धां धारयमाणः तस्य ब्रह्मणस्पतेः ईम् इत्यनुकरणात्मकं गुप्तप्रणवस्वरूपं,—— तथा अमृतं अमृतात्मसत्त्वस्वरूपं वाच्यार्थात्मना तादात्म्यसिद्धं गुह्यं गुप्ततरं वाचकं नाम एकाक्षरं नाम-बीजमन्त्रं सङ्गृणाति संस्तौति, तस्य इत् तस्यैव साधकस्य इदं विश्वं सर्वं जगत् भद्रं कल्याणप्रदं भवाति भवति, न तु अनित्यतया भासते, नापि विषमतया बाधते, अपि तु साक्षाद् ब्रह्मात्मस्वरूपेणैव भातीति भावः ॥

एवं तत् इ इति वाचकरूपं अक्षरं प्रत्यक्षं ब्रह्मैव भवति, "वाच्य-वाचकयोः तादात्म्यात्, अभेदन्यायाद् वा," तस्मात् ईं इति तद्वाचकं नाममन्त्राक्षरं ब्रह्म, तथा तद्वाच्यार्थरूपं परं ब्रह्म, इति तत्सामरस्येन सिद्धं सत् विश्वस्य सर्वस्यापि जगतः तथा सद्वस्तुनोऽपि दर्शयत् प्रकाशकं स्वयं परञ्ज्योतिरेव भवति, तत्परञ्ज्योतिःस्वरूपः स ब्रह्मणस्पतिः इति ॥ अस्मिन् अर्थे केचिद् ऋङ्मन्त्रवर्णाः एव प्रत्यक्षप्रमाणभूताः सन्ति ॥ तथा हि अधिभौतिकस्य जगतः ईङ्कारेण निर्देशः ॥ "य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्" ( ऋ. मं. १-१६४-३२ ) इति ॥ परोक्षस्य परमात्मनः निर्देशोऽपि भवति ईङ्काराक्षरेण ॥ "तिस्रो मातॄस्त्रीन् पितॄन् बिभ्रदेक ऊर्ध्वस्तस्थौ नेमवग्लापयन्ति" (ऋ. मं. १-१६४-१० ) इति ॥ अत्र न ईं इति पदविभागात् ईं इति अक्षरं लभ्यते, तस्य-परवस्तुनिदर्शकत्वेऽपि मन्त्रत्वं वाग्रूपत्वं च वस्तुसिद्धमेवेति गम्यते तदुत्तरार्धर्चेन, "मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम्" इति ॥

एवमेव अपरोक्षस्य अन्तरात्मनोऽपि निदर्शकः ईङ्कारः स्पष्टतरं अनुश्रूयते ॥ "य ईं चिकेत गुहा भवन्तम्" ( ऋ. मं. १-६७-७ ) इति ॥ तस्यापि वाग्रूपत्वं उत्तरार्धर्चे

" धारां ऋतस्य " इति पदयुगेन गम्यते ॥ अत्र " श्लोकः धारा " इति च धाराशब्दस्य वाङ्नामसुपाठाद् वाग्रूपत्वम् , " आ यः ससाद धारामृतस्य, " इति तदुत्तरार्धर्चे तदनुश्रवणम् ॥ तत्रापि गुह्यस्य ऋतस्यापि अन्तरात्मनः सम्बन्धात् वाचः तदीङ्कारात्मकत्वं सङ्गच्छते ॥ " ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया " इति तदनुश्रवणात् ( ऋ. मं. ९-७३-९ ) ॥ सोऽयमीङ्कारः यजुर्मन्त्रे स्पष्टमनुश्रूयते " ईङ्काराय स्वाहा ईङ्कृताय स्वाहा " ( तै. सं. ) इति च ॥

॥ इति तृतियेऽनुवाके प्रथमं ब्रह्मणस्पतिसूक्तम् समाप्तम ॥

## COMMENTARY—SUMMARY TRANSLATION

On that devotee alone who is bent on getting to the very root of Brahma Vidyā and who believes in Brahmaṇaspati, this ĪM which is the hidden aspect of Praṇava, bestows immortality. To that aspirant, this whole universe becomes auspicious. It does not show him its fleeting and seamy side; nor does it worry him with its inequalities. On the other hand, to him it shows itself as Brahma. Thus that ĪM is the expression of that eternal Brahma, which is ever present before the eye. " Vāchya-vāchaka are identical and not different. " Therefore, ĪM is Brahma itself which is its expression and it expresses Brahma, the supreme, as it is identical with it. It illumines all. Cf. "He stood up all alone, bearing all the three mothers and the three fathers. None can exhaust ( harm ) Him " ( Ṛg. I-164-10 ). "Who knows Him hidden in the cave ?" ( Ṛg. I-67-7 ). These mantras are vindication of the statement above.

Thus ends the first hymn in the third Section.

---

अथ द्वितीयं ब्रह्मणस्पतिसूक्तम् ।

अनुवाकः ३ । सूक्तम् २ । ऋचः १-८ ।

नमो ब्रह्मणस्पतये अष्टौ, दैवरातो वैश्वामित्रः, ब्रह्मणस्पतिः, तृतीया पञ्चमी सप्तमी च तिस्रः सारस्वताश्च, जगती ।

**Now the Brahmanaspati Sukta, Second in Third Anuvaka**

**Section III, Hymn 2, Riks 1-8** - BRAHMAṆASPATI.

This hymn beginning with " Namo Brahmaṇaspataye " contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Brahmaṇaspati is the god; Sarasvatī is the goddess for the three following Ṛks, 3rd, 5th and 7th. And the metre is Jagatī for all.

## अथ प्रथमा ऋक् ।

नमो ब्रह्मणस्पतये ब्रह्मणेऽस्मै
नम आत्मने पुरुषाय परस्मै ॥
वाचा ब्रह्मणा विश्वथा राजमानं
ब्रह्मणा तं प्र पद्ये ब्रह्मणस्पतिम् ॥ १ ॥

पदपाठः– नमः । ब्रह्मणः । पतये । ब्रह्मणे । अस्मै ।
नमः । आत्मने । पुरुषाय । परस्मै ॥
वाचा । ब्रह्मणा । विश्वऽथा । राजमानम् ।
ब्रह्मणा । तम् । प्र । पद्ये । ब्रह्मणः । पतिम् ॥

Salutation to this Brahmaṇaspati, to Brahma, to Ātma the essence of consciousness, and to the supreme Purusha ( the Supreme Person). I attain Brahmaṇaspati, who shines gloriously with the power of Vāk, the manifest Brahma in the form of mantra ( the word ).

## अन्वयभाष्यम् ।

ब्रह्मणस्पतये प्रत्यक्षब्रह्मणः वाचः अधिपतये अस्मै सर्वान्तःसंस्थिताय मुख्यप्राणरूपाय नमः, तथा परस्मै ब्रह्मणे आत्मने प्रत्यगात्मने चेतनाय पुरुषाय नमः, ब्रह्मणा प्रत्यक्षेण वाचा परया शक्त्या निजया ब्रह्मात्मवाचिकया विश्वथा सर्वथा विश्वतो मुखेन स्वरूपेण राजमानं देदीप्यमानं तं परं ब्रह्मणस्पतिं ब्रह्मणा तस्यैव मन्त्रमुखेन प्रपद्ये प्राप्नोमीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Salutation to this Brahmaṇaspati, who is Brahma the lord of Vāk, and one who is the innermost main vital breath of all. Likewise, salutation to Ātman the invisible Purusha who animates all and pervades everything. Vāk, the supreme power is manifest Brahma. She expresses Him and He glories with her. He is Brahmaṇaspati whom I attain by the help of His own mantra.

## द्वितीया ऋक् ।

ब्रह्मणस्पते त्वं च वाक् च संहितौ
दम्पतीवेव भवथो युवां मिथः ॥

वाचा साम्नाऽन्वभंवस्त्वमेकं समं
वाग् विदा समाना पुरुषस्यात्मा ॥ २ ॥

पद्पाठ :– ब्रह्मणः । पते । त्वम् । च । वाक् । च । सम्ऽहितौ ।
दम्पती इवेति दम्पतीऽइव । भवथः । युवाम् । मिथः ॥
वाचा । साम्ना । अनु । अभवः । त्वम् । एकम् । समम् ।
वाक् । विदा । समाना । पुरुषस्य । आत्मा ॥

Oh Brahmaṇaspati ! you and Vāk are one and united. You are one like husband and wife. You experience your total union with Vāk who is your equal in every respect. Vāk is indeed equal to Purusha, in fact She is His very soul.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! त्वं पुरुषसत्त्वः सन् वाक् च शक्तिसत्त्वा सती संहितौ तादात्म्येन सङ्गतौ सन्तौ युवां द्वौ दम्पती इवैव स्त्री-पुरुषवत् जायापतीवत् एव मिथः परस्परं प्रभवथः सर्वत्र ईशाथे सर्वान् नियन्तुं प्रसवितुं च समर्थौ स्तः इति भावः ॥

हे ब्रह्मणस्पते ! त्वं वाचा सह साम्ना समानयोगेन समं समानभावसम्पन्नं एकं एकसत्त्वकं अन्वभवः एकीभावं सम्पन्नोऽसि, तस्मात् सा वाक् त्वया सह समाना सती पुरुषस्य तव हृदा हृदयेन सम्मिलिता च सती आत्मा शरीरं तथा अन्तरङ्गात्मिका त्वदर्धात्मिका त्वदन्तरात्मैव भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! you are a male and Vāk who is your power is a female. So, you two are one and harmoniously united. You two are identical and behave like man and woman, husband and wife. You two together can master everything in the world. Oh Brahmaṇaspati, Vāk is your equal in all respects and so is one with you and you enjoy that oneness. Vāk is certainly the equal of Purusha, in fact the very soul of Him.

## तृतीया ऋक् ।

सरस्वति त्वं च ब्रह्मणस्पतिश्च
मिथुनाऽन्वितौ स्थो रसेन साम्नाऽऽत्मन् ॥
ब्रह्मणा पुरुषेणान्वभवः स्वात्म्यं
पुरुषः सन् स समानो वाच आत्मा ॥ ३ ॥

पद्पाठ :— सरस्वति । त्वम् । च । ब्रह्मणः । पतिः । च ।
मिथुना । अनु । इतौ । स्थः । रसेन । साम्ना । आत्मन् ॥
ब्रह्मणा । पुरुषेण । अनु । अभवः । सुऽआत्म्यम् ।
पुरुषः । सन् । सः । समानः । वाचः । आत्मा ॥

Oh Sarasvati ! you and Brahmaṇaspati are like a united couple equal in essence. You two are united in the inner-most Soul. You are one with your Lord Brahma and experience that union. Thus, the Purusha is your equal and also your soul.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं तथा ब्रह्मण: प्रत्यक्षब्रह्मरूपाया: तव पतिश्च आत्मन् अन्तरात्मनि समं समभावेन साम्ना रसेन सामरस्येन तादात्म्येन समन्वितौ स्थः, तव पुरुषेण पत्या ब्रह्मणा परमेण त्वं सात्म्यं तादात्म्यं अन्वभव: प्रतिप्राप्ता असि, अत एव सः पुरुष: त्वत्पतिः सर्वत्रापि समानः सन् वाच: तद्वाचकशक्ते: तव आत्मा अन्तरात्मस्वरूप: स्वयं अनादिसिद्धः इति ॥

### COMMENTARY--SUMMARY TRANSLATION

Oh Sarasvati ! you are united with your Lord Brahma in the inner-most soul most harmoniously. You are experiencing that union with Him who is your lord and equal in all respects. He is your Soul and you are His power who can express Him.

## चतुर्थी ऋक् ।

ब्रह्मणस्पते त्वं परमं ब्रह्म सत्यं
वाक् च सती बृहती प्रत्यक्षं ब्रह्म ॥
वाचा विश्वथाऽभ्युदगात् स पुरुषो
वाग् विदा समाना पुरुषस्यात्मा ॥ ४ ॥

पद्पाठ :— ब्रह्मणः । पते । त्वम् । परमम् । ब्रह्म । सत्यम् ।
वाक् । च । सती । बृहती । प्रत्यक्षम् । ब्रह्म ॥
वाचा । विश्वऽथा । अभि । उत् । अगात् । सः । पुरुषः ।
वाक् । विदा । समाना । पुरुषस्य । आत्मा ॥

Oh Brahmaṇaspati! you are the supreme Brahma, the Truth. Vāk who is your consort is all-pervading and is the manifest Brahma. That Purusha (Brahmaṇaspati) manifested Himself in all forms through Vāk. Vāk indeed is the equal and soul of Purusha.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते! त्वं तत् परोक्षसिद्धं सत्यं सत्यात्मकं परमं पूर्णं ब्रह्मैव असि, सा तव सती वाचकशक्तिरूपा वाक् परानाम्नी बृहती अखण्डा नामरूपादिभिः सर्वैरपि गुणैः व्यापका प्रत्यक्षं ब्रह्म साक्षाद् ब्रह्मात्मिका, तया वाचा वाङ्मुखेन सः परमः पुरुषः विश्वथा विश्वतोरूपेण अभ्युदगात् प्राकाश्यं इयाय, तस्मात् सा वाक् प्रत्यक्षसिद्धा तेन पुरुषेण परमेण आत्मना समाना सती तस्य हृदा हृदयेन युक्ता हृदयात्मिका च सम्पन्ना आत्मा शरीरं तद्-धर्माङ्गात्मिका तदन्तरात्मैव भवसीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati! you are that invisible Truth, the supreme and perfect Brahma. She is your consort as the power of expression. She is Vāk by name, she pervades everywhere and is manifest Brahma. Through her, the Supreme Purusha assumed omnifarious forms and became manifest. Vāk is evidently manifest and is equal to Him. She is His body and soul also.

## पञ्चमी ऋक् ।

सरस्वति त्वं प्रत्यक्षं ब्रह्म सती
प्रति बोधयसि ब्रह्म सत्यं परम् ॥
ब्रह्मणा वाग् विश्वथाऽभ्युदगात् परा
पुरुषः सन् स समानो वाच आत्मा ॥ ५ ॥

पदपाठ :– सरस्वति । त्वम् । प्रत्यक्षम् । ब्रह्म । सती ।
प्रति । बोधयासि । ब्रह्म । सत्यम् । परम् ॥
ब्रह्मणा । वाक् । विश्वऽथा । आभि । उत् । अगात् । परा ।
पुरुषः । सन् । सः । समानः । वाचः । आत्मा ॥

Oh Sarasvati! you are the manifest Brahma and are able to show the path to attain the unmanifest, great Brahma, the Truth. Being inspired by Brahma, Vāk or the power of speech assumed the form of the manifest universe. The Purusha himself is, as it were, Vāk and the soul of all.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं स्वयं प्रत्यक्षं ब्रह्मैव सती विद्यमाना तत् परोक्षंसिद्धं परं ब्रह्म वस्तु सत्यं यथार्थं सद्रूपं बोधयसि प्रत्याययसि परं प्रति ज्ञापयसि, अन्यस्मै बोधयसीति भावः, तेन ब्रह्मणा परमेण प्रेरिता सा वाक् परा व्यापका सती विश्वथा विश्वरूपेण योगात् नामरूपाद्यात्मना अभि अभितः तत्तन्नामात्मिका उदगात् सम्बभूव, तस्मात् सः परमः पुरुषः वाक्सङ्गमेन सह योगात् तत्समानः सन् वाच्यार्थरूपः सन् आविर्भवति, वस्तुतः सः चिन्मात्रसत्तात्मकः सन् नामरूपाद्यतीतः एवेति भावः, अतः वाचः तस्याः सः आत्मा आन्तरतमः केवलं चेतनासत्त्वः इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are evidently Brahma the manifest and as such you can lead one to that invisible supreme object which is self-existent. When inspired by Him, Vāk assumes name and form and manifests herself as innumerable objects. So, He, when united with Vāk, manifests Himself through her. Factually, He is pure knowledge itself, beyond all name and form. So, He is the soul of Vāk which expresses Him.

## षष्ठी ऋक् ।

ब्रह्मणस्पते त्वं परमे व्योमनि<br>
सन्नमात्रः सन्नपाद् वाचा पुरुषः ॥<br>
स्वतो न प्रति पद्यसे परश्चितो<br>
वाग् विद्वा समाना पुरुषस्यात्मा ॥ ६ ॥

पद्पाठ :— ब्रह्मणः । पते । त्वम् । परमे । विऽओमनि ।<br>
सन् । अमात्रः । सन् । अपात् । वाचा । पुरुषः ॥<br>
स्वतः । न । प्रति । पद्यसे । परः । चितः ।<br>
वाक् । विद्वा । समाना । पुरुषस्य । आत्मा ॥

Oh Brahmaṇaspati! you pervade the highest space. You are immeasurable and without any division in you, you stand united with Vāk. You are beyond the power of consciousness and are unattainable. It is indeed Vāk which is equal to the Purusha and is His very soul.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! त्वं परमे व्योमन् व्योमनि निजे परमे पदे ततः व्याप्तः सन् अमात्रः मात्रया मानेन मर्यादया च रहितः, अपात् अंश-पाद-नाम-रुपादिगुणविशेषैः अतीतः सन् पुरुषः परमः त्वं वाचा परया शक्त्या निजया सह प्रतितिष्ठसि, अतः त्वं चितः चेतनाशक्तेरपि परः सन् सत्तामात्रेण सिद्धः न प्रतिपद्यसे नैव प्राप्यसे, "ब्रह्मणस्पतिः" नाममात्रेण निर्दिष्टः तथा वाचा उपदिष्टोऽपि तथा श्रुतोऽपि श्रुतिमुखेन स्वरूपतो वस्तुतो भावेन बुध्या च सः नावगम्यते इति भावः; तस्मात् सा वागपि त्वत्समाना सती तस्य पुरुषस्य तव हृदयेन समन्विता सा आत्मा शरीरं अन्तरङ्गात्मिका त्वत्स्वरूपसत्त्वैव भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! you are in your highest abode, the mighty space. You are immeasurable and without any parts. You cannot be known. You remain as such in spite of your company with Vāk, who is your own power. So you are beyond even the power of consciousness. You are unattainable. Though referred to by the word Brahmaṇaspati, you cannot be known as you actually are. Vāk, however is your equal. She is your body and soul.

## सप्तमी ऋक् ।

सरस्वति त्वं पुरुषे स्वे परमे
साम्ना स्वेन रसेनाहिताऽऽत्मनि ॥
अमात्रा वागपदी साऽनभिधाऽसि
पुरुषः सन् स समानो वाच आत्मा ॥ ७ ॥

पद्पाठ :– सरस्वति । त्वम् । पुरुषे । स्वे । परमे ।
साम्ना । स्वेन । रसेन । आऽहिता । आत्मनि ॥
अमात्रा । असौ । अपदी । सा । अनभिधा । असि ।
पुरुषः । सन् । सः । समानः । वाचः । आत्मा ॥

Oh Sarasvati ! being equal to Him in essence, you, like a wife, are united in joy and harmony with your own Purusha, the Ātman Supreme. You too are immeasurable, indivisible and nameless. Purusha, the unmanifest, is equal to Vāk, the manifest, and is her soul.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वं स्वे निजे परमे पुरुषे ब्रह्मात्मनि स्वेन निजेन रसेन प्रेम्णा आनन्देन साम्ना सामरस्येन समानभावेन च आहिता तादात्म्येन प्रतिष्ठिता, नित्यसिद्धा इति यावत्, अत: असौ दिव्या सा परा वागपि अमात्रा मात्रादिरहिता, अपदी अंशपादादिरूपातीता, अनभिधा अनाम्नी, तस्या वाक् इत्यपि सञ्ज्ञा गौणी, वस्तुतस्तु ब्रह्मात्मपुरुषवत् केवलं चेतनात्मिकेति भाव:, तस्मात् स्वेन वाक्सत्त्वेन समान: सन् स: पुरुष: स्वस्या: वाच: आत्मा आन्तरतम: केवलं चेतन: इति ॥

अस्मिन्नर्थे औपनिषदं ब्राह्मणानुवचनम् । "यो वाचि तिष्ठन् वाचोऽन्तरो यं वाङ् न वेद यस्य वाक् शरीरं यो वाचमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृत:" (बृ. उ. ३-७-१०) इति ॥ एतेन तस्मिन् परमे ब्रह्मणि सर्वान्तर्यामिणि निजे पुरुषे नित्यसिद्धा सा वागपि निर्विशेषसत्त्वा मौन रूपैव भवितुमर्हतीत्युक्तं भवतीति ॥ एवं ऋङ्मन्त्रवर्णोऽपि एतमेवार्थं समर्थयति ॥—

"यावद् ब्रह्म विष्ठितं तावती वाक्" (ऋ. मं. १०-११४-८) इति, "चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्" (ऋ. मं १-३-११) "महो अर्ण: सरस्वती प्रचेतयति केतुना" (ऋ. मं. १-३-१२) इति च ॥ "अपदसि न हि पद्यसे" (बृ. उ. ५-१४-७) इति च औपनिषदं शुक्लयजुर्मन्त्रवचनम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you are united like a wife with your own lord, the Brahmātmā, the Supreme Being. You are His equal in essence and you unite with him in love and delight. You are identical with Him. You are established in Him, which means you are also eternal. So, this Vāk, which is also supreme, is immeasurable and partless ( without any divisions ). The name Vāk is only an indicatory symbol and as such secondary. In fact, she is also pure awareness like Brahma. She is his equal in essence. Purusha is the soul and inspirer of Vāk.

Vāk also who is in Brahma is impersonal and is silence itself. Cf. " She is the inspirer of honest thoughts and the good thoughts of the wise. " And " Sarasvatī is like a great ocean and animates all with knowledge." ( Ṛg. 1-3-11 & 12 ). " You are trackless and cannot be traced." ( Bṛ. Up. V-14-v ). These mantras confirm the above view and the Purāṇas also say: " She is said to be the energy in every creature" ( Durgā Saptaśatī ). " As knowledge, she pervades this whole universe. "

Thus the pervasion of Mahāsarasvatī is confirmed by mantras and the statements in the Purāṇas also.

## अष्टमी ऋक् ।

ब्रह्मणस्पते त्वं परमं ब्रह्म सत्
परेणासमं तद् विश्वतं एव पूर्णम् ॥
तत् समानं वाचाऽन्वसम्मितं विश्वै-
ब्रह्म तदीञ्ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पद्पाठ :— ब्रह्मणः । पते । त्वम् । परमम् । ब्रह्म । सत् ।
परेण । असमम् । तत् । विश्वतः । एव । पूर्णम् ॥
तत् । समानम् । वाचा । अनु । असम्ऽमितम् । विश्वैः ।
ब्रह्म । तत् । ईमिति । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Brahmaṇaspati ! you are the highest Brahma. You are unequalled. You are perfect and are all-pervading in the universe. Though you are equal to the universe in the form of Vāk, you are not contained by the manifest Brahma. You are ĪM, the infinite light which illumines everything.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! त्वं सत् नित्यसिद्धं केवलं सदात्मकं सत्तामात्रकं परमं ब्रह्म, अतः परेण अन्येन सर्वेणापि असमं असमानं तत् परोक्षं विश्वतः अस्मात् परं, तथा सर्वतः पूर्णं व्याप्ततमं अस्ति, अत एव त्वत्तः तस्मात् परेण श्रेष्ठेन असमं विषमीभूतम् तेन शून्यं इति भावः ॥ तथा तत् परं वस्तु समानं सर्वत्र सर्वदैव समानात्मकं न तु विषमसत्त्वयुक्तम् ॥ अथ —वाच्य-वाचकसत्त्वयोगेन वाचा तत् समानमपि तद्ब्रह्मात्मोदितेन ब्रह्मणा वाचा प्रत्यक्ष-ब्रह्मरूपयाऽपि वाचा तदनुगतयाऽपि असम्मितं अपरिच्छिन्नं सर्वाधिष्ठानरूपं तत् परं ब्रह्म ईं इति अनुकरणमात्रेण निदर्शनास्पदीभूतं विश्वस्य जगतः दर्शयत् प्रकाशकं ज्योतिः, तत्पर-ञ्ज्योतिःस्वरूपो ब्रह्मणस्पतिरिति ॥

॥ इति तृतीयेऽनुवाके द्वितीयं ब्रह्मणस्पतिसूक्तं समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! you are the eternal and supreme Brahma. So no others can be your equal. You are invisible and beyond all and everything. Further, you are complete in all and everything. Further, you are complete in all respects. That invisible object is the same everywhere and always. You may be said to be equal to Vāk. And yet, it is not exhausted by Vāk, the

manifest Brahma which though an outcome of Brahma does not fully express the same. That unmanifest Brahma is the abode of all, and is indicated by the onomatopœtic symbol ĪM. That is the light par-excellence which illumines all and everything; that is Brahmaṇaspati.

Thus ends the second hymn in the Third Section

---

अथ तृतीयेऽनुवाके तृतीयं ब्रह्मणस्पतिसूक्तम् ।

अनुवाकः ३ । सूक्तम् ३ । ऋचः १-९ ।

नमो ब्रह्मणे ब्रह्मणस्पतये नव, दैवरातो वैश्वामित्रः, ब्रह्मणस्पतिः,

अयुजो ब्राह्मणस्पत्याः, युजः सारस्वता वा, जगती ।

**Now the Brahmanaspati Sukta, Third in Third Anuvaka**

**Section III, Hymn 3, Riks 1-9** – BRAHMAṆASPATI.

This hymn beginning with "Namo Brahmaṇe Brahmaṇaspataye" contains nine Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Brahmaṇaspati is the god and the metre is Jagatī.

अथ प्रथमा ऋक् ।

नमो ब्रह्मणे ब्रह्मणस्पतये तस्मै
पुरुषायास्मै प्रचेतसे परस्मै ॥
विश्वरूपं तमिमं प्रत्यञ्चं सन्तं
ब्रह्मणा स्वं प्र पद्ये ब्रह्मणस्पतिम् ॥ १ ॥

पद्पाठ :– नमः । ब्रह्मणे । ब्रह्मणः । पतये । तस्मै ।
पुरुषाय । अस्मै । प्रऽचेतसे । परस्मै ॥
विश्वऽरूपम् । तम् । इमम् । प्रत्यञ्चम् । सन्तम् ।
ब्रह्मणा । स्वम् । प्र । पद्ये । ब्रह्मणः । पतिम् ॥

Salutation to the manifested (Vāk) Brahma. Salutation to him, the Lord of this manifest Brahma, also to the supreme Person, the Antarātman, the Great Knower. I attain this Brahmaṇaspati with the help of the mantra. I attain Brahmaṇaspati who is Omnifarious and the Soul within.

## अन्वयभाष्यम् ।

ब्रह्मणे प्रत्यक्षब्रह्मरूपात्मिकायै वाचे वेदमन्त्ररूपायै नमः, तथा ब्रह्मणः ब्रह्मात्मिकायास्तस्याः वाचः अधिपतये तस्मै परोक्षात्मने नमः, अस्मै प्रत्यगात्मने पुरुषाय परस्मै सर्वेभ्यः परतमाय प्रचेतसे प्रचेतनाय वरुणाभिधानाय विश्वावरणसत्त्वपूर्णाय नमः, तं परोक्षसिद्धं इमं विश्वरूपं प्रत्यक्षं तथा प्रत्यञ्चं अपरोक्षं आत्मन्यन्तर्हितं सन्तं स्वं आत्मीयं निजं ब्रह्मणस्पतिं देवतात्मानं परमं पुरुषं ब्रह्मणा मन्त्रेण ज्ञानेन च प्रपद्ये प्राप्नोमीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Salutation to Vāk, who is the manifest Brahma and is in the form of Veda mantra; also to Brahmaṇaspati her Lord, who is unmanifest. Salutation to the inner Soul, and to Him who is above all, the life-giver who is known as Varuṇa. Varuṇa covers the whole universe. Again, salutation to Him who though invisible, is in all forms outside as well as inside. He is mine, the Brahmaṇaspati, the Lord. I attain Him with mantra.

## द्वितीया ऋक् ।

सरस्वती त्वं साक्षात् सती ब्रह्मणः
परेणासमाना परा प्रचेतना ॥
ब्रह्मैवानु प्रति ऋताज्योतिषाऽन्त-
र्वाचं मेवानु प्रपद्ये ब्रह्मणस्पतेः ॥ २ ॥

पद्पाठ :— सरस्वती । त्वम् । साक्षात् । सती । ब्रह्मणः ।
परेण । असमाना । परा । प्रऽचेतना ॥
ब्रह्म । एव । अनु । प्रति । ऋता । ज्योतिषा । अन्तरिति ।
वाचम् । एव । अनु । प्र । पद्ये । ब्रह्मणः । पतेः ॥

Sarasvati ! you are Brahma, the manifest. As such you are not comparable to anybody else, and are above all and you are the power of consciousness. You are light and knowledge. You are one with Brahma since you follow Him. I attain the highest by following Vāk of Brahmaṇaspati.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं संविद्रसात्मा प्रत्यक्षं साक्षाद् ब्रह्मैव सती परेण अन्येन सर्वेण परवस्तुना च असमाना असामान्यसत्त्वा परा सर्वेभ्योऽपि अतिरिक्ता प्रचेतना केवलं चेतनात्मरूपिणी ज्योतिषा-चिता चैतन्यज्योतिद्वारा तत् परं ब्रह्मैव प्रत्यृता

प्रतिसङ्गता असि, तस्मात् ब्रह्मणस्पतेः तस्य वाचं तामेव छन्दस्वतीं अनुसृत्य तत् परं ब्रह्म प्रपद्ये, तद्ब्रह्मवस्तुप्राप्तये तद्वागेव शरणं, तत् प्रधानं करणमिति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Venerable One, you being Sarasvatī, the essence of consciousness, you are Brahma, the manifest one, and great in virtue of your knowledge and delight. As such, you are not to be compared to anybody else. You are beyond all. You are sheer power of consciousness. So, by your knowledge-light, you are united with Brahma. I attain Brahmaṇaspati by following Vāk who is part and parcel of Brahmaṇaspati. To attain Him Vāk alone has to be resorted to.

## तृतीया ऋक् ।

ब्रह्मणस्पते त्वं प्रत्यङ् समात्मन्यधि
यदुच्चरसि संविदा प्रचेतनः ॥
ब्रह्मणौता स्वात्म्यं सन्दृशा संविदाना
वाग् विदा सती बृहती बृहस्पतेः ॥ ३ ॥

पद्पाठ :— ब्रह्मणः । पते । त्वम् । प्रत्यङ् । सम् । आत्मनि । अधि ।
यत् । उत्ऽचरसि । सम्ऽविदा । प्रऽचेतनः ॥
ब्रह्मणा । आऽऊता । सुऽआत्म्यम् । सम्ऽदृशा । सम्ऽविदाना ।
वाक् । विदा । सती । बृहती । बृहस्पतेः ॥

Oh Brahmaṇaspati ! you are the inward Soul of every thing. You are the power of consciousness itself and your inspired look is the Vāk. Vāk who is a knower is completely united with Brahma and is in full harmony with him through that inspired look. Vāk therefore, is the All-pervading power ( Bṛhatī ) of the Brahmaṇaspati.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! त्वं प्रत्यङ् प्रत्यगात्मस्वरूपः, अधि-आत्मनि अध्यात्मसत्त्वपूर्णे अस्मिन् शरीरे शारीरे च केवलः प्रचेतनः सन् संविदा यदुत्पश्यसि स्वान्तःप्रज्ञानदृगुन्मीलनेन यत् समीक्षसे, तेन ब्रह्मणा परमेण निजेन सात्म्यं तादात्म्यं ओता प्राप्ता सती तत्सन्दृशा सम्यग्दृष्ट्या स्वयं संविदाना सम्यग् जानाना अनुभवन्ती सती सा वागेव बृहती व्यापका ब्रह्मसत्त्वपूर्णा, बृहस्पतेः तस्य ब्रह्मात्मनः सती अर्धाङ्गभूता परात्मिका शक्तिर्भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! you are the inner Soul in the individual. You are the pure energy of consciousness. You see by opening the eye of knowledge. Vāk being harmoniously indentical with the Brahma and knowing him through the keen insight given by him, she becomes the all-pervading power of Brahmaṇaspati, the better-half of Bṛhaspati, the Brahmātmā.

## चतुर्थी ऋक् ।

सरस्वती त्वं प्रतीची संहिताऽऽत्मनि
ब्रह्मैवानु संविदा प्रति चेतमाना ॥
वाचा रसेन सात्म्यं समितं ब्रह्म
वाक् सती पुरुषस्य सा बृहस्पतेः ॥ ४ ॥

पद्पाठ :– सरस्वती । त्वम् । प्रतीची । सम्ऽहिता । आत्मनि
ब्रह्म । एव । अनु । सम्ऽविदा । प्रति । चेतमाना ॥
वाचा । रसेन । सुऽआत्म्यम् । सम्ऽइतम् । ब्रह्म ।
वाक् । सती । पुरुषस्य । सा । बृहस्पतेः ॥

Sarasvati ! you are introspective and are united with the inner Soul, the Brahma. Following the Brahma within, you are inspired by knowledge. Through the word and the essence of delight, Brahma is united with you. Sarasvatī is Vāk, the supreme power of Brahma, the Purusha.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं संविद्रसात्मा प्रतीची अन्तर्मुखा सती आत्मनि संहिता प्रतिष्ठिताऽसि, तथा तत् चेतनात्मस्वरूपं ब्रह्म अनु एव अनुसृत्यैव संविदा ज्ञान-कलया प्रति चेतमाना प्रति स्फुरन्ती सर्वाः धियः पुनः चेतयन्ती सती आत्मनि अन्तः प्रति तिष्ठसि, वाचा तया परया रसेन तद्वाग्रसेन च स्वेनैव आत्मरसेन वा तत् ब्रह्मात्मवस्तु सात्म्यं तादात्म्यं समितं स्वान्तरेव समुपात्तम्, अत एव सा वाक् देवतात्मैव तस्य पुरुषस्य बृहस्पतेः परा शक्तिर्भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Venerable One! you are Sarasvatī, the essence of the power of knowledge itself. Turning inward, you are established in the Soul. By following Brahma, the pure form of consciousness, you are inspired with knowledge.

By inspiring all intellects, you establish yourself in the Soul. With excellent Vāk and her essence, Brahma is harmoniously blended. Vāk is the Supreme Power of Brahma, of the Purusha.

## पञ्चमी ऋक् ।

ब्रह्मणस्पतिः सन् अपात् पुरुषोऽसौ
परश्चितः संविदा क्रतुना चिता ॥
ब्रह्मणा वाचा सपादुदगादयं
वाक् विदा प्रत्यृता सात्म्यं पुरुषेऽन्तः ॥ ५ ॥

पदपाठ :– ब्रह्मणः । पतिः । सन् । अपात् । पुरुषः । असौ ।
परः । चितः । सम्ऽविदा । क्रतुना । चिता ॥
ब्रह्मणा । वाचा । सऽपात् । उत् । अगात् । अयम् ।
वाक् । विदा । प्रति । ऋता । सुऽआत्म्यम् । पुरुषे । अन्तरिति ॥

Brahmaṇaspati is pure existence, indivisible and all-pervading Person. He is beyond the power of consciousness. He is one. But through the power of knowledge, will and action He manifests Himself as many. Vāk or the power of speech is always one with her Purusha, the Supreme reality.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः स्वयं स्वसत्त्वेन अपात् अंशपादादिविशेषरहितः, सन् केवलं सदात्मकः, असौ विप्रकृष्टः पुरुषः पुरुषसत्त्वः, चितः परः चेतनाशक्तेरपि उत्तरः, संविदा ज्ञानेन क्रतुना कर्मणा चिता चिन्मात्रया वाचा वाचकशक्त्या ब्रह्मणा मन्त्रेण सचैतन्येन स्वरसत्त्वेन सोऽयं अन्तरात्मा सपात् अंश-पाद-नाम-रूपादिभिः सविशेषः सन् उदगात् आविर्बभूव ॥ अतः तस्य सा पराशक्तिरूपा वागेव स्वे निजे पुरुषे अन्तः चेतनात्मनि सात्म्यं तादात्म्यं प्रत्यृता प्रत्यक्सङ्गता सती तेन आत्मना नित्यं समन्विता अस्तीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati, has independent existence and is without any parts. He is the Purusha. He is beyond Chit, power of knowledge. He divided ( sapāt ) himself assuming name, form etc. with the power of knowledge, will and action. Vāk is His power of expression. Vāk being His power par-excellence is identified with Him, the Primal Energy.

## षष्ठी ऋक् ।

सरस्वती त्वमपदी परा सती
प्रतीची चित्तिरमृता प्रचेतना ॥
सपदी वाक् पुरुषेण प्रत्यृताऽऽत्मन्
पुरुषः सोऽनु प्रत्यृतः स्वात्म्यं वाचा ॥ ६ ॥

पद्पाठ :– सरस्वती । त्वम् । अपदी । परा । सती ।
प्रतीची । चित्तिः । अमृता । प्रऽचेतना ॥
सऽपदी । वाक् । पुरुषेण । प्रति । ऋता । आत्मन् ।
पुरुषः । सः । अनु । प्रति । ऋता । सुऽआत्म्यम् । वाचा ॥

Sarasvati ! you too are without parts and are pure existence. You are indeed introspective; you are the light of knowledge, you are immortal. You are consciousness. In manifestation, you are also like the Purusha, with name and form and many parts. Even so, you are one with Purusha and He is one with you.

## अन्वयभाष्यम् ।

हे भगवति! त्वं सरस्वती स्वयं संविद्रसस्वरूपा परात्मिका सती सदात्मिका च, अपदी अंश-पादादिरहिता, प्रतीची प्रत्यग्रूपा प्रत्यगात्मस्वरूपा च चित्तिः ज्योतिःस्वरूपा, अमृता नाशरहिता दिव्यरसात्मिका प्रचेतना केवलं चेतनात्मिका च असि, पुरुषेण तेन परमेण आत्मना सा त्वं वाक् सपदी पादादिविशेषरूपगुणयुक्ता सती आत्मनि स्वस्मिन् प्रत्यृता प्रति सङ्गताऽसि, स च पुरुषः अनु तां निजां शक्तिरूपां परां वाचमनुसृत्य वाचा तया सात्म्यं तादात्म्यं प्रत्यृतः सङ्गतः सन् स्वयमपि वाच्यार्थरूपः अभ्युदियायेति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Bhagavati! you are Sarasvatī, you are knowledge, consciousness and eternal existence. As such, you have no divisions and no names and forms. You are so Supreme. You are an introvert, you are light, immortal and full of essence and pure energy. You are united with Him. In manifestation, you become full of many parts and name and form. The Purusha following His own power of Speech, stays united with Vāk. Being united with Vāk, He is expressed by Vāk.

## सप्तमी ऋक् ।

ब्रह्मणस्पते तव यद् भूतं भव्यं
दृश्यमेतत् परि वर्तमानं विश्वम् ॥
विश्वथा सन्तता वाच एव भूति-
र्वाग् विदा प्रत्यृता पुरुषेण स्वात्म्यम् ॥ ७ ॥

पदपाठ :– ब्रह्मणः । पते । तव । यत् । भूतं । भव्यम् ।
दृश्यम् । एतत् । परि । वर्तमानं । विश्वम् ॥
विश्वऽथा । सम्ऽतता । वाचः । एव । भूतिः ।
वाक् । विदा । प्रति । ऋता । पुरुषेण । सुऽआत्म्यम् ॥

Oh Brahmaṇaspati, this your ever-changing universe past, present and future, is certainly pervaded by Vāk, omnifarious and continuous. That Vāk is indeed one with you, the Purusha, by identity.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! तव यत् खलु भूतं आदिसृष्टेः अद्ययावत् सम्भूतम्, तथा भव्यं भाव्यं इतः परं च आप्रलयं सम्भाव्यमानम्, तथा इदानीं परिवर्तमानं सर्वतः विद्यमानं परिवर्तनशीलं च सत् दृश्यं प्रत्यक्षं विश्वं जगदेतत् त्वदायत्तं भवति इति यावत्, तदेतत् सर्वमपि तवैव वाचः वाङ्मुखेनैव विश्वथा विश्वतो रूपेण सन्तता व्याप्ता विस्तृता च भूतिः ऐश्वर्यम्, एतेन विश्वविभूतियोगेन तव सा वाक् देवतात्मा पुरुषेण त्वया विदा ज्ञानशक्त्या सात्म्यं तदिदं वैश्वरूप्यं प्रतिसङ्गता, एवं नामरूपात्मना विश्वरूपेण विस्तृतं सर्वमपि तवैवेति भावः ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! this your universe from the first creation to now, from now on till its dissolution and as existing all-round, ever-changing and visible, is all under your control. This is all through the power of your Vāk only. Through your Vāk, your greatness manifested itself in the form of these omnifarious forms. Vāk, which is yours, is one with you. Even in this manifestation in the form of the universe of name and form, Her pervasion is yours only.

## अष्टमी ऋक् ।

सरस्वति त्वद् विश्वतो वितता प्रति
नाम्नोत रूपेण द्योतते विश्वरूपा ॥
विश्वथैषा सन्तता पुरुषस्यैव भूतिः
पुरुषोऽनु प्रत्यृतो वाचा स्वात्म्यं स्वया ॥ ८ ॥

पद्पाठ :– सरस्वति । त्वत् । विश्वतः । विऽतता । प्रति ।
नाम्ना । उत । रूपेण । द्योतते । विश्वऽरूपा ॥
विश्वऽथा । एषा । सम्ऽतता । पुरुषस्य । एव । भूतिः ।
पुरुषः । अनु । प्रति । ऋतः । वाचा । सुऽआत्म्यम् । स्वया ॥

Oh Sarasvati ! this glory that has spread all round from you has manifested itself in the form of the universe with name and form. This manifestation of the universe is the ever-existing glory of Purusha Himself. The Purusha, following His own power of speech that is Vāk, becomes one with Vāk.

## अन्वयभाष्यम् ।

हे सरस्वति ! त्वत् त्वत्सकाशात् विश्वतः विश्वरूपेण वितता व्याप्ता, सा इयं भूतिः प्रति प्रत्येकशः नाम्ना तत्तदभिधानेन तथा रूपेण तत्तदर्थात्मकेन वस्तुजातेन च विश्वरूपा सती द्योतते प्रकाशते, एवं विश्वथा सर्वप्रकारेण सन्तता विस्तृता एषा भूतिः ऐश्वर्यात्मिका विश्वव्यापकशक्तिः तस्य परमपुरुषस्यैव भवितुमर्हतीति यावत्, सः पुरुषः तां वाचमनुसृत्य तया स्वया निजया वाचा सात्म्यं तादात्म्यं प्रत्यृतः प्रतिसङ्गतः सन् सविशेषः विश्वरूपः प्रकाशते इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! the glory that has spread all round from you is manifested as the universe full of objects with names and forms. The Purusha follows his own Vāk and is united with Vāk. He shines with attributes and assumes all forms with the help of Vāk.

## नवमी ऋक् ।

ब्रह्मणस्पते त्वं परमं ब्रह्म सन्
पुरुषः स आत्मा बृहन् स इन्द्रः ॥

विश्वमिदं वाच्यं वाचमत्युदगाद्
ब्रह्म तदीम्ज्योतिर्विश्वस्य दर्शयत् ॥ ९ ॥

पदपाठ :– ब्रह्मणः । पते । त्वम् । परमम् । ब्रह्म । सन् ।
पुरुषः । सः । आत्मा । बृहन् । सः । इन्द्रः ॥
विश्वम् । इदम् । वाच्यम् । वाचम् । अति । उत् । अगात् ।
ब्रह्म । तत् । ईम् । इति । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Brahmaṇaspati ! you are Brahma the Supreme. You are the Purusha, the Ātman, the Great One and you are Indra. You are beyond this manifested universe. You are the Brahma, the Light of Lights which illumines the universe.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! त्वम् वाग्ब्रह्मणः अधिष्ठाता पतिः सन् स्वयं परमं ब्रह्मैव असि, त्वमेव परब्रह्मात्मकः इति भावः, स त्वं सन् केवलं सदात्मकः पुरुषः पुरुषसत्त्वकः, विश्वबीजात्मकः आत्मा चेतनः बृहन् महान् व्यापकः, सः त्वं परोक्षसिद्धः इन्द्रः परमैश्वर्यपूर्णः असि ॥ अतः तद् ब्रह्म परोक्षं सत् इदं प्रत्यक्षसिद्धं वाच्यं वाच्यार्थरूपं वस्तुजातं, तथा वाचं वाचकसत्त्वां तां परां शक्तिमपि अति अतिक्रम्य उदगात् ततोऽपि परतः परां काष्ठां अधिष्ठाय केवलं सन्मात्रात्मकं परोक्षसत्त्वेन स्वयं पूर्णं बभूव ॥ तदेव परमं ब्रह्म ईं ईमित्यनुकरणमात्रेण निर्देश्यं अवगम्यं ज्योतिः, तत्परञ्ज्योतिरात्मकं अस्य विश्वस्यापि जगतः दर्शयत् प्रकाशकं भवतीति ॥

॥ इति तृतियेऽनुवाके तृतीयं ब्रह्मणस्पतिसूक्तम् समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! as the Lord of Vāk, the visible Brahma, you are Brahma the supreme, who is pure existence. You are the Purusha, the very seed of the universe; you are the Soul full of energy and you are Indra, the Lordliest of all, and you are beyond the purview of the senses. So, it is Brahma who is this visible universe. That Brahma is to be indicated and attained by the onomatopoetic word ĪM. It is the light par excellence, which illumines all in this universe.

Thus ends the Third hymn in the third Section.

## अथ तृतीयेऽनुवाके चतुर्थं ब्रह्मणस्पतिसूक्तम् ।

अनुवाकः ३ । सूक्तम् ४ । ऋचः १-९ ।

ब्रह्मणस्पतिर्ज्योतिषा यत् नव, दैवरातो वैश्वामित्रः, ब्रह्मणस्पतिः, जगती ।

**Now the Brahmanaspati Sukta, Fourth in Third Anuvaka**

**Section III, Hymn 4, Riks 1-9** - BRAHMAṆASPATI.

This hymn beginning with " Brahmaṇaspatirjyotishā yat " contains nine Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Brahmaṇaspati is the god and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

ब्रह्मणस्पतिर्ज्योतिषा यत् परमे
व्योमन्यग्रे प्रचेतनं निदधे पदम् ॥
अमात्रं तत् परमं पूर्णमपदं
स एकपात् पुरुषोऽयं साकं वाचा ॥ १ ॥

पद्पाठ :- ब्रह्मणः । पतिः । ज्योतिषा । यत् । परमे ।
विऽओमनि । अग्रे । प्रऽचेतनम् । नि । दधे । पदम् ॥
अमात्रम् । तत् । परमम् । पूर्णम् । अपदम् ।
सः । एकऽपात् । पुरुषः । अयम् । साकम् । वाचा ॥

Brahmaṇaspati ( the Lord of Vāk ) first established in the infinite sky his foot in the form of primal energy by the power of his light. That step was full and mighty but it could not be measured and was without any divisions. That was the indivisible Purusha united as one with Vāk or the power of speech.

### अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः वाचः अधिपतिः ज्योतिषा निजेन चैतन्यज्योतिःसत्त्वेन अग्रे प्रथमतः विश्वविसृष्टेरपि पूर्वं परमे व्योमनि अस्माद् भौताकाशादपि परमस्मिन् श्रेष्ठे अधिष्ठाने यत् प्रचेतनं केवलं प्रकृष्टं चेतनात्मकं पदं निदधे विश्वास्पदीभूतं प्रतिष्ठापयामास- आत्मनः अधिष्ठानं सम्भावयामासेति यावत् , तदेव परम पदं अमात्रं मानादिविरहितम् , अतिमात्रम् , अत एव तत् पूर्णम् न्यूनातिरेकादिसर्वविशेषविमुक्तं, अपदं स्थानादिकल्पनानर्हं भवति, तेन प्रचेतनेन पदेन सः एकपात् इति सङ्केतितः, तथा तत्सञ्ज्ञया प्रतिबोधितः सः परमः

पुरुषः अयं सर्वान्तरात्मा वाचा निजया वाचकशक्त्या तत्पूर्णात्मसत्त्वया साकं तत्तादात्म्येन स्वतः सिद्धः सन् सदैव सम्राजते ॥ तदेतदेव ब्रह्मणस्पतेः सत्त्वं महत्त्वं च भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati is the lord of Vāk. He with the power of knowledge-light, even before the creation of this universe placed His foot in the vastness of infinite space. His foot was pure consciousness. He considered that to be his abode. That is immeasurable, beyond any measurement and perfect. There can neither be deficiency nor redundancy about it, nor can any location be assigned to it. That is the Purusha of one foot that is without any parts. This innermost Ātma who is the Purusha is one with the expressive power ( Vāk ) of Brahmaṇaspati.

## द्वितीया ऋक् ।

ब्रह्मणस्पतिर्ज्योतिषोत तमसा
सच्चासच्च सन्निदधे द्वे पदे ॥
तत् प्रचेतनं तदचेतनं ताभ्यां
स द्विपात् पुरुषोऽयं साकं वाचा ॥ २ ॥

पदपाठ :— ब्रह्मणः । पतिः । ज्योतिषा । उत । तमसा ।
सत् । च । असत् । च । सम् । नि । दधे । द्वे । पदे इति ॥
तत् । प्रऽचेतनम् । तत् । अचेतनम् । ताभ्याम् ।
सः । द्विऽपात् । पुरुषः । अयम् । साकम् । वाचा ॥

Then Brahmaṇaspati placed his two feet in the vast space in the form of light and darkness as also in the form of truth and untruth. It is those two feet which are in the form of conscious and unconscious energy. That is the two-footed Purusha ( with seemingly contradictory powers ) who is one with Vāk.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः ज्योतिषा प्रकाशरूपेण तथा तमसा तद्विरुद्धरूपेण तत्प्रतिद्वन्द्वरूपेण अन्धकारेण सत्-असत् इति च ते द्वे विरूपे पदे सन्निदधे स्थापयामास, तयोरिदं स्वरूप-लक्षणं भवति, एकं प्रचेतनं प्रकृष्टचेतनं केवलं चेतनमिति यावत्, अन्यत् अचेतनं चेतनरहितं चेति, ताभ्यां सदसद्भ्यां चेतनाचेतनाभ्यां सह वाचा-विदा च सङ्गतः एव सः पुरुषः द्विपात् संवृत्तः इति, तथा विभाव्यते इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Then Brahmaṇaspati placed in space his two feet in the form of opposites, such as light and darkness, truth and untruth. This pair is the pair of opposites. That is the nature of those two feet, one is conscious energy, and the other the unconscious energy of matter. On account of that, the Purusha came to be known as having two feet, but he is one with Vāk.

## तृतीया ऋक् ।

ब्रह्मणस्पतिः स प्रचेतन एवं
सन्नचेतनं भूतमध्याविवेश ॥
भूयोऽयं सचेतन आविर्बभूव
स त्रिपात् पुरुषोऽयं साकं वाचा ॥ ३ ॥

पदपाठ :— ब्रह्मणः । पतिः । सः । प्रऽचेतनः । एव ।
सन् । अचेतनम् । भूतम् । अधि । आऽविवेश ॥
भूयः । अयम् । सऽचेतनः । आविः । बभूव ।
सः । त्रिऽपात् । पुरुषः । अयम् । साकम् । वाचा ॥

Brahmaṇaspati himself is forever pure conscious energy. He entered into unconscious energy which is matter. Again he manifested himself as sentient beings that is the Purusha with three feet. He is one with Vāk.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः स्वयं सदैव स्वभावतः स्वरूपतश्च प्रचेतनः एव सिद्धः सन् सत्रामात्रात्मकः इदं सर्वं भूतं अचेतनं भूतजातं अधि अधिकृत्य आविवेश, एतेन अचेतनेन भूतेन सह सञ्जगमे इति भावः ॥ ततश्च भूयः एतैरेव भूतैः सह सः अयं केवलः चेतनः आत्मा सचेतनः सशरीरः सन् आविर्बभूव, तस्मात् सोऽयं पुरुषः विदा ज्ञानेन वाचा शब्दब्रह्मणा च साकं संहितः सन् त्रिपात् त्रिपादसत्त्वः इति सम्भाव्यते, तान्येतानि तस्य प्रधानानि सर्वेभ्यः प्रथमानि तत्त्वरूपाणि त्रीणि पदानि भवन्ति, —तथाहि— प्रत्यक्षं अचेतनं इदं जगदात्मकं अधिभूतं प्रथमम् तत्त्वम् ( १ ), परोक्षं प्रचेतनं ईशात्मकं तत् अधिदैवतं द्वितीयम् ( २ ), अपरोक्षं सचेतनं जीवात्मकं प्रत्यगात्मस्वरूपं आन्तरं अध्यात्मं तृतीयम् ( ३ ), इति विवेकः ॥ अत्र प्रचेतनमेव ईशात्मकं अधिदैवतं प्रथमम् ( १ ), अचेतनं जगदेव अधिभौतिकं द्वितीयम् ( २ ), अपरोक्षं सचेतनं जीवरूपमेव आध्यात्मकं तृतीयम् ( ३ ) भवति ॥

## COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati by his very nature is pure conscious energy. He entered into the elements, which are forms of unconscious energy. Thus sentient beings came into existence. Prachetana Brahmaṇaspati entered Achetana matter which also is his own creation. He thus brought into being Sachetana creation. This Purusha, always one with Vāk, is considered as three-footed. So these three feet are His major forms: one is the material physical universe, visible to the eyes, known as Adhibhūta; the second is the invisible but conscious power in the form of Īśvara, known as Adhidaivata; and then the third is consciousness embodied in the form of Jīva, the individual soul, known as Ādhyātma.

## चतुर्थी ऋक् ।

ब्रह्मणस्पतिर्भूर्भुवः स्वरितिस्तृभि-
र्वाग्भिर्व्याहृतिभिर्नि दधे पदानि ॥
पृथिवीमन्तरिक्षं दिवं चाधि
स त्रिपात् पुरुषोऽयं साकं वाचा ॥ ४ ॥

पदपाठ :— ब्रह्मणः । पतिः । भूः । भुवः । स्वरिति स्वः । तिसृऽभिः ।
वाग्भिः । व्याहृतिऽभिः । नि । दधे । पदानि ॥
पृथिवीम् । अन्तरिक्षम् । दिवम् । च । अधि ।
सः । त्रिऽपात् । पुरुषः । अयम् । साकम् । वाचा ॥

Brahmaṇaspati placed three steps with the triple utterance (vyāhṛti), Bhūḥ, Bhuvaḥ, Svaḥ, in the form of words, in the three regions of Pṛthvī (earth), Antariksha (mid-air), and Dyau (sky). He is indeed the Purusha with three steps. He is one with Vāk.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः "भूः भुवः स्वः" इति एताभिः वाग्भिः वाग्रूपाभिः तिसृभिः व्याहृतिभिः यजुर्मन्त्रात्मिकाभिः त्रीणि पदानि निदधे अस्मिन् ब्रह्माण्डे बहिः स्थापयामास, तानि च पृथिवीं इमां अवमां, अन्तरिक्षं मध्यमं उभयोः भुवनयोः सन्धिरूपं, दिवं उत्तमं भुवनं च इत्येनमेतानि त्रीणि भौवनानि पदानि अधि अधिष्ठाय सोऽय पुरुषः वाचा विदा च साकं त्रिपात् संवृत्तः इति ॥ तानीमानि सर्वेषां भूतानां तथा प्राणिनां च आधारभूतानि भुवनात्मकानि बाह्यानि त्रीणि पदानि ब्रह्मणस्पतेः तस्य पुरुषस्य भवन्तीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati with the three utterances ( vyāhṛtis ), Bhūḥ, Bhuvaḥ, and Svaḥ, in the form of words, placed His three steps in this egglike universe ( Brahmāṇḍa ) created by Brahma. They covered this earth, the mid-air and the sky. He, the Purusha, with Vāk, is considered as one with three steps. The three steps are the three worlds, the abode of all created things and beings.

## पञ्चमी ऋक् ।

ब्रह्मणस्पतिर्भूतं यद् बहिर्धाऽधि
ज्योतिषाऽद्भिः पृथिव्या च प्रत्यृतः ॥
पदानि त्रीणि भूतैर्नि दधे त्रिभिः
स त्रिपात् पुरुषोऽयं साकं वाचा ॥ ५ ॥

पदपाठ :– ब्रह्मणः । पतिः । भूतम् । यत् । बहिःऽधा । अधि ।
ज्योतिषा । अत्ऽभिः । पृथिव्या । च । प्रति । ऋतः ॥
पदानि । त्रीणि । भूतैः । नि । दधे । त्रिऽभिः ।
सः । त्रिऽपात् । पुरुषः । अयम् । साकम् । वाचा ॥

Brahmaṇaspati, when He manifested Himself by the power of light and became Adhibhūta ( that is assumed material form ) placed His three steps in the three elements, light, water and earth. He with Vāk is indeed Purusha, with three steps.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः स्वेन ज्योतिषा बहिर्धा बाह्यभावाय यत् अधिभूतं तत्त्वं प्रत्यृतः प्रतिप्राप्तः सन् ज्योतिषा तेजःस्वरूपेण अद्भिः जलैः रसात्मकैः पृथिव्या पृथुभूतेन एवं एतैः त्रिभिर्भूतैः त्रीणि पदानि निदधे, विदा ज्ञानशक्त्या वाचा निजया वाचकशब्दशक्त्या च सह स्वयं चेतनात्मा पुरुषः सः त्रिपात्सत्त्वकः स्वतः सिद्धोऽपि पुनः तैरेतैः भौतिकैः पदैः युक्तः सोऽयं पुरुषः त्रिपात् इति भाव्यते, एतानि त्रीणि भूतात्मकानि पदानि भवन्ति, अत्रायं विशेषः—तत्र आधाराधेयभावतया "पृथिवी-अन्तरिक्षं-द्यौः" इति त्रयाणां भुवनानां, तथा "पृथिवी-आपः-तेजः" इति त्रयाणां भूतानां च सामान्येन निर्देशात् तेषां उभयविधानामपि त्रयाणां पदानां समानं नामरूपात्मकं सत्त्वं भुवनानां भूतानां च आधाराधेयभावमात्रेण भेदोपचारदर्शनात्, तथा हि द्यौरिति ज्योतिराश्रयीभूतं पदम्, स्वः इति, पृथिवी च भूमिरेव भूः इति । अन्तरिक्षं इति मध्यमं पदं भुवः इति तच्च अपां आश्रयीभूतम् अप्-

सञ्ज्ञकमेव, उभयत्रापि उदकनामसु—अन्तरिक्षनामसु च अप्शब्दस्य पाठात्, तदेतदेव उपनिषत्सु तेजोऽबन्नशब्दैरुपदिष्टमनुश्रूयते, इति विशेषः ॥

### COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati, through the power of light manifested himself and became Adhibhūta ( material form ). Light, water and earth are the three elements in which he placed his three steps. He is Purusha with three steps. These steps are in the form of three basic elements.

The container and the contained are the same. The three worlds, earth, mid-air and sky, are made of earth, water ( fluids ) and light respectively and they are identical with each other in name and form also. Dyau is the abode of light, Pṛthvī that of earth and Antariksha that of water and is known as Ap. The word Ap is included in both the lists, in the Vedic Dictionary, 'Nighaṇṭu', meaning water and mid-air ( Jala and Antariksha respectively ). This ( Trivṛtkaraṇa ) is referred to in the Upanishads by the words Tejas, Ap and Anna. This is the speciality here.

### षष्ठी ऋक् ।

ब्रह्मणस्पतिर्ज्योतिषाऽधि दिव्यानि
पृथिव्यामन्तरिक्षे दिवि पदानि ॥
अग्निनेन्द्रेण सवित्रा च नि दधे
स त्रिपात् पुरुषोऽयं साकं वाचा ॥ ६ ॥

पदपाठ :— ब्रह्मणः । पतिः । ज्योतिषा । अधि । दिव्यानि ।
पृथिव्याम् । अन्तरिक्षे । दिवि । पदानि ॥
अग्निना । इन्द्रेण । सवित्रा । च । नि । दधे ।
सः । त्रिऽपात् । पुरुषः । अयम् । साकम् । वाचा ।

Brahmaṇaspati through the power of light, placed his celestial three steps in Pṛthvī, Antariksha and Dyau in the form of Agni, Indra and Savitā. He is the Purusha with three steps and is one with Vāk.

### अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः अधि-ज्योतिषा अधिदैवततत्त्वेन पृथिव्यन्तरिक्षद्युलोकेषु अग्निना भौमेन इन्द्रेण विद्युदात्मना सवित्रा दिव्येन च तेजोविशेषेण यत् खलु दिव्यानि देवतात्मकानि तानि त्रीणि पदानि निदधे, तेन विदा—वाचा च साकं त्रयीरूपया छन्दस्तत्त्वया युक्तः सोऽयं पुरुषः त्रिपात् संवृत्तः इति सम्भाव्यतामिति ॥

## COMMENTARY--SUMMARY TRANSLATION

Brahmaṇaspati, through his Adhidaivata principle, placed His three steps respectively in Pṛthvī, Antariksha and Dyau, in the form of Agni which is Indra on earth, Indra who is lightning in heaven, and Savitā who is the sun. These three are divine steps. He is the Purusha with three steps. He is one with Vāk.

## सप्तमी ऋक् ।

ब्रह्मणस्पतिरात्मानमध्यन्त-
ज्योतिषाऽद्भिः पृथिव्याऽन्नैः प्रत्यृतानि ॥
वाचा प्राणैर्मनसा दधे पदानि
स त्रिपात् पुरुषोऽयं साकं वाचा ॥ ७ ॥

पद्पाठ :– ब्रह्मणः । पतिः । आत्मानम् । अधि । अन्तरिति ।
ज्योतिषा । अत्ऽभिः । पृथिव्या । अन्नैः । प्रति । ऋतानि ॥
वाचा । प्राणैः । मनसा । दधे । पदानि ।
सः । त्रिऽपात् । पुरुषः । अयम् । साकम् । वाचा ॥

Brahmaṇaspati through his Adhyātma principle, placed three steps in the form of Vāk, Prāṇa and Manas, in light, water and food. ( Vāk is the power of speech, Prāṇa is the power of life, and Manas is the power of thought. ) This was the Purusha with three steps who is one with Vāk.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः आत्मानं अधिष्ठाय तेन स्वात्मीयेन अध्यात्मतत्त्वेन सर्वान्तर्येण सर्वेषां अन्तः शरीरे तेजो-जल-पृथिवीस्वरूपैः भूतैः अन्नैश्च सह प्रत्यृतानि प्राप्तानि यानि त्रीणि पदानि वाचा तेजोमय्या आग्नेय्या प्राणेन आपोमयेन ऐन्द्रेण वायव्येन रुद्रियेण च मनसा अन्नमयेन भौमेन सौम्मेन च अन्तरात्मनि निदधे तानि करणत्रयात्मकानि स्थापयामास ॥ तैः सह युक्तः सोऽयं पुरुषः सर्वान्तरः आत्मा विदा ज्ञानशक्त्या वाचा वाचकशक्त्या च सह त्रिपात् संवृत्तः, तत्रापि परापश्यन्तीमध्यमारूपया वाचा इति विशेषः ॥

## COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati, through his soul-power, that is Adhyātma, placed three steps in the bodies of all beings in the form of Vāk ( speech ), Prāṇa ( vital breath ) and Manas ( mind ). That means, He established the three karaṇas, instruments of action. He, this Purusha, with the Vāk supreme is considered

as having three steps. Vāk referred to here is parā, paśyanti and madhyamā. These are the three stages of the power of speech, the fourth is the actual word called Vaikharī. This is a speciality.

## अष्टमी ऋक् ।

ब्रह्मणस्पतिः करणैस्त्रिभिरन्तः
संविदा कर्मणा कामेन चिताऽऽत्मनि ॥
वैश्वानरेण तेजसाऽऽत्मना प्रज्ञेन
चतुष्पात् स पुरुषोऽयं साकं वाचा ॥ ८ ॥

पद्पाठ :— ब्रह्मणः । पतिः । करणैः । त्रिऽभिः । अन्तरिति ।
सम्ऽविदा । कर्मणा । कामेन । चिता । आत्मनि ॥
वैश्वानरेण । तेजसा । आत्मना । प्रऽज्ञेन ।
चतुःऽपात् । सः । पुरुषः । अयम् । साकम् । वाचा ॥

Brahmaṇaspati, in his own soul, invested the three karaṇas, namely Vāk, Prāṇa and Manas which are already with knowledge, will and consciousness, with the three stages of consciousness, vaiśhvānara (normal consciousness), tejas (dream consciousness) and Sushupti (sleep consciousness). That is the Purusha with four steps. He is one with Vāk (the fourth step is Turīya mentioned in the next mantra).

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः सर्वेषां अन्तःशरीरे प्रत्यगात्मनि त्रिभिः करणैः वाक्-प्राण-मनः-स्वरूपैः तच्छक्तिभिश्च संविदा ज्ञानात्मिकया क्रियया प्रत्यक्षकृतिरूपया कामेन इच्छात्मिकया सङ्कल्प-भावनादिसत्त्वया चिता परया चैतन्यात्मिकया च सह वैश्वानरेण स्थूलशरीराभिमानिना जाग्रतिसत्त्वेन, तेजसा तैजसात्मना सूक्ष्मशरीराभिमानिना स्वप्नसत्त्वेन, प्रज्ञेन प्राज्ञेन कारणशरीराभिमानिना सुषुप्तिसत्त्वेन च सङ्गतः सन् विदा परात्मिकया चेतनया, वाचा निजया चतुष्पद्या “परा-पश्यन्ती-मध्यमा-वैखरी” इति च तन्त्रान्तरप्रसिद्धया, तथा “ॐ भूर्भुवः स्वः” इति (आर्षया) प्रणवव्याहृतिरूपया च छन्दोमय्या च वेदचतुष्टयात्मिकया परया वाचा सह प्रपूर्णः सोऽयं पुरुषः सर्वान्तरात्मा चतुष्पात् चतुर्भिः सत्त्वैः सम्पन्नः इति सम्भाव्यताम् ॥ अत्र सर्वत्रापि यद् यत् स्वरूपं तत्त्वं च पुरुषस्य समर्थ्यते तत् सर्वमपि तत्पराशक्तेः वाग्देवतायाः अपि तत्समानमेवेति ज्ञेयम्, तथा यद् यद् वाचो देव्याः तात्विकं रूपं उच्यते तत् सर्वं पुरुषस्य ब्रह्मणस्पतेरपि समानसत्त्वेन संवेद्यम् इति सङ्केतः ॥

COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati within all souls, combines with the Karaṇas (instruments) Vāk, Prāṇa and Manas with Vaiśvānara, Tejas and Prajñā. His Vāk has four steps or stages, parā, paśyantī, madhyamā and vaikharī; this is well-known in Tantras and known to Ṛshis. Or Vāk is both Praṇava and Vyāhṛti (Om, Bhūḥ, Bhuvaḥ and Svaḥ) and has four steps. With Vāk, He, the Purusha, the Soul turned inward becomes one who has four stages or steps.

## नवमी ऋक् ।

ब्रह्मणस्पतिरग्रियं यदुत्तमं
तुरीयं तत् पदं नि दधेऽन्तरधि ॥
पुरुषोऽयं चतुष्पात् पूर्णः स वाचा
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ९ ॥

पदपाठ :— ब्रह्मणः । पतिः । अग्रियम् । यत् । उत्ऽतमम् ।
तुरीयम् । तत् । पदम् । नि । दधे । अन्तरिति । अधि ॥
पुरुषः । अयम् । चतुःऽपात् । पूर्णः । सः । वाचा ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

Brahmaṇaspati placed in the soul of all Turīya, the best and the fourth step. This Purusha with Vāk is perfect with four steps. He is that light par excellence which illumines the universe.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः सर्वेषां अन्तः आत्मनि अधिष्ठानरूपं अग्रियं सर्वेभ्योऽपि आदिमं च यत् उत्तमं तत् परोक्षं तुरीयं पदं निदधे, तेन च सोऽयं पुरुषः सर्वान्तरात्मा वाचा निजया चतुष्पद्या सह स्वयमपि चतुष्पात् सर्वसत्त्वेन पूर्णः प्रभवति, तस्मात् तदेव तुरीयं पदं परमं विश्वस्य जगतः अस्य दर्शयत् प्रकाशकं ज्योतिः, स ब्रह्मणस्पतिः तत्परञ्ज्योतिःस्वरूपः सर्वज्ञानविज्ञानादिपूर्णः इति ॥

॥ इति तृतीयेऽनुवाके चतुर्थं ब्रह्मणस्पतिसूक्तं समाप्तम् ॥

COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati placed within the soul of all, the last step. It is the best and the invisible fourth step. This Purusha is the inner soul of all. He is one with Vāk, full of all principles. He is the Light supreme, which illumines the universe and He is Brahmaṇaspati.

Thus ends the Fourth hymn in the Third Section.

## अथ तृतीयेऽनुवाके पञ्चमं ब्रह्मणस्पतिसूक्तम् ।

अनुवाकः ३ । सूक्तम् ५ । ऋचः १-८ ।

ब्रह्मणस्पतिर्ब्रह्मणा प्रति अष्टौ, दैवरातो वैश्वामित्रः, ब्रह्मणस्पतिः, जगती ।

**Now the Brahmanaspati Sukta, fifth in Third Anuvaka**

**Section III, Hymn 5, Riks 1-8 - BRAHMAṆASPATI.**

This hymn beginning with "Brahmaṇaspatirbrahmaṇā prati" contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Brahmaṇaspati is the god and Jagatī is the metre.

### अथ प्रथमा ऋक् ।

ब्रह्मणस्पतिर्ब्रह्मणा प्रति वाचा
यो विश्वरूपः परः सन् विश्वतस्परि ॥
यः प्रत्यङ् अयं चेततेऽन्तः संविदा
समेन तं पुरुषं प्र पद्ये रसेन ॥ १ ॥

पदपाठः— ब्रह्मणः । पतिः । ब्रह्मणा । प्रति । वाचा
यः । विश्वऽरूपः । परः । सन् । विश्वतः । परि ॥
यः । प्रत्यङ् । अयम् । चेतते । अन्तरिति । सम्ऽविदा ।
समेन । तम् । पुरुषम् । प्र । पद्ये । रसेन ॥

Brahmaṇaspati who is one with Vāk, the manifest Brahma, is perceptible as the vast universe, and yet he transcends everything. I attain that Purusha or Being, through full harmony and concord with Him. He it is who, in the inner soul, inspires and animates all.

### अन्वयभाष्यम् ।

यः ब्रह्मणस्पतिः ब्रह्मणा छन्दोमयेन वाचा छन्दस्वत्या ब्रह्मण्यया प्रति ऋतः प्रातिमुख्येन सङ्गतः, यः विश्वरूपः विश्वतोमुखेन स्वरूपेण उदितः सन् अस्मात् विश्वस्मात् परः परि अतीतः व्याप्तः, यः अन्तः सर्वेषां अन्तर्हृदये प्रत्यङ् प्रत्यगात्मरूपः अयं अपरोक्षसिद्धः अहमयमस्मीति सर्वानुभूतितः प्रसिद्धः सन् संविदा ज्ञानकलया चेतते संस्फुरति चेष्टते, तं इमं स्वान्तरं पुरुषं समेन रसेन प्रत्यक्ष-परोक्षापरोक्षाणां जगदीशजीवात्मनां सामरस्येन योगेन प्रपद्ये तादात्म्येन प्राप्नोमीति ॥

COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati is one with Vāk, in the form of Brahma, the Vedic mantra in metres ( Chhandasvatī ). He manifests Himself as multi-formed though

He really transcends the universe. He dwells in the hearts of all as the inmost soul. He who is to be realised vibrates with the light of knowledge. I attain this Purusha by identity with Him and in full harmony.

## द्वितीया ऋक् ।

यो भूतः सन्नधि प्रति भूते ततो
यो देवः सन्नधि प्रति दैवते ततः ॥
यो अन्तरुतात्माऽध्ययमात्मंस्ततः
समेन तं पुरुषं प्र पद्ये रसेन ॥ १ ॥

पद्पाठ :– यः । भूतः । सन् । अधि । प्रति । भूते । ततः ।
यः । देवः । सन् । अधि । प्रति । दैवते । ततः ॥
यः । अन्तरिति । उत । आत्मा । अधि । अयम् । आत्मन् । ततः ।
समेन । तम् । पुरुषम् । प्र । पद्ये । रसेन ॥

He who is eternally self-existent pervades every other existence. He who is light incarnate pervades every existent deity. He who is the Paramātman, pervades every other soul. Him I attain by being in tune with Him in full harmony.

## अन्वयभाष्यम् ।

यः स्वयं भूतः विद्यमानः सन् तथा स्वेनैव सद्रूपेण आविर्भूतश्च सन् प्रति भूते प्रत्येकस्मिन् अधिभूते वस्तुनि ततः, आत्मनः सकाशादाविर्भूते जगति प्रति ततः प्रातिमुख्येन भूयो विततः, तथा यः देवः स्वयं देवतात्मा प्रकाशकः सन् प्रति दैवते अधि ततः परोक्षेण अधिदैवततत्त्वेन व्याप्तः, उत अपि च यः स्वयं आत्मैव सन् अध्यात्मसत्त्वेन स्वेन सर्वस्मिन् आत्मनि ततः, एवं अन्तर्यामिस्वरूपेण यः अधिभौतिके अधिदैवते अध्यात्मके च वस्तुनि सर्वस्मिन्नपि एकरूपेण सत्त्वेन चित्सत्तया च सन्ततोऽस्ति, तं परमं पुरुषं सामरस्येन तदेकीभावेन प्रपद्ये इति ॥ अत्र "अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्" इति (ब्र. सू. १-२-१८) ब्रह्मसूत्रनिर्दिष्टं अन्तर्यामिब्राह्मणतत्त्वमनुसन्धेयम्, तथा हि "यः पृथिव्यां तिष्ठन् पृथिव्याः अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्माऽन्तर्याम्यमृतः" इति (बृ. उ. ३-७, ३-२३) "यः अग्नौ तिष्ठन्०" "यः आदित्ये तिष्ठन्०" "यः वचि तिष्ठन्०" "यः आत्मनि तिष्ठन्०" इत्यादि ॥ तत्र तत्त्वत्रयोदितेषु भूतेषु, देवेषु, आत्मसु च सर्वेष्वपि सिद्धवस्तुषु तस्य परमपुरुषस्य प्रतिष्ठा तथा तेषां सर्वेषामपि संयमनं च अनुश्रूयते ॥

## COMMENTARY—SUMMARY TRANSLATION

Being Himself ever-existent, by His very existence, He pervades every element. Likewise, He is God, who is illumination itself and so pervades every god. He fills every god with His invisible Adhidaivata principle. And further, He being Himself the great Ātmā, He fills every soul with His Adhyātma principle. As the Antaryāmin, the indweller, He pervades fully all things, Adhibhautika, Adhidaivika and Adhyātmika. I attain the Purusha, the all-pervader by identity and in full harmony. Cf. " The ruler within the gods, etc. is Brahma because of the characteristics mentioned" (B.S. 1-2-18).

## तृतीया ऋक् ।

यो भूतानि ब्रह्मणेह वाचोत्ससर्ज
यद्धु तेजो या अपो यां भूमिं सान्नाम् ॥
इमानि त्री त्रिवृताऽऽत्मना योऽभरत्
समेन तं पुरुषं प्र पद्ये रसेन ॥ ३ ॥

पदपाठ :— यः । भूतानि । ब्रह्मणा । इह । वाचा । उत् । ससर्ज ।
यत् । ऊम् इति । तेजः । याः । अपः । याम् । भूमिम् । सान्नाम् ॥
इमानि । त्री । त्रिऽवृता । आत्मना । यः । अभरत् ।
समेन । तम् । पुरुषम् । प्र । पद्ये । रसेन ॥

He who created with the help of the manifest Brahma ( word ) all the elements, the light, the waters, the earth with food, invested all created elements with the soul. They got multiplied by the process of triplication ( trivṛtkaraṇa ). I attain the Purusha by identity and in full harmony.

## अन्वयभाष्यम् ।

यः ब्रह्मणः वाचः अधिपतिः सन् स्वेन ब्रह्मणावाचा छन्दस्वत्या भूतानि भूतजातानि प्रत्यक्षाणि उत्ससर्ज उच्छ्वासतः आविश्चकार, यत् खलु प्रत्यक्षं सद्रूपं तेजः, याश्च अपः सरसाः, यां च सान्नां अन्नसहितां भूमिं इमां सर्वेषामाधारभूतां प्रथमतः उत्ससर्ज आदिसृष्टौ इति यावत् इति अर्थाद् गम्यते तानि त्रीणि इमानि प्रत्यक्षसिद्धानि भूतानि त्रिवृता त्रिवृतानि प्रत्येकशः त्रिवृत्कृतानि स्वयं त्रिवृद्भूतानि वा यः आत्मना निजेन चैतन्यसत्त्वेन अभरत् पूरयामास, तथा स्वयमपि तत्र पूर्णः इति भावः, " वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" इति च ( ना. उ. १०–४ ) श्रुत्यन्तरादपि गम्यते सोऽयमेवार्थः तं परमं पुरुषं समेन रसेन समभावेन प्राप्नोमीति ॥

अत्र "सञ्ज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" इति (ब्र. सू. २-४-२०) ब्रह्ममीमांसायां निर्णीतं त्रिवृत्करणतत्वं अनुसन्धेयम् ॥ तथा च तदेव छान्दोग्योपनिषदि अनुश्रूयते "सदेव सोम्येदमग्र आसीत् तत् तेजोऽसृजत, तदपोऽसृजत ता अन्नमसृजन्त सेयं देवतैक्षत हन्ताहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकामकरोत्" ( छां. उ. ६-३-१-४ ) इति च ॥

## COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati being the Lord of Vāk, created all the elements out of His breath in the form of metrical compositions. He breathed out the elements as it were. He created light by means of brilliance, the waters full of juice, and this earth full of food. It is indicated that this was in the beginning of creation. These three elements tripled themselves into millions of things. He invested them with a soul full of energy. He is Himself always full independently of anything else. Cf. "All is full of Purusha" ( Nā. Up. 10-4 ). That supreme Purusha I attain by identity. Cf. "But the creation of name and form are by Him the author of tripartite creation as is taught." ( B. S. II-4-20 ). This tripartite creation which is referred to in Chān. Up. ( VI-3 ) also is to be read in this context.

## चतुर्थी ऋक् ।

य इदं विश्वं त्रिवृतं व्याहरद्<br>
भूर्भुवः स्वस्त्रिवृता वाचा ब्रह्मणा ॥<br>
तत् पृथिवीमन्तरिक्षं दिवं चानु<br>
समेन तं पुरुषं प्र पद्ये रसेन ॥ ४ ॥

पदपाठ :– यः । इदम् । विश्वम् । त्रिऽवृतम् । विऽआहरन् ।<br>
भूः । भुवः । स्व १ रिति स्वः । त्रिऽवृता । वाचा । ब्रह्मणा ॥<br>
तत् । पृथिवीम् । अन्तरिक्षम् । दिवम् । च । अनु ।<br>
समेन । तम् । पुरुषम् । प्र । पद्ये । रसेन ॥

He breathed out this tripartite universe with the help of Vāk, in the form of mantras by repeating it thrice as Bhūḥ, Bhuvaḥ and Svaḥ, Pṛthvī ( earth ), Antariksha ( mid-air ) and Dyau ( sky ). By following these Vyāhṛtis, I attain the Purusha by identity in full harmony.

## अन्वयभाष्यम् ।

यः परमः पुरुषः ब्रह्मणस्पतिः इदं प्रत्यक्षसिद्धं ब्रह्माण्डरूपं विश्वं जगत् त्रिवृतं त्रिवलीभूतं "भूः भुवः स्वः" इति व्यस्त-समस्तरूपया यजुर्मन्त्रात्मिकया वाचा व्याहरत् उच्चारयामास, तदनु व्याहृतिरूपं तद् ब्रह्मैव अनुसृत्य पृथिवीं इमां अवमां अन्तरिक्षं मध्यमं भुवनं दिवं उत्तमं भुवनं च कल्पयामास तदुच्चारमात्रेण, तं तादृशं पुरुषं समभावेन एतेषां भुवनानां व्याहृतीनां न समन्वयेन प्राप्नोमीति ॥

### COMMENTARY—SUMMARY TRANSLATION

He the Great Purusha, with the help of Vāk, created this Brahmaṇḍa, the visible universe. He did this using Vāk as a Yajurmantra in the form of Vāyhṛtis, Bhūḥ, Bhuvaḥ and Svaḥ. He pronounced the Vyāhṛtis and created this Pṛthvī, the lowest world, Antariksha, the middle one and Dyau, the highest. By His very utterance of the Vyāhṛtis, they came into existence. I attain the Purusha by identity in full harmony.

## पञ्चमी ऋक् ।

यो ज्योतिषाऽन्तर्वाचा ब्रह्मणाऽऽत्मना
पुनर्यत् त्रिवृतं सम्बभार ज्योतिः ॥
इममग्निमुतेन्द्रं तममुं सूर्यं
समेन तं पुरुषं प्र पद्ये रसेन ॥ ५ ॥

पद्पाठ :— यः । ज्योतिषा । अन्तरिति । वाचा । ब्रह्मणा । आत्मना ।
पुनरिति । यत् । त्रिऽवृतम् । सम् । बभार । ज्योतिः ॥
इमम् । अग्निम् । उत । इन्द्रम् । तम् । अमुम् । सूर्यम् ।
समेन । तम् । पुरुषम् । प्र । पद्ये । रसेन ॥

He created with the help of his own brilliance and the help of Vāk (word) light, which is indeed triple in form. The three forms are Agni, Indra, and Sūrya. I attain the Purusha by identity and in full harmony.

## अन्वयभाष्यम् ।

यः पुरुषः ब्रह्मणा ब्रह्मात्मिकया वाचा ज्योतिषा ज्योतिर्मुखेन यत् खलु त्रितयं त्रेधा भावेन सिद्धं ज्योतिः सम्बभार कल्पयामास, तच्च इत्थम्भूतम्— इमं भौमं अग्निं, तं परोक्ष-सिद्धं वैद्युतं इन्द्रं, अमुं दिव्यं सूर्यं च भावयामास ज्योतिरात्मविभूतिसत्त्वकम्, तं परमं पुरुषं एतेषां अग्नीन्द्रसूर्याणां समन्वयेन एकीभूतेन ज्योतिःस्वरूपेण प्राप्नोमीति ॥

अत्र एतैर्ज्योतिर्मूर्तिभिः प्रतीकरूपैः अग्नि-विद्युदादित्यैः तन्मूलभूतः परमः पुरुष एव प्राप्यते इति च ऋषेरन्तर्हितो भावः ॥

COMMENTARY—SUMMARY TRANSLATION

He, with the help of Vāk as mantra and His brilliance, created light which is well-known to be three-fold. He created this Agni of the earth, that invisible Indra whose form is lightning and this celestial Sūrya. Him, the great Purusha, I attain by identity and in full harmony.

Note here that what the Ṛshi intends to convey is that through these light-symbols, the Supreme Purusha can be attained.

## षष्ठी ऋक् ।

योऽन्तर्ब्रह्मणेह दिव्यां ज्योतिष्मतीं
त्रिवृतां तामभरद् वाचं संविदा ॥
आग्नेय्या सहेन्द्राण्या सावित्र्या वाचा
समेन तं पुरुषं प्र पद्ये रसेन ॥ ६ ॥

पदपाठः— यः । अन्तरिति । ब्रह्मणा । इह । दिव्याम् । ज्योतिष्मतीम् ।
त्रिऽवृताम् । ताम् । अभरत् । वाचम् । सम्ऽविदा ॥
आग्नेय्या । सह । इन्द्राण्या । सावित्र्या । वाचा ।
समेन । तम् । पुरुषम् । प्र । पद्ये । रसेन ॥

By His own power of consciousness, he held within Himself Vāk, who is godly, brilliant and three-fold. I attain the Purusha through Vāk in her three aspects, Āgneyī, Indārṇī and Sāvitrī, by identity and in full harmony.

## अन्वयभाष्यम् ।

यः पुरुषः ज्योतिष्मतीं ज्योतिरात्मिकां दिव्यां व्योमवद् व्यापिकां प्रकाशिकां च सदर्थावबोधिकां तां परां वाचं ब्रह्मणा ब्रह्मसत्त्वेन त्रितयी त्रिवलीभूतां त्रयीमयीं छन्दस्वतीं वेदरूपां विदां ज्ञानानां ज्ञानिनां च तद्ब्रह्मात्मानुभावसिद्धानां मूलभूतां समभरत् अन्तः आत्मनि सन्दधारेति भावः ॥ तथा आग्नेय्या भौमाग्निसम्बन्धिन्या अग्नाय्या इन्द्राण्या वैद्युताग्निसम्बन्धिन्या मध्यमया, सावित्र्या सवितृसम्बन्धिन्या दिव्यया वाचा तं परमं पुरुषं समेन रसेन प्रपद्ये समभावेन ॥ एतासां वाचां तद्देवतानां च साम्येन योगेन, तथा तस्याः परायाः वाग्देवतायाः सम्प्रसादेनैव तत्परमपुरुषाधिगमो भवितुमर्हतीति गम्यते इति ॥

COMMENTARY—SUMMARY TRANSLATION

Purusha held within Himself Vāk (the word) who His shining and godly; she pervades everything and is illuminative. She has three aspects. She is the origin of all knowledge. She is Āgneyī when related to Agni of this earth. She is Indrāṇī when related to lightning. She is Sāvitrī when related to the celestial fire which is the Sun. With the help of this three-fold Vāk, I attain the Supreme Brahma. By bringing them together and securing the grace of the Vāg-devatā one attains the Purusha.

## सप्तमी ऋक् ।

सोमेनान्नेन मनसाऽग्निर्वैश्वानरो
यो विद्युताऽद्भिः प्राणैरिन्द्रस्तैजसः ॥
वाचा ज्योतिषा सूर्यः प्रज्ञ आत्माऽऽन्तरः
समेन तं पुरुषं प्र पद्ये रसेन ॥ ७ ॥

पदपाठः— सोमेन । अन्नेन । मनसा । अग्निः । वैश्वानरः ।
यः । विऽद्युता । अत्ऽभिः । प्राणैः । इन्द्रः । तैजसः ॥
वाचा । ज्योतिषा । सूर्यः । प्रऽज्ञः । आत्मा । आन्तरः ।
समेन । तम् । पुरुषम् । प्र । पद्ये । रसेन ॥

The Purusha who is Agni ( the principle of fire ) along with Soma, Anna and Manas is the Vaiśvānara within the body; He is Indra along with lightning, water and vital air, and is called Tejas within the body; He is the Prajña Ātmā, within the body along with Vāk, light and the sun. I attain that Purusha by identity and by being in tune.

## अन्वयभाष्यम् ।

यः परमः पुरुषः सोमेन सोमदैवत्येन अन्नेन भौमेन भौतिकेन मनसा अन्नोदितेन आन्तर्यण करणेन अग्निः पार्थिवः सन् वैश्वानरः स्थूलशरीराधिष्ठितः जाठरः प्रसिद्धः विश्वेषां नराणां आत्मा सचेतनः अस्ति, यश्च विद्युता विद्युद्रूपया तेजः शक्त्या अद्भिः वैद्युतीभिः रसात्मिकाभिः प्राणैः अप्सत्त्वकैः सह इन्द्रः मध्यमो देवतात्मा अन्तरिक्षाधिपतिः तैजसः सूक्ष्मतेजःसत्त्वकः तैजसाभिधानः सूक्ष्मशरीराधिष्ठितः आत्मा अन्तर्हितः अस्ति, तथैव ज्योतिषा दिव्येन वाचा ज्योतिष्मत्या सहितः सूर्यः द्युलोकाधिपतिः दिव्यो देवतात्मा सर्वलोकप्रत्यक्षः आन्तरः आत्मा प्रज्ञः प्रकृष्टतमज्ञानसत्त्वपूर्णः प्राज्ञसञ्ज्ञकः कारणशरीराभिमानी आनन्दरसभोक्ता भवति, एवं त्रेधा भावेन तत्त्वत्रितयात्मकेन विभूतिसत्त्वेन सिद्धः यः परमः

आत्मा अस्ति, तं पुरुषं समेन भावेन एतेषां त्रयाणामात्मनां योगेन रसेन ज्ञानानन्दशान्त्यादि-सत्त्वेन भक्ति-प्रेम-श्रद्धादिपूणन सामरस्येन प्रपद्ये प्राप्नोमीति, "तदेतत् औपनिषदं तत्त्वं ऋगादिवेदमन्त्रमुखोदितं च अत्र अनुसन्धेयम्" ( मां. उ. १–३ ) ॥

COMMENTARY—SUMMARY TRANSLATION

That supreme Purusha is Agni of this earth and is called Vaiśvānara when in this gross ( physical ) body. He is well-known as residing in the stomach. Anna, the food of this world is related to the god Soma; Manas, the mental instrument is born of food. He is Indra, the god of the mid-air and is called Tejas, when He resides in the subtle body in the form of vidyut or lightning. Vital airs or Prāṇas are born of Ap as their essence. He is Sūrya and Prajña Ātmā full of abundant knowledge. He is called Prajña by name when he resides in the casual ( karaṇa ) body. Sūrya is well-known and is an object visible to all the worlds ( this is his external form ). He becomes what he is by light celestial, and by the power of Vāk. the essence of light. That Purusha is to be attained in these three forms, which are His three-fold nature. Agni, Indra and Sūrya are His external forms, while Viśva, Tejas and Prajña are internal forms in the body. I attain the Supreme Purusha by identity, by the element of delight within, by devotion and love.

This secret teaching of Upanishads and that taught by the mantras of Veda are to be followed. Cf. ( Māṇḍūkya Up. 1–3 ).

अष्टमी ऋक् ।

यो बहिर्धाऽऽततोऽसौ विश्वरूपो
योऽति तस्थौ विश्वं पूर्णो विश्वतस्परि ॥
योऽन्तर्धाऽऽत्मा प्रत्यङ्ङधि चेततेऽयं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठ :– यः । बहिःऽधा । आऽततः । असौ । विश्वरूपः ।
यः । अति । तस्थौ । विश्वम् । पूर्णः । विश्वतः । परि ॥
यः । अन्तःऽधा । आत्मा । प्रत्यङ् । अधि । चेतते । अयम् ॥
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

He has externally spread Himself in the form of the multifarious universe. The Purusha is perfect and while pervading this universe, is also beyond this universe and is all round. Internally, He is Ātmā, the soul who inspires from within. He is that Light Supreme which illumines all this universe.

## अन्वयभाष्यम् ।

यः परमः पुरुषः बहिर्धा बाह्यभावेन असौ प्रत्यक्षसिद्धः आदित्यादिरूपेण दिव्यज्योतिर्मुखेन आततः समन्तात् सर्वतः व्याप्तः सन् विश्वरूपः बभूव, यश्च परोक्षसिद्धः विश्वतः परितश्च सर्वत्रापि परिपूर्णः सन् एतद् विश्वं ब्रह्माण्डं समग्रं दृश्यप्रपञ्चं अति अतिक्रम्य तस्थौ निजे परमे पदे प्रतितिष्ठतीति भावः, तथा तस्मिन् विश्वाधिष्ठानभूते पूर्णं विरामपदे स्वीये धाम्नि पूजनीयः सन् पूर्णो बभौ ॥

तथैव पुनः अन्तर्धा अध्यात्मतत्त्वेन प्रत्यङ् आत्मा आन्तरतमः सचेतनः प्रत्यगात्मस्वरूपः सन् अधि सर्वेषां अन्तरधिष्ठितः सन् चेतते सञ्चेतनेन स्फुरति अयं अपरोक्षः सर्वानुभवसिद्धः एवास्तीति अहमस्मीति सत्प्रत्ययेन अवगम्यते, एवं त्रेधाभावेन व्यस्तं तथा समस्तं च तत् तत्त्वत्रयं त्रिष्वपि वस्तुषु आत्मसु भूतेषु देवतेषु च सामरस्ययोगेन अनुस्यूतं तत् परमं पूर्णं ज्योतिः विश्वस्य अस्य जगतः दर्शयत् प्रकाशकं भवति, तत्परञ्ज्योतिःस्वरूप एव ब्रह्मणस्पतिरिति ॥ अत्र सूक्तारम्भे "ब्रह्मणस्पतिर्ब्रह्मणा प्रति" इति तस्यैव अनुवृत्तेः समग्रसूक्तोक्तमिदं सर्वं तत्त्वं तस्य ब्रह्मणस्पतेरेव भवितुमर्हतीति भावः ॥

॥ इति तृतीयेऽनुवाके पञ्चमं ब्रह्मणस्पतिसूक्तं समाप्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

He, the supreme Purusha, externalised Himself and spread all round evidently in the form of the sun etc. He became omnifarious. Further, as the invisible cause of everything, He transcended this visible universe. Again, internally, He became the inmost soul by adopting the principle of Adhyātma, dwelling in all. He is experienced by all internally as the soui and is realisable.

Thus being three-fold, He is in all the threes, i.e., Bhūḥ, Bhuvaḥ, Svaḥ etc. both jointly and separately. He is supreme and full of light, the light par excellence, which illumines all and everything. He is certainly Brahmaṇaspati.

Thus ends the Fifth hymn in the third Section.

## अथ तृतीयेऽनुवाके षष्ठं ब्रह्मणस्पतिसूक्तम् ।

अनुवाकः ३ । सूक्तम् ६ । ऋचः १-८ ।

ब्रह्मणस्पते त्वं वाचा अष्टौ, दैवरातो वैश्वामित्रः, ब्रह्मणस्पतिः, जगती ।
अयुजः अन्त्या च ब्राह्मणस्पत्याः, युजः तिस्रः सारस्वता वा ॥

**Now the Brahmanaspati Sukta, Sixth in the third Anuvaka**
**Section III, Hymn 6, Riks 1-8 - BRAHMAṆASPATI.**

This Hymn beginning with "Brahmaṇaspate tvam vāchā", contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Brahmaṇaspati is the god and Jagatī is the metre.

(The second, fourth and sixth mantras are addressed to Sarasvatī and the rest to Brahmaṇaspati.)

## अथ प्रथमा ऋक् ।

ब्रह्मणस्पते त्वं वाचाऽन्तस्तपस्यन्
परया चिता विश्वमाविश्चकर्थ ॥
छन्दसा स्वं सत्त्वं सोऽन्वभवद् रसेन
वाचा नेमसमात्मा ब्रह्मणस्पतिः ॥ १ ॥

पदपाठः– ब्रह्मणः । पते । त्वम् । वाचा । अन्तरिति । तपस्यन् ।
परया । चिता । विश्वम् । आविः । चकर्थ ॥
छन्दसा । स्वम् । सत्त्वम् । सः । अनु । अभवत् । रसेन ।
वाचा । नेमसमऽआत्मा । ब्रह्मणः । पतिः ॥

Oh Brahmaṇaspati ! by performing tapas within yourself by the help of Vāk and also by supreme consciousness you created this universe. Brahmaṇaspati enjoyed His own power through the essence of metre or mantras. Brahmaṇaspati is, as it were, the other half of Vāk.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! त्वं वाचा निजया परया वाचकशक्त्या अन्तः आत्मनि लीनया तथा परया परासञ्ज्ञया सह तपस्यन् मौनेन निर्विषयसत्त्वेन कैवल्येन प्रतपन्, तपोयज्ञमनुतिष्ठन् चिता परया चेतनया विश्वं इदं नामरूपात्मकं जगत् सर्वं आविश्चकर्थ सूक्ष्मतमचैतन्यबीजरूपेण आत्मनि अन्तर्हितं तद् विश्वं बहिरुत्ससर्जिथेति भावः ॥ तेन आत्मनः विश्वरूपसत्त्वस्य प्रत्यक्षीकरणोदितेन रसेन संविदानन्दात्मकेन छन्दसा प्रेमसत्त्वेन तन्निबन्धनात्मकेन

वेदेन सः ब्रह्मणस्पतिः स्वं निजं सत्त्वं सत्तात्मकं सामर्थ्यं शक्तितत्त्वं आन्तर्यं प्रत्यक्षं सद्रूपं अन्वभवत् अन्तः सम्भावयामास तस्मात् सः परः ब्रह्मणस्पतिः परमः पुरुषः वाचा तया परया सह तादात्म्येन संहितः "नेमसमात्मा" "नेम इत्यर्धे" अर्धसमात्मा समानार्धात्मकः स्वयं नित्यसिद्धोऽस्तीति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! with your power of expression and being absorbed in yourself, you performed tapas, silently. Thus you created this universe full of name and form. It was in you like a subtle seed in the form of energy and you brought it out. By visualising His own power of omnifariousness through knowledge, delight and mantras, Brahmaṇaspati enjoyed His own power in the concrete form. Brahmaṇaspati is Purusha the Supreme. 'Nema' means half. So, He is the other half-soul of total being and is one with Vāk and is ever-present everywhere.

## द्वितीया ऋक् ।

सरस्वती त्वं छन्दस्वती ब्रह्म सती
ब्रह्मणे परस्मै सुधिताऽऽत्मनेऽन्तः ॥
स्वात्म्यं प्रत्यृता सा छन्दसा रसेन
नेमसमात्मा ब्रह्मणस्पतिना बभौ ॥ २ ॥

पदपाठ :– सरस्वती । त्वम् । छन्दस्वती । ब्रह्म । सती ।
ब्रह्मणे । परस्मै । सुऽधिता । आत्मने । अन्तरिति ॥
सुऽआत्म्यम् । प्रति । ऋता । सा । छन्दसा । रसेन ।
नेमसमाऽआत्मा । ब्रह्मणः । पतिना । बभौ ॥

Sarasvatī, you are Brahma in the form of metres. You conscerate yourself to Brahma the Supreme and the inner soul ( Chetanātmā ). She is full of love and delight and is one with Brahmaṇaspati by being in tune with Him. She is the other half-soul with Brahmaṇaspati.

## अन्वयभाष्यम् ।

हे भगवति ! त्वं सरस्वती स्वयं संविदानन्दादिरससत्त्वपूर्णा छन्दस्वती प्रेम-स्वरादि-सत्त्वयुक्ता तादृशछन्दोनिबन्धनसिद्धा साक्षाद् ब्रह्मैव सती परस्मै ब्रह्मणे परब्रह्मार्थं चिते— आत्मने चेतनाय अन्तरात्मने—आत्मार्थं धिता हिता धृता–अन्तःसन्धीयसे इति तदर्थः ॥

तेन सा परा वाग् देवतात्मा छन्दसा प्रेमानन्दस्वरगीत्यादिसत्त्वेन रसेन स्वेन वाग्रसेन तथा सत्य-माधुर्यादिसत्त्वेन सह सम्पन्ना सती तेन स्वेन परमात्मना सात्म्यं तादात्म्यं प्रत्युता प्रतिसङ्गता स्वयं प्रत्यङ्मुखेन चिदात्मना समन्वितेति भावः, तस्मात् एवं प्रकारेण तेन निजेन ब्रह्मणस्पतिना योगेन सा सरस्वती नेमसमात्मा समानार्धात्मिका सती बभौ बभासे नित्यं प्रकाशते स्वयमिति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Bhagavati ! Sarasvatī, you are incarnate knowledge, delight etc. You are Chhandasvatī full of love, sound-notes etc. You are manifest Brahma as set in metres. So, you have consecrated yourself to the Supreme Brahma and Ātmā within. Sarasvatī is a deity, who with her love and song, and by the essence of her speech, which is truth, by pleasantness and other sweet qualities, is united with Paramātmā by being in tune with Him. She is united with Him as knowledge. She is the other half-soul with Brahmaṇaspati who is shining for ever.

## तृतीया ऋक् ।

ब्रह्मणस्पते त्वं च वाक् च संहितौ
नेमसमात्मानौ स्थो विश्वथाऽऽत्मना ॥
वाग् विदा ब्रह्म ब्रह्मणस्पतिर्वाच्यो
वाचस्पतिः सन् परमः शचीपतिः ॥ ३ ॥

पदपाठ :— ब्रह्मणः । पते । त्वम् । च । वाक् । च । सम्ऽहितौ ।
नेमसमंऽआत्मानौ । स्थः । विश्वऽथा । आत्मना ॥
वाक् । विदा । ब्रह्म । ब्रह्मणः । पतिः । वाच्यः ।
वाचः । पतिः । सन् । परमः । शची ३ ऽपतिः ॥

Oh Brahmaṇaspati ! You and Vāk being totally united in all respects, you are like two halves. Vāk is indeed Brahma ( the visible, the expression ), and Brahmaṇaspati is one who is expressible. He being Vāchaspati, is also the Supreme Śachīpati, i.e., Indra.

## अन्वयभाष्यम् ।

हे ब्रह्मणस्पते ! त्वं परमः पुरुषः तथा वाक् च—तव वाग्रूपा परा शक्तिश्च संहितौ मिथः सङ्गतौ सन्तौ विश्वथा — आत्मना सर्वात्मना सर्वविधेन तत्त्वेन नेमसमात्मानौ समानार्धात्मकौ स्थः अनादिसिद्धौ नित्ययोगेन चिरप्रतिष्ठायै प्रभवथः ॥ अतः सा परा

वागेव विदा ज्ञानशक्त्या प्रत्यक्षं ब्रह्म तद्ब्रह्मात्मनः वाचकशक्तिरूपा, वाच्यः तद्वाच्यार्थ-वस्तुस्वरूपः सः ब्रह्मणस्पतिः, इत्येवं एतदेव तयोः समानार्धात्मकत्वं, तस्मात् सः परः आत्मा वाचस्पतिः सन् शचीपतिः इत्यादि नामरूपादिभिः संस्तुतः वेदे प्रसिद्धः श्रूयते इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Brahmaṇaspati ! you and Vāk, your supreme power of expression, are united in all respects. In all ways, you are the equal halves. You are so from time immemorable and remain so for ever. So, the Vāk supreme, is manifest Brahman as power of expression. The expressible, however, is Brahmaṇaspati. This is how they are the equal halves of the total Reality. He is Ātmā the supreme. Brahmaṇaspati is well-known in various ways by names and forms, Vāchaspati, Śachīpati etc.

## चतुर्थी ऋक् ।

सरस्वति त्वं च बृहस्पतिर्मिथ-
श्छन्दसा स्थो युवां नेमसमात्मानौ ॥
दम्पतीवैव प्रभवथः समानौ
वाग् विदा बृहती स्वयमात्मा पतिः ॥ ४ ॥

पदपाठः— सरस्वति । त्वम् । च । बृहस्पतिः । मिथः ।
छन्दसा । स्थः । युवाम् । नेमसमऽआत्मानौ ॥
दम्पती इवेति दम्पतीऽइव । एव । प्र । भवथः । समानौ ।
वाक् । विदा । बृहती । स्वयम् । आत्मा । पतिः ॥

Oh Sarasvati ! you and Brahmaṇaspati are interlocked by metres, and you two are equal halves. You are like a married couple equal in all respects. Vāk, on account of the power of intelligence, is the Great One, and this Ātmā is the husband.

## अन्वयभाष्यम्

हे सरस्वति ! त्वं बृहस्पतिश्च मिथः परस्परं योगेन छन्दसा अनादिसम्बन्धसिद्धेन अलौकिकेन रसेन युवां द्वौ देवतात्मानौ नित्यसिद्धौ नेमसमात्मानौ समानार्धात्मसत्त्वानौ स्थः तौ युवां स्वस्वसत्तया सहैव आसथुः इति भावः, तेन च तौ युवां समं समभावेन दम्पती इवैव जाया-पती इव सह सर्वस्मिन्नपि अर्थे लौकिके अलौकिके च प्रापंचिके पारमार्थिकेऽपि मिथो योगेनैव प्रभवथः ईशाथे विश्वेषां आधिपत्ये शक्नुथः, सा वाग् दिव्या परा देवतात्मा विदा ज्ञानशक्त्या बृहती ब्रह्मसत्त्वा ब्रह्मवस्तुवद् व्यापका अभिवृद्धिसत्त्वपूर्णा च अस्ति,

सोऽयं प्रचेतनः आत्मा तत्पतिः बृहस्पतिः इति वेदमन्त्रेषु उपनिषत्सु च प्रसिद्धतरः इति । तथा च ऋङ्मन्त्रवर्णः—"बृहस्पतेर्बृहतीं वाचमावत्" (ऋ. मं. १० १३०-४) इति ॥ "एष उ एव बृहस्पतिः, वाग् वै बृहती तस्या एष पतिः, तस्मादु बृहस्पतिः" (बृ. उ. १-३-२०) इति च औपनिषदं ब्राह्मणानुवचनम् ॥ "यावद् ब्रह्म विष्ठितं तावती वाक्" (ऋ. मं. १०-११४-८) इति च वाग्ब्रह्मणोः समानसत्त्वयोगे मन्त्रदर्शनम् ॥ "यत्र क्व च ब्रह्म तद् वै वाक्, यद् वै वाक् तद् वा ब्रह्मेति एतदुक्तं भवतीति तद् ब्राह्मणम्" (ऐ. आ.) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Sarasvati ! you and Bṛhaspati, are united mutually by Chhandas (Vedic metres) which is super-worldly. Both of you are deities eternal and equal, and you exist by your own power. So, you are like a couple by your equality and you behave as such in all worldly and other-worldly affairs. You are able to rule the whole universe. Vāk is godly and supreme, a deity full of power and capable of growing to any extent like Brahma. Vāk is the essence of Brahma. Ātmā who is full of intelligence and activity is the husband, known as Bṛhaspati. He is reputed in the Veda mantras and Upanishads. "He, that is Bṛhaspati, of radiant light protected Vāk, that is metrical Bṛhatī" (Ṛg. X-130-4). "This is certainly Bṛhaspati and Vāk is called Bṛhatī. Ātmā being the husband of Bṛhatī is called Bṛhaspati." (Bṛ. Up. 1-3-20).

## पञ्चमी ऋक् ।

यो भूते विश्वस्मिँश्चितोत परस्मिन्
दैवतेऽधि प्रत्यञ्चि जीवेऽध्यन्तरस्मिन् ॥
यः सत्येन त्रिधा राजतेऽन्तः समो
नित्यमेवावरीवर्ति तत् सत्यम ॥ ५ ॥

पदपाठ :– यः । भूते । विश्वस्मिन् । चिता । उत । परस्मिन् ।
दैवते । अधि । प्रत्यञ्चि । जीवे । अधि । अन्तरिति । अस्मिन् ॥
यः । सत्येन । त्रिधा । इद् । राजते । समः । अन्तरिति ।
नित्यम् । एव । आ । वरीवर्ति । तत् । सत्यम् ॥

He (the Highest Person) is in all elements in this universe and is also in the Creative God (Īśvara) and resides as well in this indwelling soul of all creatures. He shines uniformly by his Truth in all these three places. His truth is a fact which eternally exists.

## अन्वयभाष्यम् ।

यः परमः पुरुषः प्रचेतनः आत्मा भूते अस्मिन् इह प्रत्यक्षसिद्धे विश्वस्मिन् अचेतने वस्तुजाते, उत अपि च परोक्षसिद्धे दैवते परमात्मनि च अधि अधिष्ठितः केवलं चैतन्य-सत्त्वः, तथा अस्मिन् अपरोक्षसिद्धे प्रत्यञ्चि आन्तरे जीवे जीवात्मनि अधि अध्यात्मसत्त्वे सचेतने अन्तः अन्तरात्मनि, यः परमः सत्येन सत्यैकतत्त्वेन त्रिधा-इत् त्रैधाभावेनैव तत्त्वत्रयात्मकेन सर्वात्मभावेन अन्तः सर्वत्रापि समः एकरसेन पूर्णः सन् राजते स्वयमेव प्रकाशते, तत् परमं सत्यं इह सर्वत्रापि नित्यं सर्वदैव वरीवर्ति नैरन्तर्येण प्रतितिष्ठति, नित्य-सिद्धमिति ॥

### COMMENTARY—SUMMARY TRANSLATION

He is the Supreme Purusha and the Soul of all and is full of intelligent energy. In this visible universe which is inert and in the invisible creator, as well as in the Ātmā, the Purusha is active in the form of intelligent energy. Likewise, He is in this inner individual soul who is active. He is the One Supreme. By the power of Truth, He shines uniformly in all beings. He is full of only one essence. Truth supreme is existing eternally and everywhere.

## षष्ठी ऋक् ।

सरस्वतीयं ब्रह्मणस्पतिनाऽन्तः<br>
प्रत्यञ्चि ज्योतिषा स्वरेण रसेन ॥<br>
छन्दसा स्फुरति प्रति चेतनेन<br>
विश्वस्यैव जीवसे परि संविदे ॥ ६ ॥

पदपाठः— सरस्वती । इयम् । ब्रह्मणः । पतिना । अन्तरिति ।<br>
प्रत्यञ्चि । ज्योतिषा । स्वरेण । रसेन ॥<br>
छन्दसा । स्फुरति । प्रति । चेतनेन ।<br>
विश्वस्य । एव । जीवसे । परि । सम्ऽविदे ॥

This Sarasvatī, with Brahmaṇaspati vibrates in the inner soul, with her light, her sound, and her joyful essence and activity. She shines by her light to give all-round knowledge to all in the universe.

## अन्वयभाष्यम् ।

इयं साक्षाद् ब्रह्मरूपा मन्त्रात्मिका सरस्वती परा वाग् दिव्या स्वयं देवतात्मैव सती ब्रह्मणस्पतिना तेन निजेन परमेण पुरुषेण सह प्रत्यञ्चि प्रत्यगात्मनि अन्तः अन्तर्मुखे

ज्योतिषा स्वेन सद्रूपेण सत्त्वेन, स्वरेण तद्वाचकेन स्वरमत्त्वेन, रसेन प्रेम संविदानन्दादि-सत्त्वेन, चेतनेन चिदात्मना, छन्दसा नित्यसिद्धेन निजेन निबन्धनेन च प्रतिस्वरति तद्-वाच्यार्थरूपं अक्षरं ब्रह्म वस्तु सस्वरं समुच्चरति, तत्प्रतिध्वनिरूपेण स्वयमेवाभ्युदेतीति भाव: ॥ तदिदं छन्दोमयवाक्स्वरणं विश्वस्यैवास्य जगत: प्राणभृतश्च जीवसे सञ्जीवनार्थं परि परित: संविदे ज्ञानाय सम्यग्दर्शनविज्ञानादिप्रकाशनार्थमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Sarasvatī, the Speech Supreme, in the form of mantras is Brahma himself. She being divine, unites with the divine Brahmaṇaspati, the Purusha. Within every soul, with her light, delight and activity, she sings of Brahma, the imperishable. The song is in metres which is eternal and of her making. It means that she rises up independently in the heart of all in the form of an echo. This vibration of Vāk in the form of metres is for revivifying everything in this universe and for revealing the knowledge to all.

## सप्तमी ऋक् ।

यो भूतेषूत देवेष्वात्मसु सन्नधि
ज्योतिषाऽऽपृतः सन् प्रचेतनः परः ॥
व्यस्तो व्यस्तेषूत समस्तः समस्तेषु
विरलः सन् व्यस्तात् परमः समस्तात् ॥ ७ ॥

पदपाठ :— यः । भूतेषु । उत । देवेषु । आत्मऽसु । सन् । अधि ।
ज्योतिषा । आऽपृतः । सन् । प्रऽचेतनः । परः ।
विऽअस्तः । विऽअस्तेषु । उत । सम्ऽअस्तः । सम्ऽअस्तेषु ।
विरलः । सन् । विऽअस्तात् । परमः । सम्ऽअस्तात् ॥

He is in all elements, all gods and all souls. He is full of His own light. He is all activity. He fills all and everything. He seems to be separate among those which are separate. He seems to be one among those which are united. He is other than the separate ones and higher than the united ones.

## अन्वयभाष्यम् ।

यः ब्रह्मणस्पतिः भूतेषु एतेषु सवषु अचेतनेषु उत च देवेषु दैवतेषु चेतनेषु आत्मसु जीवेषु च सचेतनेषु अधि अधिष्ठितः सन् ज्योतिषा स्वेन चैतन्यज्योतिःसत्त्वेन प्रतिहितः सन् प्रचेतनः केवलं चेतनात्मकः आपृतः समन्तात् सर्वत्रापि पूर्णः प्रतितिष्ठति, अस्तीतिभावः,

ऐतेषु त्रिषु तत्त्वेषु तथा तद्भाववस्तुषु च व्यस्तेषु पृथक् पृथक् संस्थेषु व्यस्तः पृथगिव अवस्थितः, तथा समस्तेषु तेष्वेव सहितेषु समस्तः अनुस्यूतः सन् स्वेन सत्त्वेन व्याप्तः, सोऽयं सर्वान्तरात्मा व्यस्तात् एतत्त्रितयात् विरलः अतिरिक्तः, तथा समस्तात् तस्मादेव संयुक्तसत्त्वात् तत्त्वत्रयात् तस्मात् तात्त्विकाद् वस्तुत्रयात् परमः श्रेष्ठतमः परतमः पूर्णतया प्रतिष्ठितः स पूर्णात्मैव स्वयं भवति ब्रह्मणस्पतिरिति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Brahmaṇaspati is in all elements, all gods and all souls. With His light, He pervades all. He is pure intelligent energy. He is full and perfect in every sense everywhere. He is separate among the separate ones; He is there as if He is separate. He is one among the united ones. He pervades everything with His own power. He is the very indwelling soul of all. He is different from the three principles ( physical, psychological and spiritual ) which seem separate from each other, and He is beyond them too. He transcends them all. He is supreme and full in all respects.

## अष्टमी ऋक् ।

ब्रह्मणस्पतिः स सत्यश्चिदापूतः
सत्यमेव वाचाऽऽदिदेश च्छन्दसा ।
सत्येनैवानु भावयति प्रति ब्रह्म
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठ :— ब्रह्मणः । पतिः । सः । सत्यः । चित् । आऽपूतः ।
सत्यं । एव । वाचा । आऽदिदेश । छन्दसा ॥
सत्येन । एव । अनु । भावयति । प्रति । ब्रह्म ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

Brahmaṇaspati is satya ( that is eternal existence ). He is perfect and full by His intelligent energy. He gave the message of truth only through His Vāk, His power of expression, in the form of Vedic mantras. Through the power of Vāk, in metres, He makes all realise the Truth. That is the Light Supreme which illumines the universe.

## अन्वयभाष्यम् ।

सः ब्रह्मणस्पतिः स्वयं सत्यः सत्यात्मा चैतन्यसत्तामात्रात्मकः सत्यैकतत्त्वसिद्ध एव सन् चिता निजया चेतनाशक्तिकलया आपूतः सर्वत्र परिपूर्णः अस्ति, सः छन्दसा गायत्र्यादि

छन्दोनिबन्धनक्लृप्तेन स्वेन सत्त्वेन वाचा वस्तुतत्त्वेन स्ववाचकशक्त्या छन्दस्वती वाङ्मुखेन सत्यमेव दिशति सर्वं यथार्थमेवोपदिशति दर्शयति च वस्तु-विषयादिकं धर्म-ज्ञानादिकं च सतत्त्वं बोधयतीति भाव: ॥

तथा सत्येनैव याथार्थ्येनैव तत्त्वेन स्वानुभावसिद्धेन तत् पूर्णं सत्यं परमं ब्रह्मात्मादि-वस्तुसत्त्वं अनुभावयति तदनुभावपर्यन्तं प्रेरयति प्रणयति इति भाव: ॥ तदेव परमं ज्योति: विश्वस्य सर्वस्यैवास्य तत्त्वस्य तथा तात्त्विकवस्तुसत्त्वस्य दर्शयत् प्रति प्रकाशयत् परमं सत्यं वस्तु इति । तत्परञ्ज्योति:स्वरूपात्मक एव स: ब्रह्मणस्पतिर्भवतीति ॥

एवमेतेन छन्दोदर्शनमुखेन ऋषिरयं दर्शयति स्वानुभावसिद्धं सत्यं वस्तुतत्त्वम् सर्व-वस्तु तत्त्वविज्ञानार्थं छन्दोमुखेन धीयोगेन शरण्य: स ब्रह्मणस्पतिरेव समुपास्यतामिति ॥

॥ इति तृतीयेऽनुवाके षष्ठं ब्रह्मणस्पतिसूक्तम् समाप्तम् ॥

॥ इति ब्राह्मणस्पत्य: तृतीयोऽनुवाक: सम्पूर्ण: ॥

## COMMENTARY—SUMMARY TRANSLATION

Brahmaṇaspati is Himself pure Truth. He is full and perfect by His intelligent energy. He points the way to Truth and through Vāk in the form of Vedic mantras. He causes all to realise the Truth and actually experience it by and through the light of His intelligence. That light has the power to illuminate everything in the universe.

Thus, through Chhando-Darśana, this Seer conveys that for the understanding of Truth which underlies everything, Brahmaṇspati is to be meditated upon constantly and prayed for through Vedas and the Yoga of intellect.

Thus ends the Sixth hymn in the Third Section.

Thus ends the Third Section dedicated to Brahmaṇaspati.

अथ चतुर्थः ऐन्द्रः अनुवाकः ।

अनुवाकः ४ । सूक्तम् १ । ऋचः १-८ । इन्द्रः ।

प्रथमं इन्द्रसूक्तम् ।

यो देवानां प्रथमः अष्टौ, दैवरातो वैश्वामित्रः, इन्द्रः, त्रिष्टुप् ।

**Now this the Fourth Section ( Anuvaka ) concerns Indra**

**Section IV : Hymn 1 : Riks 1-8 - INDRA.**

The first Hymn beginning with 'Yo devânâm prathamaḥ' contains eight Ṛks. Daivarâta Vaiśvâmitra is the Ṛshi Indra is the god and Trishṭup is the metre.

अथ प्रथमा ऋक् ।

यो देवानां प्रथमः पवित्रः सन्
विश्वा भूतानि प्रणयत्यजस्रम् ॥
अन्तरिक्षे यः पवते बलीयान्
इन्द्रो विश्वेषां पतिः स मध्यमः ॥ १ ॥

पदपाठः— यः । देवानाम् । प्रथमः । पवित्रः । सन् ।
विश्वा । भूतानि । प्रऽनयति । अजस्रम् ॥
अन्तरिक्षे । यः । पवते । बलीयान् ।
इन्द्रः । विश्वेषाम् । पतिः । सः । मध्यमः ॥

He ( Indra ) is indeed the first among gods. He protects all with his Thunderbolt ( Pavi ). He leads all beings all the time without any break. He blows with strength in the form of wind in the middle region between the sky and the earth. He is Indra of the middle world, the overlord of all that is created.

अन्वयभाष्यम् ।

यः— असौ दिव्यः प्रसिद्धः लोके वेदे च, सामान्येन वैशिष्ट्येन च अस्माकं श्रेष्ठः यः कश्चिदस्तीति विदितः, देवानां सर्वेषां दैवतानां दिव्यसत्त्वानां केवलं चेतनात्मनां प्रथमः अनादिसिद्धः आदिमः पवित्रः पविना त्रायमाणः विद्युद्रूपः सन् प्रथितः सर्वत्राणदः इति, तथा विश्वा विश्वानि भूतानि प्राणिजातानि अजस्रं निरन्तरं प्रणयति, विद्युच्छक्त्या प्रचेतयति, यश्च पुनः अन्तरिक्षे द्यावापृथिव्योः मध्ये सन्धिस्थाने मध्यमे भुवने पवते प्रवाति वायुसत्त्वेन

प्रवहति, अत एव "वायुर्वेन्द्रो वा अन्तरिक्षस्थानः" इति याम्कनिरुक्तं सङ्गच्छते ॥ ( नि॰ अ॰ ७, खं॰ ५, २ ) यश्च बलीयान् बलकर्मणा सर्वेभ्योऽपि श्रेष्ठः बलिष्ठः. सः तादृशः परोक्षसिद्धः मध्यमः मध्यमलोकाधिपतिः मध्यस्थ इव नित्यं प्रतिष्ठितः सर्वत्र साक्षिभूतः, इन्द्रः इन्द्रनामा ईशः परमैश्वर्यपूर्णः, "इदि परमैश्वर्ये" ( भ्वा. प. इन्दति ) इति धात्वर्थयोगात्, अत एव सः इन्द्र एव विश्वेषां देवादीनां सर्वेषां भूतानां प्राणिनां जगतां च अधिपतिः इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is reputed in the Veda and known to all people generally as well as specially. He is the first among all gods and full of divinity. He saves all with his thunderbolt; he appears in the form of lightning. He is reputed as giving protection (sustenance) to one and all. Further, he leads all the beings without pause or break and he activises everything with his power of lightning. And he blows like wind in midair, the meeting place of heaven (Dyau) above, and earth below. Cf: "It is either Vāyu or Indra in the midair." (Yāska Nirukta Chap. VII-5, 2.) He is possessed of infinite strength: is the best of all powerful ones. Such a one is the lord of the middle world and he is a witness to all and everywhere. The name Indra is derived from the root 'Idi' which implies supreme overlordship. He is the lord of not only the gods, but of all the beings of this universe.

### द्वितीया ऋक् ।

यश्चेह दिक्षु दशसु प्र वाति
भाभिर्यो दशभिर्वृणुते विश्वम् ॥
यो अयं समूळ्होऽन्तर्हृदयेऽस्माक-
मिन्द्रो विश्वेषां पतिः स मध्यमः ॥ २ ॥

पदपाठ :– यः । च । इह । दिक्षु । दशऽसु । प्र । वाति ।
भाभिः । यः । दशऽभिः । वृणुते । विश्वम् ॥
यः । अयम् । सम्ऽऊळ्हः । अन्तरिति । हृदये । अस्माकम् ।
इन्द्रः । विश्वेषाम् । पतिः । सः । मध्यमः ॥

He (Indra) blows everywhere, above and below in all the ten directions. He envelops the whole universe, with the ten rays of his radiance. He lies hidden within our hearts too as consciousness. He is Indra of the midworld, the overlord of all.

## अन्वयभाष्यम् ।

यश्च इह बहिः ब्रह्माण्डे दशसु चतस्रो दिशः — प्राचीप्रभृतयः तथा अवान्तरदिशश्च चतस्रः आग्नेयीप्रभृतयः, अधरा ऊर्ध्वा च ते उभे एवं प्रसिद्धासु दिक्षु सर्वासु प्रवाति वायुरूपेण प्रवहति, यश्च दशभिः भाभिः ज्योतिर्मयीभिः चैतन्यकिरणकलाभिः दिव्याभिः दिग्देवतास्वरूपाभिः शक्तिभिः विश्वं इदं दृश्यमानं सर्वं प्रपञ्चं वृणुते परिवृणोति तेजोमयं कुरुते आच्छादयति च, यश्च पुनः अस्माकं प्राणभृतां पिण्डे शरीरे अन्तरपि दशभिः प्राणशक्तिभिः भाभिः इदं शरीरं चेतयन् अन्तर्हृदये स्वस्थाने समूळ्हः अत्यन्तं गूढः तिष्ठति, सः अयं अन्तरात्मस्वरूपः इन्द्रः मध्यमः विश्वेषां अधिपतिः इति ॥ "दशेमे पुरुषे प्राणाः आत्मैकादशः" (बृ. आ. ३-९-४) "नव वै पुरुषे प्राणाः नाभिर्दशमी" इति च ब्राह्मणम् ॥ सोऽयं इन्द्रः अन्तरात्मा सर्वेन्द्रिय मूलाधिष्ठानभूतः सन् दशभिः प्राण-चेतनाशक्तिभिः विश्वं चेतयन् अन्तर्बहिरपि निगूढः प्रतितिष्ठतीति भावः ॥

### COMMENTARY—SUMMARY TRANSLATION

Further, he blows in the form of air, in the ten directions of the universe ( Brahmāṇḍa ), the four main quarters, the four intermediaries and the two, above and below. And he, with his ten illuminatory rays of intelligence, which are the presiding deities of the ten directions, pervades and illumines and envelops the whole of this universe. Again, he has hidden himself in us in our bodies, within our hearts, and inhabits the whole of our being, activising our bodies with his ten rays which are the ten Prāṇas ( vital airs ). He is Indra of the mid-world, the overlord of all. Cf: "In a man, there are the ten vital powers ( Prāṇas ) and Ātmā the eleventh." ( Bṛ. Up. 3-9-4 ). "Nine Prāṇas are in the human body and the tenth is in the naval region." He, this Indra, is the inner soul and being, the source of strength of all the senses. He with his ten vital airs, activises all of them.

## तृतीया ऋक् ।

यो वा पुरस्तादभितः प्ररुद्स्-

स्तपसेह नित्यं जगतां जनैः ॥

आत्मनश्चित्रमिदं प्रासारय-

दिन्द्रो विश्वेषां पतिः स मध्यमः ॥ ३ ॥

पदपाठ :– यः । वा । पुरस्तात् । अभितः । प्रऽरुद्न् ।

तपसा । इह । नित्यम् । जगताम् । जनैः ॥

आत्मनः । चित्रम् । इदम् । प्र । असारयत् ।

इन्द्रः । विश्वेषाम् । पतिः । सः । मध्यमः ॥

In the beginning, for the manifestation of this universe, he ( Indra ) roaring with his intense meditation ( tapas ) here and everywhere constantly expanded himself in the form of this wonderful universe. He is Indra, of the mid-world, overlord of all.

## अन्वयभाष्यम ।

यः प्रसिद्धः परः असौ दिव्यः पुरुषः पुरस्तात् प्राक् सृष्टेः जगतां सर्वेषां प्राणिनां भूतानां च जनेः प्रादुर्भावार्थं इह ब्रह्माण्डे अभितः सर्वतः तपसा निर्विषयात्मकेन केवलेन विमर्शेन नित्यं निरन्तरं सर्वदैव अविच्छेदेन च प्ररुदन् प्रकर्षेण स्वरन्– ज्ञानमय्या शब्दब्रह्मरूपया स्ववाचकात्मिकया परया शक्त्या वाचा सह शब्दायमानः सन्– आत्मनः सकाशात् स्वतः एव चेतनात् इदं-दृश्यं चित्रं आत्मप्रतीकरूपं विश्वं प्रासारयत् विस्तारयामास, सः मध्यमः इन्द्रः विश्वेषां अधिपतिरिति ॥

### COMMENTARY—SUMMARY TRANSLATION

In the beginning, he, the well-known and the supreme one, in order to create these worlds and all the beings, practised here in this universe, and everywhere, tapas, pure meditation. It was constant and unintermittent. All the while, he, roaring with his supreme power of speech, which is Brahma in the form of sound, expanded from himself this universe which is but a symbol of his. He is Indra of the mid-world, the overlord of all.

## चतुर्थी ऋक् ।

यो दिव्यो ह जनयन् त्समपः सञ्-

ज्योतिरात्माऽनु जीवसे पुरा नः ॥

यश्चान्तः पृथिव्यां प्रति समूळ्ह

इन्द्रो विश्वेषां पतिः स मध्यमः ॥ ४ ॥

पदपाठ :– यः । दिव्यः । ह । जनयन् । सम् । अपः । सन् ।

ज्योतिःऽआत्मा । अनु । जीवसे । पुरा । नः ॥

यः । च । अन्तरिति । पृथिव्याम् । प्रति । सम्ऽऊळ्हः ।

इन्द्रः । विश्वेषाम् । पतिः । सः । मध्यमः ॥

He, the Supreme and Brilliant Soul, in the beginning created waters for us to be able to live. He lies hidden here in the heart of the earth. He is Indra of the mid-world, the overlord of all.

## अन्वयभाष्यम् ।

यः— असौ प्रसिद्धः दिव्यः आत्मा चेतनः दिवि व्याप्तः ज्योतिरात्मा केवलं चैतन्यज्योतिरात्मस्वरूपः विद्युदात्मकः सन् इह अस्मिन् प्रपञ्चे नः अस्माकं सर्वेषां प्राणभृतां जीवसे जीवभावेन आविर्भावार्थं चिरजीवनस्थितये च पुरा पुराकल्पे प्राग् विश्वविसृष्टेः अपः अन्तरिक्षापरपर्यायाः अम्भो-जल-रसामृतस्वरूपाः सम्यक्तया सूक्ष्मस्थूलादिरूपेण आ समन्तात् जनयन् ज्योतिषः सकाशात् प्रादुर्भावयन् आस इति अभिप्रायः ॥ यश्च पुनः इह पृथिव्यां अस्मिन् अवमे लोके अन्तः समूळ्हः समूढः अग्निरूपेण ज्योतिषा निगूढः सन् समग्रां पृथिवीमधितिष्ठति ॥ सः मध्यमः मध्यमभुवनाधिपतिः इन्द्रः विश्वेषां पतिः । सः विश्वाधिपतिरपि मध्यमलोकाधिपतिरिति वेदे स्तुतः ॥ सोऽयं भौमाग्निरपि इन्द्रस्यैव विद्युदात्मनो विभूतिविशेषः ज्योतिर्मयः इति ॥

### COMMENTARY—SUMMARY TRANSLATION

He is the Ātmā, the light of consciousness pervading the shining heavens. He is also light in the form of lightning. For us here, to be born as souls and to live long, he created waters before the universe came into being. The other name of ‘ waters ’ was Antariksha, the essence of waters in the form of Ambrosia. He created it from light, which process ( evaporation ) is still on. Further, he lies hidden in the heart of this earth, in the lowest world as Fire. He is Indra of mid-world. Though he is the lord of the universe, he is known in the Vedas as the Lord of the mid-world.

## पञ्चमी ऋक् ।

योऽन्वग्निं प्रातिष्ठिपत् पृथिव्यां
रयिमन्तं समिह शङ् गर्भध्यै ॥
रायो दाश्वान् यो विश्वस्य भूतय
इन्द्रो विश्वेषां पतिः स मध्यमः ॥ ५ ॥

पदपाठ :— यः । अनु । अग्निम् । प्र । अतिस्थिपत् । पृथिव्याम् ।
रयिऽमन्तम् । सम् । इह । शम् । गर्भध्यै ॥
रायः । दाश्वान् । यः । विश्वस्य । भूतये ।
इन्द्रः । विश्वेषाम् । पतिः । सः । मध्यमः ॥

He, indeed, established the powerful Agni ( fire ) here on this earth for the welfare of all. He is the giver of all kinds of wealth to all beings for their good. He is Indra of the mid-world, the overlord of all.

## अन्वयभाष्यम् ।

यः असौ प्रसिद्धः ईशः इति इह अस्मिन् लोके शं कल्याणं सङ्गमध्यै सम्यक् प्राप्तुं रयिमन्तं ऐश्वर्यवन्तं भगवद्विभूतिस्वरूपं अग्निं दिव्यं देवतात्मानं अग्निं स्वं ज्योतिर्विभूतिं पृथिव्यां प्रातिष्ठिपत् आधिपत्येन प्रतिष्ठापयामास। यः विश्वस्य सर्वस्य जगतः भूतये सुखार्थं अभिवृद्धये च रायः ऐश्वर्यस्य दाश्वान् दाता सन् सन्निहितः अस्ति। सः मध्यमलोकाधिपतिः इन्द्रः विश्वेषां अधिपतिर्भवतीति ॥

अत्र "तुमर्थे से सेनसे०" इति ( पा. सू. ३-४-९ ) गम्धातोः तुमुन् प्रत्ययार्थे अध्यैप्रत्ययान्तं पदं "गमध्यै" इति। "गन्तुम्" इति तस्यार्थः। तथा "दाश्वान् साह्वान् मीढ्वाँश्च" इति ( पा. सू. ६-१-१२ ) सूत्रात् "दाश्वान्" इति निपातः॥ दा धातोः इदं आर्षं रूपम्॥

COMMENTARY--SUMMARY TRANSLATION

He is well-known as ' Lord '. He established here on the earth, for its good, the wealthy Agni as its master. Fire is the Lord's light in another form. He distributed all the required things for the welfare of the whole universe. He is Indra of the mid-world, overlord of all.

## षष्ठी ऋक् ।

य आदित्यं दिवं स्वमन्तरूर्ध्वं  
प्राऽऽरोहयत् स्व १ ज्योतिरात्मानम् ॥  
दृशे विश्वस्मै भुवनाय देव-  
मिन्द्रो विश्वेषां पतिः स मध्यमः ॥ ६ ॥

पदपाठः– यः । आदित्यम् । दिवम् । स्वम् । अन्तरिति । ऊर्ध्वम् ।  
प्र । आ । अरोहयत् । स्व१रिति स्वः । ज्योतिः । आत्मानम् ॥  
दृशे । विश्वस्मै । भुवनाय । देवम् ।  
इन्द्रः । विश्वेषाम् । पतिः । सः । मध्यमः ॥

He established Āditya, the sungod, high in the sky for all the world to see. The Āditya is the essence of his light and his soul. He is a god for all here. He is indeed Indra, of the mid-world and overlord of all.

## अन्वयभाष्यम् ।

यः पूर्वोक्तः पुरुषः विश्वस्मै भुवनाय समग्रप्रपञ्चाय तदर्थं दृशे द्रष्टुं प्रकाशनार्थं दर्शनार्थं च देवं देवतात्मानं स्वः प्रकाशकं ज्योतिःस्वरूपं आत्मानं स्थावर-जङ्गमान्तरात्मसत्त्वकं सचेतनं आदित्यं अमुं सर्वलोकप्रत्यक्षं स्वं स्वकीयं दिवं अन्तः द्युलोके मण्डले अन्तरे ऊर्ध्वं उच्चतरं श्रेष्ठं प्रारोहयत् सृष्ट्यादौ आरोहयामास, सः मध्यमलोकाध्यक्षः इन्द्रः विश्वेष भुवनानां देवानां च अधिपतिः ॥

अत्र "दृशे विख्ये च" इति (पा. सू. ३-४-११) सूत्रात् तुमुन् प्रत्ययार्थे दृश्धातोः दृशे इति आर्षं रूपं इति गम्यते ॥

### COMMENTARY—SUMMARY TRANSLATION

He, the famous Indra established the sun for the whole universe to see, for seeing and lighting, visible to all and to all the world; high in the sky, as highest and in the orbit in the sky. Sūrya is a god, a bright light and the soul-force of the mobile and immobile.* He is Indra of the mid-world and overlord of all.

## सप्तमी ऋक् ।

यो वायुं चेतयत्यन्तरिक्षेऽ-
न्तर्हितो यो ज्योतिरमृतेन ॥
विश्वस्यैव जीवसे चेततेऽन्त-
रिन्द्रो विश्वेषां पतिः स मध्यमः ॥ ७ ॥

पदपाठ :— यः । वायुम् । चेतयति । अन्तरिक्षे ।
अन्तरिति । हितः । यः । ज्योतिः । अमृतेन ॥
विश्वस्य । एव । जीवसे । चेतते । अन्तरिति ।
इन्द्रः । विश्वेषाम् । पतिः । सः । मध्यमः ॥

He activises Vāyu, the wind in the mid-air. He is hidden there and shines as light. He vibrates as light of consciousness within all with his Ambrosia for the very life of the universe. He is Indra of the mid-world and overlord of all.

---

Cf: Sūrya is the lord of the mobile and immobile ( Ṛg. I-115-1 )

## अन्वयभाष्यम् ।

य: परम: चेतनात्मा अन्तरिक्षे वायुं चेतयति प्रेरयति, य: स्वयमपि तत्रैव अन्तर्हित: विद्युद्रूपेण निगूढ: एव सन् ज्योति: ज्योति:स्वरूप: आत्मा चेतन: व्यापक: विश्वस्यैव जगत: जीवसे प्राणसन्धारणाय अमृतेन दिव्येन रसेन अन्त: सर्वेषां अन्तर्हृदये मूर्ध्नि मूलाधारे च चेष्टते स्वयं ज्ञप्तिरूपेण स्फुरति, स: इन्द्र: सर्वान्तरात्मा विश्वेषां पति: ईश्वर: सन् मध्यम: मध्यमलोकाधिपतिरिति स्तूयते, तत्स्वरूपतत्त्वादिदिग्दर्शनायेति ॥

COMMENTARY—SUMMARY TRANSLATION

He inspires Vāyu in Antariksha (mid-air). Hidden there only, united with lightning, he pervades all round as energy in the form of light. For the very living of all in this universe, with his Ambrosia, he moves as light of consciousness in heart and head. He is Indra the overlord of all, as the indwelling soul and is looked upon as the king of the mid-world.

## अष्टमी ऋक् ।

तत् ते भगवन् इन्द्र बृहस्पते
संविदा तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं परीतं
परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठ :– तत् । ते । भगऽवन् । इन्द्र । बृहस्पते ।
सम्ऽविदा । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । परि । इतम् ।
परमम् । ज्योति: । विश्वस्य । दर्शयत् ॥

Oh Bhagawān Indra, oh Bṛhaspati, the god of all learning, I see you performing penance with full knowledge; I perceive your fourth and highest stage of consciousness, which is worthy of realisation and which is all-pervading. That is the Light Supreme which illumines all.

## अन्वयभाष्यम् ।

हे भगवन् ! सर्वैश्वर्यपूर्ण ! बृहस्पते सर्ववाग्–विद्याधिपते ! सर्वज्ञानशक्तिपूर्ण ! इंद्र ! परमेश्वर ! परमात्मन् ! संविदा सम्यग्ज्ञानेन तपस्यन् केवलेन विमर्शरूपेण आन्तर्येण आध्यात्मकेन साधनेन तपश्चरन् ते तव तत् सर्वत: परं परोक्षसिद्धं तुरीयं पदत्रयात्

परतमं सर्वान्तरात्मकं दर्शितं दर्शनीयं दर्शनार्हं पदं पश्यामि साक्षात्करोमि, तत् परीतं सर्वत्रव्याप्तं परमं पूर्णं पदं विश्वस्य अस्य जगतः दर्शयत् प्रकाशकं ज्योतिः इत्येव साक्षात्-करोमीति भावः। तत्परञ्ज्योतिःस्वरूपः विश्वप्रकाशकः सर्वान्तरात्मा सः इन्द्र एवेति ॥ अत्रायं विशेषः— "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः इति" (ऋ॰ मं. १-१६४-४६) एवादिभिः मन्त्रवर्णैः तस्य– परमात्मनः इन्द्रादीनि बहूनि नामानि निर्दिष्टानि श्रूयन्ते ॥ तथैव तानि च तत्तद्विभूतियोगेन पृथक् पृथक् सूक्तेषु मन्त्रेषु च संस्तुतानि दृश्यन्ते। तेषां सर्वेषामपि नाम्नां मध्ये इन्द्राभिधानस्यैव महत्त्वं च प्रतीयते इन्द्रस्यैव सूक्तानां तन्मंत्राणां च सर्वेभ्यः आधिक्यात् ॥ तदिदं अस्माभिरेव अन्यत्र प्रतिज्ञातम् ॥

वैदिकस्तुतिसंयोगाद् यज्ञसम्बन्धतस्तथा।  
धात्वर्थस्य च सामर्थ्याद् इन्द्रनाम विशिष्यते ॥ इति ॥

॥ इति चतुर्थेऽनुवाके प्रथमं इन्द्रसूक्तं समाप्तम ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Bhagawân, you are full of all sorts of wealth and oh Bṛhaspati, you are the lord of all speech and learning and full of omniscience. Oh, Indra, you are the Supreme Lord. You are practising tapas with full knowledge, tapas which is pure meditation, and hence an internal discipline. I perceive your fourth foot (highest state of consciousness) which is transcendent and hence Supreme. It is superior to all the other three (jāgrat, swapna and sushupti) and so includes them all. It is the only one which is worthy of realisation. It is invisible but everywhere, supreme and full. It is the light which illumines the whole universe, the light par excellence. It is the soul of all. I seek to realise him.

Thus ends the Second hymn in the Fourth Section.

अथ चतुर्थेऽनुवाके द्वितीयं इन्द्रसूक्तम् ।

अनुवाकः ४ । सूक्तम् २ । ऋचः १-१० । इन्द्रः ।

यः प्रजानन् अजन्यः दश, दैवरातो वैश्वामित्रः, इन्द्रः, त्रिष्टुप् ।

**Now this Indra Sukta, second in Fourth Anuvaka**

**Section IV : Hymn 2 : Riks 1-10 - INDRA.**

This second Hymn beginning with "Yaḥ prajānan ajanyaḥ" contains ten Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi: Indra is the god and Trishṭup is the metre.

अथ प्रथमा ऋक् ।

यः प्रजानन् अजन्यो यः सन् अमर्त्यो
यो विश्वथा राजते स्वयमेकः ॥
यः स्वराट् सम्राड् विराड् विभुः प्रभु-
रिन्द्रमेव तं वृणे शङ् गमध्यै ॥ १ ॥

पदपाठ :- यः । प्रऽजानन् । अजन्यः । यः । सन् । अमर्त्यः ।
यः । विश्वऽथा । राजते । स्वयम् । एकः ॥
यः । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Though present to all in their hearts, he is indeed unborn. He is undying. He appears as many in the universe but He is one. He is self-luminous. He is all-powerful, all-pervading and all-controlling, the Lord of all. He is Indra. I worship him so that good may benefit all people.

अन्वयभाष्यम् ।

यः असौ सर्वानुभवसिद्धः दिवि प्रत्यक्षः सन् अपि अजन्यः जन्मादिविषयरहितः, तथा विकारपरिणामादिदोषविमुक्तः, यश्च अमर्त्यः मरणादिरहितः सन् केवलं सद्रूपः, यः स्वयं एक एव सन् विश्वथा सर्वथा सर्वभावरूपेण राजते प्रकाशते, यश्च पुनः वैश्वरूप्येण योगेन विततः सन् स्वराट् स्वयम्प्रकाशः, सम्राट् सम्यक्तया नित्यं राजमानः सार्वभौमः, विराट् विशेषेण वैविध्येन विश्वतोरूपेण च प्रकाशमानः, विभुः विश्वव्यापकः, प्रभुः विश्वस्य अधिपतिः, इत्येवंः रूपेण विभूतियोगेन स्वतः सिद्धोऽस्ति, तं इन्द्रमेव पारमैश्वर्यपूर्णं परमं पुरुषं सर्वान्तरात्मानं शं गमध्यै कल्याणं प्राप्तुं विश्वकल्याणार्थं वृणे शरण्यतया प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

He, known as the Âtmâ, and known to all by experience, is unborn, has no birth or beginning. He knows no changes. Likewise, he is undying and has no death or other variations. He is pure enduring existence. Though only One, He shines as a Cosmic Being filling the whole and varied universe. He is Swarât, self-luminous; Samrât, shining as overlord; and Virât, shining as a Cosmic Entity. He is all-pervading and all-ruling. He is Indra, full of supreme wealth, and supreme as the soul of all. Him I seek for the welfare of all as a devotee.

## द्वितीया ऋक् ।

यस्तपस्यञ्ज्योतिषा ब्रह्म वाचं-
मक्षरं मन्त्रमीमनु स्वरति ॥
तस्येदं नाम गुह्यं जपँस्तपसा
सेन्द्रमेव तं वृणे शङ् गमध्यै ॥ २ ॥

पदपाठ :— यः । तपस्यन् । ज्योतिषा । ब्रह्म । वाचम् ।
अक्षरम् । मन्त्रम् । ईम् इति । अनु । स्वरति ॥
तस्य । इदम् । नाम । गुह्यम् । जपन् । तपसा ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

He is practising penance, tapas, with the help of his light. He utters the syllable "ÎM" which is a Mantra signifying the imperishable Brahma. That is the secret name. With tapas I repeat it. I seek Indra only, to get all the good fortune.

## अन्वयभाष्यम् ।

यः पुरुषः स्वयं देवतात्मैव सन्नपि तपस्यन् स्वरूपे निर्विषये लीनः सन् ज्योतिषा स्वेन चैतन्येन वैद्युतेन तेजसा ब्रह्म प्रत्यक्षब्रह्मरूपां वाचं परात्मिकां अक्षरं परावागात्मकं स्वबीजाक्षररूपं मन्त्रं मन्त्रात्मकं गुप्तं "ईं" ईमित्येतत् अनुकरणात्मकं अनुसृत्य स्वरति अखण्डस्वररूपतः स्फुरति, तस्य तदिदं ईं इति गुह्यं नामैव तपसा निर्विषयेण विमर्शेन गुह्यं जपन् गुप्तरूपेण अजपात्मकजपतः मौनरूपेण तदेव अक्षरं अनुस्वरन् तथा स्वयमेव अनुस्वरन्तं तं तमिममन्तरात्मस्वरूपं इन्द्रं सर्वधीन्द्रियाध्यक्षं सः अयमहं शं गमध्यै आत्मशान्ति शक्तिं च अधिगन्तुं वृणे प्राप्नोमि शरणं व्रजामीति ॥ अत्र सः इन्द्रं सेन्द्रं इति

संहितायां समस्तं पदम्, पादादौ तथाऽनुश्रवणात् ॥ "सेमामविड्ढि प्रभृतिं य ईशिषे०" ( ऋ. मं. २-२४-१ ) इति अत्र " सः । इमां । " इति पदपाठः प्रसिद्धः, वेदाङ्ग व्याकरणेऽपि तथाविधः प्रयोगो दृश्यते, -- " सैष दाशरथी रामः " इति तदुदाहरणं प्रसिद्धतरमेव, तत्र प्रमाणभूतं सूत्रं च प्रसिद्धम् ।

## COMMENTARY—SUMMARY TRANSLATION

He is the Purusha, the God, who exists wholly detached and aloof from visible objects. With the help of his own power manifesting itself as the light of lightning, he utters the word which signifies the visible Brahma; it is his own seed-letter in the form of the mantra "ĪM". He utters, that means he vibrates the swara ( sound ). This "ĪM" is his own secret name. I secretly meditate upon it, i. e., by repeating the seed-letter of the mantra in silence. I seek him who is repeating it. He is Indra, the inner soul, presiding over all the senses and the intellect. To get the peace of the soul and power, I seek Him.

## तृतीया ऋक् ।

य ईं वाचमनु स्वरं स्तपसा
विश्वा ब्रह्माणि स्वरत्यन्वजस्रम् ॥
तस्येमा ब्रह्माण्यनु तपस्यन्
सेन्द्रमेव तं वृणे शङ्गमध्यै ॥ ३ ॥

पदपाठः– यः । ईं इति । वाचम् । अनु । स्वरन् । तपसा ।
विश्वा । ब्रह्माणि । स्वरति । अनु । अजस्रम् ॥
तस्य । इमा । ब्रह्माणि । अनु । तपस्यन् ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Uttering the word "ĪM" he performs tapas; he repeats thereby all mantras without break because this mantra contains all others. I perform the same kind of penance; I seek Indra to get good fortune.

## अन्वयभाष्यम् ।

यः इन्द्रः ईं इत्यनुकरणात्मिकां निजां परां वाचं अनुस्वरन् तपसा तेन अन्तः स्वरणरूपेण विश्वा विश्वानि ब्रह्माणि मन्त्रजातानि अजस्रं अखण्डधारया अनुस्वरति उच्चरति, तस्य इमा इमानि आर्षदर्शनतः समुदितानि ब्रह्माणि छन्दःसहितानि मन्त्रजातानि अनुसृत्य

एतैरेव मन्त्रैः पुनः प्रत्यञ्चि अन्तरात्मनि तपस्यन् सः अयमहं तथा स्वयमेव तपस्यन्तं तं परमं इन्द्रं सर्वान्तरात्मानमेव शं गमध्यै शान्ति प्राप्तुं वृणे स्वीकरोमि शरणं व्रजामीति ॥

COMMENTARY—SUMMARY TRANSLATION

Indra utters the great Mantra "ĪM", the word which is his and is supreme; he repeats, as it were, all the mantras continuously by reciting "ĪM" only. With the help of all these mantras which are his own and which come into existence on account of his divine vision, I seek him who is also practising tapas. He is Indra the inner soul and I seek him to get peace of soul.

## चतुर्थी ऋक् ।

यो अक्षरं वाचमीमनु स्वरन्
ब्रह्म प्रणौत्यनु वाचा ब्रह्मणा ॥
गुह्यं तमनु प्रणवं तपस्यन्
सेन्द्रमेव तं वृणे शङ् गमध्यै ॥ ४ ॥

पदपाठः— यः । अक्षरम् । वाचम् । ईम् इति । अनु । स्वरन् ।
ब्रह्म । प्रऽनौति । अनु । वाचा । ब्रह्मणा ॥
गुह्यम् । तम् । अनु । प्रऽनवम् । तपस्यन् ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

He repeats "ĪM", the imperishable Vāk in the form of this word; he praises the Super Soul with the same Vāk in the form of the secret Praṇava Mantra. I seek Indra, practising tapas with that secret Praṇava, to get peace of soul.

## अन्वयभाष्यम् ।

यः इन्द्रः अक्षरं निजां अक्षरात्मिकां ईं इत्येतां परां वाचं अनुस्वरन् ब्रह्मणा तेनैव मन्त्ररूपेण वाचा वाक्स्वरेण ब्रह्म पर ब्रह्मवस्तु अनुगम्य प्रणौति प्रकर्षेण स्तौति, अत एव तदक्षरं "प्रणवः" इत्याहुः, गुह्यं त प्रणवं गुप्तप्रणवरूपं ईं इति मन्त्रबीजाक्षरं अनुसृत्य भूयः तपस्यन् सः अयमहं तथा तपस्यन्तं ईं इति गुप्तप्रणवाक्षरानुस्वरणेन सदा संस्फुरन्तं तं इमं इन्द्रं स्वं अन्तरात्मानमेव कल्याणं शांतिसत्त्वं प्राप्तु वृणे शरणं व्रजामीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Indra repeats " ĪM ", the form of Vāk, the supreme and imperishable. With that Vāk in the form of the highest mantra, he praises Brahma, the Object Supreme. So, that letter is said to be Praṇava. I repeat that secret Praṇava, the seed-letter and practise tapas intensely. I seek Indra who manifests himself as a result of the repetition of that secret Praṇava in order to get all the good fortune.

## पञ्चमी ऋक् ।

य ईं स्वरन्तं गुह्यमनु स्वरन्
ओमिति स्वरां वाचमुच्चरति ॥
तस्येदमक्षरमनु तपस्यन्-
सेन्द्रमेव तं वृणे शङ् गमध्यै ॥ ५ ॥

पदपाठ :– यः ईं इति । स्वरन्तम् । गुह्यम् । अनु । स्वरन् ।
ओम् इति । इति । स्वराम् । वाचम् । उत्ऽचरति ॥
तस्य । इदम् । अक्षरम् । अनु । तपस्यन् ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

He utters the word " ĪM " which is the greatest secret Mantra. While doing so, he utters the word " Om ", also which is more explicit. I follow Him in practising tapas with the help of " Om ". I seek Indra alone to get peace of soul.

## अन्वयभाष्यम् ।

यः इन्द्रः परमेश्वरः इति प्रसिद्धः ईं इति एतत् अक्षरं गुह्यं आत्मनि अन्तरेव स्वरन्तं आत्मानमेव अनुसृत्य स्वरन् पुनः ओं इति प्रसिद्धां अनुकरणात्मिकां प्रणवाभिधां वाचं वाग्रूपां स्वरां स्वरानाम्नीं स्ववाचकां शक्तिं उच्चरति ध्वनयति, तस्य तदिदं ओङ्कार-रूपं प्रणवाक्षरं अनुसृत्य अवलम्ब्य तपस्यन् तज्जपेन तदर्थानुसन्धानेन तदनुध्यानादिना च पुनः तपः समाचरन् सः अयमहं तं निजं प्रणवाक्षरमनुस्वरन्तमेव इन्द्रं परमं स्वं आत्मानं वृणे शं गमध्यै आत्मशान्तये शरणं व्रजामीति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is indeed Indra known as the overlord. He repeats " ĪM ", this secret sound and it is the finest sound. In the course of doing so, he utters

'Om', the well-known Praṇava Mantra. It is a form of speech which is his own. I practise tapas, by repeating the letter and by meditating on its meaning. Only him I seek who repeats the Praṇava thus; he is supreme as my own soul; I seek him to get the internal peace of soul.

## षष्ठी ऋक् ।

य ईं स्वरँस्तिस्रो व्याहरतीह
भूर्भुवः स्व१र्वाचो यः समुच्छ्वसन् ॥
तिस्रो व्याहृतीस्ता अनु तपस्यन्
सेन्द्रमेव तं वृणे शङ्गमध्यै ॥ ६ ॥

पदपाठ :– यः । ईं इति । स्वरन् । तिस्रः । विऽआहरति । इह ।
भूः । भुवः । स्व१रिति स्वः । वाचः । यः । सम् । उत्ऽश्वसन् ॥
तिस्रः । व्याहृतीः । ताः । अनु । तपस्यन् ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

He utters "ĪM"; while doing so he breathes out the three Vyāhṛtis (Mantras) through his speech, Bhūḥ, Bhuvaḥ, and Svaḥ. I follow those three and practise tapas. Thereby I seek Indra only to get peace of soul.

## अन्वयभाष्यम् ।

यः इन्द्रः ईं इति इदं गुह्यं अक्षरं स्वरन् इह अस्मिन् ब्रह्माण्डे बहिः "भूः भुवः स्वः" इति तिस्रः ताः एताः वाचः वाग्रूपाः यजुर्मन्त्रात्मिकाः व्याहरति उच्चरति, ताश्च पुनः यः उच्छ्वसन् केवलं उच्छ्वासरूपेण अनु नादयति, तस्य ताः व्याहृतीः मन्त्ररूपाः तिस्रः वाचः अवलम्ब्य तपस्यन् तज्जपादिना तपश्चरन् सः अयं अहं तं तथा व्याहृतिमुखेन उच्छ्वसन्तं इद्रमेव कल्याणं अधिगन्तुं शरणं प्रपद्ये इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Indra repeats the secret letter "ĪM" within himself, and breathes out in this Brahmāṇḍa the words Bhūḥ, Bhuvaḥ, and Svaḥ. They are the mantras of Yajurveda. He breathes them out. I follow him by practising tapas in his way. Through those Vyāhṛtis, I seek Indra only for welfare.

## सप्तमी ऋक् ।

य ईमक्षरं स्वरन् व्याहृतिभिः
स्वरत्यृचो यजूंषि उत सामानि ॥
छन्दांस्येवानु चेतसा तपस्यन्
सेन्द्रमेव तं वृणे शङ् गमध्यै ॥ ७ ॥

पदपाठ :– यः । ई इति । अक्षरम् । स्वरन् । व्याहृतिऽभिः ।
स्वरति । ऋचः । यजूंषि । उत । सामानि ॥
छन्दांसि । एव । अनु । चेतसा । तपस्यन् ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

While repeating "ĪM" along with those Vyāhṛtis namely, Bhūḥ, Bhuvaḥ, and Svaḥ He utters Ṛk, Yajur and Sāma Vedas. I follow those Vedas in my consciousness and practise Tapas. Thereby I seek Indra only for peace of soul.

## अन्वयभाष्यम् ।

यः इन्द्रः ई इति परं अक्षरं स्वरन् पुनः ताभिरेव व्याहृतिभिः "भूः भुवः स्वः" इति तिसृभिः अनुक्रमेण ऋचः यजूंषि सामानि चेति एतानि त्रीणि च्छन्दांसि वेदरूपाणि स्वरति उच्छ्वासरूपेण श्रावयति, चेतसा मनसा तानि ऋग्यजुःसामानि च्छन्दांसि गायत्र्यादीनि च अनुसृत्य अवलम्ब्य तपस्यन् पुनः पुनः अनुदिनं ब्रह्मयज्ञादिरूपेण परमं तपः अनुतिष्ठन् सोऽयमहं तं इन्द्रं सर्वविद्याधीशमेव आत्मशान्तये संविदुदयेन परं कल्याणं प्राप्तुं शरणं व्रजामीति ॥ प्रसिद्धंच इन्द्रस्य छन्दसां वर्षकत्वं अनुश्रूयते—"यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव । स मेन्द्रो मेधया स्पृणातु" (शि.उ.४-१) इति, तथैव स्वाध्यायरूपस्य ब्रह्मयज्ञस्यैव परमतपःस्वरूपत्वं च उपदिश्यते —"ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च० —स्वाध्यायप्रवचने एवेति नाकोमौद्गल्यः । तद्धि तपस्तद्धि तपः" ( शि. उ. ९–१-६ ) इति च "यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये" ( ऋ. ८-१९-५ ) इति वेदानुवचनस्य यज्ञरूपत्वं सुप्रसिद्धमेव ॥

## COMMENTARY—SUMMARY TRANSLATION

Indra repeats "ĪM" the letter of letters with those three Vyāhṛtis, Bhūḥ, Bhuvaḥ, and Svaḥ; he makes one hear the three Vedas which follow, namely, Ṛk, Yajus and Sāma respectively. With all my mind following those Vedas, Ṛk, Yajus and Sāma, and the metres, Gāyatrī, etc. and practising tapas, I seek only Indra, who is the lord of all learning for internal peace.

## अष्टमी ऋक् ।

यो मिमाय व्याहृतिभिस्तिसृभिः
पद्भिः पृथिवीं चान्तरिक्षं दिवम् ॥
त्रीणीमा भुवनान्यनु तपस्यन्
सेन्द्रमेव तं वृणे शङ् गमध्यै ॥ ८ ॥

पदपाठ :— यः । मिमाय । व्याहृतिऽभिः । तिसृऽभिः ।
पत्ऽभिः । पृथिवीम् । च । अन्तरिक्षम् । दिवम् ॥
त्रीणि । इमा । भुवनानि । अनु । तपस्यन् ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

He measured with the help of these three steps in the form of Vyāhṛtis, the earth, mid-air and sky. Keeping in mind these three worlds and practising tapas, I seek only Indra, the Lord of three worlds, to get peace.

## अन्वयभाष्यम् ।

यः इन्द्रः तिसृभिः ताभिरेव व्याहृतिभिः स्वकीयपादरूपाभिः पद्भिः व्याहृतिरूपैः पदैः पृथिवीं इमां अन्तरिक्षं मध्यमं दिवं च इत्येतद् भुवनत्रयं मिमाय स्वकीयपादमानतः कल्पयामास तत्समानं भावयामास, तानि इमानि त्रीणि भुवनानि तथा तद्भुवनत्रयबीजमन्त्राक्षराणि च व्याहृतिरूपाणि अवलम्ब्य तपस्यन् सः अयमहं तं तद्व्याहृतित्रयमूलभूत अधिष्ठानात्मकं त्रिभुवनाध्यक्षं इन्द्रं परमेश्वरमेव कल्याण प्राप्तुं शरणं व्रजामीति ॥

COMMENTARY—SUMMARY TRANSLATION

Indra with those three steps in the form of Vyāhṛtis, measured the three worlds, i.e. Pṛthvī ( earth ), Antariksha ( mid-air ), and Dyau ( sky ). He made them equal in measurement. Bearing those three worlds or the seed letters representing those worlds in mind and practising tapas, I seek Indra, the origin of all the Vyāhṛtis and the overlord of those three worlds. I seek him only for my welfare.

## नवमी ऋक् ।

यो अग्निं वायुमादित्यं चित्तिभि-
र्वाग्भिर्व्याहृतिभिर्दधे पदानि ॥
ज्योतिष्पदानीमान्यनु तपस्यन्-
सेन्द्रमेव तं वृणे शङ् गमध्यै ॥ ९ ॥

पदपाठ :- यः । अग्निम् । वायुम् । आदित्यम् । चित्तिऽभिः ।
वाग्भिः । व्याहृतिऽभिः । दधे । पदानि ॥
ज्योतिष्पदानि । इमानि । अनु । तपस्यन् ।
सः । इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

With his power of consciousness and the worlds in the form of Vyāhṛtis, he established in the three worlds his three steps as Agni, Vāyu and Āditya, respectively. I follow those bright steps and practise tapas. I thereby seek only Indra, for peace.

## अन्वयभाष्यम् ।

यः इन्द्रः चित्तिभिः चेतनाशक्तिभिः चैतन्यज्योतिरात्मिकाभिः संविदिच्छाक्रियाशक्तिभिः वाग्भिः वाग्रूपाभिः व्याहृतिमन्त्रमयीभिः त्रिषु भुवनेषु पृथिव्यन्तरिक्षद्युस्थानेषु अनुक्रमेण अग्निं वायुं आदित्यं चेति तत्तन्नामरूपात्मकानि ज्योतिष्पदानि दधे स्थापयामास, तानि इमानि त्रीणि दैवतानि आश्रित्य तपस्यन् सः अहं तं परमं सर्वज्योतिरधिष्ठानभूतं इन्द्रं परञ्ज्योतिःस्वरूपमेव परं श्रेयः निःश्रेयसं च प्राप्तुं शरणं व्रजामीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Indra with his powers of knowing, desiring, and willing and with the help of Vyāhṛtis in the form of Mantras, established in the three worlds the three gods, Agni, Vāyu and Āditya, respectively. They are his bright steps. Following these three deities, and practising tapas, I seek only Indra, the supreme seat of all lights, the light par excellence, for welfare.

## दशमी ऋक् ।

तत् ते भगवन् इन्द्र बृहस्पते
संविदा तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पदपाठ :- तत् । ते । भगऽवन् । इन्द्र । बृहस्पते ।
सम्ऽविदा । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

## अन्वयभाष्यम् ।

अयं मन्त्रः अस्मिन्नेव चतुर्थेऽनुवाके प्रथमे सूक्ते अष्टमः, पूर्वं व्याख्यातः ॥ अस्मिन् सूक्ते द्वितीयादिषु अष्टसु मन्त्रेषु अन्तिमे पादे " सेन्द्रमेव तं वृणे शं गमध्यै " इति विद्यते, तदर्थोऽपि व्याख्यात एव पदपाठानुसारेण " सः । इन्द्रम् । एव " इति ॥ तत्र " इन्द्रेण सहितं सेन्द्रं " इति व्युत्पत्त्या समन्वये " सेन्द्रमेव शं गमध्यै तं वृणे " इन्द्रयोगेन सिद्धं तत् परं कल्याणं अमृतत्वं प्राप्तुं इति अर्थोऽपि लभ्यते, तथैव सर्वत्रापि योजयितुं शक्यम् इत्येव विशेषः ॥

॥ इति चतुर्थेऽनुवाके द्वितीयं इन्द्रसूक्तं समाप्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

This mantra is a repetition of the eighth mantra of the first section and so it is commented upon already.

Thus ends the Second hymn in the Fourth Section.

---

## अथ चतुर्थेऽनुवाके तृतीयं इन्द्रसूक्तम् ।

**अनुवाकः ४ । सूक्तम् ३ । ऋचः १-१२ । इन्द्रः ।**

**यो विश्वेषाममृतानां द्वादश, दैवरातो वैश्वामित्रः, इन्द्रः, त्रिष्टुप् ।**

**Now this Indra Sukta, third in Fourth Anuvaka**

**Section IV: Hymn 3: Riks 1-12-INDRA.**

This third hymn beginning with 'Yo viśveshâm' contains twelve Ṛks. Daivarâta Vaiśvâmitra is the Ṛshi: Indra is the god and Trishṭup is the metre.

### अथ प्रथमा ऋक् ।

यो विश्वेषाममृतानामिरज्यति
मर्त्यानां यो यन्ता यमो निहन्ता ॥
सेन्द्र एव मम भद्रो ३ऽस्त्वीशिते-
न्द्रमेव तं वृणे शङ् गमध्यै ॥ १ ॥

पदपाठः– यः । विश्वेषाम् । अमृतानाम् । इरज्यति ।
मर्त्यानाम् । यः । यन्ता । यमः । निऽहन्ता ॥
सः । इन्द्रः । एव । मम । भद्रः । अस्तु । ईशिता ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indra rules over and controls the whole of the universe, with all the immortals. He controls the mortals also. He is the god Yama, the killer. May that Indra be my ruler and promoter of good fortune. I seek only Indra for my welfare and peace.

## अन्वयभाष्यम् ।

यः इन्द्रः विश्वेषां जगतां अमृतानां अमृतात्मनां सर्वेषां देवानां इरज्यति ईष्टे ईशिता सम्राट् भवति, यः मर्त्यानां मनुष्याणां च यन्ता नियन्ता यमः धर्मराजः निहन्ता उपसंहर्ता, सः तादृशः इन्द्रः एव पारमैश्वर्यसत्त्वपूर्णः ईश्वर एव मम अस्य भद्रः कल्याणप्रदः ईशिता प्रभुः समर्थः सर्वतन्त्र-स्वतन्त्रः अस्तु, तं इन्द्रमेव आत्मनः कल्याणार्थं शरणं व्रजामीति ॥

अत्र "इरज्यति पत्यते क्षयति राजतीति चत्वार ऐश्वर्यकर्माणः" (निघण्टुः– २–२) इति अनुसन्धेयम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Indra is the overlord of the whole universe with all the immortals. He is the controller of mortals also and he is Yama, Dharmarāja, the god of death. May that Indra only, who is the lord of all wealth, be my auspicious lord. I seek Indra only, as the refuge for my welfare.

"Irajyati, Patyate, Kshayati, Rājate," these four are the functions of a ruler (Nighaṇṭu: 2–2).

## द्वितीया ऋक् ।

यो दिव्यानाममृतानां सत्पति–
र्योऽन्तरिक्ष्याणामुत पार्थिवानाम् ॥
पशूनां यो द्विपदां चतुष्पदा–
मिन्द्रमेव तं वृणे शङ् गमध्यै ॥ २ ॥

पदपाठः– यः । दिव्यानाम् । अमृतानाम् । सत्ऽपतिः ।
यः । अन्तरिक्ष्याणाम् । उत । पार्थिवानाम् ॥

पशूनाम् । यः । द्विऽपदाम् । चतुःऽपदाम् ।

इन्द्रम् । एव । तम् । वृणे । शम् । गर्मध्यै ॥

He is the good lord of all immortals of the heavens, of the beings in mid-air and on the earth, and of all the creatures having two legs and four legs. I seek only Indra's grace for peace.

## अन्वयभाष्यम् ।

यः इन्द्रः परमः पुरुषः सन् दिव्यानां द्युलोकसम्बन्धिनां अमृतानां देवानां आदित्यादीनां सत्पतिः सत्तमः अधिपतिः, यश्च अन्तरिक्ष्याणां मरुत्प्रभृतीनां तथा पार्थिवानां पृथिवीस्थानानां अग्न्यादीनां च पतिः, तथा द्विपदां मानवादीनां चतुष्पदां गो-तुरङ्ग गजादीनां पशूनां सर्वेषां प्राणिजातानां उत्तमः पतिः नित्यसिद्धः, तं परोक्षसिद्धं परमं सार्वभौमं इन्द्रमेव आत्मशान्त्यादिसुखं प्राप्तुं वृणे तदेकशरण्यतया समाश्रये इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is superior to and the good lord of all immortals in the sky, i.e., Āditya and others. He is the lord of all who inhabit the mid-air, i.e., Maruts etc.; and he is the lord of all who stay on the earth, i.e., Agni and others. He is the lord, likewise of two-legged creatures, i. e., human beings etc., and of four-legged ones, like the cow, the horse, the elephant etc., and of all other creatures. He is eternal. Him, who is beyond the reach of the senses, the supreme one; only him I resort to for happiness and internal peace.

## तृतीया ऋक् ।

यो देवो देवानां देवतमः सन्
यो मघो मघोनां मघवत्तमः ॥
यो वा रथी रथिनां रथितम
इन्द्रमेव तं वृणे शङ्ग गर्मध्यै ॥ ३ ॥

पदपाठः– यः । देवः । देवानाम् । देवऽतमः । सन् ।
यः । मघः । मघोनाम् । मघवत्ऽतमः ॥
यः । वा । रथी । रथिनाम् । रथिऽतमः ।
इन्द्रम् । एव । तम् । वृणे । शम् । गर्मध्यै ॥

He is indeed, the god of gods, the highest one. He is riches itself, and the richest among the rich. He is the rider of chariots, the best among them. Only him I seek to obtain peace and welfare.

## अन्वयभाष्यम् ।

यः इन्द्रः देवः स्वयं परमो देवतात्मैव सन् देवानां सर्वेषामपि देवतमः देवोत्तमः, यश्च मघः स्वयं ऐश्वर्यरूपः ऐश्वर्ययुक्तश्च सन् मघोनां ऐश्वर्यवतां मघवत्तम उत्तमः, यः रथी रथिकः सन् सर्वेषां रथिनां रथवतां सूर्यादीनां उत्तमः सर्वरथिकेभ्यः श्रेष्ठतमः, तं इन्द्रमेव सर्वश्रेष्ठं शान्तिसुखावाप्तये समाश्रये सर्वस्वभावेनेति ॥

### COMMENTARY—SUMMARY TRANSLATION

Indra is himself a god; he is the god of all the gods. He is riches itself and the richest of all the rich. He is a rider of chariots and is the swiftest and the best of all. Only him, the best of all in all, I resort to for peace and happiness.

## चतुर्थी ऋक् ।

यो असौ विश्वस्य योगे सं युनक्ति
विश्वस्यैव यः क्षयति क्षेमस्य ।
यो वा विश्वाः प्र शुचः शमयती-
न्द्रमेव तं वृणे शङ्गमध्यै ॥ ४ ॥

पदपाठ :– यः । असौ । विश्वस्य । योगे । सम् । युनक्ति ।
विश्वस्य । एव । यः । क्षयति । क्षेमस्य । ॥
यः । वा । विश्वाः । प्रऽशुचः । शमयति ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indra controls and orders the acquisition of everything worth having. He is the ruler who attends to the protection of acquired things. He indeed pacifies all the sorrows of life. Only him I seek for peace and happiness.

## अन्वयभाष्यम् ।

यः प्रसिद्धः ईश्वर इति असौ इन्द्रः विश्वस्य सर्वस्यापि जीवजातस्य योगे योगाय सर्वपुरुषार्थस्य प्राप्तये तथा अप्राप्तस्य अभीप्सितार्थस्य प्रापणे स्वेन परमेण आत्मना इन्द्रेण सङ्गमे समाधौ च संयुनक्ति साधकान् यथायोग्यं योजयति, यः विश्वस्यैवास्य जगति क्षयति ईशिता सन् प्रभवति, प्राप्तरक्षणलक्षणस्य क्षेमस्य परमकल्याणरूपस्य क्षयति प्रभुः पालको भवतीति अभिप्रायः ॥

अत्र क्षयति इत्यस्य ऐश्वर्यार्थकः वैदिको धातुः । "इरज्यति, पत्यते, क्षयति, राजतीति चत्वार ऐश्वर्यकर्माणः" (नि. २–२०) इति, "इन्द्रो यातोऽवसितस्य राजा० । सेदु राजा क्षयति चर्षणीनाम्०" (ऋ. मं. १-३२-१५), "यो विश्वस्य क्षयति भेषजस्य" (ऋ. मं. ५-४२-११) इति च तदनुश्रवणम् ॥

यश्च विश्वाः शुचः सर्वान् शोकान् प्रशमयति प्रकर्षेण निःशेषेण च शान्ति प्रति नयति आत्यन्तिकीं शोकनिवृत्तिं भावयति साधकेभ्यः, तं तादृशं इन्द्रं परमात्मानमेव तादृशं कल्याणं प्राप्तुं वृणे समाश्रये इति ॥

COMMENTARY—SUMMARY TRANSLATION

He is reputed as a ruler of all in general. He helps seekers to get things which they require. Yoga means realisation of human ideals (purushārtha) as also the acquisition of unattained objects. Yoga also means union with the supreme soul and attainment of Samādhi. Indra is the ruler of the whole universe capable of protecting what is acquired. He removes all sorrows completely root and branch. I take refuge in Indra only to get peace and happiness.

## पञ्चमी ऋक् ।

यो असौ भगः सुभगो यो भगवान्

भगवत्पतिर्यो भगवत्तमः ॥

यो वा भगस्यैव दाता सत्पति-

रिन्द्रमेव तं वृणे शङ्गमध्ये ॥ ५ ॥

पदपाठः— यः । असौ । भगः । सुऽभगः । यः । भगऽवान् ।

भगवत्ऽपतिः । यः । भगवत्ऽतमः ॥

यः । वा । भगस्य । एव । दाता । सत्ऽपतिः ।

इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indra is indeed wealth. He is wealthy and full of all wealth. He is the king of wealth, and controls all wealth. He is the highest among the wealthy and he is the wealthiest of all. He is indeed the giver of wealth and he is a good ruler. Only him I seek for peace and happiness.

## अन्वयभाष्यम् ।

यः असौ प्रसिद्धः ईश्वरः भगः ऐश्वर्यरूपः सुभगः परमैश्वर्यात्मा भगवान् सर्वैश्वर्यपूर्णः भगवत्पतिः ऐश्वर्यवतामपि अधिपतिः, यः भगवत्तमः ऐश्वर्यवतां सर्वेषां दिव्यविभूतीनामपि

श्रेष्ठतम: ईश्वरोत्तम:, य: भगस्य सर्वस्यापि ऐश्वर्यस्य दाता दानशील: दातृत्वस्वभावसिद्ध: सत्पति: सतां सद्वस्तूनां च अधिपति:, तं तादृशं परमं ईश्वरं इन्द्रमेव शं शाश्वतं सुखं प्राप्तुं वृणे समाश्रये स्वकीयं सम्भावयामीति ॥

COMMENTARY—SUMMARY TRANSLATION

He is the reputed lord. He is wealth itself. He is full of all wealth. He is the head of the wealthiest. He is the best lord. He is the giver of all wealth. He is the lord of all good people and of all good things. Such is the supreme lord Indra; him only, for eternal happiness I worship and I consider him as my own.

## षष्ठी ऋक् ।

यो असौ रसो यो रसवान् रसपती
रसानां यो रसतमः सत्पतिः ॥
विश्वानि यो भूतानि रसयती-
न्द्रमेव तं वृणे शङ्ग गमध्यै ॥ ६ ॥

पद्पाठः— यः । असौ । रसः । यः । रसऽवान् । रसऽपतिः ।
रसानाम् । यः । रसऽतमः । सत्ऽपतिः ॥
विश्वानि । यः । भूतानि । रसयति ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indra is indeed Rasa, the sweet essence. He is a 'Rasavān,' full of sweet essences. He is a Rasapati, Lord of Rasas. He is the essence of essences; and a good ruler. He pleases all beings through the essence of pleasure. I seek only Indra for peace and happiness.

## अन्वयभाष्यम् ।

य: असौ श्रुत्यादिषु प्रसिद्ध: रस: स्वयं रसात्मा संविद्-आनन्दादिसत्त्व: स्वयमेव सिद्धोऽस्ति ॥ तथा च "रसो वै स: । रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति" (ब्रह्मो. ७) इति औपनिषदं वचनम् ॥ यश्च रसवान् सर्वरसपूर्ण: रसपति: ज्ञानानन्दादीनां सर्वेषां आनन्दानां च रसानां अधिपति: रसाधिष्ठाता, य: रसानां सर्वेषां रससत्त्वानां रसतम: रसोत्तम:, परमो रस: इति यावत्, ब्रह्मानन्दरसात्मा सत्पति: सद्वस्तूनां अधिपति:, य: विश्वानि इमानि भूतानि सर्वप्राणिजातानि रसयति स्वेन रसेन आनन्दयति आत्मसात् करोतीति भाव:, "अग्निरिव अय:पिण्डं" सर्वं रसमयमेव भावयतीति, तं इन्द्रमेव पूर्णं स्वयं रसात्मानं शं गमध्यै आत्मशान्तये संविदा योगेन च प्राप्नोमीति ॥

अत्र "रसो वै सः। एषह्येवानन्दयति" (ब्र. उ. ७) इति, "एषोऽस्य परम आनन्दः एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति" (बृ. उ. ४-३-३२) इत्यादिवचनं प्रमाणम् ॥

COMMENTARY—SUMMARY TRANSLATION

He is indeed Rasa, the principle of pleasure. Well-known in the Vedas as the soul of joy, you are Rasâtmâ His very nature is delight. Cf: Rasa indeed he is ( *Taittirîya* ). He is Rasavân, full of all Rasas. He is Rasapati—lord of all Rasas, the very source and abode of Rasas. He is the Rasa of all Rasas, the best of all Rasas. His very nature is Brahmânanda, the indivisible highest delight of Brahma. He is the lord of all good things. He makes all beings happy. All these beings derive their happiness from him, i.e., he makes them all happy like himself, as Agni ( fire ) converts a ball of iron into a fiery mass. He makes all beings enjoy Rasas. I seek only Indra, the full, the very soul of delight for internal peace. I do so with knowledge and yoga.

सप्तमी ऋक् ।

यो असौ प्रियो यः प्रियपतिः परः
प्रियाणां यः प्रियतमः सत्पतिः ॥
तस्य प्रियस्यैव शर्मणः प्रियोऽह-
मिन्द्रमेव तं वृणे शङ्गमध्यै ॥ ७ ॥

पद्पाठ :— यः । असौ । प्रियः । यः । प्रियऽपतिः । परः ।
प्रियाणाम् । यः । प्रियऽतमः । सत्ऽपतिः ॥
तस्य । प्रियस्य । एव । शर्मणः । प्रियः । अहम् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indra is dear to all indeed; he is the dear lord supreme. He is the dearest of all dear ones and a good ruler. I am dear to him, who is known as the dear one to all. I seek only that Indra, for peace and happiness.

अन्वयभाष्यम् ।

यः सर्वान्तरः प्रसिद्धः सर्वानुभवसिद्धः आत्मा प्रियः सर्वेषां प्रेमास्पदीभूतः यः परः श्रेष्ठः सर्वेभ्यः इन्द्रियेभ्यः आन्तरः प्रियपतिः सर्वेषामपि प्रियवस्तूनां अधिष्ठानभूतः अधिपतिश्च भवति, अत एव प्रियाणां सर्वेभ्यः प्रियवस्तुभ्यः प्रियतमः यः अत्यन्तं प्रियः, सत्पतिः सद्वस्तूनां मध्ये श्रेष्ठः आत्मस्वरूपः, तस्य च परमस्य प्रियस्य आत्मनः सर्वास्पदीभूतस्य च

शर्मणः सुखरूपस्य प्रियः प्रेमपात्रभूतः अहं अयं ऋङ्मन्त्रमुखेन स्तोता तं परमं प्रियं इन्द्रमेव शं गमध्यै तद्योगसुखं लब्धुं वृणे जाया निजं पतिमिव तदनन्यभक्तिभावेन शरणं व्रजामीति ॥

अत्र "न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति" ( बृ. उ. ४-४ ६ ) इत्यादिवचनं सदुदाहरणम ॥

अन्तरात्मनः इन्द्रत्वं इन्द्रियलिङ्गत्वात् ॥ "इन्द्रियमिन्द्रलिङ्गम्०" (पा.सू. ५-२-९३) इति तद्व्युत्पत्तिवचनम् ॥ तदिदं तत्त्वं मूलतः ऋङ्मन्त्रवर्णे अनुश्रूयते ॥ "इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत्" ( ऋ. म. १-१०७-२ ) इति ॥ औपनिषदं वचनमपि तदेव समर्थयति ॥ "यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यश्छन्दांस्याविवेश । सचाऽशिक्यः पुरोवाचोपनिषद् इन्द्रो ज्येष्ठ इन्द्रियाय" ( ना. उ. ७-५ ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is reputed to be in the heart of all. His existence is confirmed by the experience of all. As Ātmā, he is dear to all; he is the very seat of love. Indra is the most superior among all the senses. He is the abode of all dear things. So, he is the dearest of all dear things. He is the best of all good things, Ātmā himself. To him, the supreme, the dear, the Ātmā, the refuge of all, I am dear, an object of love I, this singer of Ṛks, seek only Indra, the supreme and the dear one, to get peace and happiness of yoga. I go to him, with a mind which thinks of nothing else, like a wife who goes to her husband. Cf. "Lo, all things are not dear because all like them, but a thing becomes dear only because the Self likes it." ( Bṛ. Up. IV–4–6 ).

Ātman is Indra because senses are the outward symbols of the power inside. "Sense is a symbol of Indra" is the derivation ( Pāṇini Sūtra ).

### अष्टमी ऋक् ।

यो वा हितो यो हितेषु सुधितो
हितानां यो हिततमः सत्पतिः ॥
हितेष्वेव विश्वस्य यो युनक्ती-
न्द्रमेव तं वृणे शङ् गमध्यै ॥ ८ ॥

पदपाठ :– यः । वा । हितः । यः । हितेषु । सुऽधितः ।
हितानाम् । यः । हितऽतमः । सत्ऽपतिः ॥
हितेषु । एव । विश्वस्य । यः । युनक्ति ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indra is indeed beneficial and he is the greatest benefit of all the benefits. He is the most beneficial and is a good lord. He strives and brings about the benefit of all. I seek only Indra for peace and happiness.

## अन्वयभाष्यम् ।

यः असौ इन्द्रः हितः हितकृत् सर्वेषामपि समानः, यश्च हितेषु हितार्थेषु सर्ववस्तुषु हितार्थं च सुधितः सुष्ठुतया हितः सम्यक् हितरूपश्च भवति, यः हितानां सर्वेषां हितार्थानां हिततमः परमहितात्मस्वरूपः सत्पतिः सद्वस्तुषु श्रेष्ठः, यश्च विश्वस्य सर्वस्यापि प्राणभृतः हितेषु हितार्थं सत्सु युनक्ति स्वयं यतते, तथा स्वाश्रितान् सर्वानपि जनान् हितार्थेषु योजयति, तं परमं हिततमं इन्द्रमेव वृणे परमानन्दावाप्तये समाश्रये इति ॥

अत्र "त्वमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे" इति प्रार्थयते प्रतर्दनाय "प्राणोऽस्मि प्रज्ञात्मा तं मां आयुरमृतमित्युपास्व" इति इन्द्रवचनप्रयुक्तं ब्राह्मणं सदुदाहरणम् (कौ॰ब्रा॰उ. ३-१-२), तथा "मामेव विजानीहि एतदेवाहं मनुष्याय हिततमं मन्ये" इति च इन्द्रस्यैव श्रेष्ठत्वं इन्द्रसत्त्वस्य प्राणस्य प्रज्ञात्मनः हिततमत्वं प्रतिज्ञातमनुसन्धेयम् ॥

तथा "प्राणस्तथाऽनुगमात्" (ब्र. सू. १-१) इति च तदधिकरणतत्त्वमपि अनुसन्धेयम् ॥

### COMMENTARY—SUMMARY TRANSLATION

He is indeed beneficial and agreeable to all. He is the giver of equal happiness to all. He is the best benefit of all the benefits. He is the most beneficial of the beneficial. He is supremely beneficial because he is Ātman himself. He is a good ruler. He is the best amongst the good things. He always endeavours for the benefit of all beings. Likewise, he enjoins all those who go to him to work for things beneficial. Only him, the supremely beneficial Indra, I seek, to get supreme happiness. Cf. "You yourself choose a boon for me— which you consider the most beneficial to man," said Pratardana to Indra. He said to prayerful Pratardana, "I am Prāṇa and Prajñātmā. You worship me as Āyu (longevity) and Amṛta (immortality)" (Kau. Brāh. III., 1-2). Again, "know me to be the most beneficial thing to man, which I believe," said Indra. So Indra is the most beneficial.

## नवमी ऋक् ।

यो वां संविद् य उं संवित्त विश्वं
संवित्तमो योऽस्ति संविदां पतिः ॥
संवित्तये यो वेदयते वेद-
मिन्द्रमेव तं वृणे शङ् गमध्यै ॥ ९ ॥

पद्पाठः– यः । वा । सम्ऽवित् । यः । ऊम् इति॑ । सम्ऽवित्ते । विश्वम् ।
सम्वित्ऽतमः । यः । आस्ति । सम्ऽविदाम् । पतिः ॥
सम्ऽवित्तये । यः । वेदयते । वेदम् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indra is certainly consciousness. He knows the universe thoroughly. He is the most learned of all. He is the lord of the learned. He makes one know the Veda for imparting knowledge. Only Indra, I seek for peace and happiness.

## अन्वयभाष्यम् ।

यः असौ प्रसिद्धः इश्वरः इन्द्रः इति, तथा संवित् सम्यग्ज्ञानस्वरूपः यः विश्वं एतत् सर्वं जगत् संवित्ते सम्यक् पूर्णतया जानाति सर्वज्ञः इति यावत् ॥ यश्च संवित्तमः सम्यग्ज्ञानानां तज्ज्ञानवतामपि उत्तमः, संविदां सर्वविद्यानां विदुषां च अधिपतिः सन् प्रभवति ॥ यश्च पुनः संवित्तये ज्ञानोदयाय वेदं स्वं दिव्यं ज्ञानं तथा ज्ञानप्रदं छन्दोमयं ऋगादिवेदं च वेदयते ज्ञापयति स्वेन वेदवाङ्मुखेन प्रतिप्रबोधयति च, तं परम पुरुषं इन्द्रमेव शं ज्ञानादि-रसशान्तिमधिगन्तुं वृणे सर्वविद्याधीश्वरं समाश्रये शरणं व्रजामीति ॥

### COMMENTARY—SUMMARY TRANSLATION

He, who is well-known as Īśvara, is Saṁvit, the very stuff of knowledge. He knows the whole universe in all details, as an Omniscient Being. He is the best of all knowledge and the wisest of all the wise ones. He is the lord of all arts and learning and of all learned men. He reminds all of their power to know. He conveys to them the superhuman knowledge about himself and about the Veda, which is in the form of metrical Ṛgveda. Veda imparts all knowledge. He awakens the intelligence of all through Vedic literature. Indra is the Supreme Person. To get Sāma which means Jñāna, bliss and peace, I resort only to Indra who is the lord of all learning.

## दशमी ऋक् ।

यो वीरान् वीरयतीह वीर्येषु
यो वीरेषु प्रविष्टः प्रवीर्येण ॥
वीराणां यो वीरवत्तमः पति-
रिन्द्रमेव तं वृणे शङ्गमध्यै ॥ १० ॥

पदपाठः— यः । वीरान् । वीरयति । इह । वीर्येषु ।
यः । वीरेषु । प्रऽविष्टः । प्रऽवीर्येण ॥
वीराणाम् । यः । वीरवत्ऽतमः । पतिः ।
इन्द्रम् । एव । तम् । वृणे । शम् । गर्मध्यै ॥

Indra endows heroes with more heroic spirit and makes them do great deeds. He enters the very hearts of the heroes with the best of heroism. He is the hero of heroes and is their lord. I pray only to Indra for peace and happiness.

## अन्वयभाष्यम् ।

यः इन्द्रः स्वयं वीरपुरुषः सन् वीरान् वीरपुरुषान् वीर्येषु वीर्यवत्तरेषु कर्मसु वीरयति प्रेरयति आधिक्येन वीरभावयुक्तान् सम्भावयति, यश्च वीरेषु तेषु स्वेन प्रवीर्येण प्रकृष्टसामर्थ्येन प्रविष्टः आविष्टः सन् विराजते विजयते इति भावः । यः वीराणां सर्वषामपि वीरपुरुषाणां वीरवत्तमः वीरश्रेष्ठतमः अत्यन्तं वीर्यवान् पतिः सर्ववीराधिपतिः संसिद्धोऽस्तीति ॥ तं तादृशं परमं पुरुषं इन्द्रमेव सर्वत्रविजयिनं अपराजितं च शं गमध्यै कल्याणं प्राप्तुं वृणे शरणं व्रजामीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Indra is himself a heroic Purusha; he employs heroes in doing deeds which require great heroism. He inspires them to be heroes. He enters into their hearts with his great valour. He is the best of the heroes; the lord of all heroes. Such supreme person is Indra. Only him I choose to worship to get bliss and peace.

## एकादशी ऋक् ।

यः प्रजानन् अजन्यो यः सन् अमर्त्यो
यो विश्वथा राजते स्वयं य एकः ॥
यः स्वराट् सम्राड् विराड् विभुः प्रभु-
रिन्द्रमेव तं वृणे शङ् गमध्यै ॥ ११ ॥

पदपाठः— यः । प्रऽजानन् । अजन्यः । यः । सन् । अमर्त्यः ।
यः । विश्वऽथा । राजते । स्वयम् । यः । एकः ॥
यः । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

## द्वादशी ऋक्

तत् ते भगवन् इन्द्र बृहस्पते
संविदा तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १२ ॥

पदपाठः- तत् । ते । भगऽवन् । इन्द्र । बृहस्पते ।
सम्ऽविदा । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

एतत् मन्त्रद्वयं पूर्वमेव व्याख्यातम् ॥ तत्रापि अत्रत्या एकादशी ऋक् अस्मिन्नेव चतुर्थे अनुवाके द्वितीये सूक्ते प्रथमा ॥ इयं द्वादशी ऋक् चतुर्थेऽनुवाके प्रथमे सूक्ते अष्टमी ॥

॥ इति चतुर्थेऽनुवाके तृतीयम् इन्द्रसूक्तम् समाप्तम् ॥

"Yaḥ Prajānan" and "Tatte Bhagavan" are repetitions. The meaning of these is already given in IV-2-1 and IV-1-8 and commented upon also.

COMMENTARY—SUMMARY TRANSLATION

Repetition is used for emphasis.

Thus ends the Third hymn in the Fourth Section.

---

## अथ चतुर्थेऽनुवाके चतुर्थं इन्द्रसूक्तम् ।

अनुवाकः ४ । सूक्तम् ४ । ऋचः १-१२ । इन्द्रः ।

यद् देवानां निहितं द्वादश, दैवरातो वैश्वामित्रः, इन्द्रः, त्रिष्टुप् ॥ (ऋणापाकरणम्)

**Now the Indra Sukta, Fourth in Forth Anuvaka**

**Section IV, Hymn 4, Riks 1 - 12** - INDRA

This fourth hymn beginning with 'Yaddevānām nihitam' contains twelve Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Indra is the god and Trishṭup is the metre.

## अथ प्रथमा ऋक् ।

यद् देवानां निहितं मयि ऋणं
यदृषीणां यन्मनुष्याणामृणम् ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ् गमध्यै ॥ १ ॥

पदपाठ :– यत् । देवानाम् । निऽहितम् । मयि । ऋणम् ।
यत् । ऋषीणाम् । यत् । मनुष्याणाम् । ऋणम् ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

The debt I owe to the gods, to the Ṛshis and to the mortals is really the debt I owe to Indra only. I am indeed free from debt to all others. I seek Indra only for good fortune and happiness.

## अन्वयभाष्यम् ।

मयि देवानां विश्वेषां यत् ऋणं निहितमस्ति, यच्च ऋषीणां अस्मत्पूर्वजानां गोत्र-प्रवरादि-प्रवर्तकानां, तथा मनुष्याणां पित्रादीनां तदितरेषां च यत् ऋणं निहितं मयि विद्यते–मदर्थं देवर्षिमनुष्यैः तैः कृतेन उपकारेण तेषां ऋणं ऋणं यत् मयि आपतितं तेषां सर्वेषामपि ऋणानां अपाकरणाय इन्द्रस्यैव सर्वेश्वरस्य तस्य एकस्यैव अहं ऋणी भवानि, यः खलु चेतन-प्राणन-जीवन-प्रज्ञानादिदानानुग्रहेण सर्वान् आत्मसात्कर्तुं समर्थः सन् स्वयं सर्वत्रापि प्रभवति, तस्य इन्द्रस्यैव ऋणं सर्वेभ्योऽपि अधिकं इति भावः, अतः अन्यात् अन्यस्मात् तस्मात् देवादीनां सर्वस्मात् ऋणाद् विमुक्तः अनृणः ऋणरहितः तं इन्द्रमेव कल्याणार्थं सुखशान्तये च शरणं व्रजामीति ॥

### COMMENTARY—SUMMARY TRANSLATION

For the various benefits bestowed on me by the gods, the Ṛshis and men, I owe them debts. But I am indebted to Indra, the overlord, the most because it is he who has given me life, knowledge and power to act. It is with the help of these I liquidate the debts of all others. Therefore, the debt to Indra, is greater than the debts due to others. Thus, I free myself from all debts due to the gods and the others. I seek Indra only to get bliss and peace.

## द्वितीया ऋक् ।

यद् वा ऋणं मातुर्मम जनित्र्याः
परं यन्निहितं सर्वं स्वं मयि ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ् गर्मध्यै ॥ २ ॥

पद्पाठः— यत् । वा । ऋणम् । मातुः । मम । जनित्र्याः ।
परम् । यत् । निऽहितम् । सर्वम् । स्वम् । मयि ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गर्मध्यै ॥

The debt of my mother for my birth and for all she did for me is to be paid. I am indebted to Indra only for being enabled to repay the debt of my mother. Now I am free from all other debt. I pray to Indra only for peace and happiness.

## अन्वयभाष्यम् ।

मम जनित्र्याः जनयित्र्याः मातुः मयि निजे पुत्रे यत् स्वं स्वकीयं सर्वं सर्वस्वमपि मात्रा निहितं अन्येभ्यः सर्वेभ्योऽपि ऋणेभ्यः अधिकं ऋणं भवति, गर्भधारण-प्रसव-पालन-पोषण-रक्षण-शिक्षणादिभिः निष्पन्नं अत एव परं अनतिक्रम्यं तस्मात् मातृ ऋणादपि निर्मुक्तः अहं अनृणः सन् इन्द्रस्यैव ऋणी भवानि, यतः इन्द्रऋणं सर्वथव अपारं अनुत्तीर्यमेवेति, तस्मात् तं इन्द्रमेव शरणं प्रपद्ये कल्याणं प्राप्तुं इति ॥ अत्र "मातृदेवो भव । पितृदेवो भव" इत्यादिषु मातुरेव प्रथमं स्थानं, " एभ्यो माता गरीयसी " इति च तदनुस्मरणात् ॥

COMMENTARY—SUMMARY TRANSLATION

My mother gave me birth, her own life and soul, and she bore me in the womb, brought me forth, protected me and nourished me and suffered for me. Therefore, the debt I owe her is greater than that to all others; it is not possible to pay it back generally. For being free from the debt of my mother, I am indebted to Indra only. His debt is so great that it can never be liquidated. I pray to him only for happiness and peace.

## तृतीया ऋक् ।

यज्जनितुः पितुर्निहितं मयि
यदात्मदायि ऋणं भूरि बृहत् ॥

इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्

इन्द्रमेव तं वृणे शङ्गमध्ये ॥ ३ ॥

पदपाठः– यत् । जनितुः । पितुः । निऽहितम् । मयि ।

यत् । आत्मऽदायि । ऋणम् । भूरि । बृहत् ॥

इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।

इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

The debt I owe to my father for my birth is vast and great. He has endowed me with his own soul. For being free from all the debt to my father, I am indebted to Indra only. I now am a debtor only to Indra. I seek only Indra for peace and happiness.

## अन्वयभाष्यम् ।

मम जनितुः जनयितुः पितुः जन्मदानरूपं यत् मयि ऋणं निहितमस्ति, यच्च आत्मदायि सचेतन–सशरीरात्मसत्त्वप्रदानरूपम् भवति, अथवा "आत्मा वै पुत्रनामाऽसि" इति ( ऐ. ब्रा. ७ ) वचनात् साक्षादात्मप्रदं, तथा द्वितीयजन्मरूपेण ब्रह्मोपदेशेन गायत्री-मन्त्रमुखेन स्वात्मदानरूपं, यच्च अन्यत् महत् महत्तरं भूरि बहुतरं रक्षण–शिक्षणादिभिः प्राप्तं यत् पितृऋणमस्ति तस्मात् सर्वस्मादपि ऋणात् मुक्तः अहं अनृणः सन् इन्द्रस्यैव ऋणी भवानि इति इन्द्रैकनिष्ठया तमेव अनन्यशरण्यं समाश्रये, पूर्णकल्याणप्राप्तये इन्द्रैकाश्रयणमेव वरेण्यमिति ॥

### COMMENTARY—SUMMARY TRANSLATION

To my father I owe a great debt for giving me birth. For giving me this active body or according to the dictum that the son is ones own self ( Ait. Brāh. 7 ), he is in me; he has given me himself; by initiating me into Brahmacharyā he has given me a second birth. Further, he has bestowed upon me vast benefits like protection teaching etc. For all this I owe him a debt. This is my father's debt. For being redeemed from that debt completely, I am indebted to Indra only. I have single-minded devotion to Indra. I take refuge in him like one who has no one else to resort to. For the liquidation of all debts, the best means is to take refuge in Indra.

## चतुर्थी ऋक् ।

यद् गुरूणां गुरुतमं ब्रह्मदायि

यदृणं विश्वथा निहितं मयि ॥

इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ्ग गर्मध्यै ॥ ४ ॥

पदपाठः– यत् । गुरूणाम् । गुरुऽतमम् । ब्रह्मऽदायि ।
यत् । ऋणम् । विश्वऽथा । निऽहितम् । मयि ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गर्मध्यै ॥

The debt of the gurus (the preceptors), who gave me the knowledge of Brahma is in every way the heaviest. For being free from all those debts, I am indebted to Indra only. I owe nothing now to anybody. I seek only Indra for peace and happiness.

## अन्वयभाष्यम् ।

मयि विद्याप्रदातॄणां ब्रह्मदायि वेद-ज्ञानादिप्रदानेन सम्प्राप्तं गुरुतमं अत्यन्तं गुरुभूतं अनिर्वाह्यं अनपाकरणीयं च भवति, विश्वथा सर्वप्रकारेण शिष्यवात्सल्यात् आचरितेन प्रेम-हितसद्भावादिना रक्षण–शिक्षणादिना च मयि यत् ऋणं निहितं अस्ति, तस्मात् ततोऽपि अन्यस्मात् अज्ञातात् सर्वस्मात गुरुऋणादपि विमुक्तः सन् अनृणः संवृत्तः अहं इन्द्रस्यैव ऋणी भवानीति अनन्यगतिकतया तं परमं उत्तमर्णं इन्द्रमेव शरणं व्रजामीति ॥

### COMMENTARY—SUMMARY TRANSLATION

My teachers have placed me under great debt. It is for giving me the gift of Veda and knowledge. It is really very heavy and difficult to bear. It is so, because of the love they bore towards me, their disciple and because of their protection and tuition which was full of love, benevolence and good feeling. That debt is on me. I have been redeemed of it and all other debt from unknown quarters. So, being free and unindebted, I am indebted now to Indra only. As one having no other person to resort to, I seek him, the great redeemer of debts.

## पञ्चमी ऋक् ।

यद् वाऽधि ऋणं मयि गव्यदायि
भूतं भव्यं च गवीन्यं १ यद् गवाम् ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ्ग गर्मध्यै ॥ ५ ॥

पदपाठ :– यत् । वा । अधि । ऋणम् । मयि । गव्यऽदायि ।
भूतम् । भव्यम् । च । गवीन्यम् । यत् । गवाम् ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

For being redeemed of the great debt I owe to the cows for giving me milk-products now, in the past, and in future, I am indebted to Indra only. Only him, I approach for peace and happiness.

## अन्वयभाष्यम् ।

गवां गोमातृणां गव्यदायि दुग्धादिगोरसप्रदानेन सम्पन्नं मम सञ्जीवनार्थं पवित्रीकरणार्थं आत्मनः आन्तर्यसूक्ष्मसत्त्वशुध्यर्थं च भूतं इतः पूर्वं जन्मतः अद्यावधिनिष्पन्नं, तथा भव्यं भाव्यं इतः परं यावज्जीवं सम्भाव्यमानं च गवीन्यं तद् गोसम्बन्धि कृष्यादिनिमित्तकमपि अधि अधिकं विशिष्टं यत् ऋणं मयि यत् खलु निहितमस्ति तस्मात् अन्यस्मादपि सर्वस्मात् गोमातृऋणात् निर्मुक्तः अहं अनृणः सन् सर्वऋणरहितोऽपि इन्द्रस्यैव ऋणी भवानीति, अन्यत् पूर्ववदेव योज्यम् ॥

COMMENTARY—SUMMARY TRANSLATION

To the cow-mother ( Gomātā ), I am indebted for giving me milk, milk-products and other products, in order to feed me, save me and purify my soul. Cows have done so in the past and they do it now and in future also they will do it. As I use them for agriculture also, the debt is so heavy. They have thus placed me under a great debt. For being free from that debt I owe the cows, I am indebted to Indra only. I seek Indra only for peace and happiness.

## षष्ठी ऋक् ।

यन्मे धेनूनामृणं प्राणदायि
गव्यानामधि निहितं मयि ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ्गमध्यै ॥ ६ ॥

पदपाठ :– यत् । मे । धेनूनाम् । ऋणम् । प्राणऽदायि ।
गव्यानाम् । अधि । निऽहितम् । मयि ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

I owe a debt to milch cows for milk which is life-giving. Cows have placed me under a deep debt by supplying me with cow-products. I am indebted to Indra only for being redeemed of all the cows' debts. Only him I seek for peace and welfare.

## अन्वयभाष्यम् ।

मे मम धेनूनां कामदोग्ध्रीणां गवां प्राणदायि दुग्धादिना प्राणसञ्जीवनार्थं यत् निष्पन्नं, तथा गव्यानां गोसम्बन्धिनां पञ्चगोरसानां क्षीर-दधि-घृत-गोमूत्र-गोमयानां च मयि यत् पवित्रीकरणेन बाह्याभ्यन्तरीयं यत् आयुरारोग्यबलसुवीर्यादिसत्त्वप्रदानेन च निष्पन्नं ऋणं यत् मयि निहितं भवति, तस्मात् सर्वस्मादपि ऋणात् मुक्तः अनृणः सन् इन्द्रस्यैव ऋणी-भवानि, तदर्थं तं इन्द्रं परमं पुरुषमेव शरणं व्रजामीति ॥

COMMENTARY—SUMMARY TRANSLATION

I am indebted to the cows, the cows which satisfy all desires. They have given me the very essence of my life. They have given me the five cow-products ( Pañchagavya—milk, curds, ghee, cow-urine and cow-dung ) for my purification, for prolonging my life, for improving my health, for increasing my strength, for raising my potency, and for making me strong in every way. Therefore, the debt they have put me under is very great. For being free from all that debt, I am indebted to Indra only. I seek only Indra for peace and happiness.

## सप्तमी ऋक् ।

यद् वा ऋणं वेदानां ज्ञानदायि
विद्यानां प्रति निहितं यन्मयि ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ् गमध्यै ॥ ७ ॥

पदपाठ :– यत् । वा । ऋणम् । वेदानाम् । ज्ञानऽदायि ।
विद्यानाम् । प्रति । निऽहितम् । यत् । मयि ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indeed the debt of the Vedas for giving me knowledge and the arts, is on me. For being free from all that debt, I am indebted to Indra only. I seek him only for peace and welfare.

## अन्वयभाष्यम् ।

वेदानां ऋगादीनां तथा विद्यानां वेदशास्त्राद्युपदिष्टानां कर्मोपासनाज्ञानयोगादिरूपाणां वैदिकानां तथा कृष्यादीनां च जीविकादिप्रधानानां संविदां दातृ ज्ञानप्रदानरूपं यत् मयि ऋणं निहितं अस्ति, तस्मात् सर्वस्मादपि ऋणविशेषाद् विमुक्तः अनृणः सन् इन्द्रस्यैव ऋणी भवानीति । अन्यत्सर्वं यथापूर्वं ज्ञेयम् ॥

### COMMENTARY—SUMMARY TRANSLATION

I am indebted to the four Vedas, the Vidyās and other Śāstras, into which I was initiated, in the form of action ( Karma ), meditation ( Upāsanā ) and knowledge ( Jñāna ) and agriculture. They all contribute to the maintenance of life. They have given me the highest gift of Jñāna, the knowledge. For being free from these special debts, I am indebted to Indra only. I seek only Indra for peace and happiness.

## अष्टमी ऋक् ।

यद् वा ऋणं भूतानां सन्निहितं
यदु विश्वेषां पुरुषाणां मयि ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ् गर्मध्यै ॥ ८ ॥

पदपाठः— यत् । वा । ऋणम् । भूतानाम् । सम् । निऽहितम् ।
यत् । ऊम् इति । विश्वेषाम् । पुरुषाणाम् । मयि ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गर्मध्यै ॥

Indeed, the debt of all the elements ( Bhūta ) is on me. The debt due to all men as well is on me. For being free from all that debt, I am indebted to Indra only. I seek Indra only for peace and welfare.

## अन्वयभाष्यम् ।

भूतानां पृथिव्यादीनां आकाशपर्यन्तानां यत् मम सन्धारणजीवनादिना निष्पन्नं तथा विश्वेषां पुरुषाणां जनानां तत्र तत्र समागम—सम्भाषण—सहवासादिना च यत् यत् ऋणं निहितं, तथा असङ्गतानामपि दूरत एव कृतेन साहाय्यादिरूपेण उपकारेण यच्च ऋणं मयि निहितं भवति, तस्मात् सर्वस्मादपि ऋणात् विमुक्तः अनृणः सन् इन्द्रस्यैव ऋणी भवानीति,

अत्र सर्वत्रापि परमैश्वर्यपूर्णस्य तस्य इन्द्रस्य एकस्यैव ऋणीभूतः अन्येषां सर्वेषां सर्वेभ्योऽपि ऋणेभ्यो विमुच्यते इत्यर्थः अनुसन्धेयः ॥

COMMENTARY—SUMMARY TRANSLATION

There is a debt I owe to the elements, earth, fire, water etc. for bearing me, giving me life etc. Likewise, I owe a debt to all men, whom I have met in various places and conversed with. To them also I owe a debt whom I have not met but who have extended their help to me in various forms. Having liquidated all that debt, I am now indebted to Indra only. My debt now is to him only who is full of wealth here and everywhere. He who accepts Indra's debt will be freed from all other debts due to all others. I seek him only for peace and happiness.

## नवमी ऋक् ।

यत् पृथिव्या मम धरित्र्याऽऽहितं
यदग्नेऋणं गृहपतेर्मयि ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ्गमध्यै ॥ ९ ॥

पदपाठः— यत् । पृथिव्या । मम । धरित्र्या । आऽहितम् ।
यत् । अग्नेः । ऋणम् । गृहऽपतेः । मयि ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

The debt I owe to Pṛthvī ( the earth ) who bears me, and that to Agni, the lord of the earth, is there. For being free from those debts, I am indebted to Indra only. I seek only Indra for peace and welfare.

## अन्वयभाष्यम् ।

मम धरित्र्याः धारयित्र्याः सर्वाधारभूतायाः भूमातुः, तथा पृथिव्याः अधिपतेः अग्नेः देवतात्मनः यत् मयि ऋणं निहितम् भवति, अत्र "अग्निर्वै गृहपतिः सोऽस्य लोकस्य गृहपतिः" इति ब्राह्मणम् (ऐ॰ब्रा॰), तस्य अग्नेः अत्र बहिः धान्याद्युत्पादनेन तत्पाकादिसाधनेन च तथा यज्ञादिनिष्पत्त्या च उपकाररूपं ऋणं भवति, तथैव अन्तरपि वैश्वानररूपेण अन्नादिपचनेन च यत् ऋणं मयि निहितं तस्मात् सर्वस्मादपि ऋणात् विमुक्तः अनृणः सन् इन्द्रस्यैव ऋणी भवानि इति ॥

## COMMENTARY—SUMMARY TRANSLATION

I owe a debt to mother earth who bore me. So do I to Agni, the deity, the lord of this earth, which is his home. Cf.: "Agni is the lord of this world, the earth, his home" (Ai. Brāh). I am indebted to him because he produces the grain and other food. Agni helps me in cooking. He is helping me to perform sacrifices. As Vaiśvānara Agni in my bowels he helps the digestion of what I eat. For being free from all that debt, I am indebted to Indra only. I pray to Agni to give me peace and happiness.

## दशमी ऋक् ।

यद् वाऽन्तरिक्षस्य मध्यमस्य
यद् वायोर्ऋणं निहितं मयि ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ् गर्मध्यै ॥ १० ॥

पदपाठ :— यत् । वा । अन्तरिक्षस्य । मध्यमस्य ।
यत् । वायोः । ऋणम् । निऽहितम् । मयि ।
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गर्मध्यै ॥

Indeed, the debt which I owe to the mid-air and to Vāyu of the mid-world is there on me. For being free from that debt, I am indebted to Indra only. I seek him only for peace and knowledge.

## अन्वयभाष्यम् ।

मध्यमस्य लोकस्य अन्तरिक्षस्य अवकाशदानादिना तथा तद्गृहपतेः वायोः श्वासोच्छ्वासादिसाहाय्येन यत् ऋणं मयि निहितम् अस्ति, "वायुर्वै गृहपतिः सोऽन्तरिक्षलोकस्य गृहपतिः" इति च ब्राह्मणम् (ऐ॰ ब्रा.) ॥ तस्य वायोः बहिः वहनेन अन्तः प्राणसन्धारणादिना च यत् ऋणं मयि निहितं भवति, तस्मात् सर्वस्मादपि ऋणात् विमुक्तः सन् अनृणो भूत्वा इन्द्रस्यैव ऋणी भवानि। तदर्थं आत्मकल्याणोपप्राप्तये च तं इन्द्रमेव शरणं व्रजामीति ॥

## COMMENTARY—SUMMARY TRANSLATION

To the mid-world, the Antariksha, I am indebted for its giving me space to live in and to its lord Vāyu. Cf: "Vāyu is indeed the lord. He is the lord of mid-air" ( Ai. Br. ). To him, I am indebted for being able to breathe and live. The debt is on me. For being free from all those debts, I am indebted to Indra only. I pray to Indra only for peace and happiness.

## एकादशी ऋक् ।

यद् वाऽधि दिवो मयि ऋणं निहितं
यदादित्यस्य स्व१र्ज्योतिषः परम् ॥
इन्द्रस्यैव ऋणी भवान्यनृणोऽन्याद्
इन्द्रमेव तं वृणे शङ् गमध्यै ॥ ११ ॥

पदपाठः– यत् । वा । अधि । दिवः । मयि । ऋणम् । निऽहितम् ।
यत् । आदित्यस्य । स्व१रिति स्वः । ज्योतिषः । परम् ॥
इन्द्रस्य । एव । ऋणी । भवानि । अनृणः । अन्यात् ।
इन्द्रम् । एव । तम् । वृणे । शम् । गमध्यै ॥

Indeed, the debt of the sky, and that of Āditya, the Sun, who is a luminary and gives out celestial light, is on me. These debts are indeed great. For being free from those debts, I am indebted to Indra only. I seek Indra only for peace and welfare.

## अन्वयभाष्यम् ।

दिवः उत्तमलोकस्य तथा तद्गृहपतेः आदित्यस्य च मयि यत् ऋणं अधिनिहितं भवति ॥ "असौ वै गृहपतिः सोऽमुष्य लोकस्य गृहपतिः" इति च ब्राह्मणम् (ऐ. ब्रा.) ॥ अमुष्य स्वः प्रकाशकस्य ज्योतिषः दिव्यज्योतिरात्मनः बहिः प्रकाशादिदानेन अन्तः–बुद्धि-नेत्रादिधीन्द्रियप्रेरणया च यत् परं दुरतिक्रम्यं ऋणं निहितमस्ति, तथा नित्यं दीयते चेति, तस्मात् सर्वस्मादपि ऋणात् मुक्तोऽहं अनृणः सन् इन्द्रस्यैव ऋणी भवानि, तदर्थं तं तादृशं इन्द्रमेव शं गमध्यै अनिर्बन्धनसिद्धं शाश्वतं शान्तिमयं कल्याणं प्राप्तुं वृणे शरणं व्रजामि, सर्वात्मना तं परमं इन्द्रं एकमेव समाश्रये इति ॥

## COMMENTARY—SUMMARY TRANSLATION

I am indebted to Dyau, the highest of the worlds and so to its lord Āditya. Cf.: "This indeed is Gṛhapati, the lord. He is the lord of this world ( Dyau )" ( Ai. Br. ). He is a luminary and a celestial light. Externally by giving light etc. and internally by inspiring intellect, eye, etc., which are senses of knowledge ( Dhīndriyāṇi ). That debt is formidable and it is borne every day. For being free from these debts also, I am indebted to Indra only. To get the eternal peace which is free from all conditions, I take resort to Indra only.

## द्वादशी ऋक्

तत् ते भगवन् इन्द्र बृहस्पते
संविदा तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १२ ॥

पदपाठः— तत् । ते । भगऽवन् । इन्द्र । बृहस्पते ।
सम्ऽविदा । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

*The same as the eighth Ṛk of the first Hymn in this Section.*

## अन्वयभाष्यम् ।

अयं चतुर्थ अस्मिन्नेव अनुवाके प्रथमे सूक्ते अष्टमो मन्त्रः पूर्वं व्याख्यातः ।

अत्रेदं किञ्चिद् रहस्यं इन्द्रत्वसिद्धम्—ऋषिभिः ऋङ्मन्त्रमुखेन अभिष्टुतस्य तस्य इन्द्रस्य औपनिषदं परब्रह्मात्मस्वरूपतत्त्वं किञ्चिद् विमृश्यते दिग्दर्शनमात्रार्थम् । तथाहि— "आत्मा वा अरे द्रष्टव्यः" (बृ-उ. २-४-५) इति । द्रष्टव्यत्वेनोपदिष्टस्य सर्वान्तरात्मनः तस्य साक्षात्कारेण सर्वव्यापकत्वं ब्रह्मत्वं इन्द्रस्वरूपतत्त्वं च सिध्यतीति अन्यत्रोपदिष्टं अनुश्रूयते, तद्यथा ऐतरेयोपनिषदि प्रतिज्ञायते— "आत्मा वा इदमेक एवाग्र आसीत् नान्यत् किञ्चन मिषत्" इत्यारभ्य अन्ते— "स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत" इति तस्यैव आत्मनः शरीरेऽन्तः प्रवेशं निर्दिश्य पूर्णब्रह्मात्मपुरुषात्मतां परोक्षेण सञ्ज्ञितां इन्द्रात्मतां च दर्शयति ॥ "स एतमेव पुरुषं ब्रह्मततमपश्यत् इदमदर्शमिती३ न्, तस्मादिदन्द्रो नामेदन्द्रो

हवै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण ” (ऐ. उ. १-३, १३-१४) इति ॥

“इदं दर्शनादित्यौपमन्यवः” इति च यास्कनिरुक्तम् ॥ (नि. १०-८-१०) तथा अन्यत्रापि “इन्धो हवै नामैष योऽयं दक्षिणेऽक्षन् पुरुषो (दृश्यते) तं वा एतमिन्धं सन्तं इन्द्र इत्याचक्षते परोक्षेणैव” (बृ.उ. ४-२-२) इति आत्मनोऽस्य अक्षिपुरुषस्य दृक्सत्त्वस्य स्वयम्प्रकाशस्य परोक्षेण इन्द्रसञ्ज्ञां दर्शयति ।

“इन्धे भूतानीति वा । तद्यदेनं प्राणैः समैन्धन् तदिन्द्रस्येन्द्रत्वमिति विज्ञायते” (नि. १०-८-७-८) इति ॥

एवमेव मधुविद्यायां तस्य ऋङ्मन्त्रोपदिष्टस्य इन्द्रस्य विश्वरूपसत्त्वेन ब्रह्मात्मत्वमनुशास्ति उपनिषन्मुखेन याज्ञवल्क्यः– तथाहि– “इदं वै तन्मधु दध्यङ्ङाथर्वणः अश्विभ्यामुवाच तदेतदृषिः पश्यन् अवोचत्”, “रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रति चक्षणाय ॥ इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश” (ऋ .मं. ६-४७-१८) इति ॥ सोऽयं ऋङ्मन्त्रः बृहदारण्यकोपनिषदि मधुविद्यायामेव अन्ततो व्याख्यातः ॥ “अयं वै हरयः अयं वै दश च शतानि च बहूनि च अनन्तानि च तदेतद् ब्रह्मापूर्वमनपरमनन्तरबाह्यम्, अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्” (बृ. उ. २-५, १९) इति ॥ एवं पारमैश्वर्ययोगसत्त्वपूर्णत्वं परमानन्दरसात्मत्वं च तस्य इन्द्रस्य प्रधानं लक्षणं दर्शयति यास्कः ॥

“इन्दतेर्वा ऐश्वर्यकर्मणः ०” (नि॰ १०-८-११)

“इन्दौ रमते इति वा” (नि. १०-८-७) इति च ॥

अस्मिन्नर्थे प्रधानप्रमाणभूतः ऋङ्मन्त्रवर्णः—

“यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ॥ कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि । इन्द्रायेन्दो परिस्रव” (ऋ॰ मं. ९) इति ॥

तस्य इन्द्रस्य ब्रह्मात्मत्वे स्पष्टार्थकः ऋङ्मन्त्रो भवति ॥ “इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः परू पुरुहूतः ॥ महान् महीभिः शचीभिः” (ऋ. मं. ८-१६-७) इत्यादिसङ्क्षेपः ॥

॥ इति चतुर्थेऽनुवाके चतुर्थं इन्द्रसूक्तम् समाप्तम् ॥

Thus ends the Fourth hymn in the Fourth Section.

## अथ चतुर्थेऽनुवाके पञ्चमं इन्द्रसूक्तम् ।

अनुवाकः ४ । सूक्तम् ५ । ऋचः १-८ । इन्द्रः ।

यः प्रजानन् एक एव अष्टौ, दैवरातो वैश्वामित्रः, इन्द्रः जगती ।

**Now this Indra Sukta, Fifth in Fourth Anuvaka**

**Section IV: Hymn 5: Riks 1-8 - INDRA**

This fifth hymn beginning with 'Yaḥ Prajānan eka eva' contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Indra is the god and Jagatī is the metre.

### अथ प्रथमा ऋक् ।

यः प्रजानन् एकं एवासीत् पुरुषो
यस्मान्नान्यन्न निमिषन्न किं स्वित् ॥
यो वा ब्रह्म परं ब्रह्मणस्पतिर्यः
स सत्योऽयममृतो विश्ववेदाः ॥ १ ॥

पदपाठः – यः । प्रऽजानन् । एकः । एव । आसीत् । पुरुषः ।
यस्मात् । न । अन्यत् । न । निऽमिषत् । न । किम् । स्वित् ॥
यः । वा । ब्रह्म । परम् । ब्रह्मणः । पतिः । यः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

### द्वितीया ऋक् ।

यो वा विश्वमिदं बभूवायं बृहन्
एक एव यो बहुधाऽऽततान ॥
यो विदा सुचित्ती छन्दसा सुवेदाः
स सत्योऽयममृतो विश्ववेदाः ॥ २ ॥

पदपाठः – यः । वा । विश्वम् । इदम् । बभूव । अयम् । बृहन् ।
एकः । एव । यः । बहुधा । आऽततान ॥
यः । विदा । सुऽचित्ती । छन्दसा । सुऽवेदाः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

### तृतीया ऋक् ।

यश्चिद् विश्वमिदं वेद ब्रह्मणाऽयं
य इमा जजान भुवनानि विश्वा ॥
विश्वेषु योऽनु भूतेषु प्रविष्टोऽन्तः
स सत्योऽयममृतो विश्ववेदाः ॥ ३ ॥

पदपाठः – यः । चित् । विश्वम् । इदम् । वेद । ब्रह्मणा । अयम् ।
यः । इमा । जजान । भुवनानि । विश्वा ॥
विश्वेषु । यः । अनु । भूतेषु । प्रऽविष्टः । अन्तरिति ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

### चतुर्थी ऋक् ।

यो विदा ब्रह्म बृहन् यो बृहस्पति-
र्यो जनिता ऋचां यो ऋषिः परः सन् ॥
यो वाचो विश्वस्य जनिता सत्पतिः
स सत्योऽयममृतो विश्ववेदाः ॥ ४ ॥

पदपाठः – यः । विदा । ब्रह्म । बृहन् । यः । बृहस्पतिः ।
यः । जनिता । ऋचाम् । यः । ऋषिः । परः । सन् ॥
यः । वाचः । विश्वस्य । जनिता । सत्ऽपतिः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

### पञ्चमी ऋक् ।

यो विश्वथा ज्योतिरभि द्योततेऽयं
यस्मिन् अन्यन् न रोचते परं किं स्वित् ॥
य एकः सन् सहसेह चेततेऽन्तः
स सत्योऽयममृतो विश्ववेदाः ॥ ५ ॥

पद्पाठः – यः । विश्वऽर्था । ज्योतिः । अभि । द्योतते । अयम् ।
यस्मिन् । अन्यत् । न । रोचते । परम् । किम् । स्वित् ॥
यः । एकः । सन् । सहसा । इह । चेतते । अन्तरिति ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## षष्ठी ऋक् ।

यं वाचा वा वदितुं न विप्रा अरं
यं प्राणैः स्वरितुं प्राणभृतो नालम् ॥
यं मनसा मन्तुं न मनीषिणोऽरं
स सत्योऽयममृतो विश्ववेदाः ॥ ६ ॥

पद्पाठः – यम् । वाचा । वा । वदितुम् । न । विप्राः । अरम् ।
यम् । प्राणैः । स्वरितुम् । प्राणऽभृतः । न । अलम् ॥
यम् । मनसा । मन्तुम् । न । मनीषिणः । अरम् ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## सप्तमी ऋक् ।

यं वा श्रुत्या श्रोत्रिया नानुश्रोतुं
यं चक्षुषा न दृशेऽरं चक्षुष्मन्तः ॥
यं धियाऽनुध्यातुमरं न विपश्चितः
स सत्योऽयममृतो विश्ववेदाः ॥ ७ ॥

पद्पाठः – यम् । वा । श्रुत्या । श्रोत्रियाः । न । अनु । श्रोतुम् ।
यम् । चक्षुषा । न । दृशे । अरम् । चक्षुष्मन्तः ॥
यम् । धिया । अनु । ध्यातुम् । अरम् । न । विपःऽचितः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## अष्टमी ऋक् ।

तत् ते भगवन् इन्द्र ब्रह्मणस्पते
संविदाऽयं तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं सम्परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पद्पाठः – तत् । ते । भगऽवन् । इन्द्र । ब्रह्मणः । पते ।
सम्ऽविदा । अयम् । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । सम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

॥ इति चतुर्थेऽनुवाके पञ्चमं इन्द्रसूक्तम् समाप्तम् ॥

Thus ends the Fifth hymn in the Fourth Section.

---

अथ चतुर्थेऽनुवाके षष्ठं इन्द्रसूक्तम् ।

अनुवाकः ४ । सूक्तम् ६ । ऋचः १-१० । इन्द्रः ।

यो विश्वतः सीं दश, दैवरातो वैश्वामित्रः इन्द्रः, जगती ।

**Now the Indra Sukta, Sixth in Fourth Anuvaka**

**Section IV, Hymn 6, Riks 1 - 10 -** INDRA

This sixth hymn beginning with 'Yo viśvataḥ sīm' contains ten Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Indra is the god and Jagatī is the metre.

## अथ प्रथमा ऋक् ।

यो विश्वतः सीं प्रथमं बभूव स्वयं
यस्मिन्नन्यन् न बभूवेह किंऽस्वित् ॥
य एकः सऽस्तपसा सञ्चिकेतान्तः
स सत्योऽयममृतो विश्ववेदाः ॥ १ ॥

पदपाठः – यः । विश्वतः । सीम् । प्रथमम् । बभूव । स्वयम् ।
यस्मिन् । अन्यत् । न । बभूव । इह । किम् । स्वित् ॥
यः । एकः । सन् । तपसा । सम् । चिकेत । अन्तरिति ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## द्वितीया ऋक् ।

यो वा ज्योतिषा तपस्यन् सहसाऽन्तः
स्वमक्षरं मन्त्रमीमनु स्वरति ॥
य ईं स्वरेण विश्वमिदं समधमत्
स सत्योऽयममृतो विश्ववेदाः ॥ २ ॥

पदपाठः – यः । वा । ज्योतिषा । तपस्यन् । सहसा । अन्तरिति ।
स्वम् । अक्षरम् । मन्त्रम् । ईम् इति । अनु । स्वरति ॥
यः । ईम् इति । स्वरेण । विश्वम् । इदम् । सम् । अधमत् ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## तृतीया ऋक् ।

य ईं स्वरन्तं गुह्यमेवानु स्वरन्
ओमिति स्वरां वाचं समुच्चरति ॥
यो वाऽक्षरं सदु ब्रह्म परमं
स सत्योऽयममृतो विश्ववेदाः ॥ ३ ॥

पदपाठः – यः । ईम् इति । स्वरन्तम् । गुह्यम् । एव । अनु । स्वरन् ।
ओम् इति । इति । स्वराम् । वाचम् । सम् । उत्ऽचरति ॥
यः । वा । अक्षरम् । सत् । ऊम् इति । ब्रह्म । परमम् ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## चतुर्थी ऋक् ।

य ईं स्वरेण सं स्वरं छन्दांस्यनु
स्वरत्यृचो यजूंषि च सामानि ॥
यो वा विश्वं छादयतीह च्छन्दोभिः
स सत्योऽयममृतो विश्ववेदाः ॥ ४ ॥

पदपाठः – यः । ईम् इति । स्वरेण । सम्ऽस्वरन् । छन्दांसि । अनु ।
स्वरति । ऋचः । यजूंषि । च । सामानि ॥
यः । वा । विश्वम् । छादयति । इह । छन्दःऽभिः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## पञ्चमी ऋक् ।

य ईं स्वरंस्तिस्रो व्याहरतीह
भूर्भुवः स्व१र्वाचो य उ समुच्छ्वसन् ॥
यो मिमाय त्रिधेद् भुवनं वाग्भिः
स सत्योऽयममृतो विश्ववेदाः ॥ ५ ॥

पदपाठः – यः । ईम् इति । स्वरन् । तिस्रः । विऽआहरति । इह ।
भूः । भुवः । स्व१रिति स्वः । वाचः । यः । ऊम् इति । सम् । उत्ऽश्वसन् ॥
यः । मिमाय । त्रिधा । इत् । भुवनम् । वाग्भिः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## षष्ठी ऋक् ।

यो वा व्याहृतिभिरेवेदं तिसृभिः
पृथिवीं चान्तरिक्षं च दिवं भूयः ॥
य इमानि त्री भुवनानि वि ममे
स सत्योऽयममृतो विश्ववेदाः ॥ ६ ॥

पद्पाठः – यः । वा । व्याहृतिऽभिः । एव । इदम् । तिसृऽभिः ।
पृथिवीम् । च । अन्तरिक्षम् । च । दिवम् । भूयः ॥
यः । इमानि । त्री । भुवनानि । वि । ममे ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## सप्तमी ऋक् ।

यो अग्निं वायुमादित्यं च चित्तिभि-
र्वाग्भिर्व्याहृतिभिर्निदधे पदानि ॥
ज्योतिष्पदानि यो भुवनेष्वधीन्द्रः
स सत्योऽयममृतो विश्ववेदाः ॥ ७ ॥

पद्पाठः – यः । अग्निम् । वायुम् । आदित्यम् । च । चित्तिऽभिः ।
वाग्भिः । व्याहृतिऽभिः । नि । दधे । पदानि ॥
ज्योतिष्पदानि । यः । भुवनेषु । अधि । इन्द्रः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## अष्टमी ऋक् ।

यो वा विद्युतः परः सन् सहसेन्द्रो
विद्युत एवा जजान विश्वमेतत् ॥
यो भूतानि संस्कुरुतेऽज्योतिषाऽन्तः
स सत्योऽयममृतो विश्ववेदाः ॥ ८ ॥

पद्पाठः – यः । वा । विद्युतः । परः । सन् । सहसा । इन्द्रः ।
विऽद्युतः । एव । आ । जजान । विश्वम् । एतत् ॥
यः । भूतानि । सम्ऽकुरुते । ज्योतिषा । अन्तरिति ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## नवमी ऋक् ।

यः प्रजानन् अजन्यो यः सन् अमर्त्यो
यो विश्वथा राजतेऽन्तर्य एकः ॥
यो वा स्वराट् सम्राड् विराड् विभुः प्रभुः
स सत्योऽयममृतो विश्ववेदाः ॥ ९ ॥

पद्पाठः – यः । प्रऽजानन् । अजन्यः । यः । सन् । अमर्त्यः ।
यः । विश्वऽथा । राजते । अन्तरिति । यः । एकः ॥
यः । वा । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## दशमी ऋक् ।

तत् ते भगवन् इन्द्र ब्रह्मणस्पते-
ऽयं संविदा तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं सम्परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पद्पाठः – तत् । ते । भगऽवन् । इन्द्र । ब्रह्मणः । पते ।
अयम् । सम्ऽविदा । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । सम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

॥ इति चतुर्थेऽनुवाके षष्ठं इन्द्रसूक्तम् समाप्तम् ॥

Thus ends the Sixth hymn in the Fourth Section.

अत्रायं विशिष्टो विषयः कश्चित्—

"यो वा सन्नेक एवासीत् पुरुषोऽयम्" इति अष्टर्चं एकं सूक्तम्, "यो विश्वतः सीं प्रथमं बभूवायम्" इति दशर्चं अन्यत् सूक्तम्, तदिदं सूक्तद्वयं छन्दोदर्शनसमये द्विविधमनुश्रुतं द्विवारम्— किञ्चित् पाठभेदेन, तत्र प्रथमतः प्रत्येकस्मिन् मन्त्रे उभयोरपि

सूक्तयोः अन्तिमं मन्त्रं विना अन्तिमे चतुर्थे पादे " स सत्योऽयममृतो विश्ववेदाः " इति विद्यते, अत्रेदं आत्मसूक्तेन समानं तदनुश्रवणम् ॥

तत्रापि उभयोरपि सूक्तयोः अन्तिमे मन्त्रे " तत् ते भगवन् इन्द्र ब्रह्मणस्पते " इति इन्द्रशब्दस्य श्रवणात् तत इन्द्रदेवताकत्वेन मत्वा सङ्गृहीतं इन्द्रानुवाके सूक्तद्वयं तदन्ततः ॥

अथ तथैव पुनः अन्यस्मिन् समये तयोः सूक्तयोः मध्ये " यो वा सन्नेक एवासीत् पुरुषोऽयम् " इति प्रथमे सूक्तेप्रत्येकस्मिन् मन्त्रे अन्तिमे पादे " तपसा धीभिः पुरुष तं प्र पद्ये " इति श्रुतम्, द्वितीये सूक्ते तु "यो विश्वतः सीं प्रथमं बभूवायम् " इत्यत्र सः चतुर्थः पादः " परमः परस्मात् पूरुषः स पूर्णः " इति विशिष्टरूपेण अनुश्रुतः, तस्मात् तदिदं सूक्तद्वयं तु पुरुषशब्दयोगात् पुरुषानुवाके सङ्गृहीतम्, अन्यः सर्वोऽपि पाठक्रमः उभयत्रापि समानरूप एव दृश्यते ॥

अनयोः सूक्तयोः अन्वयभाष्यं तु पुरुषानुवाके एव एकत्र विरचितमस्ति, तथैव इन्द्रसूक्तेऽपि व्याख्यातुं शक्यं युक्तं चेति प्रतीयते, तदपि इन्द्रतत्त्वपरतयैवेति विशेषः, वस्तुतस्तु— अत्र " ब्रह्मणस्पतिः, इन्द्रः, आत्मा, पुरुषः " इति च एतैः पृथगभिधानैः तत्तदर्थपरत्वमेव विशिष्यते नामानुरूपेण तत्त्वेनेति स्वतः सिद्धमेव ॥

मूलतत्त्वतः तेषामेतेषां ब्रह्मणस्पतिप्रभृतीनां चतुर्णामपि दैवतानां एकरूपता — समानात्मता — सर्वात्मता — सम्पूर्णता च वस्तुसिद्धेति प्रतिज्ञायते, तथाऽपि तेषु तेषु मन्त्रेषु सूक्तेषु च तत्तदभिधानपरतया तत्तद्देवतात्मकवस्तुतत्त्वस्य च वैशिष्ट्येन तत्तदर्थ-व्याख्यानस्य औचित्यात् यथासङ्गतं किञ्चिदुपन्यस्तं यथामति तद्भाष्यमुखेनेति वेदितव्यम् इति सङ्क्षेपतो विज्ञप्तिः ॥

॥ इति ऐन्द्रः चतुर्थोऽनुवाकः सम्पूर्णः ॥

## *NOTE ON INDRA*

( The following Note precedes the fifth Hymn in the Sanskrit text but it is given here at the end of this Section as the whole Section is for Indra and the Note applies to the whole Section. —Translator ).

This is the secret here about Indra:

Indra, who is praised all-round by the seers through the Ṛks is described in the Upanishads as Parabrahma Himself and that matter is discussed here to indicate the way of the Upanishads in dealing with Indra.

The Bṛhadāraṇyaka ( II-4-5 and IV-5-6 ) says, " Oh! Maitreyī, Ātman indeed is to be realised." Thus he the indwelling Soul of all is described as one who can be realised. By realising him, his all-pervasiveness, Brahmatva (derived from the root word 'Brah' to grow) and the characteristic nature of Indra are confirmed. This kind of description of Brahma is found elsewhere too: Cf. Ai. Up. " In the beginning Ātman was all alone and then

nothing else vibrated or bloomed." Then his entry into the individual's body is also indicated saying: "He split only the central part of the head and entered the body through it." This is followed by a statement indicating that the Infinite Brahma is Indra himself. Thus, "He (the Ṛshi) saw this Purusha (the Self) as Brahma Himself saying 'I realised Him'." Therefore Indra is the name which prevailed. Indra means, "This was realised." Thus they call the Ātman, the realised One as Indra, from the view point of indirect perception (Paroksha) (Ai. Up. 1-3, 13-14). And again, the followers of Upamanyu say, "Indra is so called because of his being realised" (Nirukta 10-8-10). Elsewhere, it is said, "Indra is he, indeed, by name, who is the Purusha in the right eye. They call Him Indha (i. e. self-luminous) as Indra" (Bṛ. Up. IV-2-2). So, Indra is the self-luminous power, the power of sight of the Purusha in the eye He is therefore Indra by name from the view point of indirect perception (Paroksha).

He, Indra, illumines the elements. This indwelling soul (Jīvātmā) was also illumined by the vital airs. And so, Indra's 'indratva' (i. e. the characteristic of the nature of Indra) is confirmed (N. 10-8).

Again, it is said in Madhuvidyā, referred to in a Ṛk, that Indra is also capable of omnifarious manifestations, and so the Upanishads also say that Indra is Brahma. Cf. Dadhyam, the seer, the son of Atharvaṇa told the twins (Aśvins) this art of Madhu (i. e. Madhuvidyā). The Seer Gārga knowing this principle said in a Ṛk, "Indra went in pursuit of every one of the forms in the universe and assumed all those very forms. Each of the forms therefore is a means to know him. That Indra shines in manifold forms on account of his Māyā Śakti. His rays of light always accompany him, ten hundreds, i. e. by thousands" (Ṛg. VI, 47-18). Again, this Ṛk has been explained thus in the Bṛ. Upanishad, "This Soul is his ray; his ray has become ten hundred, thousands, many and infinite, that is Brahma. He is beginningless, endless, neither internal nor external. This Ātman is Brahma who experiences all. This is the precept, Anuśāsana" (Bṛ. Up. II, 5-19). Further, the word Indra is derived from the root 'Idi', paramaiśvarya, meaning supreme wealth of every kind. Or 'Indau ramate' meaning Indra is one who is enjoying the very essence of supreme bliss, according to Yāska (Nirukta 10-8-7). And a Ṛk confirms this principle of the Upanishads. Cf.: "Indra is Brahma, Indra is Seer, i.e. Ṛshi, Indra is manifold, and is invoked widely (Puruhūtaḥ). He is superb by his powers which are infinite" (Ṛg. VIII, 16-7).

This about Indra.

Now another note on two Hymns which appear immediately after the fourth Hymn.

The hymn beginning with "yaḥ prajānan eka eva āsīt" containing eight Ṛks and the hymn beginning with "Yo Viśvataḥ sīm" consisting of

ten Ṛks were heard by Daivarāta twice in two different versions with a slight variation. When heard for the first time with the exception of the last mantra of both the hymns the last quarter of each one of the mantras of both the hymns ends with " sa satyoyamamṛto viśvavedāḥ " which is the same as found at the end of each of the mantras of the Ātma-Sūkta. In the last mantras of both these hymns is found the line " Tat te Bhagavan Indra Brahmaṇaspate. " In this part of the mantra, because of the use of the word Indra, both these hymns were considered to belong to the section of Indra and were so included at the end of that Section. And again, when heard for the second time, the last quarter of each of the first Ṛks of the two hymns beginning with "Yaḥ prajānan eka eva āsīt" it was heard thus: "Tapasā dhībhiḥ purusham tam prapadye." The last quarter of each of the Ṛks of the second hymn, "Yo viśvataḥ sīm" was heard in a characteristic manner thus: " Paramaḥ parasmāt purushaḥ sa pūrṇaḥ. " Therefore because of the use of the word Purusha, both these hymns were considered to belong to the Section of Purusha and so were included in that Section. The reading in the remaining parts of each one of the Ṛks of both the hymns is the same.

These two hymns have been commented upon only in the Section on Purusha. Likewise, in the Section on Indra also, a similar commentary in respect of these two hymns is considered proper and possible with reference to Indra. In fact, the Section, viz. of Brahmaṇaspati, Indra, Ātman and Pususha being distinctly known as such by their names, are ascribed specially to these respective gods. We opine that it is self-evident that fundamentally these gods have the same form, equal in nature, all pervasive and all-perfect. Even so, it is to be understood that the mantras and the hymns ascribed to various gods by different names have been rightly commented upon with reference to the characteristic principles of the respective gods.

Thus ends the Fourth Section dedicated to Indra.

अथ पञ्चमः आत्मानुवाकः ।

अनुवाकः ५ । सूक्तम् १ । ऋचः १-१० । आत्मा ।

प्रथमं आत्मसूक्तम् ।

अयमसौ पुरुषः दश, दैवरातो वैश्वामित्रः, आत्मा, जगती ।

**Now this the Fifth Section ( Anuvaka ) concerns Atma**
**Section V: Hymn 1: Riks 1-10 - ĀTMĀ**

This Hymn beginning with "Ayamasau purusho Brahmaṇaspatiḥ" contains ten Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Ātmā is the god and the metre is Jagatī.

अथ प्रथमा ऋक् ।

अयमसौ पुरुषो ब्रह्मणस्पति-
रयं न आत्मा परः सत्पतिर्ऋषिः ॥
अयं विश्वानि भुवनानि तपसा-
ऽभि चष्टे चेतसाऽस्मिन् निहितानि ॥ १ ॥

पद्पाठः – अयम् । असौ । पुरुषः । ब्रह्मणः । पतिः ।
अयम् । नः । आत्मा । परः । सत्ऽपतिः । ऋषिः ॥
अयम् । विश्वानि । भुवनानि । तपसा ।
अभिऽचष्टे । चेतसा । अस्मिन् । निऽहितानि ॥

This Ātmā is Brahmaṇspati, Purusha ( the Supreme Person ). This Ātmā is the Paramātmā, the Lord of all Existence, the Seer. He sees all the worlds contained in him by the power of concentration and by his power to know all.

अन्वयभाष्यम् ।

अयं अन्तरात्मा अपरोक्षतः सिद्धः सर्वान्तरः असौ सविता सर्वलोकप्रत्यक्षः पुरुषः पुरुषसत्त्वः, ब्रह्मणः प्रत्यक्षब्रह्मरूपायाः वाचः पतिः अधिष्ठाता बाह्यः दिव्यः देवतात्मा आन्तरो मुख्यप्राणस्वरूपः, अयं प्रत्यक्सत्त्वः सः परोक्षसिद्धः परः विश्वस्मात् श्रेष्ठः, आत्मा केवलं चैतन्यसत्त्वः सत्पतिः सत्स्वरूपः, सतः अस्य विश्वस्य अधिपतिः, ऋषिः द्रष्टा ज्ञान-दृक्छक्तिसम्पन्नः विश्वसाक्षीति भावः ॥

सोऽयं तपसा निर्विषयसत्त्वेन केवलेन विमर्शेन चेतसा मनसा सचेतनेन सम्यग्ज्ञानेन इमानि विश्वानि अभि अभितः बहिः चष्टे पश्यति, तथा तानि च अन्तः अस्मिन् आत्मनि

निहितानि द्रष्टरि प्रतिष्ठितानि अन्तर्दृशा पश्यति साक्षात्करोति इति यावत्, एवमिह "प्रत्यक्ष–परोक्ष–अपरोक्षतत्त्वानां सामरस्येन बाह्याभ्यन्तरपरवस्तुसमन्वयेन स्वानुभूतं तत्त्वं अनेन सूक्तेन अनुवाकेन च ऋषिराश्रावयति छन्दोमुखेन ॥

अत्र "स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः।" (भृ. उ. ३–१०–४) "योऽसावादित्ये पुरुषः सोऽसावहम्" (वा॰ सं॰ ४०–१६) "योऽसावसौ पुरुषः सोऽहमस्मि" (ई. उ. मं. १६) इत्यादीनि औपनिषदानि च मन्त्रब्राह्मणवचनानि प्रमाणानि भवन्ति ॥ एवं वेदशास्त्राद्युपदिष्टानि सर्वाण्यपि वस्तुतत्त्वानि आध्यात्मिकया निष्ठया अन्तर्दृशा स्वानुभूत्यैव प्रत्येतव्यानि भवन्तीति ॥

## COMMENTARY—SUMMARY TRANSLATION

This is the Inner Soul who is in all and is realisable. This Savitā ( the sun ) who is visible to all is purusha, a personality. This is Brahmaṇaspati, the lord of Vāk; he is the god outside our bodies but is also the chief vital force within. This is the inner view. This is he, whose existence is proved indirectly also. He is above all. He is Ātmā, the pure spiritual energy. He is Existence itself, and is the lord of all existence. He is a seer, all-seeing witness. He who is here as Ātmā, with the help of his tapas ( power to concentrate ) and the help of his mind which can take purely an objective view sees all worlds which are outside. He sees them within himself also with his insight. Thus, directly, indirectly and by inward realisation and by equating the things within and without, the seer expresses by this hymn, the truth of existence which he has experienced.

Cf: "He who is in the individual and who is ( in the orb of ) Āditya are identical" ( Tait. Up. III, 10-4 ). "The Purusha in Āditya is this I" ( Yaju. Sam ). "Who is this Purusha in the form of Āditya is myself" ( Iś. Up. 16).

So the statement in this mantra has support in Brāhmaṇa and Upanishad. Thus, the truth stated in the Vedas and Upanishads is to be interpreted spiritually and experienced by individual insight. Truth is a matter for realisation.

### द्वितीया ऋक् ।

य इमा विश्वा भुवनानि प्रजज्ञे
य आत्मा मर्म बभूव सोऽन्तरः ॥
अयं विश्वानि चेतसाऽभिचष्टे-
ऽयं तपसा यतते शङ्ग गर्भध्ये ॥ २ ॥

पद्पाठः – यः । इमा । विश्वा । भुवनानि । प्रऽजज्ञे ।
यः । आत्मा । मम । बभूव । सः । अन्तरः ॥
अयम् । विश्वानि । चेतसा । अभि । चष्टे ।
अयम् । तपसा । यतते । शम् । गमध्यै ॥

He created all these worlds ( out of himself ). He became my inner soul also. He sees as witness all the worlds with his mind. In the individual, he tries to attain beatitude through tapas, the power of concentration.

## अन्वयभाष्यम् ।

यः परमः पुरुषः विश्वानि इमानि प्रत्यक्षसत्त्वानि भुवनानि प्रजज्ञे जनयामास आत्मनः सकाशात् चेतनात् तान्येतानि आविश्चकारेति यावत्, एतेन विश्वरूपेण स्वयं आविर्बभूवेति तदभिप्रायः ॥

यः आत्मा चेतनः सः मम आन्तरः प्रत्यङ् बभूव,— सोऽयं अन्तरात्मा चेतसा मनसा सचेतनेन सहज्ञप्तिसत्त्वेन तानि इमानि विश्वानि भूतानि विश्वथा सर्वप्रकारेण अभि सर्वतः चष्टे पश्यति साक्षिरूपः सन् प्रत्यक्षीकरोति, सोऽयं शं परं शाश्वतं आत्मनिष्ठाशान्तिसुखसत्त्वं गमध्यै अधिगन्तुं तपसा केवलेन विमर्शन यतते संविदा सर्वदा यत्नशीलः स्वभावत एवास्तीति ॥ अस्मिन् अर्थे कुत्सार्षेयः ऋङ्मन्त्रवर्णोऽपि भवति "वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभि श्रीः ॥ इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण" (ऋ. मं. १–९८–१) इति, "आ ते भद्रायां सुमतौ यतेम" (ऋ. मं. ६–१–१०) इति च ॥

## COMMENTARY—SUMMARY TRANSLATION

He is the supreme Purusha, who created these visible worlds, with his own energy and out of himself. He manifested himself as all these worlds. He became my indwelling soul also. The same inner Ātmā sees with his ever-active mind, these worlds in all their varied forms. He is the all-seeing Purusha and sees them all vividly ( pratyakshīkaroti ). He who is inside me, tries by pure and simple deliberation, to attain supreme and eternal peace. Cf: " He, Vaiśvānara, manifested here, sees the universe and he attempts to unite with Sūrya " ( Ṛg. I, 98–1 ), " Let me try to attain your auspicious wisdom " ( Ṛg. VI, 1–10 ).

## तृतीया ऋक् ।

अयं विश्ववेदाः पुरुषोऽयं परो-
ऽयं ब्रह्मणा तपस्यत्यन्वजस्रम् ॥

अयं धीभिरभि सन्धत्ते तद् बृहद्-
अयं वाचाऽनुवक्ति ब्रह्म सत्यम् ॥ ३ ॥

पदपाठः – अयम् । विश्वऽवेदाः । पुरुषः । अयम् । परः ।
अयम् । ब्रह्मणा । तपस्यति । अनु । अजस्रम् ॥
अयम् । धीभिः । अभि । सम् । धत्ते । तत् । बृहत् ।
अयम् । वाचा । अनु । वक्ति । ब्रह्म । सत्यम् ॥

This Ātmā is the Purusha; Ātmā is omniscient. He is supreme. He practises tapas (austerity) constantly by repeating mantras to attain Brahma. Through all the activities of his intellect, he is in constant touch with Brahma, the great one. He expresses Brahma, the ever existing reality by his words.

## अन्वयभाष्यम् ।

अयं अन्तरात्मा विश्ववेदाः विश्ववित् सर्वभौतिक–भौवन–लौकिकादिज्ञानयुक्तः सर्ववैदिकतत्त्वज्ञानसहितः परः श्रेष्ठः सर्वेन्द्रियेभ्यः परतरः पुरुषः, अयम् ब्रह्मणा ब्रह्मार्थं ब्रह्मतत्त्वज्ञानार्थम्, अत्र इयं हेतौ तृतीया विभक्तिः "ब्रह्मणा" इति, तेन "फलमपीह हेतुः" इति न्यायात् ब्रह्मतत्त्वज्ञानार्थं इति अर्थो लभ्यते, तस्यैव सर्वश्रेष्ठफलरूपत्वात् ॥ तथैव ब्रह्मणा मन्त्रेण सर्वार्थसिद्धिहेतुभूतेन तन्मन्त्रयोगेन वा अजस्रं अखण्डधारणया आत्मानुसन्धानरूपया अनु तपस्यति अनुपदं तपश्चरति, सोऽयं आत्मा तथा तपस्यन् धीभिः सर्वैरपि ज्ञान-भाव-कर्मेन्द्रियैः सहसम्मिलितैः अभि अभितः सर्वप्रकारेण तत् परोक्षं बृहत् महत्तरं ब्रह्म सन्धत्ते धारयति तदेकलक्ष्येण निष्ठया धारणया च सर्वेन्द्रियाणि निर्विषयतया सन्दधाति, सर्वैः तैः बुद्ध्यादिभिः इन्द्रियैः अन्तर्बहिरपि यद् यद् जानाति भावयति यद् यत्करोति च तत्र सर्वत्रापि सर्वसाक्षितया स्थितं ब्रह्मैव धिया अनुसन्धत्ते इति भावः ॥

अयं आत्मा वाचा परया अन्तस्स्फुरणरूपया तत् परं सत्यं सर्वत्रापि सत्तया अनुस्यूतं ब्रह्मवस्तु अनु अनुलक्ष्य वैखर्या अपि तत्परं ब्रह्मैव अनुवदति, अयं यद् यद् वाचा वदति तत् सर्वमपि तस्य परब्रह्मण एव अनु वचनमिति भावः ॥

तदिदं साक्षात्कृतात्मनः ज्ञानयज्ञं तथा ज्ञानयमं सर्वं व्यवहारं च तथा तदभ्यासादिप्रक्रियानुक्रमं च ऋषिरनुश्रावयति अनेन छन्दोमुखेनेति ॥

### COMMENTARY—SUMMARY TRANSLATION

This inner soul or spirit is omniscient. He is endowed with all the material as well as spiritual and Vedic knowledge. He is a 'purusha' who

is beyond the reach of the senses and hence the higest. This Ātmā in order to attain Brahma, as per dictum "the result is in the cause," constantly repeats the mantra, and continuously maintains contact with Brahma and practises tapas all the time. Thus, through his intellect, his thoughts, his functions and through all his senses and in all respects, he keeps in constant touch with that invisible Brahma. He holds Him within himself by concentrating every activity of every sense of his, on Brahma. Therefore his intellect is constantly in touch with Brahma, who is the witness of everything everywhere. This inner soul, by its Vāk, which flashes within, expresses in words Brahma, the Supreme, indicating the supreme truth, which exists everywhere all the time. Whatever this soul speaks is a reaffirmation of Brahma, the supreme. All this is the repeated concentration on the supreme knowledge (Jñāna-yajña) by a realised soul. All his activities are like sacrifices, leading to Brahma. Thus the seer teaches us through this mantra the procedure of Jñāna-yajña.

## चतुर्थी ऋक् ।

अयं हृदयं यदन्तः स्वरन् ब्रह्म
श्रोत्रेणानु शृणोति ब्रह्मणाऽऽत्मनि ॥
अयं श्रोत्रेण तच्छ्रुतं ब्रह्मणाऽन्त-
रयं चक्षुषाऽन्तरभिचष्टे ज्योतिः ॥ ४ ॥

पदपाठः – अयम् । हृदयम् । यत् । अन्तरिति । स्वरन् । ब्रह्म ।
श्रोत्रेण । अनु । शृणोति । ब्रह्मणा । आत्मनि ॥
अयम् । श्रोत्रेण । तत् । श्रुतम् । ब्रह्मणा । अन्तरिति ।
अयम् । चक्षुषा । अन्तरिति । अभिऽचष्टे । ज्योतिः ॥

This soul dwelling in the inmost heart gives expression to Brahma. The soul itself hears the Brahma with its own ears in the form of Brahma. That Brahma which is heard by the ears is seen as the eternal light or flame by the inner eye.

## अन्वयभाष्यम् ।

अयं आत्मा हृदयं हृदयसञ्ज्ञकः हृदयसत्त्वकः सञ्ज्ञानादिमूलभूतत्वात्, तस्य हृदयस्यैव सर्वेन्द्रियविषयवृत्त्युरुपसंहारास्पदीभूतत्वात्, हृदयात्मकः हृदि प्रतिष्ठितत्वात् । "हृदि ह्येष आत्मा" (प्रश्नो. ३, ६) इति च ब्राह्मणम् ॥ तन्निर्वचनमपि एवं भवति,—

"हृद्ययमिति तस्माद् हृदयम्" ( छा. उ. ८–३–३ ) इति यच्च हृदयं ब्रह्म ब्रह्मात्मकं सत् सर्वभूताधिष्ठानं तत्प्रतिष्ठाश्रयीभूतत्वात् ॥ "हृदयं वै सम्राट् सर्वेषां भूतानामायतनम्, हृदयं वै सम्राट् सर्वेषां भूतानां प्रतिष्ठा, हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति, हृदयं वै सम्राट् परमं ब्रह्म" ( बृ. उ. ४–१–७ ) इति च औपनिषदं ब्राह्मणम्, अयं आत्मा हृदयस्वरूपः सन् स्वयं अन्तः हृदये स्वस्मिन् यत् परं ब्रह्म अनुसरति, अक्षरब्रह्मरूपया परया वाचा अनाहतनादरूपेण च, तथा स्वरन् स्वयं तद् ब्रह्मवस्तु अनुलक्ष्य ब्रह्मणा मन्त्रेण सह तन्मुखेन, बृहता व्यापकेन व्योमसत्त्वेन दिक्स्वरूपेण ब्रह्मात्मकेनैव अन्तः श्रोत्रेण आत्मनः मिथुनीभूतेन आत्मनि अन्तः शृणोति, "श्रोत्रं चात्मा चाश्विनः" (ऐ. ब्रा.) इति च ब्राह्मणम् ॥ "उत नो ब्रह्मन्नविष इति शंसति श्रोत्रं वै ब्रह्म श्रोत्रेण हि ब्रह्म शृणोति" (ऐ. ब्रा.) इति च ब्राह्मणम् ॥ एतेन "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" (बृ. उ. ४–५–६) इत्युपदिष्टं आत्मश्रावणं हि प्रतिस्फुरणं ब्रह्मैव अनुस्वरतः आत्मनः अन्तःश्रवणमेव भवितुमर्हति, न तु गुरूपदिष्टस्य उपनिषद्वाक्यस्य बहिःश्रावणमात्रं इति सूचितं भवति ॥

सोऽयं आत्मा स्वस्मिन् अन्तः स्वरद् ब्रह्म अनुशृण्वन् पुनः ब्रह्मणा मन्त्रमुखेन च श्रोत्रेण च अन्तः श्रुतं तद् ब्रह्मैव अनुलक्ष्य तदनुश्रावणेन च तन्मयः सन् अयं आत्मा अन्तः चक्षुषा प्रत्यग्दृशा दिव्यदृष्ट्या ब्रह्मरूपेण प्रज्ञानेत्रेण अन्तः हृदये ज्योतिः स्वयम्प्रकाशकं ज्योतिरात्मकं साक्षिरूपं तत् परं ब्रह्म अभि अभितः अन्तर्बहिरपि सामरस्येन चष्टे पश्यति, अत्र सम्यग्ज्ञानेन तत् परं ज्योतिरात्मकं वस्तु साक्षात्करोतीति भावः ॥ अत्र तद्दर्शने साधनभूतं चक्षुरपि ब्रह्म, तथाऽनुश्रवणात्, "चक्षुर्वै ब्रह्म, चक्षुर्वै सत्यम्," "यच्चक्षुषा पश्यति तत् सत्यं भवति" ( बृ. उ. ४–१–४ ) इति च औपनिषदं वचनम्, "अथ यदतः परो दिवो ज्योतिर्दीप्यते०, तद् यदिदमन्तः पुरुषे ज्योतिः, तदेतद् दृष्टं च श्रुतं चेत्युपासीत, चक्षुष्यः श्रुतो भवति" ( छां. उ. ३–१३–७ ) इति च ॥

तदिदं "ज्योतिश्चरणाभिधानात्" ( ब्र. सू. १–१–२४ ) इत्यस्मिन्नधिकरणे मीमांसितमनुसन्धेयम् ॥

अस्मिन् अर्थे ऋङ्मन्त्र एवास्य सर्वस्यापि मूलं प्रमाणम्। "भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः" ( ऋ. १–७९–८ ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Ātmā is in the heart. It is sometimes called 'heart.' Heart is the very seat of the soul. It is the seat of the soul because it is the place from where all the senses which pursue their objects draw their strength. He is the heart itself, because the Ātmā is established in the heart. Cf: "This Ātmā is in the heart" ( Praś. Up. III-6 ). The derivation of the word 'hṛdaya' also points that way. Cf: "This is in heart and so, it is heart" ( Chh. Up.

VIII-3-3 ). The heart is Brahma. It is the place where all elements are located; it is the base which shelters all energy. Cf : "It is the heart indeed, the overlord, that is the location of all elements. Heart is, indeed, the overlord, the base of all elements. It is the heart, indeed, which is the overlord, in which all the elements are established. So, heart is, indeed, overlord, Brahma the Supreme ( Bṛ. Up. IV-1-7 ).

This Ātmā ( individual soul ) is in the very heart. So, the soul in the heart makes a sound in the form of Vāk indicating the imperishable Brahma. Vāk is in the form of uncaused sound. The soul hears the sound indicating the Brahma, with its internal ears which contain the element of sky ( Ākāśa Sattva ). Ākāśa includes all the eight directions. And so they too are one with the Ātmā. Cf: ''Ear and Ātmā are the Aśvins" ( Ait. Brāh. ). Again, " Ear is indeed Brahma and so it is through the ear that one hears Brahma " ( Ait. Brāh. ).

So, the injunction, "Lo! Ātmā is to be seen and heard" (Bṛ. Up. III-4-5, 6 ), indicates hearing by the inner ear. Further, it is indicated that it is not merely external hearing of the truth stated by the Upanishads, and taught by the teacher. This Ātmā (the individual soul) having heard the Brahma internally and having concentrated on Him through the repetition of the mantra becomes full of that sound; he then sees with his internal eye, the eye of knowledge, the divine insight, Brahma Himself; he sees within his heart the Light which illumines all. The soul sees the Light inwardly and also outwardly by identity. That means, with his sound knowledge, the soul realises the Light supreme. Cf: "Eye indeed is Brahma; Eye indeed is truth"; "Whatever one sees with the eyes is Truth" (Bṛ. Up. 4-1-4). Again, " And the light which shines above in the sky and beyond, is the light within the individual. This is both seen and heard and so it is the one to be meditated upon. That which is seen becomes also audible (Chh. Up. 3-13-7). Refer to " Jyotiḥ charaṇābhidhānāt, " i. e., light is mentioned as having four feet, it is Brahma ( Br. Sū. 1-1-24 ). The main reference is to the mantra, " Let us hear, oh ! gods, what is auspicious and let us see with our own eyes what is auspicious in all sacrifices " ( Ṛg. I-79-8 ).

पञ्चमी ऋक् ।

अयं वाचाऽऽदिशति ब्रह्म ब्रह्मणा-
ऽयं वाचं देवीं ब्रह्मणे दिशति ॥
संविद्वाऽऽत्मानमात्मने आदिशती-
मयं जायां पतिरश्नोति वाचम् ॥ ५ ॥

पदपाठः – अयम् । वाचा । आऽदिशति । ब्रह्म । ब्रह्मणा ।
अयम् । वाचम् । देवीम् । ब्रह्मणे । दिशति ॥
सम्ऽविदा । आत्मानम् । आत्मने । आऽदिशतीम् ।
अयम् । जायाम् । पतिः । अश्नोति । वाचम् ॥

This individual soul indicates the Brahma by words in the form of mantra. The soul then offers the heavenly goddess of speech ( mantra ) to Brahma. The soul with all the intelligence at his command offers the mantra to the Supreme soul. Brahma accepts that mantra as his own just as a husband accepts his wife.

## अन्वयभाष्यम् ।

अयं आत्मा अन्तः पुरुषः साक्षात्कृतात्मा च वाचा परया स्वार्धात्मिकया स्वस्य वाचकशक्तिरूपया सह ब्रह्मणा मन्त्रमुखेन च ब्रह्म स्वानुभूतं शब्दमुखेन सामान्यतः विदितं वा तत् परं वस्तु दिशति परस्मै प्रतिबोधयति, तथा सः अयं आत्मा वाचं तां स्वार्थविबोधिनीं देवीं दिव्यां ब्रह्ममयीं ब्रह्मणे परस्मै ब्रह्मात्मने दिशति दर्शयति स्वात्मसमर्पणपरां समर्पयति, ब्रह्मात्मकृते निजां वाग्रूपां तनूं समर्पयतीति भावः, एवं संविदा ज्ञानेन आत्मानं स्वं पुरुषं तथा स्वां वाचं च आत्मने परस्मै पुरुषाय दिशतीं समर्पयन्तीं, अथवा संविदा सम्यग्ज्ञानेन इमं अन्तरात्मानं स्वं पतिं आत्मने परस्मै ब्रह्मात्मने निवेदयन्तीं तां तादृशीं जायां स्वार्धात्मिकां वाचं अयं आत्मा पतिः पुरुषस्थानीयः अश्नोति व्याप्नोति पतिरिव जायां स्वीकुरुते स्वात्मीयामेव भावयति, तथा तस्यां स्वस्त्रीभूतायां ज्ञानेच्छाकृतिचेतनाशक्तिरूपायां वाचि स्वयं प्रज्ञानसत्त्वेन आविर्भवति, स्त्रियां पुरुष इवेति भावः ॥

सा तादृशी वागेव वेदरूपेण प्रकाशते स्वानुभावादितब्रह्मात्मतत्त्वप्रकाशनार्थमिति ॥

### COMMENTARY—SUMMARY TRANSLATION

The soul within, or one who has realised Brahma refers to Him by words or by mantra, that is by the power of expression. The soul as it were hands over to Him his power of speech who is like a celestial lady signifying Brahma. The soul dedicates his own body in the form of sound to Him. Thus, with full knowledge, the individual soul, through the use of the mantra offers himself to the universal soul. The universal soul receives the individual soul as his wife. It is such Vāk in the form of mantra which shines as Veda with the purpose of manifesting Brahma that is within its own experience.

## षष्ठी ऋक् ।

अयं वैश्वानरो विश्वमभ्य१श्नोति
तपसा द्यावापृथिवी अन्तरिक्षम् ॥
अयं वाचा प्राणेन मनसाऽभ्यूळ्हो-
ऽयं प्रचेतनेनाभ्य१श्नाति भूतिम् ॥ ६ ॥

पदपाठः – अयम् । वैश्वानरः । विश्वम् । अभि । अश्नोति ।
तपसा । द्यावापृथिवी इति । अन्तरिक्षम् ॥
अयम् । वाचा । प्राणेन । मनसा । अभिऽऊळ्हः ।
अयम् । प्रऽचेतनेन । अभि । अश्नाति । भूतिम् ॥

This Vaiśvānara (universal soul) pervades the whole universe. It pervades the sky, earth and mid-air by means of tapas. Being endowed with the power of speech, with vital breath, and with the mind, the soul enjoys the universe fully through consciousness.

## अन्वयभाष्यम् ।

अयं अन्तरात्मा वैश्वानरः विश्वेषु नरेषु अन्तः व्याप्तः सन् तपसा तेजःकिरणेन ज्ञानेन चैतन्यसत्त्वेन च विश्वं इदं अचेतनं भूतजातं सचेतनं प्राणिजातं च अभि अभितः सर्वतः अश्नोति व्याप्नोति, तथा द्यावापृथिवी अन्तरिक्षं चेति प्रसिद्धं एतत् प्रत्यक्षं भुवनत्रयात्मकं ब्रह्माण्डं अन्तर्बहिरपि पूर्णः सन् अधितिष्ठति, सोऽयमात्मा सर्वान्तरः वाचा तेजोमय्या, प्राणेन आपोमयेन, मनसा अन्नमयेन, च एतैः त्रिभिः त्रिवृत्कृतेन अन्तःसत्त्वेन अभिऊळ्हः ऊढः सङ्कलितः निगूढः सन् अयं आत्मा प्रचेतनेन संविद्-इच्छा-क्रिया-चेतनासत्त्वेन इदं विश्वं अभ्यश्नाति भुनक्ति, ज्ञानेन कामेन (भावनेन) कर्मणा च अयमात्मा वाचा प्राणेन मनसा च सह यद् विहरति (विषयेषु) यद् यद् व्यवहरति च तत् सर्वमपि अस्य अन्तरात्मनः तत्तद्विषयोपभोगरूपमेव सम्पद्यते इति भावः ॥

### COMMENTARY—SUMMARY TRANSLATION

This inner-self is called Vaiśvānara, as it is dwelling in every body. He pervades all animate and inanimate beings in the three worlds known as sky, earth, and mid-air. This inmost Ātmā is completely hidden in the form of power of speech, in the form of prāṇa and manas or mind. He enjoys this universe through knowledge, will and action.

Here the first predicate 'Aśnoti' means 'pervades' and the second 'Aśnāti' means 'enjoys'.

## सप्तमी ऋक् ।

अयं वैश्वानरोऽस्माकमन्तर्हितो-
ऽयं विश्वेषु भुवनेष्वधिक्षितः ॥
अयं धीभिर्विश्वमिदं सञ्चिकेता-
यं वाचा तदुच्चरति प्रविद्वान् ॥ ७ ॥

पदपाठः – अयम् । वैश्वानरः । अस्माकम् । अन्तरिति । हितः ।
अयम् । विश्वेषु । भुवनेषु । अधिऽक्षितः ॥
अयम् । धीभिः । विश्वम् । इदम् । सम्ऽचिकेत ।
अयम् । वाचा । तत् । उत्ऽचरति । प्रऽविद्वान् ॥

This Vaiśvānara is hidden in us all, and dwells in all the worlds. He knows this universe by his intelligence and expresses this truth with his power of speech, with the help of mantras.

## अन्वयभाष्यम् ।

सः अयं वैश्वानरः सचेतनः सशरीरी आत्मा अस्माकं सर्वेषां प्राणिनां अन्तःशरीरे हृदये अन्तर्हितः गुप्तः सन् सोऽयं विश्वेषु भुवनेषु बहिरपि अध्यतिष्ठत्, "स्वं पदं" इत्यध्याहार्यम्, अन्यथा "अधिशीङ्स्थासां कर्म" (पा. सू. १-४-४६) इति द्वितीयार्थानुपपत्तेः, तथा स्वं पदं अधिष्ठाय सर्वाधिपत्येन तेषु भुवनेषु शरीरेषु च वरीवर्तीति भावः ॥

सोऽयं आत्मा धीभिः बुद्ध्यादिभिः सर्वेन्द्रियैः तत्तद्वृत्तिभिश्च इदं विश्वं सर्वैः विषयैः उपक्लृप्तं सञ्चिकेत सम्यक्तया जानाति, अत एव अयं प्रकर्षेण विद्वान् सर्वज्ञः सन् वाचा परया निजया छन्दोमय्या इदं सर्वं स्वानुभावसिद्धं वस्तुतत्त्वं प्रोच्चरति सम्यग्दर्शनेन यथानुभूतमेव अनुवदति छन्दोमुखेन इति ॥

### COMMENTARY—SUMMARY TRANSLATION

This Vaiśvānara, the active inner Ātmā, lies hidden in everybody in the heart. Externally too he is in all the worlds. The words 'Svam Padam' ( his own place ), though not expressly used, they are to be taken to be there; otherwise, the Pāṇini Sūtra ( 1 – 4 – 46 ) will be violated. So, being established in his own place, he parvades the worlds. Therefore, he is omniscient. He is

all-wise. So, with his Vāk in the form of Veda, he proclaims the truth experienced by him.

## अष्टमी ऋक् ।

अयं चिद् विश्वमभ्य१श्नोति चित्तिभि-
र्विदा कामेन कर्मणाऽश्नाति भूतिम् ॥
अयं संविदाऽभि चष्टे विश्वमेत-
दमृतोऽस्मिन् अनश्नन् भूम्ना राजते ॥ ८ ॥

पद्पाठः – अयम् । चित् । विश्वम् । अभि । अश्नोति । चित्तिऽभिः ।
विदा । कामेन । कर्मणा । अश्नाति । भूतिम् ॥
अयम् । सम्ऽविदा । अभि । चष्टे । विश्वम् । एतत् ।
अमृतः । अस्मिन् । अनश्नन् । भूम्ना । राजते ॥

This soul, indeed, pervades the universe by the powers of consciousness. With the help of the power of knowledge, will, and action he enjoys the glory of this universe. He, this ( soul ) through the power of knowledge, witnesses the whole universe. But, without being affected by any enjoyment, he shines with splendour as an immortal.

## अन्वयभाष्यम् ।

अयं चित् अयमेव प्रसिद्धः सर्वेषामपि अपरोक्षानुभूतिसिद्धः आत्मा चित्तिभिः चेतनात्मिकाभिः संविद्-इच्छा-क्रियास्वरूपाभिः स्वशक्तिभिः विश्वं इदं अभितः सर्वत्र अश्नोति व्याप्नोति, तथाव्याप्त्या भूतिं तां विश्वविभूतिं अश्नाति उपभुनक्ति, सोऽयमेव संविदा सम्यग्ज्ञानेन पूर्णः सन् एतद् विश्वं अभिचष्टे स्वयं साक्षिरूपः सन् प्रतिपश्यति, प्रत्यगात्मसत्त्वेन द्रष्टृत्वमात्रेण प्रतितिष्ठतीति भावः ॥

तथा अवस्थितः अयं आत्मा अस्मिन् विश्वस्मिन् भूते भुवने शरीरे च अमृतः दिव्यभावेन आविर्भूतस्वरूपतत्त्वानुभावेन अमृतात्मा नित्यमुक्तः अनश्नन् व्याप्ति विषयप्रवृत्ति-तदुपभोगादिवृत्तिरहितः सन् भूत्या नित्यसिद्धया पारमैश्वर्यादिसत्तामात्रया राजते प्रकाशते, तत्सामरस्ययोगेन परमानन्दरसपूर्णेन स्वयमेव सम्राजते इति ॥

अस्मिन् अर्थे अत्र “ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ॥ तयो-

रन्यः पिप्पलं स्वाद्वत्त्यनश्नन् अन्यो अभि चाकशीति ” ( ऋ. मं. १-१६४-२० ) इति ऋङ्मन्त्रवर्णोपवर्णितं तत्त्वमनुसन्धेयम् ॥

अस्मिन् मन्त्रे जगद्-ईश-जीवात्मनां सामरस्ययोग: उपदिष्टः, तथा जीवेशयोरात्मनोः सहयोगः, सखित्वं, समानस्थानत्वं, समानैकनामरूपत्वं च निर्दिष्टं गम्यते, तथैव पुनः तयोरनयोः जीवात्म-परमात्मनोः भोगाभोगमात्रेण अशनानशनरूपेण गुणेन च वैशिष्ट्यं तत्त्वदृष्ट्या उपदिष्टं अनुश्रूयते ॥

अत्र “ ऋतं पिबन्तौ सुकृतस्य गुहां प्रविष्टौ परमे परार्धे ” (कठो. १-३-१) इति च औपनिषदः श्लोकोऽपि तत्समानार्थक एवेति दृश्यते, तच्च ब्रह्ममीमांसायां निर्णीतेन अर्थेन सामान्यात् अपि प्रतीयते, “गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्” (ब्र. सू. १–२–११) इति अस्मिन् छन्दोदर्शने तु “ अयं चिद् विश्वमभ्यश्नोति चितिभिः ” इत्यस्मिन् मन्त्रे परात्त्व-प्रत्यक्त्वसत्त्वेन एकस्यैवात्मनः विश्वव्याप्ति-स्वरूपस्थितिरूपे अशनानशनरूपे चैतन्यसत्त्वे समर्थिते भवतः ॥

अस्मिन् अर्थे ऋङ्मन्त्रोपपादितं तत्त्वमनुसन्धेयम्—

“ एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे ॥
तं पाकेन मनसाऽपश्यमन्तितस्तं माता रेळ्हि स उ रेळ्हि मातरम् ॥ ”
( ऋ. मं. १०–११४–४ ) इति ॥

एवमेव “ अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ॥
स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वन्तः” ( ऋ. मं. १-१६४-३१, ऋ. मं. १०-१७७-३) इति * ॥ अयं ऋङ्मन्त्रवर्णोपि प्रमाणोदाहरणम् ॥

अत्र अनयोर्मन्त्रयोः “ अपश्यम् ” इति तत्साक्षात्कारानुवचनं समानमेव भवति ॥

अपि च तदेतदेव परमपुरुषस्य तस्य परमं तात्त्विकं स्वरूपमुपवर्णितं चतुर्ष्वपि वेदेषु पुरुषसूक्तमुखेन सुप्रसिद्धेन मन्त्रवर्णेन — “ त्रिपादूर्ध्व उदैत् पुरुषः पदोस्येहाभवत् पुनः ॥ ततो विष्वङ् व्यक्रामत् साशनानशने अभि ” ( ऋ. मं १०–९०–४ ) इति ॥

अस्मिन् ऋङ्मन्त्रे एकस्यैव पुरुषस्य तस्य चेतनात्मनः प्रवृत्ति--अप्रवृत्तिरूपोभयवृत्ति-

---

* टिप्पणी– अस्य मन्त्रस्य उपव्याख्यानानि ब्राह्मणारण्यकोपनिषदादिषु बहुधा अनुश्रूयन्ते ॥

( १ ) “ तस्य वाकृतन्तिर्नामानि दामानि० ” इत्यादि “ तदुक्तमृषिणा अपश्यं गोपामनिपद्यमानम् ” (ऐ. आ. २–१ ६ ) इति ।

( २ ) “ अपश्यं गोपामित्याह० असौ वा आदित्यो गोपाः प्राणो वै गोपाः ” ( तै. ब्रा. ५–६–१५) ।

( ३ ) “ अपश्यं गोपां० एष वै गोपाः०” (श. प. ब्रा. १४–१–४–१–१०)इत्यादि ।

( ४ ) “ आवरीवर्ति भुवनेष्वन्तरिति एष महानात्मा सत्त्वलक्षणः ” ( नि. १४-३ ) इत्यादि ।

सत्त्वे चराचरात्मकरूपे भुक्ति-अभुक्तिरूपे अशनानशने तत्सहिते वृत्ती च अनुश्रूयेते ॥ " ततो व्यक्रामद् विष्वङ् अशनानशने अनु " इति च अथर्वणीये स्पष्टमेव तद् विशिष्ट-तदनुश्रवणम् ॥

## COMMENTARY—SUMMARY TRANSLATION

This fact of being able to enjoy without being affected is well-known and is proved by the experience of realised souls. The soul, with its powers of knowledge, will, and action pervades this universe and enjoys the cosmic splendour. He who is full of real knowledge enjoys this universe as an all-seeing witness. When the Soul looks into itself by an inward sight, it finds itself there as an all-seeing witness. Thus dwelling in this universe and in all bodies, the soul is immortal, eternally free and not affected by what it sees, does or enjoys. As such, he shines forever on account of his effulgence and divine delight. Cf: " Two bright-feathered birds are always together and are friends and seated in the same tree. One of them eats the sweet fruit of the tree and the other looks on without eating" ( Ṛg. 1 - 164 - 20 ). The meaning of that mantra is corroborated by the present mantra. Here the co-existence of Jīva and Īśa ( the individual and universal souls ), their friendship, their occupation of the same place, similarity of their name and form, are indicated along with their separate characteristics of enjoyment and detachment. Further, the mantra of Kaṭha Upanishad ( 1-3-11 ) denotes the same meaning. Again Br. Sū. 1-2-11 : " Both of them who have entered the cave are souls " discusses this question. But in the mantra " Ayam vai viśvan, " the only one Ātmā assumes two forms by being outward and inward, one being the pervador of the universe and the other being in His own state, the former enjoying it and the latter indifferent to it. Again, in the same tone, the mantra ( Ṛg. 114 - 4 ) adds "One bright-feathered bird ( soul ) entered the ocean, the universe. He sees this universe which came into existence. I saw Him within myself with my matured mind. Him the mother ( Vāk ) licks and he licks his mother." All these points are to be correlated to this mantra.

Likewise, consider another mantra which confirms this statement : " I saw the Protector. He is inaccessible and ever alert and goes into and beyond the cosmic paths. He covers Himself with rays of light and all the directions, even and odd. Being such, He exists in the centre of the worlds ( Ṛg. I - 164 - 3 ); it is repeated as ( Ṛg. X - 177 - 3 ). There are other mantras which make similar statements supporting this one. ( Cf. Ai. Ar. II-1-6 ; Tait. Sec. V - 6 - 15 ; Śata. Br. XIV - 1 - 4 - 1 - 11 ; Nirukta XIV - 3 ). Again, " He Purusha, went up with his three feet. His one foot was the universe. He spread Himself all round as ( two ), one taking food and the other not taking food" ( Ṛg. X - 90 - 4 ). In this mantra also, only one Purusha is

described as having two attitudes ( pravṛtti and apravṛtti ) due to his forward movement and its absence, or enjoyment and otherwise, one taking food and the other not taking it, and the simultaneous twofold existence is also described in the latter half. The Atharvaṇa mantra also makes it clear: "Then ( He ) pervaded all round and everything, enjoying and not enjoying at the same time ( Bhogya and Abhogya ). "

## नवमी ऋक् ।

अयं प्रजानन् अजन्यः सन् अमर्त्यो-
ऽयं विश्वथा राजतेऽन्तर्य एकः ॥
अयं स्वराट् सम्राड् विराड् विभुः प्रभु-
रयं सत्योऽयममृतो विश्ववेदाः ॥ ९ ॥

पदपाठः – अयम् । प्रऽजानन् । अजन्यः । सन् । अमर्त्यः ।
अयम् । विश्वऽथा । राजते । अन्तरिति । यः । एकः ॥
अयम् । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
अयम् । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

The soul, being of the nature of pure consciousness, is unborn and eternal. He shines forth in various forms throughout the universe. He is alone. He shines by himself. He shines resplendently. He shines all-round and everywhere. He is the lord. He is the truth. He is immortal and knows everything.

## अन्वयभाष्यम् ।

सः अयं चेतनः अन्तरात्मा प्रजानन् केवलं संवित्सत्त्वः सन् अजन्यः जन्मरहितः नूतनतया न प्रजायते ज्ञानात्मनः नित्यसिद्धत्वात्, तथा अयं सन् सदैव सदात्मकः अमर्त्यः क्षय-विकार-मरणादिरहितः सद्रूपत्वादेव, अयं विश्वथा विश्वरूपेण राजते योऽयं सर्वदा स्वयं एक एव सन् एकात्मको भवति, सोऽयं स्वराट् स्वाराज्ययोगेन स्वयम्प्रकाशः, सम्राट् साम्राज्येन राजमानः सार्वभौमः विराट् विशेषेण राजमानः विश्वरूपः, विभुः व्यापकः, प्रभुः अधिपतिः, अयं सत्यः विश्वाधिष्ठानरूपः, केवलं सद्रूपश्च, अयं अमृतः अमृतात्मा नित्यमुक्तः रसात्मा अमरणधर्मा अनन्तश्च विश्ववेदाः विश्ववित् सर्वज्ञः स्वयमेव भवतीति ॥

एवं अयं अन्तरात्मा अन्वयतः सर्वज्ञानक्रियादिसत्त्वपूर्णः विश्वरूपः, व्यतिरेकतः सर्वविशेषरहितः केवलं चैतन्यसत्तामात्रया परिपूर्णः अस्तीति वस्तुतत्त्वम् ॥

## COMMENTARY—SUMMARY TRANSLATION

This inner soul or spirit is without birth. Likewise, he is without death. He shines as the universe and in the universe. He is always one only and so all alone. He is Svarāṭ. He shines by himself on account of having his own light. He shines brilliantly. He is a Saṃrāt, the king of all the worlds. He is Virāṭ, he shines infinitely in all forms. He is a Vibhu, the pervader. He is Prabhu, the lord of all. He is Existence, the very basis of everything. He is immortal and ever free and has no death. He is infinite and omniscient. Thus, the inner soul is full of all powers of knowledge, will, action etc., and is omnifarious. He is infinite potentiality. That is the reality.

## दशमी ऋक् ।

तत् तें भगवन् इन्द्र ब्रह्मणस्पते-<br>
ऽयं संविदा तपस्यन् अनुं तुरीयंम् ॥<br>
पदं पंश्यामि दर्शतं सम्परीतं<br>
तत् परमं ज्योतिर्विश्वंस्य दर्शयंत् ॥ १० ॥

पदपाठः – तत् । ते । भगवन् । इन्द्र । ब्रह्मणः । पते ।<br>
अयम् । सम्ऽविदां । तपस्यन् । अनुं । तुरीयंम् ॥<br>
पदम् । पश्यामि । दर्शतम् । सम् । परिं । इतम् ।<br>
तत् । परमम् । ज्योतिंः । विश्वंस्य । दर्शयंत् ॥

I see you ( my inner Spirit sees you ), Oh Bhagavan, Indra, Brahmaṇa-spati, you who are practising tapas with concentrated consciousness. Your status is the highest reached by consciousness. You are all-seeing and all-pervading. You are the supreme illumination which reveals everything.

## अन्वयभाष्यम् ।

अत्र प्रथमे पादे त्रिभिः सम्बुध्यन्तैः पदैः आत्मनः अन्तर्यामिणमेव तत्तद्गुणधर्मादिपूर्णं अन्ततः प्राप्यं अनुलक्ष्य छन्दोमुखेन स्तौति ऋषिरयं भावोद्रेकेण इत्येव विशेषः ॥

तथैव अत्र सर्वेषु मन्त्रेषु "अयं" इति इदं शब्देनैव आत्मानं दर्शयति न तु "अहं" इति अस्मच्छब्देन, तस्मात् नात्र अहंकारादिभावशङ्कावसरः अस्तीति न पुनः किञ्चिद् वक्तव्यमापतति ॥ अयं आत्मा भगवान् चैतन्य-संविदादिविभूतिभिः सम्पन्नः, अयं इन्द्रः सर्वेन्द्रियाधिष्ठानभूतः, अयः ब्रह्मणः वाचः पतिः मुख्यप्राणस्वरूपः, सोऽयं मम आत्मा

अन्तर्यामी इत्यपि सर्वं योजयितुं शक्यम् । संविदा ज्ञानेन तपस्यन् अयमहं परमस्य आत्मनः तव तत् तुरीयं दर्शतं दर्शनीयं परीतं परितोऽव्याप्तं सम्पश्यामि साक्षात्करोमि, तदेव विश्वस्य दर्शयत् प्रकाशकं परमं ज्योतिः भवतीति ॥

॥ इति पञ्चमेऽनुवाके प्रथमं आत्मसूक्तम् समाप्तम् ॥

## COMMENTARY--SUMMARY TRANSLATION

Here Ātmā, the inner soul, is described as endowed with high attributes, characteristics etc. and attainable at long last. The speciality is that the seer is praising the Supreme Spirit with intense emotion. Likewise, in every mantra here, he deliberately uses 'ayam' (the third person singular) to indicate himself and never 'aham' the first person. He is free from vanity and is humble.

This Ātmā is Bhagavān, full of radiance, energy and knowledge. This is Indra, the very seat of all senses. This is the lord of Vāk. He, who is also my soul, can be described as the controller from within. With the power of concentration, he practises (I practise) tapas to reach the fourth step (the highest) which is yourself. I realise it everywhere. It is that which is the light par excellence.

Thus ends the First Hymn in the Fifth Section.

---

## अथ पञ्चमेऽनुवाके द्वितीयं आत्मसूक्तम् ।

अनुवाकः ५ । सूक्तम् २ । ऋचः १-१० । आत्मा ।

यो यज्ञे विश्वथा दश, दैवरातो वैश्वामित्रः, आत्मा, त्रिष्टुप् ।

**Now this the Atma Sukta Second in Fifth Anuvaka**

**Section V: Hymn 2 : Riks 1-10** - ĀTMĀ

This Hymn beginning with "Yo Jajñe Viśvathā" contains ten Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Ātmā is the god and Trishṭup is the metre.

### अथ प्रथमा ऋक् ।

यो जज्ञे विश्वथा संविदा नृनिमान्
य आविवेश चित्तिभिः पुरुषः ॥
वैश्वानरो यः सहसा चेततेऽन्तः
स सत्योऽयममृतो विश्ववेदाः ॥ १ ॥

पद्पाठः— यः । यज्ञे । विश्वऽथा । सम्ऽविदा । नॄन् । इमान् ।
यः । आऽविवेश । चित्तिऽभिः । पुरुषः ॥
वैश्वानरः । यः । सहसा । चेतते । अन्तरिति ।
सः । सत्यः । अयं । अमृतः । विश्वऽवेदाः ॥

He who manifested himself in all the forms in the universe by the power of his consciousness, pervaded and entered into all human beings with his many powers. He is Vaiśvânara, who from within activises all with his energy. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

य: पुरुषः चेतन: आत्मा विदा ज्ञानशक्त्या विश्वथा सर्वथा विश्वरूपेण जज्ञे स्वयमेव प्रादुर्बभूव, तथा तैरेव विश्वभूतैः सह योगेन आविर्भूतान् इमान् प्रत्यक्षसिद्धान् नरान् विश्वान् प्राणभृत: चित्तिभिः चेतनाशक्तिभि: संविद्-इच्छा-क्रियात्मिकाभि: जनयामास, जज्ञे इति पूर्वत्र अन्वयः, ततश्च आत्मनः सकाशादाविर्भूतान् तान् इमान् विश्वान् नरान् प्राणिवर्गान् ताभिरेव चेतनाभि: सह आविवेश प्राविशत्, य: विश्वेषां नराणां अन्त: प्रवेशेन सिद्ध: वैश्वानर: विश्वात्मा सहसा बलेन ऐन्द्रेण प्राणसत्त्वेन अन्त: आत्मनि शरीरे च चेतते अन्तर्हृदये चेतन्यकलये स्फुरति, तदिदं सर्वानुभवसिद्धमेव ॥ सोऽयं अन्तरात्मा सत्यः नित्यसिद्धः अमृत: नित्यमुक्त: अमृतात्मा विश्ववेदा: सर्वज्ञश्च स्वयं भवतीति ॥

अस्मिन् अर्थे ऋङ्मन्त्रवर्णः—"न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव" (ऋ. मं. १०-८२-७) इति ॥ अयं मन्त्रः तदिदं लोकप्रसिद्धं अज्ञानमनुश्रावयति सर्वेषां एतेषां उत्पादनेन तेषु अन्त: प्रविष्टस्य तस्य परमस्य आत्मन: स्वरूपतत्त्वज्ञानं न भवति, तच्च ज्ञानं विशिष्टेन साधनेन आन्तरेण धीयोगेन तपसैव भवितुमर्हतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

He that is the Âtmâ, who is in the form of Chetanâ, conscious energy, manifested himself as omnifarious with the power of his consciousness. Again with the same power he entered all these human and other living beings in the form of knowledge, desire and action. As Vaiśvânara, he entered into all. He is the soul of all, and is supported by Indra, and by the strength of prāṇa which gives energy and acts. He is truth eternal. He is immortal and always without any binding. He is omniscient and independent. Cf.: "You could not know Him, who created all these and who is within you." (Ṛg. X-82-7).

## द्वितीया ऋक् ।

य: संविदा द्योतते देवतमो
यो धीभिरभिचष्टे संविदध्यै ॥
विश्वं यश्चेतयते सुप्रचेताः
स सत्योऽयममृतो विश्ववेदाः ॥ २ ॥

पदपाठः— यः । सम्ऽविदा । द्योतते । देवऽतमः ।
यः । धीभिः । अभिऽचष्टे । सम् । विदध्यै ॥
विश्वम् । यः । चेतयते । सुऽप्रचेताः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He shines as the greatest of gods on account of his power and coscious-ness. He sees everything and attains the highest by the power of his manifold intellect. He being omniscient, activises this universe. He is the reality. He is immortal and omniscient.

## अन्वयभाष्यम् ।

यः आत्मा संविदा प्रज्ञानचित्कलया द्योतते स्वयं प्रकाशते; अत एव देवतमः सर्वेषां देवानां श्रेष्ठतमः आत्मैव सर्वदेवतासु वरिष्ठः, इति यावत्, यः संविदध्यै सम्यक्तया वेत्तुं तद्विज्ञानार्थम् धीभिः बुद्ध्यादिकरणैः अभिचष्टे पश्यति सर्वत्र साक्षिरूपेण तिष्ठति, अत्र तुमुन्-प्रत्ययार्थे विद् धातोः अध्यै प्रत्ययान्तं पदम्, तेन "विद् ज्ञाने" "विद्लृ लाभे" इति अर्थात् ज्ञातुं प्राप्तुं चेति अर्थद्वयं गम्यते विदध्यै इति एकेनैव पदेन, इति विशेषः ॥

यः स्वयं प्रचेताः चेतनः सर्वज्ञश्च सन् विश्वं इदं अचेतनं जगत् सर्वं चेतयति बोधयति आत्मसात् करोति, अचेतनमपि विश्वं सचेतनं भावयति, अग्निरिव अयःपिण्ड स्वस्वरूपं करोतीति भावः, चेतनात्मनः तदिदं स्वभावसिद्धं वस्तुतत्त्वम् यदात्मसात्करण-सामर्थ्यम्, सोऽयं अन्तरात्मा सर्वान्तरः सत्यामृतादिलक्षणः विश्ववेत्ता च स्वयमेवास्तीति ॥

### COMMENTARY—SUMMARY TRANSLATION

The Ātmā, with his power of knowledge, shines brilliantly. He is the best of all the gods. He is everywhere as a witness with all the instruments of intellect etc., and he attains all that he wants. He is himself conscious energy; he is omniscient and so gives knowledge to the universe. He makes the inert universe active as fire does an iron ball. He is himself conscious energy and so, it is natural for him to make others like himself. The inner soul of all is the truth. He is immortal and omniscient.

## तृतीया ऋक् ।

य आदित्यस्तपसा द्योतते स्व१-
र्यो अन्तरिक्षे सहसेन्ध इन्द्रः ॥
यः पृथिव्यां ज्योतिषाग्नी रोचते
स सत्योऽयममृतो विश्ववेदाः ॥ ३ ॥

पद्पाठः— यः । आदित्यः । तपसा । द्योतते । स्व१रिति स्वः ।
यः । अन्तरिक्षे । सहसा । इन्धे । इन्द्रः ॥
यः । पृथिव्याम् । ज्योतिषा । अग्निः । रोचते ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He as Āditya (the sun) blazes with heat in his own place, that is in the world of light (the sky). As Indra, he flashes with strength as lightning in the mid-air. He burns with heat in this world as Agni. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः आत्मा असौ आदित्यः दिव्यः ज्योतीरूपः सन् स्वः स्वःस्थाने निजे ज्योतिर्मण्डले तपसा ज्योतिस्तपनेन औष्ण्येन प्रकाशेन च द्योतते दीप्यते, यः इन्द्रः विद्युदात्मस्वरूपः अन्तरिक्षे मध्यमे भुवने सहसा बलेन सूक्ष्मप्राणसत्त्वेन इन्धे दीप्यते गुप्तरूपेण, यः अग्निः भौमतेजःस्वरूपः पृथिव्यां अस्यां ज्योतिषा प्रत्यक्षेण रूपेण रोचते प्रज्वलति, एवं त्रिषु भुवनेषु बहिरपि अग्नीन्द्रादित्यरूपेण प्रतिष्ठितः सोऽयं अन्तरात्मा त्रिदैवत्यसत्त्वः सन् प्रभवति ॥ एकस्य चिदात्मनः एव इदं दिव्यदेवताविभूतित्रयमिति वैदिकं तत्त्वम्, सः सत्यः अमृतात्मा विश्ववेदाः सर्वज्ञः इति सर्वं समानम् ॥ अस्मिन् अर्थे कुत्सार्षेयं ऋङ्मन्त्रदर्शनं प्रत्यक्षं प्रमाणम्:– "आ प्रा द्यावा पृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च" (ऋ॰ मं. १-११५-१) इति ॥

### COMMENTARY—SUMMARY TRANSLATION

The Ātmā in the form of Āditya blazes in his own place, the sky; the sun's orb with heat shines like the light of a luminary. He as Indra, in the form of lightning, flashes with strength as the subtle power of prāṇa in mid-air without being seen by others. He as Agni, actually burns in this world with light. Thus, in the three worlds, He is present in the form of Agni, Āditya and Indra. He, this inner Ātmā is the triple god. These three gods are the

celestial forms of that Ātmā, who is all alone and pure knowledge. This is the cardinal principle of the Vedas.

The fourth line is to be interpreted as before. Cf.: "Sūrya, the soul of the mobile and the immobile creations has filled the sky, the earth and mid-air" (Ṛg. I-115-1). This mantra of Kutsa testifies to the above statement.

## चतुर्थी ऋक् ।

यो देवानां जनिता पतिः सोमो
यो मतीनां पिताऽधि भुवनानाम् ॥
येनेमा विश्वा भूतानि मदन्ति
स सत्योऽयममृतो विश्ववेदाः ॥ ४ ॥

पदपाठः – यः । देवानाम् । जनिता । पतिः । सोमः ।
यः । मतीनाम् । पिता । अधि । भुवनानाम् ॥
येन । इमा । विश्वा । भूतानि । मदन्ति ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He is Soma, the lord, the creator of all gods. He is the creator and master of all intellects and of all worlds. All these living beings are delighted by him. He is the truth, he is immortal and is omniscient.

## अन्वयभाष्यम् ।

यः चेतनः आत्मा सोमः दिव्यः रसात्मा मनःसत्त्वः स्वयं आनन्दात्मकः सन् देवानां सर्वेषामपि देवतात्मनां अग्न्यादीनां जनिता जनयिता तत्प्रादुर्भावहेतुभूतः सन् प्रसिद्धोऽस्ति वेदे, अत्र "जनिता मन्त्रे" (पा. सू. ६-४-५३) इति सूत्रात् जनयितेत्यस्य आर्षेयं रूपं मन्त्रे जनिता इति भवति, यश्च मतीनां विश्वासां धियां जनयिता पिता पालयिता प्रेरयिता च भवति अन्तरात्मरूपत्वात्, तथा सर्वेषां भुवनानां तदनु भूतानां च पिता अधिपतिश्च स्वतः-सिद्धोऽस्ति, येन च पुनः परमानन्दरसात्मना इमानि विश्वानि भूतानि मदन्ति हृष्यन्ति, तेन सोमरससत्त्वेनैव मानसेन सौमनस्येन भावेन च सर्वे प्राणभृतः परितृप्यन्ति इति भावः, सोऽयं अन्तरात्मा सत्यः अमृतः सर्वज्ञः इत्यादिकं पूर्ववदेव योज्यम् ॥

एतस्मिन् प्रतर्दनार्षेयं ऋङ्मन्त्रदर्शनं भवति :– "सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः। जनिताऽग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः" (ऋ. मं. ९-९६-५) इति ॥

अत्र छन्दोदर्शनेऽस्मिन् मन्त्रे पूर्वार्धचर्चार्थे अयं मन्त्रः, उत्तरार्धचर्चार्थे अन्यो मन्त्रः अस्ति प्रमाणभूतः, "इन्द्राय सोमो रण्वो मदाय" (ऋ. मं. ९-९६-९) इति ॥

"तदिदास भुवनेषु ज्येष्ठम्० । अनु यं विश्वे मदन्त्यूमाः" (ऋ. मं. १०-१२०-१) इति च ॥ यं इन्द्रं सर्वान्तरात्मानमनुसृत्य सर्वाः प्रजाः हृष्यन्ति, तस्मै इन्द्रात्मने प्रहर्षार्थं पवते सोमो रसात्मा इत्यर्थः, अस्य सर्वार्थस्य प्रतिपादकोऽयं मन्त्रः—"यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि, इन्द्रायेन्दो परि स्रव" (ऋ. मं ९-११३-११) इति ॥ "सोमेनानन्दं जनयन् इन्द्रायेन्दो परि स्रव" (ऋ. मं. ९-११३-६) इति च ॥

## COMMENTARY—SUMMARY TRANSLATION

The Ātmā, the divine, conscious energy is Soma, the essence itself. He is delight itself. He is the generator of all gods, Agni and others. He is the cause of their birth and he is the master of all intellects. He is the creator of all worlds. From him, who is himself the very essence of delight supreme, all these living beings derive their joy. All the living beings derive their satisfaction from him. He, this inner soul, is the truth.

"Soma spreads his power, Soma is the creator of all intellects of the sky, the earth, of Agni, of Sūrya, of Indra and Vishṇu" (Ṛg. IX - 96 - 65). This mantra of Pratardana supports the above statement.

In the present mantra, the latter half is supported by another mantra of Ṛgveda: "The pleasant Soma is for Indra's exhilaration" (Ṛg. IX - 96 - 9). "All who follow him get delighted" (Ṛg. X - 120 - 1). All beings who follow Indra, who is the soul of all, are pleased. For the delight of Indra, Soma has assumed the liquid form. This is the sense here.

The following mantra contains all that is mentioned above: "Make me an immortal denizen of that place, where ānanda, moda, muda and pramuda (all these are various forms of joy), are over-flowing, where all the desires are fulfilled. Oh! Soma, flow profusely for Indra." (Ṛg. IX - 113 - 11); and there is another: "Creating delight, Oh! Soma, flow for Indra" (Ṛg. IX - 113 - 6).

## पञ्चमी ऋक् ।

यो बृहन् बृंहतो भवति ब्रह्म

ब्रह्मणां यो जनिता ऋषिः पतिः ॥

यो भूतानि बृंहयति ब्रह्मणा

स सत्योऽयममृतो विश्ववेदाः ॥ ५ ॥

पदपाठः— यः । बृहन् । बृहतः । भवति । ब्रह्म ।
ब्रह्मणाम् । यः । जनिता । ऋषिः । पतिः ॥
यः । भूतानि । बृंहयति । ब्रह्मणा ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

The soul is the greatest of the great. He spreads everywhere. He is the seer of all mantras and their lords. He makes all beings grow apace with the help of the mantras. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः आत्मा बृहतः महतोऽपि सर्वस्मात् बृहन् महान् महीयाँश्च सन् विश्वव्यापकः बृहत्त्वात् धर्मात् बृंहणत्वसत्त्वाच्च यः स्वयं ब्रह्मैव भवति ब्रह्मात्मना स्वसत्तया वरीवर्तीति भावः ॥ यश्च ब्रह्मणां वेदानां ज्ञानानां च जनिता जनयिता तत्प्रादुर्भावकारणसत्त्वपूर्णः ऋषिः द्रष्टा पतिः अध्यक्षः सन् राजते, यः खलु ऋङ्मन्त्रमुखेन संस्तुतः साक्षाद् ब्रह्मणस्पतिस्वरूपः इति भावः ॥ तथा च गृत्समदार्षेयं ऋङ्मन्त्रदर्शनम्—"गणानां त्वा गणपतिं हवामहे० । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते०" (ऋ. मं. २–२३–१) इति, "उस्रा इव सूर्यो ज्योतिषामहो विश्वेषामिज्जनिता ब्रह्मणामसि" (ऋ. मं. २–२३–२) इति च ॥ यश्च ब्रह्मणा स्वेन मन्त्रेण भूतानि इमानि आत्मनः सकाशादेव आविर्भूतानि भूतजातानि बृंहयति भूयः अभिवर्धयति स्वस्यैव चेतनाशक्त्या बहुधा महत्त्वेन च अनन्तानि सम्भावयति सोऽयं सर्वान्तरात्मा सत्यः अमृतः विश्ववेत्ता च स्वयं भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Ātmā is greater than anything else. By his characteristic greatness and by the capacity to grow, he himself becomes Brahma, the greatest. He is ever there as Brahma. He is the seer and lord of all knowledge, which he has himself created. It is in him to create them and everything else. He is extolled by mantras and is evidently Brahmaṇaspati himself. He with the help of his mantras developed these living beings which were born of him only. He, this inner soul of all, is the truth; he is immortal and omniscient.

## षष्ठी ऋक् ।

यो भूतानां भूतपतिर्भवति
यो वा भूतानि सम्बिभर्ति गर्भे ॥
विश्वान्येतानि जजान चित्तिभिः
स सत्योऽयममृतो विश्ववेदाः ॥ ६ ॥

पद्पाठः – यः । भूतानाम् । भूतऽपतिः । भवति ।
यः । वा । भूतानि । सम् । बिभर्ति । गर्भे ॥
विश्वानि । एतानि । जजान । चित्तिऽभिः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

The Ātmā is the lord of all elements. He bears and holds them all in his womb. By the powers of his consciousness he brought them all out. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः चेतनात्मा भूतानां आकाशादीनां सर्वेषां जगतां समात्राणां शब्दादितन्मात्रा-सहितानां भूतपतिः स्वयंसिद्धः अधिपतिः पुरुषः विश्वबीजसन्धारकः सन् पुरुषसत्त्वः यः आदितः सर्वाणि भूतानि अन्तः आत्मनि स्वे गर्भे सम्बिभर्ति सम्बभार बीजरूपेण सन्दधे, पुरुषः इवैव स्वसन्तानबीजरूपाणि सुवीर्याणि ज्योतीरसैकसत्त्वानीति भावः ॥ यश्च तपसा अन्तःप्रवृद्धेन तेजःसत्त्वेन आत्मबलरूपेण तानि स्वान्तःसन्धृतानि भूतानि बहिः बाह्येन नामरूपादिभावेन केवलं नामात्मकानि तानि सरूपभावाय जज्ञे बहिरुत्ससर्ज, सोऽयं अन्तरात्मा चैतन्यसत्त्वः सत्यः केवलं सत्त्वरूपः अमृतात्मा सर्वज्ञश्च सन् विश्वस्यैवास्य प्रभवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Ātmā is the lord of all elements like ākāśa (sky) etc. and all worlds, including the subtle characteristics of the elements. He is Purusha, a person who bears the seed of the universe. He carried all in himself like a seed, like a Purusha who retains within himself the very seed of his future children. He by his tapas, by his own vigour brought out all those elements which he had retained within him. They assumed various names and forms. They had formerly only names and when he brought them out, they assumed forms also. He, the inner soul, is the truth, he is immortal and omniscient.

## सप्तमी ऋक् ।

यो भूतानि स्वयमेवाबभूव
विश्वेषु यो भूतेष्वन्तः प्रविष्टः ॥
यो अस्माकमन्तरः प्रचेतते
स सत्योऽयममृतो विश्ववेदाः ॥ ७ ॥

पदपाठः – यः । भूतानि । स्वयम् । एव । आऽबभूव ।
विश्वेषु । यः । भूतेषु । अन्तरिति । प्रऽविष्टः ॥
यः । अस्माकम् । अन्तरः । प्रऽचेतते ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He manifested himself in the form of all the elements. He entered into the heart of all of them. He activises from within all of us. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः केवलं चैतन्यसत्त्वः आत्मा भूतानि इमानि अचेतनरूपाणि स्वयमेव आ समन्तात् बभूव आकाशादिभूतात्मकेन मूर्तस्वरूपेण आविर्बभूव, एतेन चेतनात् आत्मनः परस्मात् सकाशात् अचेतनस्य जगतः सम्भूतिरुच्यते, केवले चेतनेऽपि आत्मनि बीजरूपेण नाम्ना अवशिष्टानि तानि सरूपतः आविश्चकारेति तस्य परं हृदयम् ॥

अथ पुनस्तेषु बहिरुत्सृष्टेषु अचेतनेष्वपि भूतेषु अन्तः सूक्ष्मेण अनुद्भूतरूपेण चेतनासत्त्वेन अनु अनुस्यूततया आविवेश, तथा आविश्य च तानि अधितिष्ठतीति भावः ॥ एतेन अचेतनेष्वपि आकाशादिषु भूतेषु चेतनात्मसत्त्वं तथा तस्य अनुद्भूतरूपत्वं च प्रतितिष्ठतीति ऋषिर्ज्ञापयति, यश्च अस्माकं सर्वेषां तनुभृतां अन्तः प्रत्यङ् चेतते उद्भूतरूपेण ज्ञानेच्छाकृतिचेतनादिसत्त्वेन संस्फुरति, सोऽयं अन्तरात्मा सत्यामृतत्वसर्वज्ञतादिस्वरूपतत्त्वपरिपूर्णः इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Ātmā, the pure conscious energy, manifested itself in the form of all these inert elements. The creation of this inert universe proceeded from the Ātmā who is all energy. The secret is that all were already existing as names only in him; but he manifested them all or he gave them form. He entered by his still unmanifested subtle energy into all those inert elements. He did it continuously without any break. By this the seer reminds us that the Ātmā is the very source of their activity. Further, he throbs within all of us who have bodies. It is he who enlivens us with the power of intellect, knowledge, desire, action etc. The inner soul is the truth, he is immortal and omniscient.

## अष्टमी ऋक् ।

यो अन्तः प्राणाः प्राणानां पतिः परो
यः प्राणेषु प्रविष्टो ज्योतिषाऽधि ॥

यः प्राणैर्भूतानि प्रणयतीन्द्रः
स सत्योऽयममृतो विश्ववेदाः ॥ ८ ॥

पदपाठः – यः । अन्तरिति । प्राणाः । प्राणानाम् । पतिः । परः ।
यः । प्राणेषु । प्रऽविष्टः । ज्योतिषा । अधि ॥
यः । प्राणैः । भूतानि । प्रऽनयति । इन्द्रः ।
सः । सत्यः । अयम् अमृतः । विश्वऽवेदाः ॥

He is indeed the inner prāṇa, he is the greatest, and the lord of all vital powers. With his conscious power in the form of light, he entered into the prāṇas. Indra, the lord of all living beings moves them with the help of the prāṇas. He is the inner soul, he is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः चेतनः आत्मा अन्तः शरीरे हृदये आत्मनि च प्राणाः स्वयं प्राणस्वरूपः प्राणानां सर्वेषां परः श्रेष्ठः अध्यक्षः मुख्यप्राणसत्त्वः सन् सर्वेषां अन्तः प्रतितिष्ठति, यश्च पुनः प्राणेषु तेषु ज्योतिषा चैतन्यज्योतिःकिरणस्वरूपेण प्रविष्टः सन् अधि तान् अध्यास्ते, तथा तदन्तः अधिष्ठितः सन् तेषां प्राणानां प्रेरणेन च पुनः तैरेव स्वप्रेरितैः प्राणैः इमानि भूतानि प्रणयति सञ्चालयति सचेतनानि भावयति, यः इन्द्रः सर्वेषां प्राणादीनां धीन्द्रियाणां च ईशानः अध्यक्षः इति प्रसिद्धः वेदे, "इन्द्रो ज्येष्ठ इन्द्रियाय" (ना. उ. ७-५) इति च तदनुश्रवणम्, सः अयं अन्तरात्मा स्वयं सत्यत्व - अमृतत्व - सर्वज्ञत्वादिसत्त्वपूर्णः प्रभवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

This Ātmā is himself all the prāṇas. He is the lord supreme of all prāṇas, he is the chief of all prāṇas. He dwells in them all in the form of life. He moves them and vitalises all these living beings. He is Indra, the lord of all the prāṇas and the senses. He, the inner soul, is endowed with truth, immortality and omniscience.

## नवमी ऋक् ।

अयं प्रजानन् अजन्यः सन् अमर्त्यो
ऽयं विश्वथा राजतेऽन्तरय एकः ॥
अयं स्वराट् सम्राड् विराड् विभुः प्रभु-
रयं सत्योऽयममृतो विश्ववेदाः ॥ ९ ॥

पदपाठः – अयम् । प्रऽजानन् । अजन्यः । सन् । अमर्त्यः ।
अयम् । विश्वऽथा । राजते । अन्तरिति । यः । एकः ॥
अयम् । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
अयम् । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ।

## अन्वयभाष्यम् ।

अयं मन्त्रः पञ्चमेऽनुवाके प्रथमे सूक्ते नवमः पूर्वं व्याख्यातः ॥

COMMENTARY—SUMMARY TRANSLATION

This mantra occurs as the ninth of the first hymn in the fifth Section and is translated and commented upon there.

## दशमी ऋक् ।

तत् ते भगवन् इन्द्र बृहस्पते
संविदा तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पदपाठः – तत् । ते । भगऽवन् । इन्द्र । बृहस्पते ।
सम्ऽविदा । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

## अन्वयभाष्यम् ।

अयं मन्त्रोऽपि पूर्वस्मिन् सूक्ते व्याख्यातः ॥

COMMENTARY—SUMMARY TRANSLATION

This mantra occurs as the tenth of the first hymn in the fifth Section and is already translated and commented upon there.

॥ इति पञ्चमेऽनुवाके द्वितीयं आत्मसूक्तम् समाप्तम् ॥

Thus ends the Second Hymn in the Fifth Section

## अथ पञ्चमेऽनुवाके तृतीयं आत्मसूक्तम् ।

अनुवाकः ५ । सूक्तम् ३ । ऋचः १-१४ । आत्मा ।

यो दिव्यो महस्वान् चतुर्दश, दैवरातो वैश्वामित्रः, आत्मा, त्रिष्टुप् ।

**Now this the Atma Sukta, Third in the Fifth Anuvaka**
**Section V: Hymn 3: Riks 1-14 - ĀTMĀ**

This Hymn beginning with "Yo divyo mahasvān" contains fourteen Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Ātmā is the god and Trishṭup is the metre.

### अथ प्रथमा ऋक् ।

यो दिव्यो महस्वानेकः सन् ऋषि-
र्यो विश्वेषामृषीणां यो महीयान् ॥
य इदं विश्वं संविदाऽभिचष्टे
स सत्योऽयममृतो विश्ववेदाः ॥ १ ॥

पदपाठ – यः । दिव्यः । महस्वान् । यः । एकः । सन् । ऋषिः ।
यः । विश्वेषाम् । ऋषीणाम् । यः । महीयान् ॥
यः । इदम् । विश्वम् । सम्ऽविदा । अभिऽचष्टे ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He is indeed a radiant One. He is one (without a second) only. He is the seer of all the seers. He perceives this universe with the power of consciousness. He is the truth, he is immortal and omniscient.

### अन्वयभाष्यम् ।

यः परमः पुरुषः दिव्यः द्युलोकस्थोऽपि परोक्षतया प्रसिद्धः महस्वान् तेजस्वी एकः मुख्यः एकाकी च सन् सदात्मा ऋषिः द्रष्टा, यश्च विश्वेषां च ऋषीणां सर्वेषामपि द्रष्टॄणां महीयान् ऋषिः साक्षिभूतः अत्यन्तं पूज्यः महत्तमः अस्ति, यश्च विदा ज्ञानेन इदं विश्वं अभितः व्याप्तः सन् पश्यति, सोऽयं अन्तरात्मा सत्यः नित्यसिद्धः अमृतात्मा विश्ववेत्ता च स्वयं भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

He is Purusha, the supreme person. He is known though he is invisible. He is the seer of all seers. He is the eternal witness. He is the greatest of all worshipful beings. He pervades this universe and sees it. This inner soul is the truth, ever evident, ever immortal and omniscient.

## द्वितीया ऋक् ।

योऽग्रे बृहस्पतिस्तपसाऽऽत्मनि
च्छन्दांसि विदा विश्वान्यभ्यपश्यत् ॥
छन्दोभिर्विश्वमिदं ह्यजनयत्
स सत्योऽयममृतो विश्ववेदाः ॥ २ ॥

पदपाठः – यः । अग्रे । बृहस्पतिः । तपसा । आत्मनि ।
छन्दांसि । विदा । विश्वानि । अभि । अपश्यत् ॥
छन्दःऽभिः । विश्वम् । इदम् । हि । अजनयत् ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

In the beginning Bṛhaspati, with the help of tapas and knowledge, saw within himself all the Vedas and the worlds. He created the universe with the aid of the mantras. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः वेदोपनिषदादिषु प्रसिद्धः बृहस्पतिः बृहत्याः छन्दोरूपायाः वाचः अधिपतिः स्वयं सन् तपसा अन्तर्विमर्शेन निर्विषयात्मकेन योगेन समाधिरूपेण विदा प्रज्ञानदृशा विश्वानि छन्दांसि गायत्र्यादीनि तथा गायत्र्यादिच्छन्दोनिबन्धनसिद्धानि मन्त्ररूपाणि वाङ्मयानि अभि अपश्यत् आभिमुख्येन आत्मनि प्रत्यक्षं सन्ददर्श, अपि च यः पुनः छन्दसा तेनैव प्रत्यक्षब्रह्मरूपेण मन्त्रेण विश्वं इदं सर्वं जगत् अजनयत् सर्गादौ जनयामास ॥ सोऽयं अन्तरात्मा सत्यः अमृतः विश्ववेदाः सर्ववेदसंवित्सर्वपूर्णोऽस्तीति ॥

### COMMENTARY—SUMMARY TRANSLATION

He is Bṛhaspati, well-known in the Vedas. He is the lord of Vāk, who is Bṛhatī, a metrical form. By tapas, by meditation, he perceived all the Vedas and the metres in which they are composed, such as Gāyatri, etc. Further, with the help of mantras which is the visible Brahma, he created this universe. This inner soul is truth, he is immortal and omniscient.

## तृतीया ऋक् ।

योऽधि छन्दोभिर्ऋषीं नजनय-
च्छन्दसवानु ऋषिषु प्रविष्टः ॥

य एकर्षिर्ऋषीणाꣳ ऋषितमः

स सत्योऽयममृतो विश्ववेदाः ॥ ३ ॥

पदपाठ :– यः । अधि । छन्दःऽभिः । ऋषीन् । अजनयत् ।

छन्दसा । एव । अनु । ऋषिषु । प्रऽविष्टः ॥

यः । एकऽऋषिः । ऋषीणाम् । ऋषिऽतमः ।

सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He created the seers with the aid of the Vedas, and entered the hearts of those seers in the form of Vedic mantras. He is the seer of all seers; he is the only seer. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः आत्मा परमः पुरुषः छन्दोभिः गायत्र्यादिभिः तदुपबद्धैः वेदमन्त्रैश्च वेदैश्च विज्ञानरूपैः वेदमन्त्रदर्शनार्थं दिव्यदृक्सत्त्वप्रदानेन ऋषीन् मन्त्रद्रष्टृरूपान् सम्यग्दर्शनपूर्णान् अजनयत् सम्भावयामास, अत एव यः मन्त्रमुखेन "ऋषिकृत्" इति स्तूयते, "ऋषिमना य ऋषिकृत् स्वर्षाः" ( ऋ. मं. ९–९६–१८ ) इति "भूमिरस्यृषिकृन्मर्त्यानाम्" ( ऋ. मं. १–३१–१६ ) इति च सुस्पष्टार्थकं तदनुश्रवणम्, यश्च पुनः छन्दसा तेन वेदरूपेण विज्ञानेन तत्परमवस्तुतत्त्वानुभावात्मकेन तथा छन्दस्वत्या वाचा तच्छन्दोरूपेणैव ऋषिषु स्वप्रणीतेषु तेषु अनुप्रविष्टः अनन्तरमेव प्राविवेश इति भावः, अत एव तेषां ऋषीणां मुखादेव छन्दस्वत्याः वाचः उपलब्धिरनुश्रयते "यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन् ऋषिषु प्रविष्टाम्" ( ऋ. मं. १०-७१-३ ) इति ॥

यश्च एकर्षिः सर्वेभ्योऽपि प्रधानः प्रथमः सन् सः एकर्षिः इति वेदोपनिषदादिषु मन्त्र-मुखेनैव अभिष्टुतः अनुश्रूयते ॥ "पूषन् एकर्षे यम सूर्य०" इति यजुर्मन्त्रवर्णः प्रसिद्धः ( वा. सं. अ. ४०-१६ ; ईशोप. १६ ) ॥

"क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः" ( मु. उ. ३–२–१० ) इति "व्रात्यस्त्वं प्राणैकऋषिरत्ताविश्वस्य सत्पतिः" इति च औपनिषदं वचनम् ( प्र. उ. २-११ ) ॥ अत एव यः ऋषीणां अपि ऋषितमः, श्रेष्ठतमः परमर्षिः इन्द्रः इति ब्रह्मात्मेति च संस्तूयते ताभिरेव छन्दस्वतीभिः वाग्भिः स महत्तमः इति च ॥ "इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरूपुरुहूतः । महान् महीभिः शचीभिः" इति ( ऋ. मं. ) स एव इन्द्रः तेषां छन्दसां वर्षकः "यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव । समेन्द्रो मेधया स्पृणोतु" ( श. उ. ४-१ ) इति ॥ छन्दसां वर्षकः सन् स इन्द्रः छन्दो-मुखादेव स्वयं आविर्बभूवेति ॥

सः एवंलक्षणः आत्मा अयं आन्तरः सत्यत्वामृतत्वादिसत्त्वसिद्धः विश्ववेदाः सर्वज्ञः सर्वज्ञकल्पैः विश्वैः वेदैः छन्दोभिः स्वयं पूर्णः इति ॥

COMMENTARY—SUMMARY TRANSLATION

He is Ātmā, who created the seers, with the aid of metres and mantras. The Vedas are realised knowledge. The seers are endowed with the power of vision, which visualises the mantras. He created the seers and conferred on them the superhuman power of perceiving the Vedas in the form of mantras. So, the mantras say that he is the maker of seers.

## चतुर्थी ऋक् ।

यो वशी वसिष्ठो मैत्रावरुणो
विद्युतं उर्वश्या मनसः प्रजज्ञे ॥
मन्त्रकृत् सन् महसां यो महस्वान्
स सत्योऽयममृतो विश्ववेदाः ॥ ४ ॥

पदपाठः – यः । वशी । वसिष्ठः । मैत्रावरुणः ।
विऽद्युतः । उर्वश्याः । मनसः । प्रऽजातः ॥
मन्त्रऽकृत् । सन् । महसाम् । यः । महस्वान् ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He is indeed Vāsishtha, being the most self-possessed of all the seers. He is born of Urvaśī's mental powers which are spread all over like lightning. He is indeed the creator of mantras and the most radiant of all who shine. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः आत्मा परमः पुरुषः वसिष्ठः वसितृतमः वरिष्ठः श्रेष्ठतमः अत एव ऋषीणां सर्वेषां मुनीनां द्रष्टॄणां तथा प्राणरूपाणां धीन्द्रियाणां च अध्यक्षः वशी सर्वतन्त्रस्वतन्त्रः वशीकृत-प्राणादिसर्वेन्द्रियग्रामः सर्वेषु ज्येष्ठः, अत एव नाम्नाऽपि वसिष्ठः इति प्रसिद्धः एवास्तीति ॥ तथा च उपनिषत्सु उपदिष्टं प्राणानां अपि ऋषित्वं अनुश्रूयते ॥ "तस्यासत ऋषयः सप्त तीरे" इति "प्राणा वा ऋषयः प्राणानेवैतदाह" (बृ. उ. २-२-३) इति ॥ तेषु च प्राणेषु वसिष्ठत्वं ज्येष्ठत्वं श्रेष्ठत्वं च मुख्यप्राणरूपस्य आत्मन एवेति च श्रूयते ॥ "यो ह वै ज्येष्ठं च श्रेष्ठं च वेद० । प्राणो वै ज्येष्ठश्च श्रेष्ठश्च०" इत्यादि, अथ पुनः "यस्मिन् वः उत्क्रान्ते इदं शरीरं पापीयो मन्यते स वो वसिष्ठः इति० ॥— सा ह वागुवाच यदहं वसि-

ष्ठाऽस्मि त्वं तद् वसिष्ठोऽसीति "—बहुप्रपञ्चेन अन्ततः निर्णीतं दृश्यते "प्राणो वसिष्ठः" इति ॥ "सोऽपि मुख्यः प्राणः एव भवितुमर्हतीति" (बृ. उ. ६–१–१–१४) (छां. उ. ५–१–१३) ॥ "तान् वरिष्ठः प्राण उवाच" (प्र. उ. २–३) इति च तस्य वरिष्ठत्वम् ॥ प्राणस्यैव वशित्वमपि प्रतिज्ञायते—"प्राणस्येदं वशे सर्वं त्रिदिवे यत् प्रतिष्ठितम् (प्र. उ. २-१३) इति ॥ तस्यैव इन्द्रात्मतयाऽनुश्रवणं ऋङ्मन्त्रे विद्यते—"यदद्य कच्च वृत्रहन् उदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे" इति, "इन्द्र इद्धिश्रुतो वशी" इति च ॥

यः उर्वश्याः बहुतरं व्याप्तायाः विद्युतः विद्युद्रूपायाः चिच्छक्तेः सकाशात् मनसः मनोऽधिष्ठितात् चन्द्रमसो रसात्मनः उदगात् आविर्बभूव । अत एव सः वसिष्ठः अयोनिजः ब्रह्मणो मानसः पुत्रः इति पौराणिकी प्रसिद्धिः सङ्गच्छते ॥ अत्र अयोनिजस्य तस्य वसिष्ठस्याविर्भावे वसिष्ठार्षेयं ऋङ्मन्त्रदर्शनमनुसन्धेयम् — "विद्युतो ज्योतिः परि सञ्जिहानं मित्रावरुणा यदपश्यतां त्वा ॥ तत् ते जन्मोतैकं वसिष्ठागस्त्यो यत् त्वा विश आ जभार" (ऋ. मं. ७-३३-१०) इति ॥ "उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसोऽधि जातः" (ऋ. मं. ७–३३–११) इति च ॥ "अप्सरसः परि जज्ञे वसिष्ठः" (ऋ. मं. ७-३३-१२) "सत्रे ह जातौ०। ततो जातमषि माहुर्वसिष्ठम्" (ऋ. मं. ७–३३–१३) इति च ॥

यः मन्त्रकृदेव मन्त्रद्रष्टेव सन् महमां तेजसां तेजस्विनां च महस्वान् महान् तेजस्वी पूज्यश्च बभूव । सः अयं आत्मा सत्यादिलक्षणः सर्वज्ञः इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Ātmā is indeed Vaśi, self-possessed, all the prāṇas and senses being under his control. So, of all the seers, he is the best and capable of doing everything independently. Thus, by name also, he is known as Vasishṭha. In the Upanishads, these prāṇas are being described as seers. Cf: "On its banks, are the seven seers: thus the prāṇas are the seers and this refers to the prāṇas only" (Bṛ. Up. II-2-3). Ātmā is Mukhya Prāṇa. He is a mind-born son of Brahma and not born of any woman, so say the Purāṇas. Re: Vasishṭha's birth, "Mitra and Varuṇa saw you (Vasishṭha) as a spark of light issuing from lightning" (Ṛg. VII-33-10).

### पञ्चमी ऋक् ।

यो अन्तर्गर्भे समात्मानं वेद
चिदाविर्भूद् यो विश्वथाऽऽत्मना ॥
मन्त्रदृगेवर्षियो वामदेवः
स सत्योऽयममृतो विश्ववेदाः ॥ ५ ॥

पदपाठः – यः । अन्तरिति । गर्भे । सम् । आत्मानम् । वेद ।
चित् । आविः । अभूत् । यः । विश्वऽथा । आत्मना ॥
मन्त्रऽदृक् । एव । ऋषिः । यः । वामऽदेवः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

Ātmā knew himself while still in the womb and with that self-knowledge, manifested himself as the whole universe. He is Vāmadeva, a seer and indeed a seer of mantras. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

यः महान् प्रसिद्धः रुद्रो वामदेव इति दिव्यः देवतात्मा तस्यैव सत्त्वेन सिद्धः सन् गर्भे मातुः गर्भाशये अन्तः शयान एव आत्मानं सम्यक् वेद संविविदे तत्त्वतः सम्यग्ज्ञानेन साक्षात् चकार, इति वेदोपनिषत्पुराणादिषु सुप्रसिद्धं, तथा तेन स्वस्वरूपतत्त्वज्ञानेन यः विश्वथा विश्वरूपेण आत्मना स्वरूपेण ब्रह्मात्मना आविर्बभूव सर्वतः प्राकाश्यं प्राप । तस्येदं ऋङ्मन्त्रदर्शनम्,

"अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः ॥
अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यता मा ॥" (ऋ. मं. ४-२६-१-३)

इति ॥ तन्मन्त्रस्य औपनिषदं ब्राह्मणमपि भवति तावत्तत्त्वार्थप्रतिपादकम्—

"ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति । तस्मात् तत् सर्वमभवत्, तद् यो यो देवानां प्रत्यबुध्यत स एव तदभवत्, तथर्षीणां तथा मनुष्याणां तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे, अहं मनुरभवं सूर्यश्चेति" (बृ. उ. १-४-१०) इति ॥ एवं मातुः गर्भे अन्तरेव विद्यमानस्य वामदेवस्य तदेतादृशं सर्वात्मभावसम्पन्नं ब्रह्मानुभावपूर्णं तत्त्वविज्ञानं उदियायेत्यपि अनुश्रूयते —

"गर्भे नु सन्नन्वेषामवेदमहं देवानां जनि मानि विश्वा ॥ शतं मा पुर आयसीररक्षन् अधः श्येनो जवसा निरदीयम्" (ऋ. मं. ४-२७-१) इति । एतन्मन्त्रस्य उपव्याख्यानं औपनिषदं ब्राह्मणानुवचनम्,— "पुरुषे ह वा अयमादितो गर्भोभवति०"— इत्यादि ॥ स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म तदुक्तमृषिणा "गर्भेनु सन्नन्वेषामवेदं ०— निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच" (ऐ. उ. ४–५) इति ॥

यः एवं मन्त्रदृक् मन्त्रद्रष्टा एव सन् ऋषिः प्रसिद्धः वामदेवः यश्च वामदेवनामा रुद्रः सः तादृशः देवतात्मा च सोऽयं आत्मा सत्यः सत्यत्वादिलक्षणसम्पन्नः विश्ववेदाः सर्वज्ञः विश्ववेदविशिष्टः स्वयं अमृतात्मैव भवतीति सम्पद्यते ॥

## COMMENTARY—SUMMARY TRANSLATION

He is indeed a great one, a well-known Purusha. While still in the womb only, he knew himself, realised himself. With that self-knowledge, he manifested himself as Brahma in all the various forms everywhere. Cf: "I became Manu; I became Sūrya. I am the seer Kakshīvān, vibrating with meditation. I blessed Kutsa, the son of Arjuna. I am the poet Uśanā. Behold me" ( Ṛg. IV-26-1 ).

Thus, the knowledge that 'I am all' ( Sarvātmabhāva ) and the realisation that 'I am Brahma Himself' ( Brahmātma anubhava ) came to Vāmadeva while still in the womb. Cf: "While still in the womb, I came to know the birth and manifestation of all these gods. One hundred steel armours protected me. Sleeping as I was, I came out like a falcon with speed" ( Ṛg. IV-27-1 ).

### षष्ठी ऋक् ।

यो अन्तस्तपसा ब्रह्मणा दिव्येन
यो विश्वामित्रं मुनिराबभूव ॥
मन्त्रकृद् विश्वामित्रो य ऋषिः
स सत्योऽयममृतो विश्ववेदाः ॥ ६ ॥

पद्पाठः – यः । अन्तरिति । तपसा । ब्रह्मणा । दिव्येन ।
यः । विश्वऽमित्रम् । मुनिः । आऽबभूव ॥
मन्त्रऽकृत् । विश्वामित्रः । यः । ऋषिः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

He the muni, indeed, became a Viśvamitra, a friend of the universe with the help of his tapas, his mantras and super glory. He became the seer Viśvāmitra, the seer of mantras. He is the truth, he is immortal and omniscient.

### अन्वयभाष्यम् ।

यः अन्तस्तपसा आन्तर्येण महसा निर्विषयेण विमर्शेन न तथा दिव्येन दिव्यभावसत्त्वेन सत्त्वशुद्धिरूपेण च ब्रह्मणा मन्त्रेण तथा तद्दिव्यमन्त्राभिमन्त्रितेन चरुणा हविःसत्त्वेन सुवीर्येण संसिद्धेन ब्रह्मवर्चसेन दिव्येन अलौकिकेन महसा अध्यात्मतेजसा च विश्वमित्रं मित्रनाम्ना प्रसिद्धः सूर्य इव विश्वस्यास्य जगतः मित्रं मित्रस्थानीयः सम्बभूव सम्पन्नः इति प्रसिद्धिं जगौ, तथा च तस्यैवेदं मन्त्रदर्शनम् —" मित्रो जनान् यातयति ब्रुवाणः ० " इति सूक्तं

( ऋ.मं. ३-५९-१-९ ) एतस्मिन् अर्थे प्रमाणम् । "आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम" ( ऋ. मं ३-५९-३ ) इति च । तत्र विश्वमित्रत्वसम्पत्तिबोधकं इदं छन्दोवचनम्, अत एव तेनैव योगेन नाम्नाऽपि "विश्वामित्रः" इति प्रसिद्धः सः ऋषिः, तच्च मन्त्रदर्शनप्राप्ताद् ऋषित्वादेवेति गम्यते ॥ अत्र "विश्वामित्रः" पूर्वपददीर्घः "मित्रे चर्षौ" (पा. सू. ६-३-१३०) इति सूत्रात् सङ्गच्छते ॥ तादृशं ऋषित्वमपि प्राणस्वरूपात्मत्वादेवेति गम्यते ॥ "सप्तर्षयस्तपसे ये निषेदुः" (ऋ. मं. १०-१०९-४ ) "सप्तर्षयः प्रतिहिताः शरीरे" "तस्यासत ऋषयः सप्त तीरे" ( बृ. उ. १-२-३ ) "सप्त प्राणाः प्रभवन्ति तस्मात्" ( मुं. उ. २-१-८ ) "सप्त वै शीर्षण्याः प्राणाः" (तै. आ. ) इति च सप्तानां ऋषीणां प्राणस्वरूपत्वेनोपदेशः, "प्राणो वै वसिष्ठः, प्राणो वै विश्वामित्रः" ( ऐ.आ. ) इति वसिष्ठस्येव विश्वामित्रस्यापि प्राणशब्देन निर्देशः सङ्गच्छते ॥ यश्च मन्त्रकृत् मन्त्रद्रष्टा ऋषिः ब्रह्मर्षिः इति प्रसिद्धः, वसिष्ठ-वामदेवादिवदेव विश्वामित्रस्यापि सर्वात्मभावोदितब्रह्मात्मसाक्षात्कारानुश्रवणं दृश्यते ॥

तथा च तस्य विश्वामित्रस्यैव ऋङ्मन्त्रदर्शनं अपि एतस्मिन् अर्थे प्रमाणं भवति ॥

"अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् । अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम" ( ऋ. मं. ३-२६-७-८ ) इति ॥ "अजस्रं ज्योतिर्हविरस्मि सर्वम्" ( साम. ) इति च ॥ सोऽयं आत्मा सत्यः सत्यमन्त्रस्वरूपः सत्यप्रतिज्ञःसिद्धः, "सत्यमन्त्रा ऋजूयवः" ( ऋ.मं. १-२०-४ ) इति ऋषीणां सत्यमन्त्रत्वं प्रतिज्ञायते ॥ तथा अमृतात्मा विश्ववेदाः जातवेदः स्वरूपः विश्वेषां ज्ञानानां वेदानां च द्रष्टा सर्वज्ञः परमर्षिः इति ॥

अत्र "मन्त्रकृत्" इति ऋषेः यत् खलु मन्त्राकर्तृत्वं प्रदर्शितं तत्तु केवलं मन्त्राद्रष्टृत्वमेवेति बोध्यम् । न तु पुनस्तत् कृतिसाध्यत्वरूपं भवितुमर्हति ॥ अत एव "मन्त्रादृक्–मन्त्राकृत्" इति सुस्पष्टार्थकं तत्समानार्थकमेव सङ्गच्छते ॥ प्रसिद्धे ऋगादिवेदे तन्मन्त्राकर्तृत्वं बहुधाऽनुश्रूयते, "ऋषे मन्त्राकृतां स्तोमैः काश्यपोद्वर्धयन् गिरः । सोमं नमस्य राजानम्०" ( ऋ. मं. ९-११४-२ ) इति ॥ "अहं ब्रह्म कणवं मह्यं वर्धनम्" ( ऋ.मं १०-४१-१ ) इति च ऋङ्मन्त्रावर्णो ॥ "यामृषयो मन्त्रकृतो मनीषिणः अन्वैच्छन् देवास्तपसा श्रमेण ॥ तां देवीं वाचꣳहविषायजामहे सा नो दधातु सुकृतस्य लोके" ( तै. ब्रा. २-८-८-५ ) इति याजुषो मन्त्रवर्णः ॥ अत्र "वाचा विरूपनित्यया," इति ( ऋ.मं. ) "यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन् ऋषिषु प्रविष्टाम्" ( ऋ. मं. १०-७१-३ ) "ओहब्रह्माणो विचरन्त्यु त्वे" ( ऋ. मं. १०–७१-८ ) इति च ॥ एवमादिभिः दर्शितानां तेषां कर्तृत्वं करणत्वं च नाम नित्यसिद्धानां मन्त्राणां पुनः कृतेरसम्भवात् अनौचित्याच्च विद्यमानानामेव दर्शनेन श्रवणेन तदनुवचनादिरूपेण तदाविर्भावमात्रं भवितुमर्हतीति

तद्वेदमन्त्रादिवचनादेव समुन्नीयते, तदेतत् शब्दप्रामाणिकानां सर्वेषामपि वेद-शास्त्रादि-तत्त्वविदां निर्णीतं वस्तुतत्त्वमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

He became a Viśvāmitra, a friend of the universe. Mitra is a name for Sūrya, the sun; like him he became a friend of the universe. It was through his performance of tapas, knowledge of mantra, offering oblations ( havis ), and meditation that he became the very splendour of Brahma and the inner glory which are of superworldly order. Cf: " Mitra guides the people who have approached him through speech " ( Ṛg. III-59-1 to 9 ).

He is a mantrakṛt, a maker of mantras, and is famous as Brahmarshi. Like Vasishṭha, Vāmadeva etc., Viśvāmitra also had the knowledge that all is Self, which leads to the realisation of Brahma.

Here the word 'mantrakṛt' indicates the authorship of mantra by a Ṛshi; but really the 'seership' only of a mantra is intended. So, the word 'mantrakṛt' means evidently a 'mantradṛk' and it is used in that sense. Since it is impossible and not right to speak of making again the mantras which are eternal, it is gathered from the Vedas, that it is only 'seeing and hearing them' ( mantras ) that is referred to by all such statements.

### सप्तमी ऋक् ।

यो अन्तः पाशैस्त्रिषु पदेषु बद्धो
यो वा विमुक्तो वरुणस्य पाशात् ॥
शुनः शेपो य ऋषिर्देवरातः ॥
स सत्योऽयममृतो विश्ववेदाः ॥ ७ ॥

पदपाठः — यः । अन्तरिति । पाशैः । त्रिषु । पदेषु । बद्धः ।
यः । वा । विऽमुक्तः । वरुणस्य । पाशात् ॥
शुनःशेपः । यः । ऋषिः । देवऽरातः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

Indeed the Ātman was bound down by three inner nooses in three places. He was released from the noose of Varuṇa. He was the seer Śunaśśepa later known as Devarāta. He is the truth, he is immortal and is omniscient.

## अन्वयभाष्यम् ।

यः पाशैः त्रिभिः अन्तः बहिरपि बन्धरूपेण निहितैः त्रिषु पदेषु अग्र-मध्य-मूल-भागेषु बहिःशरीरे, तथा अन्तः मूलाधार-हृदय-भ्रूमध्यशिरःस्थानेषु अवम-मध्यम-उत्तम-रूपतया ग्रथितैः ब्रह्म-विष्णु-रुद्रसञ्ज्ञकैः बन्धनसाधनैः ग्रन्थिभिः वाक्-प्राण सम्बन्धैः बद्धः नियमितः इति प्रसिद्धः आसीत्, तथा देवताप्रसादेन तस्य वरुणस्य आवरणशक्तिसत्त्वस्य देवतात्मनः पाशात् आवरणरूपात् तस्मात् बन्धनत्रयात् विमुक्तः पुनः विमोकं प्राप्तः इति च प्रसिद्धम्; तदेतत् तस्यैव मन्त्राद्दर्शनाद् गम्यते — "उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत । अवाधमानि जीवसे" (ऋ. मं. १-२५-२१) इति ॥ "शुनः शेपोयमह्वद् गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः । अवैनं राजा वरुणः स सृज्याद् विद्वाँ अदब्धो विमुमोक्तु पाशान्" (ऋ॰ मं १-२४-१३) इति च ॥ यः शुनः शेपः ऋषिः मन्त्रद्रष्टा देवरातः देवरात-नाम्ना प्रसिद्धः देवैः विश्वामित्राय रातः दत्तः इति ; तथा च ब्राह्मणम्— "देवा वा इमं मह्यमरासतेति सह देवरातो वैश्वामित्रः" (ऐ॰ ब्रा. पं. ७) इति ॥ अत्र याजुषं ब्राह्मणमपि एतमेवार्थं समर्थयति ॥ "शुनः शेपमाजीगर्तिं वरुणोऽगृण्हात् । स एतां वारुणीमपश्यत् । उदुत्तमं वरुणपाशमस्मदित्याह । आत्मानमेवैतया वरुणपाशाद् विमुञ्चति" (तै॰ सं ५-२-१-४) इत्यादि ॥ तथा च सर्वानुक्रमसूत्राम् — "कस्य पञ्चोनाऽऽजीगर्तिः शुनः शेपः स कृत्रिमो वैश्वामित्रो देवरातः" (ऋक् सर्वानु. सू. १-२४) इति ॥

सोऽयं अन्तरात्मा ऋषिषु प्रतिष्ठितः सत्यः नित्यसिद्धः अमृतात्मा विश्ववेदाः सर्ववेत्ता च भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

There are three nooses binding the Ātman from within, and from without as well. Externally, the nooses in the body are at the bottom, in the middle and at the top in the head. Internally, they are in mūlādhāra ( solar plexus ), in the heart, and in the centre of the eyebrows. In terms of gods, the nooses are, Brahmā, Vishṇu and Rudra. The seer Śunaśśepa was released by divine grace from all those three nooses of Varuṇa, the god who envelops every Ātman. This was possible for the seer Śunaśśepa on account of his power to see a mantra. One may refer here to the following mantras: "Loosen our bonds that are above, in the middle, and down below, so that I may freely live" Ṛg. I-25-21 ); "Let the wise one ( Varuṇa ) remove the bonds off me" ( Ṛg. I-25-23 ).

Śunaśśepa is a seer, known also as Devarāta; he was given ( rāta ) by the gods ( devaiḥ ) to Viśvāmitra, hence he was called Devarāta. Cf: "He is Devarāta who belongs to my lineage and so is Vaiśvāmitra. He was indeed given to me by the gods" ( Ait. Brāh. V ). A Brāhmaṇa mantra in Yajurveda also states, "Varuṇa caught hold of Śunaśśepa, the son of

Ājigarta. He had the vision of this mantra which praises Varuṇa. "Oh! Varuṇa, loosen this noose which is binding me etc. He said thus and he released himself from the noose of Varuṇa" (Tai. Sam. 5-2-1-4). See the Sarvānukrama Sūtra also: "Śunaśśepa, a son of Ājigarta, became the adopted son (svayam datta) of Viśvāmitra and became famous as Devaráta (Sar. Sūtra 1-24).

This inner soul is well-known among the seers, he is ever perfect, the truth eternal, he is immortal and omniscient.

### अष्टमी ऋक् ।

अयं केतुभिर्ज्योतिरन्तः प्रविष्टो
ज्योतिषा समप्स्व१न्तर्निविष्टः ॥
अयमद्भिः पृथिवीमनुविष्टः
स सत्योऽयममृतो विश्ववेदाः ॥ ८ ॥

पदपाठः – अयम् । केतुऽभिः । ज्योतिः । अन्तरिति । प्रऽविष्टः ।
ज्योतिषा । सम् । अप्ऽसु । अन्तरिति । निऽविष्टः ॥
अयम् । अत्ऽभिः । पृथिवीम् । अनु । विष्टः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

This Ātmā (the principle of consciousness) entered the body (gross matter) in the form of light along with the vital powers. He then entered the waters (the liquid principle) along with light. He then entered the earth (solid) along with those waters. He is the truth, he is immortal and omniscient.

### अन्वयभाष्यम् ।

अयं अन्तरात्मा चेतनः केतुभिः प्राणशक्तिभिः प्रज्ञाभिः ज्यौतिः दिव्यं तेजः अन्तः प्रविष्टः सशरीरेण पुरुषरूपेण उदयार्थं आदौ दिव्ये ज्योतिषि प्राविवेशेति भावः, ततश्च तेन ज्योतिषा वैद्युतेन सह अप्सु जलेषु निविष्टः नितरां विवेश रसभावेन, ततश्च सोऽयमात्मा ताभिरेव अद्भिः पुनः ततोऽपि स्थूलभावाय वृष्टिमुखेन पृथिवीं इमां अनुप्रविष्टः सन् जल-तेजसोः द्वारा प्रार्थिवं सत्त्वं प्रापेति सिध्यति ॥

सः परोक्षः सत्यात्मा चेतनः अमृतः आत्मा एवं क्रमेण ज्योतिर्जलपृथिवीभूतेषु स्वेन चैतन्यसत्वेन अनुस्यूतः अमृतात्मा स्वरूपेण सिद्धः स्वयं सर्वज्ञसत्त्व एव भवतीति ॥ एतेन तस्य आत्मनः भूतशरीरादिसम्बन्धमात्रेण मूलस्वरूपहानिर्न भवितुमर्हतीति सिध्यति ॥

COMMENTARY—SUMMARY TRANSLATION

The inner soul is conscious energy. He, in the form of a flame with his various forces of vital airs, that is prāṇa, entered the body. It is light and lightning which entered the waters or the liquid principle. Then this Ātmā, entered again this earth in the form of rains. He is the supreme truth. Thus he is continuously present in light, water and the earth. He is immortal and omniscient.

## नवमी ऋक् ।

अयं पृथिव्या अन्नमनु रेतो-
ऽयं रेतसा तानृषींरनु यन् ॥
ऋषिभ्योऽयमृषिषु प्रविष्टः
स सत्योऽयममृतो विश्ववेदाः ॥ ९ ॥

पदपाठः – अयम् । पृथिव्याः । अन्नम् । अनु । रेतः ।
अयम् । रेतसा । तान् । ऋषीन् । अनु । यन् ॥
ऋषिऽभ्यः । अयम् । ऋषिषु । प्रऽविष्टः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

The Ātmā entered into food through the earth, and through food he entered into the seminal fluid; and through that seminal fluid, he entered into the body of the ancient seers and through them entered other seers. The Ātmā is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

अयं चेतनः अन्तरात्मा तदनन्तरं पृथिव्याः सकाशात् तेजोमुखेन उदितः सन् पृथिव्यामेवोत्पन्नं सरसं अन्नं च प्रविशन् तद् भोग्यमन्नमनुसृत्य रेतः रेतोरूपेण तथा तेन रेतसा सह उदियाय, ततश्च पुनः तेनैव रेतसा सतेजसेन सरसेन सभौमसत्त्वेन सचेतनेन च सुवीर्येण तान् पूर्वान् ऋषीन् अनुसृत्य यन् अनुगच्छन् तेभ्यः प्राचीनेभ्यः ऋषिभ्यः सकाशात् ऋषिषु तदुत्तरेषु पश्चात्तनेषु आर्षबीजक्षेत्रपरम्पराप्रवाहोदितेषु ऋष्यन्तरेषु प्रविष्टः सन् तत्तदृषिरूपेणोदितः सोऽयमन्तरात्मा एवमजस्रधारया अनुस्यूतो भवति, अत एव सत्यः सत्स्वरूपः अनेकेषु शरीरेषु अतीतेष्वपि स्वयं अमृतः एकरूपेण अवस्थितः अविनाशी विश्ववेदाः सर्वज्ञः इति ॥ अत्र औपनिषदं वचनमपि एतमेवार्थं समर्थयति, "अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मा" इति ॥

अत्र केवलस्य चेतनात्मन: तेजो-जल-पृथिवीसत्त्वेन भूतत्रितयेन आदिसृष्टौ सशरीराणां सचेतनानां च मनु-वसिष्ठादीनां अयोनिजानां आदिमानां आविर्भाव: संवृत्त:, इति तदिदं तत्त्वं वसिष्ठाविर्भावे प्रदर्शितम्, " विद्युतो ज्योति: परि सञ्जिहानम् " ( ऋ. मं. ७ ) इति चतुर्भिर्मन्त्रै:, " यो वा वसिष्ठो ह वशी ऋषीणाम् " इति अस्मिन् सूक्ते चतुर्थे मन्त्रे ॥ तस्यैवायं विशिष्टोऽर्थ: यजुर्वेदेऽपि अनुश्रूयते, " अद्भ्य: सम्भृत: पृथिव्यै रसाच्च । विश्वकर्मण: समवर्तताधि । तस्य त्वष्टा विदधद् रूपमेति । तत् पुरुषस्य विश्वमाजानमग्रे " ( तै. ) इति ॥ " अद्भ्य: सम्भृत:० तन्मर्त्यस्य देवत्वमाजानमग्रे ( शु. य. सं. ३०-१७ ) इति ॥ सोऽयमर्थ: अत्र छन्दोदर्शने ( अस्मिन्नेव सूक्ते ) पूर्वस्यां अष्टम्यामृचि सन्दृष्ट:, स च समर्थित: भाष्ये सङ्क्षेपत: दिग्दर्शनार्थम्, योनिजानामुत्पत्तिस्तु अस्यां नवम्यामृचि प्रदर्शिता, तत्क्रमस्तु पञ्चाग्निविद्यायां विस्तरश: अनुश्रूयते उपनिषत्सु समर्थितम् ॥ " असौ वाव लोको गौतमाग्नि:० " इत्यादि आरभ्य " इति तु पञ्चम्यामाहुतावाप: पुरुषवचसो भवन्ति " इत्यन्तम् बहुधा प्रपञ्चितम् ( बृ. उ. ६–२–९–१३ ) ( छां. उ. ५–३–१–१० ) तत् सर्वं ब्रह्ममीमांसायां निर्णीतम् ॥ तत्र तृतीयस्यामाहुतौ पृथिव्या: सकाशादेव योगेन च त्रिवृत्करणेन आविर्भाव: अयोनिजानाम्, तथा च ऋङ्मन्त्रवर्ण:, " द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् । उत्तानयोश्चम्वो१र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् " ( ऋ. मं १-१६४-३३ ) इति ॥ पञ्चम्यामाहुतो मातु: सकाशात् योनिजानां उत्पत्ति: प्रत्यक्षसिद्धैवेति विवेक: ॥

## COMMENTARY—SUMMARY TRANSLATION

This is Ātmā, the conscious energy. He was born as Tejas ( the principle of light ) from the earth. He entered into the juicy food which grows out of the earth. It was quite enjoyable. The essence of food took the form of semen in the body. From that semen, which contained the splendour and the essence of the earth and all energy, were born the Ṛshis of old and then the later ones. That ensured the continuity of the seers.

From the original elements viz., Tejas, Jala and Pṛthvī, born of Ātmā at the very beginning, Manu, Vasishṭha, and other seers, were born as Ayonijas, i.e. born of no woman.

In this ninth mantra, the birth of those seers born of woman is described, which is further detailed in the Pañchāgni Vidyā of the Upanishads: Cf: "This world Gautama is Agni" etc. ( Bṛ. Up. VI–2, 9 to 13 ). Again, "The waters get the name of Purusha, in the fifth oblation" etc. (Chhānd. Up. 5-3, 1 to 10 ). So, another mantra also says, "The sky or the sun was my father. This earth was my mother; the mid-air is the relation joining these two" ( Ṛg. I–164, 34 ). In the fifth oblation, the birth of those born of woman is described.

## दशमी ऋक् ।

पूर्वेभ्योऽयमृषिभ्योऽहं परियन्
पूर्वेष्वयं पितृषु ज्योतिषाऽऽप्तः ॥
अयं पितृभ्यस्तपसाऽभ्युदितः
स सत्योऽयममृतो विश्ववेदाः ॥ १० ॥

पदपाठः – पूर्वेभ्यः । अयम् । ऋषिऽभ्यः । अहम् । परिऽयन् ।
पूर्वेषु । अयम् । पितृषु । ज्योतिषा । आप्तः ॥
अयम् । पितृऽभ्यः । तपसा । अभि । उत्ऽइतः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

This Ātmā which calls itself 'I' is descended from the ancient seers. It entered and continued its decent in our forefathers through the light, the seed of ancestors. From the forefathers, it has taken birth through their tapas. He is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

अयं अहं आत्मा पूर्वेभ्यः अस्माकं प्राचीनतरेभ्यः ऋषिभ्यः वसिष्ठ–विश्वामित्रप्रभृतिभ्यः देवरातप्रभृतिभ्यो वा गोत्र-प्रवरादिप्रवर्तकेभ्यः बीज-क्षेत्रप्रवाहपरम्परया अविच्छिन्नधारया सन्ततया परियन् प्रतिगच्छन् तथा आगच्छन् इति यावत्, अयं आत्मा पूर्वेषु प्राचीनेषु पितृषु तथा अर्वाचीनेषु प्रपितामह-पितामह-पितृरूपेषु ज्योतिषा तेजोमयेन सुवीर्येण प्राप्तः अवतीर्णः अर्वाचीनतामुपगतः, सोऽयं आत्मा पितृभ्यः साक्षात् पितुः सकाशात् तपसा बाह्याभ्यन्तरेण शास्त्रीयनियमपूर्वकं समाचरितेन धर्म-यज्ञ-योगादिरूपेण साधनविशेषेण संस्कृतः अभि आभिमुख्येन साक्षात् सशरीरः सन् उदितः अजनिष्ट जीवसत्त्वेन सम्पन्नः इति यावत् । सोऽयं आत्मा शारीरः सचेतनः सत्यः सत्स्वरूपः अमृतः विकार–विनाशादिरहितः विश्ववेदाः सर्वज्ञसत्त्वसिद्धः स्वयं भवति ॥ " जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येनासयोनिः " (ऋ. मं. १–१६४–३० ) इति मन्त्रवर्णनिर्दिष्टः " प्रत्यङ् देवानां विशः प्रत्यङ् उदेषि मानुषान्" ( ऋ. मं १-५०-५ ) इति च तदर्थानुश्रवणं भवति ॥

## COMMENTARY—SUMMARY TRANSLATION

This 'I', the Ātmā is derived from our ancient seers, Vasishtha, Viśvāmitra and others or Devarāta and others, through direct and continuous flow of 'seed'. This descended into our forefathers as 'light' which was splendid and strong. This Ātmā issued forth, as Tejas, which was in the form of life.

Life lived according to religion, performance of sacrifices etc. were instrumental for the expression of Ātmā as embodied being. Ātmā was there as seed. That same Ātmā is in the body as an active principle. He is the truth, he is immortal and omniscient. Cf: "This soul with food, intellect, speech, knowledge etc. which are dependent upon it, lives and moves in the bodies which are mortal."

## एकादशी ऋक् ।

अहं ज्योतिषस्तपसाऽभ्युदितो-
ऽहं देवैर्ऋषिभ्यश्चेतसा रातः ॥
ऋषेर्जातोऽयमृषिर्देवरातः
स सत्योऽयममृतो विश्ववेदाः ॥ ११ ॥

पदपाठः – अहम् । ज्योतिषः । तपसा । अभि । ऊत्ऽइतः ।
अहम् । देवैः । ऋषिऽभ्यः । चेतसा । रातः ॥
ऋषेः । जातः । अयम् । ऋषिः । दैवऽरातः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

I am born on account of the tapas of brilliant forefathers. I was a gift of gods given to seers out of sincerity. I am born of a seer, and am the seer Daivarāta. The Ātmā is truth, is immortal and is omniscient.

## अन्वयभाष्यम् ।

अहं अहम्प्रत्ययगम्यः अन्तर्यामी अयमन्तरात्मस्वरूपः तपसा आर्षवंशे प्रादुर्भावेन कर्मणा सद्भावनया संविदा मन्त्रदर्शनेन च साक्षात् ऋषिस्वरूपोदयार्थं स्वाचरितेन च चिरन्तनेन धर्म–यज्ञ–योगादिना साधनविशेषेण ज्योतिषः पितुः ज्योतिरात्मनः सकाशात् तेजोमयात् सुवीर्यात् ब्रह्मवर्चसाच्च अभ्युदितः दिव्यभावेन सिद्धः अभूवम्, सोऽयमहं पुनः तैः देवैः दिव्यात्मभिः चेतसा मनसा सद्भावसत्त्वेन सौमनस्येन ऋषिभ्यः आर्षयदृष्टियुक्तेभ्यः मुनिभ्यः योगिभ्यः यतिभ्यः संयमिभ्यश्च रातः दत्तः ऋषित्व-सम्यग्दर्शित्वादिसत्त्वाभ्युदयप्राप्तये तपोयोगादिशिक्षणार्थं समर्पितः इति यावत् । अयं आत्मा ऋषेः मूलपुरुषात् शुनःशेपापरनाम्नः देवरातात् जातः प्रादुर्भूतः अयं देवरातः ऋषिः ऋषित्वलक्षणेन सम्पन्नः अभवत्, वरुणादिभिः देवैः विश्वामित्राय दत्तः शुनःशेपो देवरातः इवेवेति भावः, सोऽयं अन्तरात्मा सत्यधर्मा अमृतत्वादिसत्त्वसम्पन्नः विश्वेषां वेदानां तत्त्ववेत्ता च भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

This my soul, the guide within, and known on account of self-consciousness was born on account of the tapas of my forefathers. This soul by his actions, his good-will, by his knowledge and by the the power of visualising the mantra, devoted himself for long to the Dharma, Yajña, Yoga etc. with the special purpose of becoming a seer. He ( Daivarāta ) was born as a spark of his forefathers, which was full of splendour, strength and the glory of Brahma. He gave himself up to those who share the views of seers, of munis, of yogis, of yatis, and of sannyāsins. He served them so that he might become a seer, a samyagdarśī, a realised soul. This individual is born of a seer, Devarāta, originally known as Śunaśśepa who was his ancestor. He is himself a seer, this Daivarāta. He has all the characteristics of a seer like Śunaśśepa. Devarāta was given as a gift to Viśvāmitra, by the gods Varuṇa and others. The inner soul is characterised by truth, is endowed with immortality and knows the correct meaning of all Vedas.

## द्वादशी ऋक् ।

अयं तपसा छन्दांस्यन्वगच्छ-
मयमृचश्छन्दोभिरन्वदर्शम् ॥
मन्त्रदृगेव महसाऽभवमृषिः
स सत्योऽयममृतो विश्ववेदाः ॥ १२ ॥

पदपाठः – अयम् । तपसा । छन्दांसि । अनु । अगच्छम् ।
अयम् । ऋचः । छन्दःऽभिः । अनु । अदर्शम् ॥
मन्त्रऽदृक् । एव । महसा । अभवम् । ऋषिः ।
सः । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

This Ātmā ( this person ), this soul studied and understood the Vedas through tapas. With the help of the Vedic mantras and their full knowledge, this Ātmā saw these ( new ) mantras. I became a seer of mantras on account of my knowledge of Brahma. The Ātmā is the truth, he is immortal and omniscient.

## अन्वयभाष्यम् ।

अयं प्रत्यगात्मा तपसा अन्तर्विमर्शादिना धीयोगेन यज्ञरूपेण पवित्रीकृतहृदयः विशुद्ध-सत्त्वेन सत्पात्रीकृतशीर्षण्यदिव्ययन्त्रनिचयः अभूत, तेनैव च योगेन सोऽयमहं छन्दांसि

गायत्रीप्रभृतीनि छन्दस्सत्त्वानि अनुसृत्य अगच्छम् तान्येव छन्दांꣳसि आत्मनि अन्तः उपप्रापम्, तैरेव छन्दोभिः भूयोऽपि तपस्यन् प्राचीनतमानां वेदानां विज्ञानेन तद्देवतानां प्रसादेन धियां समाधिसत्त्वेन सम्प्रसादेन च ऋचः इमाः नूतनाः अन्वदर्शम् छन्दोदर्शनसत्त्वेन स्वयं सम्प्रापम्, तेन च महसा दिव्येन ब्रह्मवर्चसेन मन्त्रदृक् मन्त्रद्रष्टैव सन् ऋषिः ऋषित्वलक्षणसम्पन्नः अभवम् तत्साक्षात्कारेण संवृत्तोऽस्मि, "ऋषिर्विप्रः काव्येन" (ऋ. मं. ८–७९–१) इति, "ऋषिर्हं दीर्घश्रुत्तमः" (ऋ. मं.) इति च तदनुश्रवणम् ॥

एवं योऽयमेतादृशेन ऋषिसत्त्वेनोदितः सोऽयं अन्तरात्मा सत्यः सत्यमन्त्रः अमृतात्मस्वरूपः विश्ववेदाः सर्ववित् सत्त्वसम्पन्नः इति ॥

तदिदं छन्दोदर्शनं नूतनमेव भवितुमर्हति, तथा च वसिष्ठार्षेयं ऋङ्मन्त्रदर्शनम्, "ये च पूर्वे ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः ॥ अस्मे ते सन्तु सख्याशिवानि यूयं पात स्वस्तिभिः सदा नः" (ऋ॰ मं. ७–२२–९) इति ॥ एवं नूतनेन मन्त्रदर्शनेन नूतनाः ऋषयोऽपि भवन्तीति वेदे श्रूयते तथा च माधुश्छन्दसं आर्षं दर्शनम् —"अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत" (ऋ. मं. १–१–२) इति ॥

अत्र छन्दस्वत्याः वाग्देवताया एव सत्प्रसादेनोदितं तदिदं छन्दोदर्शनसत्त्वमिति प्रतिज्ञायते, तत्प्रतिज्ञावचनं च वाचः आम्भृण्याः एव भवति, तच्च अनेन छन्दोदर्शनेन सार्थकं सत्यं प्रत्यक्षसिद्धमेवेदमभूदिति गम्यते — "यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्" (ऋ. मं. १०-१२५-५) इति ॥ "उतो त्वस्मै तन्वं१ विसस्रे जायेव पत्य उशती सुवासाः" (ऋ॰ मं. १०-७१-४) इति ॥ अस्मिन् अथ औपनिषदं मन्त्रवचनमपि भवति—"यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनूꣳ स्वाम्" (कठो. १–२–२३) इति ॥ एतावता प्रपञ्चेन प्रमाणेन इदानीमपि नूतनं मन्त्रदर्शनं तथा नूतनं ऋषित्वं च तपसैव प्राप्तुं शक्यमिति सिध्यति ॥

## COMMENTARY—SUMMARY TRANSLATION

This self-introspective soul (of Daivarāta) purified itself by tapas, that is by critical examination of experiences, by logical thought and by sacrifices. Thereby he became the master of his inner powers and other instruments of knowledge. Being thus purified, he was able to enter the secrets of the Vedic metres such as Gāyatrī, and of the sacred mantras. This enabled him to 'see' new Vedic mantras in his vision, mantras which are similar and akin to those of the most ancient mantras. This was possible (for Daivarāta) on account of his tapas, his deep knowledge of ancient Veda mantras, the grace of the respective gods who are the subjects of the mantras, concentration amounting to communion with the truth of truths, and on account of spiritual delight. He has become the seer of mantras by his great powers of knowing Brahma. He is full of the characteristics of a seer of mantras. Daivarāta is

full of this realisation. " A Vipra or a Brahmin becomes a seer on account of his ability to be a poet, a poet who sees mantras " ( Ṛg. VIII-79-1 ). " He who is able to hear best the mantras with his inner ear is a seer or a Ṛshi " ( Ṛg. ).

Thus he who has attained the inner status of a seer or Ṛshi is the real soul who can see the mantras, who is eternal, and who has the knowledge of everything.

This 'Chhandodarśana' deserves to be called a collection of the new Vedic mantras. There are references in Veda itself to the fact of seeing new mantras. For instance, see Ṛg Veda VII-22-9 regarding Vasishṭha: " May the gods Indra and Brahma of old, and those created by the Brahmins who 'saw' anew fresh mantras, be friendly and good to us and may you, oh Indra and Brahma always protect us." Thus the Vedas themselves have internal evidence that by 'seeing' new mantras new seers come into being. Similarly there is the phenomena of new mantras being seen by Madhuchchhandas: " Agni worshipped or praised by the ancient Ṛshis is also praised by new Ṛshis ( Ṛg. I-1-2 ). The seer ( Daivarāta ) makes a declaration here that this 'Chhandodarśana' ( this bunch of mantras ) has been possible for him on account of the grace of the goddess of speech who is replete with metrical mantras. The seer Vāgāmbhṛṇī has made a similar declaration. That declaration seems to be supported and proved to be true, by this declaration of Daivarāta. In the Ṛg Veda X-125-5, the seer declares, " I have the power to invest with greatness whichever god I wish to—Brahma for instance. I invest the seer also with great intelligence." Similarly in Ṛg Veda X-71-4, it is stated, " To the seer whom she Vāk ) likes, she offers hereself like a well-dressed bride to her lover." There is evidence to this effect in the Upanishads also. " The Ātmā is available only to him whom the Ātmā chooses. This Ātmā reveals himself to one whom he chooses " ( Kaṭha I-2-23 ). Thus it is proved both by fact and by evidence that this kind of 'seeing' new mantras and the coming into being of new seers ( as in the case of Daivarāta ) is possible through tapas, that is by austerity, by concentration, and purification of the tools of perception.

### त्रयोदशी ऋक् ।

अयं प्रजानन् अजन्यः सन् अमर्त्यो-
ऽयं विश्वथा राजतेऽन्तर्य एकः ॥
अयं स्वराट् सम्राड् विराड् विभुः प्रभु-
रयं सत्योऽयममृतो विश्ववेदाः ॥ १३ ॥

पद्पाठः – अयम् । प्रऽजानन् । अजन्यः । सन् । अमर्त्यः ।
अयम् । विश्वऽर्था । राजते । अन्तरिति । यः । एकः ॥
अयम् । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
अयम् । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## चतुर्दशी ऋक् ।

तत् ते भगवन् इन्द्र बृहस्पते
संविदा तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं परीतं
तत् परमम् ज्योतिर्विश्वस्य दर्शयत् ॥ १४ ॥

पद्पाठः – तत् । ते । भगऽवन् । इन्द्र । बृहस्पते ।
सम्ऽविदा । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

॥ इति पञ्चमेऽनुवाके तृतीयं आत्मसूक्तम् समाप्तम् ॥

The 13th and 14th mantras, which follow before Section V is completed, are repetitions of the 9th and 10th mantras in the first hymn of this Section V, which please see. See commentary also thereon.

Thus ends the Third hymn in the Fifth Section.

## अथ पञ्चमेऽनुवाके चतुर्थं आत्मसूक्तम् ।

अनुवाकः ५ । सूक्तम् ४ । ऋचः १–८ । आत्मा ।

अयं प्रत्यङ् पुरुषः अष्टौ, दैवरातो वैश्वामित्रः, आत्मा, जगती ।

**Now this the Atma Sukta, Fourth in the Fifth Anuvaka**
**Section V: Hymn 4: Riks 1-8 - ĀTMĀ**

This hymn beginning with "Ayam Pratyaṅ Purushaḥ" contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Ātmā is the god and Jagatī is the metre.

### अथ प्रथमा ऋक् ।

अयं प्रत्यङ् पुरुषः स आत्मा परः
सन्नपादतनूरकरणोऽप्राणः ॥
संविदा कामेन कर्मणा प्रचितो-
ऽयं वाचा स्वधयाऽधि चेततेऽन्तः ॥ १ ॥

पदपाठः – अयम् । प्रत्यङ् । पुरुषः । सः । आत्मा । परः ।
सन् । अपात् । अतनूः । अकरणः । अप्राणः ॥
सम्ऽविदा । कामेन । कर्मणा । प्रऽचितः ।
अयम् । वाचा । स्वधया । अधि । चेतते । अन्तरिति ॥

This person (soul) who turns his sight inward is the highest Ātman. He is without any parts, without a body, without any means of action, without the vital power. Being invested with pure consciousness, will-power, and the power of action, he inspires every one from within, by the power of speech.

### अन्वयभाष्यम् ।

अयं आत्मा प्रत्यङ् अन्तर्मुखः सर्वेषां प्राणभृतां शरीरे अन्तर्हितः सचेतनः पुरुषः पुरुषसत्त्वः ज्योतिर्मयः सः परः सर्वेभ्यः उत्तमः परमः आन्तरतमः सन् केवलं सत्स्वरूपः, सः स्वयं अपात् अंश-गुण-धर्म-रूपादि पादविशेषविरहितः, अतनूः अशरीरः शरीरादि सम्बन्धरहितः अकरणः बुध्यादिसर्वेन्द्रियवृत्तिविशेषादिबन्धनिर्मुक्तः सर्वविषयैरपि अलिप्तः एवास्ति, तथा अप्राणः प्राणादिभिरपि अनिबद्धः असंस्पृष्टश्च केवलः चैतन्यमात्राशबलः इति यावत् ॥

सोऽयं संविदा ज्ञानशक्त्या क्रियया कृतिशक्त्या एषणया इच्छाशक्त्या चिता संविदादि त्रिशक्तितत्त्वसहितया परया तुरीयया चेतनाशक्त्या च आचितः सङ्गृहीतः प्रविवृत्तः स्वधया स्वाभिधया वाचा वाचकसत्त्वया आत्मनि अन्तः अधि अधिष्ठानरूपेण चेतते चेतनया संस्फुरति, सोऽयं सर्वान्तरः सर्वेन्द्रियवृत्तिविषयास्पर्दीभूतः सर्वेषामपि अन्तः अपरोक्षसिद्ध एवेति ॥ अस्मिन्नर्थे ऋङ्मन्त्रवर्णः— "प्रत्यङ् देवानां विशः प्रत्यङ् उदेषि मानुषान् । प्रत्यङ् विश्वं स्वर्दृशे" ( ऋ. मं. १-५०-५ ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This introspecting soul is located in all living beings. He is Purusha endowed with pure intelligence. He is Ātmā the Supreme. He is indivisible; he has no division, nor form nor any attributes. He is without a body. He is without senses, and other means of action. He is not bound by the vital airs, nor is he touched by them. Even then, he exists and is pure intelligent energy. His existence can be known on account of knowledge, will to desire, will to act and on account of the Turīya (purest conscious state) which includes all these other states of consciousness. By means of his own power of speech he inspires all. That inner soul is realisable through self-experience. Cf.: "You are the inner soul of gods, of men and of the entire universe. Realisation can be attained by inward seeing" (Ṛg. 1-50-5).

## द्वितीया ऋक् ।

अयं ज्योतिषा रसेन भूम्याऽऽचितः  
प्रत्यङ् त्रिवृताऽन्नेन भूतैः सम्भृतः ॥  
वाचा प्राणेन मनसा चेतनेना-  
यमस्मास्वन्तरधि प्रचेतते ॥ २ ॥

पद्पाठ :– अयं । ज्योतिषा । रसेन । भूम्या । आऽऽचितः ।  
प्रत्यङ् । त्रिऽवृता । अन्नेन । भूतैः । सम्ऽभृतः ॥  
वाचा । प्राणेन । मनसा । चेतनेन ।  
अयम् । अस्मासु । अन्तरिति । अधि । प्रऽचेतते ॥

This indewelling soul is invested with the principle of light, fluid and earth. And he is born of and protected by the three elements mixed in equal proportions. He is within us and activises us through the power of speech, the vital forces and the principle of consciousness from within ourselves.

## अन्वयभाष्यम् ।

अयं सोऽयं चेतनः आत्मा ज्योतिषा प्रथमेन तेजःसत्त्वेन, रसेन द्वितीयेन अप्-सत्त्वेन, भूम्ना तृतीयेन भूमिसत्त्वेन च आचितः सर्वसारभूतः सन् समुदितः, सर्वषां अन्तः प्रत्यङ् प्रत्यगात्मरूपेण प्रतिष्ठितः अस्ति, सोऽयं त्रिवृता त्रिवृदितेन तेजो-जल-भूमिसत्त्वेन समानैकरसभूतेन अन्नेन भोज्येन सञ्जीवनीयेन अमृतरूपेण दुग्धेन रस-घन-स्निग्धपदार्थैक-सत्त्वेन दुग्धादिना वा पोषितः सन् तैः एतैः त्रिसत्त्वेः सह तेजोजलान्नोदितैः सर्वैः प्राण-भृद्भिः सम्भृतः, सन्भृतः, सचेतनो बभूवेति यावत् ॥

सोऽयं अन्तरात्मा अस्मासु सर्वेषु जन्तुषु अन्तः शरीरे हृदयं अधिष्ठितः सन् वाचा संवित्सत्त्वया, प्राणेन कृतिसत्त्वेन, मनसा कामना-भावना-कल्पनादिसत्त्वेन च, इत्यनेन तेजोऽबन्नात्मकेन करणत्रयेण सह चेतनेन चैतन्यसत्त्वेन प्रचेतते संस्फुरति । तथा चेतमानः अयं स्वयं संवित् क्रियेच्छाप्रधानानि वाक्-प्राण-मनःस्वरूपाणि एतानि आन्तर्याणि त्रीणि करणानि प्रचेतयति इति सिध्यति ॥

### COMMENTARY—SUMMARY TRANSLATION

This inner soul is intelligent energy. He is the unified essence of all the three principles of light, fluid and earth. He is established within all. This soul within the body is born of and supported by the principles of light, fluid and earth, found in food and other substances. The 'anna' is food, in the form of any eatable, ambrosia, or milk products, which are in the form of solid, liquid and fatty substances. The Soul in us and all the living beings vibrates with Vāk in the form of intelligence, desire or power of action. The power of consciousness is united with Vāk, Prāṇa and Manas which are the essence of Tejas, Ap and Anna. This vibrant inner soul inspires the three internal instruments, Vāk, Prāṇa and Manas, which express themselves as knowledge, action and desire.

## तृतीया ऋक् ।

अयं धीभिरभि द्योततेऽसौ सविता
प्रज्ञया वाचा प्रज्ञपन्या चित्तिभिः ॥
अयमन्तः संप्रसादसत् प्रचेतनः
प्रत्यङ् प्रज्ञोऽधि विश्वथा चिकेतति ॥ ३ ॥

पदपाठः – अयम् । धीभिः । अभि । द्योतते । असौ । सविता ।
प्रज्ञया । वाचा । प्रऽज्ञपन्या । चित्तिऽभिः ॥

अयम् । अन्तरिति । सम्प्रसादऽसत् । प्रऽचेतनः ।
प्रत्यङ् । प्रऽज्ञः । अधि । विश्वऽथा । चिकेतति ॥

This Ātmā shines on account of the power of intelligence. He is the very sun (in the universe) and shining in the inmost heart with the power of intelligence and of speech and other powers of consciousness. He is the inner being in full ecstacy and full of knowledge of everything.

## अन्वयभाष्यम् ।

अयं सर्वान्तरः आत्मा धीभिः संवित्सत्त्वाभिः अभितः द्योतते प्रकाशते । अयमेव बहिः ब्रह्माण्डे सविता प्राणिनां प्रसविता—जनयिता प्रेरयिता च सन् असौ दिव्यः अभिद्योतते मण्डले निजे अन्तरधिष्ठितः देदीप्यते, अभितः सर्वतः प्रकाशयति च । तथा प्रज्ञया संवित्सत्त्वया धिया वाचा वाचिकया शब्दतन्मात्रया प्रज्ञपनिया स्वं गुप्तं अर्थं वाच्यार्थसत्त्वं लक्ष्यार्थं च प्रकर्षेण ज्ञापयन्त्या चिता चेतनया सर्वदा स्वयमेव प्रकाशते, सोऽयं आत्मा अन्तः आन्तरतमः सन् सम्प्रसादसत् सुषुप्तिसंस्थः तथा समाधिनिष्ठः प्रचेतसः केवलं चेतनः प्रत्यङ् अन्तर्मुखः प्रत्यगात्मस्वरूपः प्रज्ञः प्रकृष्टज्ञानसत्त्वपूर्णः, अधि अध्यात्मतत्त्वतः सिद्धः विश्वथा सर्वथा चिकेतति जानाति, सोऽयमात्मा अन्तरात्मनि स्वस्मिन्नेव प्रतिष्ठितः सन् आत्मानं नित्यं अशरीरत्वादि सत्त्वपूर्णं स्वयमेव अनुभवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Ātmā, the internal soul, shines with all the powers of intellect and with powers of knowing. This is like the sun outside in the universe, who inspires all with light. He is a divine being shining for ever independently within his own orb. The Ātmā has great power of intelligence and speech. This Ātmā who is in the inmost heart, is always in dreamless sleep as it were. He is pure conscious energy. He is the soul turned inward. He is full of knowledge and strength. He knows all and everything. He is established within the heart and experiences himself in the form of knowledge of everything.

## चतुर्थी ऋक् ।

अयं जातवेदाः पुरुषोऽन्तरग्नि-
र्मनसाऽधि सोमेनाग्नेन भूम्ना ॥
अयं वैश्वानरः पचत्यन्नमन्तः
प्रत्यङ् ङ्गिसदभिचष्टे चेतसा ॥ ४ ॥

पद्पाठः – अयम् । जातऽवेदाः । पुरुषः । अन्तरिति । अग्निः ।
मनसा । अधि । सोमेन । अन्नेन । भूम्ना ॥
अयम् । वैश्वानरः । पचति । अन्नम् । अन्तरिति ।
प्रत्यङ् । ज्ञप्तिऽसत् । अभिऽचष्टे । चेतसा ॥

He is the Purusha knowing everything. He is the inner fire with the power of the mind feeding on soma, the essence of divine food. He is the Vaiśvānara, the inner fire which digests all food. With his sight turned inward, he is capable of seeing and knowing everything by his powers of intelligence.

## अन्वयभाष्यम् ।

अयं सर्वान्तरः आत्मा जातवेदाः विश्ववेत्ता तथा विश्वसत्तात्मकः पुरुषसत्त्वः अन्तः शरीरे अभ्यन्तरे जाठरः अग्निः सन् प्रतितिष्ठति । तथा शरीरेऽन्तर्हितः सन् मनसा अन्तःकरणेन अधि तदधिष्ठितेन सोमेन दिव्येन रसात्मना भूम्ना भूमिसत्त्वेन व्यापकेन अन्नेन भोज्येन प्राणसञ्जीवनीयेन युज्यते इति अर्थात् लभ्यते, सोऽयं वैश्वानरः सर्वनर-शरीरसम्बद्धः सचेतनः सिद्धः आत्मरूपः ज्योतिर्मयः अग्निः आन्तर्यः सन् अन्तः शरीरे अन्नं भुक्तं भोग्यं च पचति भोजनार्हं अन्नं परिपाकमुखेन रसादिभावाय प्रेरयति प्रणयतीति यावत् ॥

अत्र स्मार्तं वचनमुदाहरणम्—"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापान-समायुक्तः पचाम्यन्नं चतुर्विधम्" इति । सोऽयं प्रत्यङ् आत्मा ज्ञप्तिसत् ज्ञान-भावनादिसत्त्वः अप्रमादादिसद्वृत्तिकः स्फूर्ति–जागृतिसंस्थः चेतसा अन्तःकरणेन अभिचष्टे सर्वतः विपश्यति प्रज्ञानेत्रेण सर्वं प्रत्यक्षीकरोति, आत्मन एवान्तरनुभावयेति । अस्मिन्नर्थे ऋङ्मन्त्र-वर्णो भवति — "इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण" इति, "एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे" (ऋ. मं. १०-११४-४) इति च ॥

### COMMENTARY—SUMMARY TRANSLATION

This Ātmā who is in all, knows all and everything and contains all in himself. He is the Purusha, the person. Within the bodies of all, he is the fire in the stomach (jaṭhara agni). He is one with the internal instruments (antaḥ-karaṇa) and its presiding deity Soma. This Vaiśvānara (inner fire) in the bodies of all is full of energy. He is the very soul. He is the internal bright Agni. Residing in the body, he digests all food. This means that it is he who dwells in us and inspires us. Cf.: "I am in the bodies of all living

beings as Vaiśvānara; with the help of prāṇa ( the outward breath ) and apāna ( the inward one ), I digest the four-fold food " ( Gita XI ).

This is the indwelling soul, full of the power of knowledge, power of intellect, thought and watchfulness. With the internal instrument ( antaḥ-karaṇa ), he knows all and experiences all and everything within himself.

## पञ्चमी ऋक् ।

अयं विश्ववेदाः पुरुषः स इन्द्रो
विद्युता द्योततेऽद्भिः प्राणैर्मरुद्भिः ॥
सुप्तिसदात्मा चेतते तेजसाऽन्त-
र्नाभिसदिमां तनूं दधे रुद्रियः ॥ ५ ॥

पदपाठः – अयम् । विश्वऽवेदाः । पुरुषः । सः । इन्द्रः ।
विऽद्युता । द्योतते । अत्ऽभिः । प्राणैः । मरुत्ऽभिः ॥
सुप्तिऽसत् । आत्मा । चेतते । तेजसा । अन्तरिति ।
नाभिऽसत् । इमाम् । तनूम् । दधे । रुद्रियः ॥

This is the omniscient Purusha. He is Indra. He shines with the help of Maruts, with the lightning, the waters and all the forces of life. He is the soul in dreamless sleep. With his power of light, he vibrates within. Being located in the navel and deriving his power from Rudra, he supports this body.

## अन्वयभाष्यम् ।

अयं सर्वान्तरः आत्मा विश्ववेदाः विश्वविज्ञानसत्त्वः तथा पुरुषः विश्वबीजात्मक-पुरुषत्वसत्त्वयुक्तः सः परोक्षसिद्धः इन्द्रः अधिदैवततत्त्वेन सिद्धः पारमैश्वर्यादिसर्वसत्त्वपूर्णः सन् विश्वस्यैव प्रभवति, सः विद्युता वैद्युतज्योतिःशक्त्या तथा तदाश्रयीभूताभिः अद्भिः रससत्त्वाभिः मरुद्भिः स्वीयैः सखिभूतैः मरुद्गणैः सहितः तथा प्राणैः आपोमयैः सञ्जीवन-सत्त्वैश्च साकं द्योतते अन्तरिक्षे स्वे भुवने गुप्ततया राजते। तत्तद्द्वारा प्रकाशते आविर्भवति इति भावः ।

सोऽयं सुप्तिसत् सुप्तिस्थाने मध्यमे पदे तृतीये सन्धिरूपे पदे प्रतिष्ठितः आत्मा चेतनः अन्तः तेजसा तेजःसत्त्वेन स्वरूपेण चेतते जागृतः सन् स्फुरति, अत एव नाम्ना अपि सः तैजसः इति उपनिषदि प्रसिद्धः, "स्वप्नस्थानः अन्तःप्रज्ञः० प्रविविक्तभुक् तैजसः" इति तद्वचनम् ( मां. उ. ) तथा नाभिसत् अन्तःशरीरे नाभिसंस्थः, बहिस्तु अन्तरिक्षस्थः

नाभिः अध्यात्मं अन्तरिक्षं भवति, " नाभ्या आसीदन्तरिक्षम् "( ऋ. मं. १०-९०-१४ ) इति मन्त्रवर्णात् ॥ सोऽयं इमां तनूं प्रत्यक्षसिद्धां दधे धारयामास, नित्यं सन्धारयतीति यावत् ॥ सोऽयं रुद्रियः मरुत्पितृत्वात् प्राणरूपत्वाच्च । " अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया " ( ऋ. मं. ८-७२-३ ) " नव वै पुरुषे प्राणाः । नाभिर्दशमी " ( तै. ) " दशेमे पुरुषे प्राणाः आत्मैकादशः " ( तै. ) इति च ॥ एतेन आत्मनः रुद्रियत्वं प्रतिज्ञातं गम्यते इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This internal soul of all is one; he is like the seed of all. He is the very embodiment of all knowledge of all types. He contains the very seed of this universe. He is the Indra, full of supreme riches. He shines brilliantly with his friendly troop of Maruts, with his power of lightning, with waters containing the very essence of life, and with all life forces. He manifests himself in all these forms.

He vibrates as pure energy. He flashes with his internal power of light. Even by name, he is Taijasa ( brilliance ), famous in the Upanishads. Cf.: " While in dream, he is awake internally, enjoys divine happiness other than the worldly one, and is known as Taijasa " ( Māṇḍ. Up. 4 ). He is in the navel region within the body; externally, he is in the mid-air. " From navel, mid-air was born " ( Ṛg. X-90-14 ). He supports this visible body. He belongs to Rudra, who is the father of Maruts and who is the very form of life.

### षष्ठी ऋक् ।

अयं बहिर्धाऽन्तर्धा च समापृतः
सन्नात्मा सोऽमृतः प्रचेतनो नित्यम् ॥
मात्रायाः परः स ईशानो विश्वस्य
विश्वमेवाधि प्रतीदं विश्वरूपः ॥ ६ ॥

पदपाठः — अयम् । बहिःऽधा । अन्तःऽधा । च । सम् । आऽपृतः ।
सन् । आत्मा । सः । अमृतः । प्रऽचेतनः । नित्यम् ॥
मात्रायाः । परः । सः । ईशानः । विश्वस्य ।
विश्वम् । एव । अधि । प्रति । इदं । विश्वऽरूपः ॥

This soul which pervades everything and all bodies externally and internally, is Ātmā the imperishable, eternal, pure energy. He is beyond all measurement. He is the ruler of the whole universe. He is everywhere in this universe as the universe is within him.

## अन्वयभाष्यम् ।

सोऽयं चेतनः आत्मा बहिर्धा ब्रह्माण्डे उत अन्तर्धा पिण्डे अस्मिन् शरीरे च, एवं अन्तर्बहिरपि सः परोक्षः सं सम्यक्तया समानरूपेण आपृतः व्याप्तः पूर्णः, सः स्वयं अमृतः विकार–विकासादिरहितः प्रचेतनः प्रकृष्टचेतनः केवलं चैतन्यमात्रः आत्मा, मात्रायाः मानात् परः मानादिरहितः अमात्रः इति यावत्, सः अस्य विश्वस्य ईशानः ईशिता, इदं समग्रं विश्वं जगत् अधि अधिष्ठितः विश्वरूपः सन् बभौ इति ॥

### COMMENTARY—SUMMARY TRANSLATION

This soul, the conscious energy, is externally in the macrocosm (Brahmāṇḍa) and internally in the microcosm (piṇḍa). It is an invisible power which pervades everything equally and fully. He is immortal without any change whatsoever. He is the pure energy of consciousness itself. He is, in short, the Ātmā beyond all measure. He is the ruler of this cosmos at large. He is this whole universe which is contained in him.

## सप्तमी ऋक् ।

अयं प्रजानन् अजन्यः सन् अमर्त्यो-
ऽयं विश्वथा राजतेऽन्तर्य एकः ॥
अयं स्वराट् सम्राड् विराड् विभुः प्रभु-
रयं सत्योऽयममृतो विश्ववेदाः ॥ ७ ॥

पद्पाठः — अयम् । प्रऽजानन् । अजन्यः । सन् । अमर्त्यः ।
अयम् । विश्वऽथा । राजते । अन्तरिति । यः । एकः ॥
अयम् । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
अयम् । सत्यः । अयम् । अमृतः । विश्वऽवेदाः ॥

## अष्टमी ऋक् ।

तत् ते देव सवितः पुरुषात्मन्
संविदाऽयं तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं सम्परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पद्पाठः – तत् । ते । देव । सवितः । पुरुष । आत्मन् ।

सम्ऽविदां । अयम् । तपस्यन् । अनु । तुरीयम् ॥

पदम् । पश्याभि । दर्शतम् । सम् । परि । इतम् ।

तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

## अन्वयभाष्यम् ।

अयं मन्त्रः पूर्वं व्याख्यातः । अत्र " देव सवितः पुरुष आत्मन् " इति सम्बुध्यन्तानि चत्वारि पदानि तु विशिष्टानि तत्तद्विशेषणार्थेन यथासम्भवं योजनीयानि इत्येव विशेषः ॥

॥ इति पञ्चमेऽनुवाके चतुर्थं आत्मसूक्तम् समाप्तम् ॥

॥ इति पञ्चमः आत्मानुवाकः सम्पूर्णः ॥

## COMMENTARY—SUMMARY TRANSLATION

The seventh mantra is a repetition and has been comented upon: it is the ninth mantra in the first hymn of the fifth section ( Anuvāka–V ).

The eighth mantra also is a repetition and has been commented upon : it is the tenth mantra in the first hymn of the fifth section ( Anuvāka–V ). The only difference is that the vocatives, Deva, Savitaḥ, Purusha and Ātman with their respective attributes are to be interpreted according to context.

Thus ends the Fourth hymn in the Fifth Section.

Thus ends the Fifth Section dedicated to Ātmā

---

अथ षष्ठः पुरुषानुवाकः ।

अनुवाकः ६ । सूक्तम् १ । ऋचः १-८ ।

अथ प्रथमं पुरुषसूक्तम् ।

यः प्रजानन् एक एवासीत् अष्टौ, दैवरातो वैश्वामित्रः, पुरुषः, जगती ।

**Now this the Purusha Sukta, First in the Sixth Anuvaka**

**Section VI: Hymn 1: Riks 1-8** - PURUSHA.

This hymn beginning with "yaḥ prajānan eka evāsīt", contains eight Ṛks Daivarāta Vaiśvāmitra is the Ṛshi, Purusha is the god and the metre is Jagatī.

अथ प्रथमा ऋक् ।

यः प्रजानन् एक एवासीत् पुरुषो
यस्मान्नान्यन्न निमिषन्न किं स्वित् ॥
यो वा ब्रह्म परं ब्रह्मणस्पतिर्य-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १ ॥

पदपाठः – यः । प्रजानन् । एकः । एव । आसीत् । पुरुषः ।
यस्मात् । न । अन्यत् । न । निऽमिषत् । न । किम् । स्वित् ॥
यः । वा । ब्रह्म । परम् । ब्रह्मणः । पतिः । यः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

That Purusha who was alone in the form of pure consciousness; that Purusha except whom there existed nothing else which was living or moving; that Purusha who is the supreme Brahma and who is the lord of the power of speech, Him I shall attain by penance and by the use of my intelligence.

अन्वयभाष्यम् ।

यः प्रजानन् केवलं संवित्सत्त्वः पुरुषः परमः सद्रूपः, कश्चिदेकः कश्चिदस्तीति लोके वेदे च प्रसिद्धः, तथा यः अयं आत्मा अस्माकं अन्तः हृदये "अहं" इति—चैतन्यप्रत्ययेन स्फुरन्, पुरुषः पुरुषरूपः आत्मा सृष्टेः प्राक् स्वयं यः एक एव आसीत् इति अनुश्रूयते, तथा यस्मात् परस्मात् आत्मनः अन्यत् वस्तु न आसीत्, निमिषत् चेतमानं विशेषेण संस्फुरत् किं स्वित् यत् किंचिदपि विशेषरूपं न आसीत् इति च वेदे श्रूयते, यो वा पुरुषः परं ब्रह्म सर्वदा स्वयं परब्रह्मात्मस्वरूप एव अस्ति, यश्च ब्रह्मणः प्रत्यक्षब्रह्म-

रूपाया: वाच: सर्वस्या अपि वाचकशक्ते: अधिपति: सोऽयं प्रत्यगात्मस्वरूप: पुरुष:, तस्मात् धीभि: सर्वै: बुद्ध्यादिभि: आत्मैकलक्ष्याभि: धीन्द्रियै: तपसा केवलेन विमर्शरूपेण धीयोगेन तं परमं पुरुषं प्रपद्ये प्राप्नोमीति । एतेन धीयोग एव तद्ब्रह्मात्मपुरुषानुभवसाधनमित्युक्तं भवति । तथा च प्रसिद्धः ऋङ्मन्त्रवर्ण:—" यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन । स धीनां योगमिन्वति ( ऋ॰ मं. १-१८-७ ) इति ॥ अत्र ज्ञानादियज्ञसिद्धे: सर्वस्या: अपि मूलभूत: स: पुरुष: सर्वासां धियां अन्तरात्मना सामरस्येन योगे स्वयमेव प्रकाशते इति तदभिप्राय: ॥

## COMMENTARY—SUMMARY TRANSLATION

Purusha, who is pure consciousness, is the supreme of supremes. He is existence itself. He is known in the world and Veda as one and existing alone. He is Purusha dwelling in the body, throbbing with the cognition 'I'. It is known that He was all alone in the beginning. Likewise, there was nothing else apart from Him; Purusha was indeed Brahma himself. He is the lord of Vāk, who is perceptible. He is the lord of the power of speech. He is the indwelling soul. So, I attain Him, with all the powers of my intelligence, which are directed towards him. I attain him by Tapas, by pure meditation ending in union ( Dhīyoga ) with Him, the Purusha, the supreme. Union by dint of meditation ( Dhīyoga ) is the only way of realising that Brahma, Ātmā and Purusha. Cf.: " Without meditation (Dhīyoga), the sacrifice ( Yajña ) of even the wise is not successful, and He is present in the union on account of meditation only " ( Ṛg. I-18-7 ). The idea is that Purusha who is the origin of all existence can be attained when all the powers of intelligence are one with Him.

## द्वितीया ऋक् ।

यो वा विश्वमिदं बभूवायं बृहन्
एक एव यो बहुधाऽऽततान ॥
यो विदा सुचित्ती छन्दसा सुवेदा-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ २ ॥

पदपाठः – यः । वा । विश्वम् । इदम् । बभूव । अयम् । बृहन् ।
एकः । एव । यः । बहुधा । आऽततान ॥
यः । विदा । सुऽचित्ती । छन्दसा । सुऽवेदाः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He indeed became the whole universe. He who could expand infinitely was only one, but spread apace Himself in multi-million forms. He is the very power of intelligence and of life, and he is full of knowledge. I attain Him, the Purusha, by penance and by the powers of meditation.

## अन्वयभाष्यम् ।

यः असौ दिव्यः परमः पुरुषः इदं प्रत्यक्षं विश्वं बभूव अनेन विश्वरूपसत्त्वेन स्वयं आविर्बभूव, योऽयं प्रत्यगात्मा बृहन् व्यापकः ब्रह्मात्मपुरुषस्वरूपः, यश्च स्वयं एक एव सन् बहुधा नामरूपात्मकेन बहुभावेन आ समन्तात् सर्वतः ततान स्वं सत्त्वं विस्तारयामास, यः विदा ज्ञानशक्त्या सह सुचित्ती सुचित्त्या सञ्चेतनाशक्त्या च छन्दसा गायत्र्यादिना योगात् सुवेदाः प्रज्ञानधर्मा ऋगादि सर्ववेदसत्त्वात्, तं तादृशं परमं पुरुषं तपसा आत्मनि अन्तर्विमर्शेन धीभिः सर्वधीयोगेन प्रपद्ये इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is Purusha the supreme. He manifested Himself in the form of this multifarious visible universe. He is the inner soul, who pervades everything and is Brahma himself. He was all alone, but He spread Himself all round with name and form, which are innumerable. He is immortal, and has no birth or death. He is the Truth and Life as He Himself is Existence. He is supreme knowledge itself. I attain that Purusha by Tapas, by meditation and I become one with him with all my powers of intelligence.

## तृतीया ऋक् ।

यो वा विश्वमिदं वेद ब्रह्मणाऽयं
य इमा जजान भुवनानि विश्वा ॥
विश्वेषु योऽनु भूतेषु प्रविष्टोऽन्त-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ३ ॥

पदपाठः – यः । वा । विश्वम् । इदम् । वेद । ब्रह्मणा । अयम् ।
यः । इमा । जजान । भुवनानि । विश्वा ॥
विश्वेषु । यः । अनु । भूतेषु । प्रऽविष्टः । अन्तरिति ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He, indeed, knows all these worlds. By the power of knowledge in the form of mantra, He created all these worlds. He entered into the very soul of all things and all living beings inside out. I attain that Purusha, by penance and meditative powers.

## अन्वयभाष्यम् ।

यः असौ दिव्यः पुरुषः इदं विश्वं वेद सर्वदा जानाति सर्वज्ञः इति यावत्, यश्चायं सर्वान्तर्यामी पुरुषः ब्रह्मणा चेतनेन ज्ञानेन तथा प्रत्यक्षब्रह्मरूपेण शब्दात्मकेन सत्त्वेन मन्त्रमुखेन इमानि विश्वानि भुवनानि जजान जनयामास, मन्त्रोच्छ्वसनमात्रेण आविश्चकारेति भावः, ततश्च एतेषु विश्वेष्वपि भूतेषु भौतिकेषु शरीरेषु च अनु समन्तात् विवेश अन्तर्बहिरपि आपृतः सन् नित्यं प्रतितिष्ठति इति भावः । तं परमं पुरुषं तपसा धीयोगेन च प्रपद्ये इति ॥

### COMMENTARY—SUMMARY TRANSLATION

He is Purusha, the supreme, who knows everything in and out and always the entire universe. The Purusha, by the power of intelligence and by the power of speech, through Mantra, created all these worlds. He breathed out the mantras and made them manifest by breath alone. Further, He entered into all these living bodies, as well as into all these bodies composed of the elements; He pervaded everything in and out and thus He stays eternally. I attain that Purusha, the supreme by Tapas and by meditation.

## चतुर्थी ऋक् ।

यो विद्रा ब्रह्म बृहन् यो बृहस्पति-
र्यो जनिता ऋचां यो ऋषिः परः सन् ॥
यो वाचो विश्वस्य जनिता सत्पति-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ४ ॥

पदपाठः – यः । विद्रा । ब्रह्म । बृहन् । यः । बृहस्पतिः ।
यः । जनिता । ऋचाम् । यः । ऋषिः । परः । सन् ॥
यः । वाचः । विश्वस्य । जनिता । सत्ऽपतिः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He is the supreme Brahma on account of knowledge. He is Bṛhaspati the master of speech. He is the creator of Vedic mantras. He is the seer superior. He is the generator of speech and of the universe. He is the lord of all that exists. I attain that Purusha by Tapas and by meditation.

## अन्वयभाष्यम् ।

यः परमः पुरुषः विद्रा ज्ञानसत्तया ब्रह्म ब्रह्मरूपः, बृहन् व्यापकः महान्, यः बृहस्पतिः बृहत्याः वाचः अधिपतिः मुख्यप्राणस्वरूपः बृहतीच्छन्दसः पतिः छन्दःपुरुष

इति वा तदर्थः, ऋचः जनिता इति च उत्तरपदसम्बन्धात्, यश्च ऋचः ऋगादिवेदराशेः जनिता जनयिता प्रादुर्भावहेतुभूतः—आत्मन्यन्तर्विद्यमानानां एव ऋगादीनां ज्ञानप्रकाशनार्थं सर्वेषां कृते बहिरुत्स्रष्टा इति भावः ॥ अत एव सर्वेभ्यः परः श्रेष्ठः ऋषिः अतीन्द्रियार्थ-तत्त्वदर्शी तत्प्रकाशकः सन् पुनः यः वाचः जनिता जनकः सन् तस्याः छन्दस्वत्याः सकाशात् विश्वस्यास्य जनयिता सत्पतिः सर्वेषां सद्वस्तूनां अधिपतिः अस्ति स्वतःसिद्धः, तं तादृशं पुरुषं तपसा अन्तर्विमर्शेन धीयोगेन प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

He is Purusha, the supreme intelligence, He is Brahma the all-pervader. He, this Ātmā, is the energy within all. He is Bṛhaspati, the lord of Vāk. He is the chief vital breath of all. He is the lord of Bṛhatī metre, i. e. He is Himself the Chhandaḥ-Purusha. He is the sole generator or cause of the manifestation of all the Vedas and Mantras. It is He who has manifested them which were hidden; He has done so for the knowledge of all. Therefore, He is the best of all the seers. He sees all the things beyondthe senses and discloses them to all. He is the creator of this entire universe through Vāk in the form of Chhandas. He is the lord of all that exists. I attain that Purusha by Tapas and by unitive meditation.

### पञ्चमी ऋक् ।

यो विश्वथा ज्योतिरभि द्योततेऽयं
यस्मिन् अन्यन् न रोचते परं किंस्वित् ॥
य एकः सन् सहसेह चेततेऽन्त-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ५ ॥

पदपाठः – यः । विश्वऽथा । ज्योतिः । अभि । द्योतते । अयम् ।
यस्मिन् । अन्यत् । न । रोचते । परम् । किम् । स्वित् ॥
यः । एकः । सन् । सहसा । इह । चेतते । अन्तरिति ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He is the flaming light shining all round in all forms. When He who is the very Truth shines, nothing else is capable of shining without Him. He is all alone, and He activises all with His strength. I attain that Purusha by Tapas and by meditation.

## अन्वयभाष्यम् ।

यः परमः पुरुषः ज्योतिः स्वयं ज्योतीरूपः सन् अयं विश्वथा विश्वरूपेण अभितः सर्वत्रापि द्योतते प्रकाशते, यस्मिन् परस्मिन् सत्ये आत्मनि प्रकाशमाने अन्यत् विश्वमिदं किँस्वित् किञ्चिदपि न रोचते हि, निश्चयेन स्वसत्तया नैव प्रकाशते, नापि अन्यत् प्रकाशयितुं शक्नोतीति भावः ॥ यः स्वयं एक एव सन् इह बहिर्ब्रह्माण्डे अन्तः पिण्डे च अन्तर्हितः गुप्तः सन् सहसा बलेन चेतते संस्फुरति, तं परमं पुरुषं धीभिः तत्प्रेरिताभिः तपसा विमर्शेन तदेकाग्रेण सदनुसन्धानेन प्राप्नोमीति ॥

### COMMENTARY—SUMMARY TRANSLATION

He is Purusha, the supreme. He is the flaming light himself. As such, He shines all round in all forms. When He who is the very Truth shines, nothing in this universe can shine without His light. This means that nothing shines by itself. He is all alone hidden both in the microcosm externally and internally and also in the macrocosm, and He activises all by His own power. That Purusha, the supreme, I attain with all my intelligence inspired by Him. I attain Him by concentration on him and by getting into touch with Him.

## षष्ठी ऋक् ।

यं वाचा वा वदितुं न विप्रा अरं
यं प्राणैः स्वरितुं प्राणभृतो नालम् ॥
यं मनसा मन्तुं न मनीषिणोऽरं
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ६ ॥

पदपाठः – यम् । वाचा । वा । वदितुम् । न । विप्राः । अरम् ।
यम् । प्राणैः । स्वरितुम् । प्राणऽभृतः । न । अलम् ॥
यम् । मनसा । मन्तुम् । न । मनीषिणः । अरम् ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

Even the wise are not able to describe the Purusha with words. The living beings cannot express Him by breath or sound or show Him in their lives. The intelligent are not able to know Him with their minds. I attain that Purusha by penance and by meditation.

## अन्वयभाष्यम् ।

यं अमुं परमं पुरुषं विप्राः ज्ञानिनः वाचा वैखर्या वदितुं उच्चरितुं न अरं अलं याथार्थ्येन न समर्थाः भवन्ति, यं च मनीषिणः बुद्धिमन्तः मनस्विनोऽपि मनसा अन्तः-

करणेन मन्तुं ज्ञातुं न अरं न प्रभवन्ति, तं तादृशं पुरुषं धीभिः धियां योगेन तपसा तत्साध्येन विमर्शेन प्राप्नोमि इति ॥ अत्र सः पुरुषः वचन-स्वरण-मननादिव्यापारविशेषैः अप्राप्योऽपि तन्निवृत्त्यात्मकेन अन्तःसत्त्वेन तपसा प्राप्यः अन्तरनुभवैकगम्यः इत्यभिप्रायः ॥

COMMENTARY—SUMMARY TRANSLATION

This Purusha, the supreme, the wise cannot describe with words. They are not able to express Him in words. That Purusha, even the living ones cannot express in their own lives. The intelligent also cannot understand Him with their mental powers. It is such Purusha, I attain by intellectual union with Him. That Purusha cannot be known by word or sound or by mere wordy knowledge. None of these faculties can help one to know Him. But by renouncing all sense objects, and by going beyond them, He can be attained by meditation and by experience only.

## सप्तमी ऋक् ।

यं वा श्रुत्या श्रोत्रिया नानु श्रोतुं
यं चक्षुषा न दृशेऽरं चक्षुष्मन्तः ॥
यं धियाऽनु ध्यातुमरं न विपश्चित-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ७ ॥

पदपाठः — यम् । वा । श्रुत्यां । श्रोत्रियाः । न । अनु । श्रोतुम् ।
यम् । चक्षुषा । न । दृशे । अरम् । चक्षुष्मन्तः ॥
यम् । धिया । अनु । ध्यातुम् । अरम् । न । विपःऽचितः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

Even the knowers of Veda cannot hear Him as they hear other sounds. Those who have eyes cannot see Him with their eyes. Even those who are of pure mind cannot easily contemplate Him only by their intellect. I attain Him by penance and by intense meditation.

## अन्वयभाष्यम् ।

यं परमं पुरुषं सर्वान्तरात्मानं श्रोत्रियाः श्रोत्रवन्तः वेदात्मकश्रुतियुक्ताः श्रुत्या श्रोत्रेन्द्रियेण वेदवाचाऽपि अनुश्रोतुं न अरं अलं बाह्यपदार्थमिव श्रोतुं न प्रभवन्ति, तथा यं च चक्षुष्मन्तोऽपि चक्षुषा अनेन दृशे द्रष्टुं प्रत्यक्षं ईक्षितुं न शक्नुवन्ति, यं पुरुषं विदः विद्वांसोऽपि धीभिः बुध्यादिभिः ज्ञानेन्द्रियैः अनुध्यातुं ध्यानादिषु विषयीकर्तुं न अरं असमर्थाः,

एवं सः पुरुषः वाक्-प्राण-मनश्चक्षुः-श्रोत्रादिभ्यः तथा सर्वेभ्योऽपि इन्द्रियेभ्यः परः, अत एव तदिन्द्रियवृत्तीनां अगोचरः अविषयः सः इति भावः ॥ तं तादृशं पुरुषं धीभिः धीयोगेन तपसा प्राप्नोमीति ॥ अत्र "यद् वाचाऽनभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" ॥ "यन्मनसा न मनुते" "यच्चक्षुषा न पश्यति०" "यत् प्राणेन न प्राणिति०" (केनोप. १–४–८) इत्यादिवचनोक्तं औपनिषदं तत्त्वमनुसन्धेयम् ॥ तथैव तदुपबृंहणाय गीताशास्त्रानुवचनमपि योजनीयम्—"न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्" (गी. ११-८) इति ॥ "ददामि बुद्धियोगं तम्" (गी.१०-१०) इति च ॥

## COMMENTARY—SUMMARY TRANSLATION

That Purusha, the supreme, is the inner soul of all. Even then, those who are well-versed in the Vedic lore, cannot hear him with their ears. It is not possible to hear him like an external thing. Likewise, those who have eyes cannot see him nor can the learned, with the help of their intellects bring him within their comprehension. That Supreme Purusha is beyond Vāk, Prāṇa, Manas, Chakshus, Śrotra and all other senses. He cannot be visualised by any one of these senses as he is not an object of the senses. Such Purusha I attain, by my inner powers turned towards him and by penance. "That which cannot be expressed by speech, that which cannot be understood by mind, etc." (Ken. Up. I–4–8). Again, the Gītā says, "But you cannot see me with these eyes. So, I give you divine sight with which you can see my original divine splendour" (Gītā XI-8). "I bless you with divine vision so that you can know me" (Gītā X–10).

## अष्टमी ऋक् ।

तत् तें भगवन् इन्द्र पूरुषात्मन्
संविदाऽयं तंपस्यन् अनुं तुरीयम् ॥
पदं पंश्यामि दर्शतं सम्परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठः – तत् । ते । भगऽवन् । इन्द्र । पुरुष । आत्मन् ।
सम्ऽविदा । अयम् । तपस्यन् । अनु । तुरीयम् ॥

पदम् । पश्यामि । दर्शतम् । सम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

॥ इति षष्ठेऽनुवाके प्रथमं पुरुषसूक्तम् समाप्तम् ॥

This mantra is already commented upon.

Thus ends the First Hymn in the Sixth Section.

---

अथ द्वितीयं पुरुषसूक्तम् ।

अनुवाकः ६ । सूक्तम् २ । ऋचः १-१० ।

यो विश्वतः सीं दश, दैवरातो वैश्वामित्रः, पुरुषो, जगती ।

**Now this Purusha Sukta, Second in the Sixth Anuvaka**

**Section VI, Hymn 2, Riks 1-10** - PURUSHA

This hymn beginning with 'Yo viśvataḥ sīm' contains ten Ṛks. Daivarāta Vaiśvāmitra is the seer, Purusha is the god and the metre is Jagatī.

**अथ प्रथमा ऋक् ।**

यो विश्वतः सीं प्रथमं बभूव स्वयं
यस्मिन् अन्यन् न बभूवेह किं स्वित् ॥
य एकः सँस्तपसा सञ्चिकेतान्तः
परस्मात् पुरुषः स पूर्णः परमः ॥ १ ॥

पदपाठः — यः । विश्वतः । सीम् । प्रथमम् । बभूव । स्वयम् ।
यस्मिन् । अन्यत् । न । बभूव । इह । किम् । स्वित् ॥
यः । एकः । सन् । तपसा । सम् । चिकेत । अन्तरिति ।
परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

He existed by Himself in the abstract even before anything or before the universe was created. In Him who was by Himself nothing else existed. He who was alone and by Himself cognised Himself as the highest by the meditative powers He had. He is the perfect person and the supreme one.

## अन्वयभाष्यम् ।

यः अयं प्रत्यगात्मस्वरूपः, प्रथमं आदौ सृष्टेरपि प्राक्, विश्वतः सर्वत्र सीं सन्ततः परोक्षः बभूव आस, स्वयमेवेति अर्थात् सिध्यति, अथवा "सः ईं" सीं इति संहितायां योगात् सः ईं इति स्वरूपया स्वाध्यात्मिकया परया वाचा साकं सः आस इति भावः ॥ यस्मिन् पुरुषे परस्मिन् आत्मनि अन्यत् दृश्यमिदं विश्वं हि निश्चयेन इह किँस्वित् किञ्चिदपि न बभूव, अथवा प्रश्नार्थक "किँस्वित्" इति शब्दः, एतावद् व्यापक महत् वस्तु भूतं विश्वं सर्वात्मना तदानीं नैव आसीत् इति कल्पयितुं वक्तुं च शक्यम्? इति प्रश्नस्य बीजम्, एतेन तस्मिन् पुरुषे ब्रह्मबीजरूपेण चैतन्यात्मना स आत्मा आस इति गम्यते इति उक्तं भवति, यश्च स्वयं एक एव सन् सत्तात्मकः स निर्विषयात्मकेन तपसा विमर्शरूपेण अन्तः आत्मन्येव सञ्चिकेत संविविदे, सः परस्मात् व्यापकात् दिव्यदेवतास्वरूपात् अपि परमः श्रेष्ठतमः परतमः पुरुषः स्वयंपूर्णः अन्यूनः सन् विश्वरूपादिसर्वभावास्पदीभूत एवास्तीति ॥ अत्र एतस्मिन् अर्थे ऋङ्मन्त्रवाणौं उदाहरणहौं भवतः — "आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास" (ऋ. मं. १०-१२९-२ ३-४) इति ॥ "अजस्य रूपे किमपि स्विदेकम्" (ऋ. मं १-१६४-६) ॥ इति च ॥

## COMMENTARY—SUMMARY TRANSLATION

This inner soul existed everywhere before any creation and was imperceptible. By inference it is proved that he was all alone by himself. Or 'Saḥ+īm'=sīm, means he was in himself with īm, the half syllable, which indicates the imperceptible Vāk or power of expression. In such supreme Purusha, there was certainly nothing of this perceptible universe. Or, the word 'Kimsvid', is interrogative in character; it may be interpreted as meaning that there was nothing all-pervading like this. By this it is to be inferred that in that Purusha, Brahma was like a seed of the creation, in the form of pure energy. Further, he was all alone because he was purest possible existence. By tapas, that is by the power of concentration, which has no object for particular concentration, he knows himself within himself. He excels all and is all-pervading. So, Purusha is the highest. He is perfect by himself. He is not wanting in anything. He is the final resort of the existence of all cosmos. "That which was all alone united with Svadhā that is Vāk in the form of his own expression, breathed without any air. There was nothing else besides him, or different from him or equal to him" (Ṛg. X-129-2). "In the unborn Purusha there is something indefinable" (Ṛg. I-164-6).

## द्वितीया ऋक् ।

यो वा ज्योतिषा तपस्यन् सहसाऽन्तः
स्वमक्षरं मन्त्रमीमनु स्वरति ॥
य ईं स्वरेण विश्वमिदं समधमत्
परस्मात् पुरुषः स पूर्णः परमः ॥

पदपाठः – यः । वा । ज्योतिषा । तपस्यन् । सहसा । अन्तरिति ।
स्वम् । अक्षरम् । मन्त्रम् । ईम् इति । अनु । स्वरति ॥
यः । ईम् इति । स्वरेण । विश्वम् । इदम् । सम् । अधमत् ।
परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

While performing Tapas ( that is while concentrating ) intensely with the light within himself, he utters the letter 'Īm' as a mantra of his own. With the utterance of that syllable Īm, he created this universe as though by blowing like a bellow. He, the Purusha, is supreme of supremes and is perfect and is the highest.

## अन्वयभाष्यम् ।

यः पुरुषः अन्तः स्वात्मनि ज्योतिषा वेद्युतेन तपस्यन् सहसा बलेन स्वं निजं अक्षरं बीजात्मकं ईं इति अनुकरणरूपं मन्त्रं स्ववाचकं मननीयं वर्णं अनुसृत्य स्वरति अनुस्वाररूपया सूक्ष्मतमया स्वरात्मिकया परया वाचा स्फुरति, यश्च पुनः ईं इत्याकारेण स्वरेण तेन ईङ्कारमन्त्राक्षरेण इदं विश्वं समधमत् , भस्त्रयेव धमनतः उच्छ्वासरूपेण बहिरुत्ससर्ज, सः परोक्षः नित्यसिद्धः परस्मादपि श्रेष्ठात् परमः श्रेष्ठतमः पूर्णः पुरुषः इति श्रुतिमुखादनुश्रूयते इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Purusha, with the help of his own light, practices tapas, and utters his own seed-letter Īm, which is Onomotopoeic. It is a mantra which has to be contemplated. He vibrates with the imperceptible Vāk, the power of expression, which is very subtle and volatile in form. Again, with that syllable Īm, he breathes out this universe, as though a blow-pipe. He is the imperceptible and eternal Purusha superior to all the best. He is perfect. This is evident from the Vedas.

## तृतीया ऋक् ।

य ईं स्वरन्तं गुह्यमेवानु स्वरन्

ओमिति स्वरां वाचं समुच्चरति ॥

यो वाऽक्षरं सदु ब्रह्म परमं

परस्मात् पुरुषः स पूर्णः परमः ॥ ३ ॥

पदपाठः – यः । ईम् इति । स्वरन्तम् । गुह्यम् । एव । अनु । स्वरन् ।

ओम् इति । इति । स्वराम् । वाचम् । सम् । उत्ऽचरति ॥

यः । वा । अक्षरम् । सत् । ऊम् इति । ब्रह्म । परमम् ।

परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

While humming secretly the sound or mantra Īm, and while imitating the same, he utters the sacred syllable Om (a vowel). He who is expressed by that word is indeed indestructible, he is Brahma, the supreme. He is the supreme of supremes, a perfect Purusha.

## अन्वयभाष्यम् ।

यः चेतनः आत्मा ईं इति स्वरन्तं अनवरतं नादस्वरादिरूपेण संस्फुरन्तं तं गुह्यं प्रणवं तथा तादृशं स्वात्मानमेव वा अनुसृत्य स्वरन् पुनः ॐ इति एतदनुकरणात्मिकां स्वरां सम्यग् व्यक्तरूपेण समुदितां वाचं निजां वाचकशक्तिरूपां उच्चरति मात्रात्रितयात्मिकां अक्षरस्वरूपां वदति, वा अथवा यः पुरुषः स्वयं अक्षरं निजवाचकरूपं सत् सदात्मकं वाक्स्वरूपं प्रत्यक्षं ब्रह्म, तथा तद्वाच्यार्थरूपं परमं ब्रह्म इति वेदे प्रसिद्धः अस्ति, सः तादृशः परस्माद् वस्तुनः अपि सर्वस्मात् परमः पूर्णः पुरुषः इति ॥

अत्र अस्मिन् अर्थे ऋङ्मन्त्रवर्णोऽपि उदाहरणार्हः पुनः प्रामाण्याय—" ऋचो अक्षरे परमे व्योमन् " ( ऋ. मं. १-१६४-३९ ) इति, तथा " ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म इत्यार्षम् । गायत्रं छन्दं परमात्मं सरूपम् । सायुज्यं विनियोगम् " इति च औपनिषदं यजुः ( म. ना. उ. १५-१ ) ॥ " असौ वा आदित्य उद्गीथः एष प्रणवः ओमिति ह्येष स्वरन् एति च औपनिषदं ब्राह्मणम् " ( छां.उ. १-५-१ ), " अथाध्यात्मं य एवायं मुख्यः प्राणः तमुद्गीथमुपासीत । ओमिति ह्येष स्वरन् एति " ( छां. १-५-३ ) इति च तदनुवचनम् ॥

## COMMENTARY—SUMMARY TRANSLATION

He the Ātmā, the intelligent energy, mutters Īm, which is the secret Praṇava Mantra. Further, following it, he utters loudly Om, so that it may

be heard. That is also an onomotopoeic vowel. It contains three parts, a, u, m. He is indeed Akshara that is the word OM. Akshara also means indestructible. It is self-expressive Vāk and indicates Brahma, the supreme. Thus says the Veda. He is such Purusha, the supreme of all supreme things. He is perfect: Cf. " All the Ṛks (Vedic mantras) are in Akshara, the indestructible existence, who is in the highest sky " (Ṛg. I-164-39). Further, " The single syllable Om is Brahma " (Mahānārāyaṇopanishad 15-1). " This Āditya is indeed Brahma. He is Praṇava. He comes repeating Om " (Chhānd. Up. 1-5-1). " Now from the view point of the inner soul, the chief of the vital airs is to be meditated upon, as Udgītha. He comes uttering Om " (Chhānd. Up. I-5-3).

## चतुर्थी ऋक् ।

य ईं स्वरेण सँ स्वरँश्छन्दाँस्यनु-
स्वरत्यृचो यजूँषि च सामानि ॥
यो वा विश्वं छादयतीह च्छन्दोभिः
परस्मात् पुरुषः स पूर्णः परमः ॥ ४ ॥

पदपाठः- यः । ईम् इति । स्वरेण । सम्ऽस्वरन् । छन्दाँसि । अनु ।
स्वरति । ऋचः । यजूँषि । च । सामानि ॥
यः । वा । विश्वम् । छादयति । इह । छन्दःऽभिः ।
परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

He, while muttering the syllable Īm, utters the Vedic mantras in metres, namely, the Ṛks, Yajus and Sāmas. He covers the whole universe as it were with metres (Vedic mantras) indeed. He is Purusha, the supreme of supremes and is perfection itself.

## अन्वयभाष्यम् ।

यः चेतनः आत्मा ईं इति सूक्ष्मतमेन स्वरेण पूर्णबिन्दुरूपेण तत्सहितेन वा वामाक्षिसत्त्वेन विराट्सञ्ज्ञकशक्तिबीजाक्षरमन्त्रेण छन्दाँसि गायत्र्यादीनि आदौ सँस्वरन् केवलेन स्वररूपेण उच्छ्वसन्, ततः तान्येव छन्दाँसि अनुसृत्य पुनः ऋचः छन्दस्वतीः सस्वरवतीः मन्त्ररूपाः वाचः स्वरति प्रकाशयति, उत अपि च यजूँषि छन्दस्वन्ति सामानि च स्वरणेन उत्सृजति, यश्च पुनः इह प्रपञ्चे तैरेव छन्दोभिः गायत्रादिभिः तथा छन्दस्वद्भिरेव

ऋगादिभिः मन्त्रैः विश्वं छादयति रक्षणार्थं कवचवत् इति भावः। सः परस्मात् परमः श्रेष्ठतमः पूर्णः पुरुषः स एव छन्दःपुरुषः इति ॥

## COMMENTARY--SUMMARY TRANSLATION

He is Ātmā, the intelligent energy full of Īm, the subtlest vowel which is like a point. With that or with the seed-letter indicating cosmic force, he expressed at the beginning the metres Gāyatrī etc. He breathed them out as mere sounds. Then, following the same metres, he manifests the Ṛks, Vedic mantras, which are full of metres and accents. Further, he utters the metrical Yajus and Sāmas. With those Vedas, the Ṛks, and others, he covers or protects this universe. He is the supreme of supremes and is perfect. He is Purusha, Purusha of the Vedas.

## पञ्चमी ऋक् ।

य ईं स्वरँस्तिस्रो व्याहरंतीह
भूर्भुवः स्व१र्वाचो य उ समुच्छ्वसन् ॥
यो मिमाय त्रिधेद् भुवनं वाग्भिः
परस्मात् पुरुषः स पूर्णः परमः ॥ ५ ॥

पदपाठः – यः । ईम् इति । स्वरन् । तिस्रः । विऽआहरंति । इह ।
भूः । भुवः । स्व१रिति स्वः । वाचः । यः । ऊम् इति । सम् । उत्ऽश्वसन् ॥
यः । मिमाय । त्रिधा । इत् । भुवनम् । वाग्भिः ।
परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

He, while murmuring Īm and breathing out, utters the three words, Bhūḥ, Bhuvaḥ and Svaḥ. With these words he measured the universe in three ways. He, the Purusha is the supreme of supremes, and is perfect.

## अन्वयभाष्यम् ।

यः आत्मा चेतनः ई इति मन्त्राक्षररूपां परां वाचं स्वरन् तेनैव च स्वररूपेण सम्यक्तया उच्छ्वसन् तथा प्राणसत्त्वेन तेन उच्छ्वासरूपेण इह आकाशे बहिः — ब्रह्माण्डे "भूः भुवः स्वः" इति तिस्रः वाचः व्याहरति वाग्रूपेण उच्चरति, अत एव तासां व्याहृति-सञ्ज्ञाऽपि वेदे प्रसिद्धा, यश्च पुनः वाग्भिः ताभिरेव व्याहृतिभिः भुवनं इदं समग्रं ब्रह्माण्डं

त्रिधा-इत् त्रिधैव भावेन मिमाय विबभाज, सर्वभूताश्रयीभूतं कल्पयामास इति भाव:, स: परस्मात् अस्मात् सर्वस्माद् भुवनात् परम: परतम: त्रिभुवनाधिष्ठानसत्त्व: परमव्योमात्मक: पूर्ण: पारमैश्वर्यादिभि: सर्वैर्गुणै: सम्पन्न: अन्यूनसत्त्व: स पुरुषो भवतीति ॥

COMMENTARY—SUMMARY TRANSLATION

This Ātmā is the intelligent energy. He utters Īm. it is the Vāk, the supreme power in the form of a letter or mantra. He breathed out and with the force of that breath in the sky which is the macrocosm, he uttered the three words " Bhūḥ, Bhuvaḥ and Svaḥ." They are uttered and therefore they are called vyāhṛtis, utterances. Again with these words, he divided this whole universe into three divisions, so that it may become the refuge of all the beings. The three divisions are, this solid earth, the vacant space surrounding the earth and the sky beyond. He is supreme of all the supremes. He is the essential substance which supports these three worlds. He pervades the sky. He, the Purusha being perfect has no want.

## षष्ठी ऋक् ।

यो वा व्याहृतिभिरेवेदं तिसृभिः
पृथिवीं चान्तरिक्षं च दिवं भूयः ॥
य इमानि त्री भुवनानि विममे
परस्मात् पुरुषः स पूर्णः परमः ॥ ६ ॥

पदपाठः – यः । वा । व्याहृतिऽभिः । एव । इदम् । तिसृऽभिः ।
पृथिवीं । च । अन्तरिक्षं । च । दिवम् । भूयः ॥
यः । इमानि । त्री । भुवनानि । विऽममे ।
परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

He created indeed, with these three vyāhṛtis ( utterances ) this earth, mid-air and the sky. He measured out these three worlds. He is the Purusha, the supreme one of all the supremes, and he is the perfect one.

## अन्वयभाष्यम् ।

यः आत्मा चेतनः पुरुषः तिसृभि: ताभिरेव व्याहृतिभिः " भू भुव: स्व: " इति एताभिरेव इदं विश्वं विममे, स्वीयैः त्रिभि: पदैः समानं भावयामास इति तदर्थः, " य इदं दीर्घं प्रयतं सधस्थमेको वि ममे त्रिभिरित् पदेभि: " ( ऋ. मं. १-१४ -२ ) इति ऋङ्मन्त्र-

वर्णोऽपि तमेतमेवार्थं समर्थयति ॥ तेन च भूयः पुनरपि पृथिवीं इमां अवमां अन्तरिक्षं मध्यमं सन्धिरूपं दिवं अमुं लोकं उत्तमं भुवनं च नामभिः रूपैश्च त्रीत्रीणि भुवनानि विममे विश्वेषां भूतानां तथा प्राणभृतां स्थावरजङ्गमरूपाणां कृमिकीटादीनां जन्तूनां मानवान्तानां तथा दिव्यानां देवतात्मनां च प्रतिष्ठायै त्रीणि स्थानानि कल्पयामास इति आशयः ॥ सः तादृशः कल्पनातीतः परस्मात् परतमः तावत्सत्त्वमहत्त्वादिभिः विभूतिभिः पूर्णः सः परमः पुरुषः एव भवितुमर्हतीति हृदयम् ॥ अस्मिन् विषये त्रेधा ऋङ्मन्त्रवर्णोऽनुश्रूयते । तथा हि–
"एतावानस्य महिमाऽतो ज्यायाँश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" (ऋ॰ मं॰ १०-९०-३) इति ॥ "तावानस्यःमहिमा ततो ज्यायाँश्च पूरुषः" (साम॰ ६-२०) "तावन्तो अस्य महिमानस्ततो ज्यायाँश्च पूरुषः" (अथर्व सं. १९-६-३) इति तु आथर्वणीये ॥

तत्र "एतावानस्य महिमा" इति तन्महत्त्वस्य प्रत्यक्षतो विश्वविभूतियोगेन निर्देशः । "तावानस्य महिमा" इति च तस्य महिम्नः विश्वतः परत्वेनोपदेशः । "तावन्तो अस्य महिमानः" इति तु परोक्षसिद्धस्यापि तन्महत्त्वस्य बहुधा भावेन संस्तुतिः अनन्तत्वोपवर्णार्था इति विशेषः ॥ चतुष्पात्त्वं ज्यायस्त्वं परमत्वं यथाश्रुतं सर्वत्रापि तत् समानमेवेति हृदयम् ॥

## COMMENTARY—SUMMARY TRANSLATION

He is Ātmā, the intelligent energy. With those three vyāhṛtis, he created this universe. The vyāhṛtis are Bhūḥ, Bhuvaḥ, and Svaḥ. He measured the three worlds means he made them equal to his three steps. Cf. "He, with his three steps measured this extensive universe, which he himself has created and fixed" ( Ṛg. I–144-3 ). By measuring this earth, mid-air, the middle one and borderland, and that sky, which differ in both name and form, he created the abode of all beings from worms and insects to human beings and the celestial gods. Such an unimaginable power is the supreme of all the supremes. He is full of all virtues like strength, greatness etc. He is Purusha. A Ṛk mantra, used in the other two Vedas also, may be cited. "This much is his greatness. Therefore, this Purusha is great" ( Ṛg X–90-3 ). "That much is his greatness. Therefore Purusha is great" (Sāma 6–20 ). "So mighty and extensive is his greatness. Therefore, Purusha is great" ( Atharva 19–6-3 ). The word 'Etāvān' indicates his greatness as visibly evident by his universal glory. Again 'tāvān' with reference to his greatness, indicates that his greatness is beyond this universe. 'Tāvantaḥ' also indicates that his greatness, though invisible, is praised in diverse ways in order to describe his infinity. His greatness and supremacy are the same everywhere.

## सप्तमी ऋक् ।

यो अ॒ग्निं वा॒युमा॑दि॒त्यं च॒ चित्ति॑भि-
र्वा॒ग्भिर्व्या॒हृति॑भि॒र्नि द॑धे प॒दानि॑ ॥
ज्योति॑ष्प॒दानि॒ यो भु॒वने॒ष्वधी॒न्द्रः
पर॑स्मात् पुरु॑षः स पू॒र्णः पर॑मः ॥ ७ ॥

पदपाठः— यः । अ॒ग्निम् । वा॒युम् । आ॒दि॒त्यम् । च॒ । चित्ति॑ऽभिः ।
वा॒ग्भिः । व्या॒हृति॑ऽभिः । नि । द॒धे । प॒दानि॑ ॥
ज्योति॑ष्प॒दानि॑ । यः । भु॒वने॑षु । अधि॑ । इन्द्रः॑ ।
पर॑स्मात् । पुरु॑षः । सः । पू॒र्णः । प॒र॒मः ॥

He, by the powers of his intelligence, by the power of speech and by the power of (three) vyāhṛtis, placed three steps in the form of Agni, Vāyu and Āditya. Again, he planted the steps of light in the three worlds. He is Indra, the supreme of all supremes, the Purusha who is perfect.

## अन्वयभाष्यम् ।

यः आत्मा स्वयं चेतनः पुरुषः केवलः सन् चित्तिभिः चिच्छक्तिभिः चैतन्यज्योतिष्कलात्मिकाभिः वाग्भिः व्याहृतिरूपाभिश्च सह अग्निं वायुं आदित्यं चेति त्रीणि पदानि निदधे स्थापयामास, यश्च पुनः तान्येव ज्योतिष्पदानि अधिदैवतसत्त्वपूर्णानि त्रिषु भुवनेषु पृथिव्यन्तरिक्षद्युस्थानेषु अन्तः अधिष्ठानरूपेण तदाधिपत्येन च निदधे ॥ सः इन्द्रः पारमैश्वर्यादिसर्वगुणपरिपूर्णः परस्मात् ज्योतिर्मयात् दैवतात् सर्वस्मादपि परमः परतमः पूर्णः पुरुषः एव भवितुमर्हतीति ॥

COMMENTARY—SUMMARY TRANSLATION

Ātmā being himself pure consciousness, established through the powers of intelligence, of speech and of the three vyāhṛtis, three steps in the form of Agni, Vāyu and Āditya. Again, he planted steps of light in the three worlds, earth, mid-air and sky, as their (Agni, Vāyu and Āditya) basic seats. He is above all the gods who are full of light. He is Purusha and the perfect one.

## अष्टमी ऋक् ।

यो वा॑ वि॒द्यु॒तः प॒रः स॒न् स॒हसे॑न्द्रो
वि॒द्यु॑तं ए॒वा ज॒जा॒न विश्वं॑मेतत् ।

यो भूतानि संस्कुरुते ज्योतिषाऽन्तः
परस्मात् पुरुषः स पूर्णः परमः ॥ ८ ॥

पदपाठः – यः । वा । विद्युतः । परः । सन् । सहसा । इन्द्रः ।
विऽद्युतः । एव । आ । जजान । विश्वम् । एतत् ॥
यः । भूतानि । सम्ऽकुरुते । ज्योतिषा । अन्तरिति ।
परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

Indra being beyond and greater than lightning, he is the Lord of lightning. He created this universe from lightning itself. He purifies all beings with the help of the light within. He is the supreme of supremes, the Purusha is perfection itself.

## अन्वयभाष्यम् ।

यः स्वयं विद्युदात्मकः ततश्च परः सन् सद्रूपः परः सर्वेभ्यः श्रेष्ठः सहसा आत्मबलेन स इन्द्रः ईशानः पारमैश्वर्यपूर्णः सन् विद्युतः सकाशात् इदं विश्वं प्रजज्ञे जनयामास, तथा स्वयमेव सः विद्युतः विश्वरूपेण आविर्बभूव ॥ यश्च पुनः एतेषु सर्वेषु अन्तर्हितः सन् ज्योतिषा स्वेन इमानि भूतानि संस्कुरुते प्रतिक्षणं परिपाकेन नूतनानि सम्भावयति, आत्मसात् करोतीति भावः ॥ सः परस्मात् सर्वस्मादपि विद्युदादेः परमः श्रेष्ठः पुरुषः इति ॥

COMMENTARY—SUMMARY TRANSLATION

He is himself of the nature of lightning. But he is beyond lightning and superior to lightning and the best of all. He, by his own glory, is Indra, the ruler by his own might. From this lightning, he created this visible universe. Or, he is himself lightning and as such with the help of the light of lightning only, he manifested himself as this universe which is full of variety. Again, he is within all beings. He is there as the Lord and makes them new ( renew them ) every moment by developing and maturing them with his light. He makes them like himself. He is beyond all lights like lightning etc. He is Purusha and is perfect.

## नवमी ऋक् ।

यः प्रजानन् अजन्यः सन् अमर्त्यो
यो विश्वथा राजतेऽन्तर्य एकः ॥
यो वा स्वराट् सम्राड् विराड् विभुः प्रभुः
परस्मात् पुरुषः स पूर्णः परमः ॥ ९ ॥

पदपाठः — यः । प्रऽजानन् । अजन्यः । सन् । अमर्त्यः ।
यः । विश्वऽर्था । राजते । अन्तरिति । यः । एकः ॥
यः । वा । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
परस्मात् । पुरुषः । सः । पूर्णः । परमः ॥

## दशमी ऋक् ।

तत् ते भगवन् इन्द्र पुरुषात्मन्
संविदाऽयं तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं सम्परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पदपाठः — तत् । ते । भगऽवन् । इन्द्र । पुरुष । आत्मन् ।
सम्ऽविदा । अयम् । तपस्यन् । अनु । तुरीयम् ॥
पदम् । पश्यामि । दर्शतम् । सम् । परि । इतम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

॥ इति षष्ठेऽनुवाके द्वितीयं पुरुषसूक्तम् समाप्तम् ॥

These two Ṛks have occurred earlier at the end of the fourth hymn in the fifth section and have been commented upon.

Thus ends the Second hymn in the Sixth Section.

## अथ तृतीयं पुरुषसूक्तम् ।

अनुवाकः ६ । सूक्तम् ३ । ऋचः १-१६ ।

पुरुषः सन् अमृत आत्मा षोळश, दैवरातो वैश्वामित्रः, पुरुषः, जगती ।

**Now this Purusha Sukta, Third in the Sixth Anuvaka**

**Section VI, Hymn 3, Riks 1-16-PURUSHA**

This hymn beginning with 'Purushaḥ san Amṛta Ātmā' contains sixteen Ṛks. Daivarāta Vaiśvāmitra is the seer, Purusha is the god and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

पुरुषः सन् अमृतं आत्मा प्रचेतनो
यो विश्वथा राजते भूतिभिरेकः ॥
यो वा स्वराट् सम्राड् विराड् विभुः प्रभु-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १ ॥

पदपाठः – पुरुषः । सन् । अमृतः । आत्मा । प्रऽचेतनः ।
यः । विश्वऽथा । राजते । भूतिऽभिः । एकः ॥
यः । वा । स्वऽराट् । सम्ऽराट् । विऽराट् । विऽभुः । प्रऽभुः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

Being the Purusha, he is the immortal Ātmā and the mighty conscious energy. He is all alone and shines everywhere in all forms, full of glory. He shines by himself. He is the supreme lord and is all-pervading. I attain him by means of meditation and by the reasoning process.

### अन्वयभाष्यम् ।

यः स्वयं पुरुषः पुरुषसत्त्वः विश्वमूलबीजात्मकः अमृतः क्षय-विकारादिरहितः सन् सत्स्वरूपः नित्यसिद्धः आत्मा व्यापकः प्रचेतनः चैतन्यैकसत्तया विद्यमानः ज्ञानात्मकः अनादिसिद्धः स्वयं प्रज्ञाता इति भावः, यः एकः स्वयं एक एव सन् विश्वथा भूतिभिः वैश्वरूपेण विततामिः शक्तिभिः विभूतिभिश्च राजते देदीप्यते, यश्च स्वराट् स्वयम्प्रकाशः सम्राट् सार्वभौमः विराट् विश्वरूपः विभुः व्यापकः प्रभुः अधिपतिः तं तादृशं यथोक्तलक्षणं परमं पुरुषं धीभिः तत्प्रेरितैः धीन्द्रियैः धियां योगेन च तपसा अन्तर्विमर्शेन प्रपद्ये अपरोक्षतः प्राप्नोमि साक्षात्करोमीति भावः ॥

## COMMENTARY—SUMMARY TRANSLATION

He is himself the Purusha, the very seed which is the original cause of the universe. He is immortal, he does not change the least due to either waste or transformation. He is the very spirit of existence and is eternally existent. He is Ātmā, the pervader and conscious energy. He is all alone as conscious energy. Being omnifarious, he shines with powers which can pervade all kinds of forms. He is self-luminous. He is an emperor. He is omnifarious. He is a pervader. He is the lord. I attain this Purusha whom I have described by meditation and my reasoning faculty. I realise him within myself.

## द्वितीया ऋक् ।

पुरुषो यो दिव्यो ज्योतिरात्मा पर-
स्तपसाऽऽत्मनि द्योततेऽन्तरजस्रम् ॥
यो वा प्रत्यङ् चित्ती सस्ति पुरुष्वधि
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ २ ॥

पद्पाठः— पुरुषः । यः । दिव्यः । ज्योतिःऽआत्मा । परः ।
तपसा । आत्मनि । द्योतते । अन्तरिति । अजस्रम् ॥
यः । वा । प्रत्यङ् । चित्ती । सस्ति । पुरुषु । अधि ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

The Purusha is divine light, the light itself and the Soul-supreme. He shines constantly within himself and by himself by means of meditation. He resides within all as the inner-Soul full of the power of consciousness. I attain him with meditation and by thinking and reasoning.

## अन्वयभाष्यम् ।

यः पुरुषः दिव्यः देवतास्वरूप· अधिदैवततत्त्वसिद्धः ज्योतिः चैतन्यज्योतिःस्वरूपः आत्मा आत्मवस्तुरूपः अथवा ज्योतिरात्मा ज्योतिःशरीरः, परः सर्वस्मात प्रकृष्टतरः परोक्षसत्त्वसिद्धः, आत्मनि स्वस्मिन्नेवान्तः तपसा प्रत्यङ्मुखेन निर्विषयात्मकेन विमर्शसत्त्वेन अजस्रं नित्यं अविच्छिन्नधारया द्योतते स्वयं प्रकाशते अनन्यसत्तया राजते इति यावत् । यश्च स्वयं एक एव सन् एकरूपः एकसत्त्वश्च प्रत्यङ् प्रत्यगात्मस्वरूपः चिती चित्या चेतनात्मक-शक्त्या निजया पुरुषु बहुषु सस्ति स्वपिति सीदति, तथा अधिष्ठितः सन् अध्यात्मसत्त्वेन सर्वाधिष्ठानात्मको भवतीति तदर्थः, अत एव सः पुरुषः इति उपदिश्यते, प्रतिज्ञायते चेति ॥

अस्मिन् अर्थे ऋङ्मन्त्रवर्णो भवति मेधातिथेरार्षेयः — “ गोषा इन्दो नृषा अस्यश्वसा वाजसा उत । आत्मा यज्ञस्य पूर्व्यः ( ऋ. मं. ९-२-१० ) इति ॥ तं तादृशं पुरुषं धीभिः तस्यैव करणरूपाभिः, तथा तपसा तासां धियां योगेन आन्तर्येण संयमेन धारणा–ध्यान–समाधिसत्त्वेन-अपरोक्षतः प्राप्नोमीति ॥ एतेन धियां योगे सः पुरुषः स्वयमेव स्वरूपेण समुदेतीति सिध्यति ॥ अस्मिन् अर्थे ऋङ्मन्त्रवर्णो भवति मेधातिथेरार्षेयः — “ यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन । स धीनां योगमिन्वति ” ( ऋ. मं. १-१८-७ ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Purusha is of the nature of a celestial being, a god. He is the presiding principle in all. He is light and has the body of light. He is the best of all and prevails everywhere by the very power of being beyond all. Within himself, he is the indwelling soul; he shines continuously with pure consciousness turned inward. He shines without the help of any other outside agency. He is alone, he is the only one form, one existence and is the very indwelling soul of all, and he is the very basis of all. Therefore, he is Purusha dwelling in all. He is described as such in the Vedas. Cf. Medhātithi says: “Oh Moon, you are in the cows, children, horses and food. You are the ancient soul of all activities in the form of sacrifice” ( Ṛg. IX-2-10 ). I realise him with inner restraint in the form of concentration, meditation, and union with him. By this it is meant that he reveals himself to one whose senses are controlled. Cf. Again Medhātithi says in this connection: “The sacrifice of even the learned cannot be fruitful without him who shines wherever there is concentration ” ( Ṛg. I-18-7 ).

## तृतीया ऋक् ।

पुरुषो यो विश्ववेदा बृहस्पति-
र्यो विश्वशक्तिः सहस्वान् यो विश्वकर्मा ॥
सत्यमन्त्रो यो विश्वकामः सत्पति-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ३ ॥

पद्पाठ :– पुरुषः । यः । विश्वऽवेदाः । बृहस्पतिः ।
यः । विश्वऽशक्तिः । सहस्वान् । यः । विश्वऽकर्मा ॥
सत्यऽमन्त्रः । यः । विश्वऽकामः । सत्ऽपतिः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

Purusha is the omniscient Bṛhaspati. He is all-powerful and mighty. He is capable of creating the universe and of doing everything. His words will come true. He is capable of entertaining all desires. He is the lord of all existence. I attain that Purusha by means of meditation and intense thinking.

## अन्वयभाष्यम् ।

यः पुरुषः विश्ववेदाः विश्ववेत्ता सर्ववेदसत्त्वपूर्णः सर्ववेदाविर्भावहेतुभूतत्वात्, बृहस्पतिः बृहत्याः वाचः अधिपतिः, यश्च विश्वशक्तिः सर्वक्रियाशक्तिपूर्णः, सहस्वान् बलवान, यः विश्वकर्मा सर्वकर्मकारकः सर्वकर्मकर्ता च, सत्यमन्त्रः सत्यसङ्कल्पः सत्यप्रतिज्ञः सत्यवाक्-सत्त्वपूर्णः, यः विश्वकामः सर्वेच्छाशक्तियुक्तः पूर्णकामश्च, सत्पतिः सर्वेषां सद्वस्तूनां अधिपतिः केवलः सदात्मकः अस्ति, तं तादृशं पुरुषं धियां योगेन तपसा च आन्तर्येण संयमेन प्रपद्ये अपरोक्षतः साक्षात्करोमीति । तदिदं सर्वसामरस्ययोगेन तत्समन्वयेन योगेन पुरुषस्य तस्य महत्त्वं तथा तत्प्राप्तितत्त्वं च प्रतिपाद्यते ॥

### COMMENTARY—SUMMARY TRANSLATION

Purusha is omniscient. He is full of that intelligent power which manifests itself as all the Vedas. He is Bṛhaspati, the lord of Vāk which is all-pervading. He is omnipotent. He is mighty. He is a Viśvakarmā because not only he makes all to do all the works, but also he himself is the doer of all works. He is a Satyamantra, that is one whose word, whose resolves and promises are never fruitless. He is full of the substance of true speech. He is full of powers of entertaining all kinds of desires, at the same time all his desires are fulfilled. He is the lord of all existence, because he is existence itself. I attain that Purusha, by the concentration of all intellectual powers and by meditation as well as self-restraint. That means, I realise him, through inward identification and by synthesising all powers for attaining him.

## चतुर्थी ऋक् ।

यो वा विश्वमेतद् रूपमति रिक्तो
यः परस्मात् सन् अपात् पूरुषः परः ॥
विश्वैभिर्यः पुरुषैर्न प्रति पद्यते
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ४ ॥

पद्पाठः – यः । वा । विश्वम् । एतत् । रूपम् । अति । रिक्तः ।
यः । परस्मात् । सन् । अपात् । पुरुषः । परः ॥
विश्वेभिः । यः । पुरुषैः । न । प्रति । पद्यते ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He, the Purusha, indeed transcends this universe. He is superior to all divinities. He is the perfect Purusha, without any divisions. He is not attainable by any person. I attain that Purusha by meditation and by the reasoning power.

## अन्वयभाष्यम् ।

यः पुरुषः एवंविधेन विश्वसमन्वयेन विश्वरूपोऽपि एतत् विश्वं रूपं सरूपं च समस्तं जगत् वस्तुजातं अति रिक्तः अतीतः एतस्मात् सर्वस्मात् अतिरिक्तः यश्च परस्मात् परतरात् दिव्यवस्तुनः देवतात्मनः अधिदैवतसत्त्वयुक्तादपि परः परतमः श्रेष्ठतमः भवति, तथा यः अपात् अंश-पादरूपादिविशेषरहितः पूरुषः केवलं चेतनात्मकः, यश्च विश्वेभिः पूरुषैः विश्वैः देवमानवप्रभृतिभिः बाह्यदृष्ट्या न प्रति पद्यते न ज्ञायते नापि प्राप्यते तस्य प्रत्यगात्मस्वरूपत्वात् परोक्षत्वाच्चेति, तं तादृशं परमं पुरुषं धीभिः अन्तरात्मसत्त्वाभिः तथा प्रत्यङ्मुखाभिः तपसा आन्तर्येण केवलेन निर्विषयात्मकेन विमर्शेन अन्तर्निष्ठारूपेण प्रपद्ये तादृशेन अनुभावेन स्वमेवान्तर्यामिणं प्राप्नोमीति ॥ तदिदं व्यतिरेकेण विशेषादिरहितस्य तस्य तद्भावेनैव प्रतिपत्तिः भवितुं अर्हतीति युज्यते, तदनुरूपमेव तपः साधनं अध्यात्मतत्त्वसिद्धं तथा साध्यं च अन्तर्निष्ठात्मकमुपदिश्यते ॥

### COMMENTARY—SUMMARY TRANSLATION

That Purusha though omnifarious and one with all things, still transcends this manifest universe, this whole world He is the presiding deity over all the superior celestial deities and at the same time he transcends them. He is indivisible and without any parts He is Purusha, the purest form of energy. None of the beings, nor any of the mortals or immortals can get at him. They cannot even know him, because he is deep within their hearts. I attain that supreme Purusha, by means of my concentrated intellect turned inward and by pure meditation without any particular object or desire. I get at him, who is the guide within ( Antaryāmi ) by such an exercise of mental powers. By contrast, he who is beyond all desires and attributes can be attained by meditating along that line only, that is, by unmotivated concentration on the supreme Purusha.

## पञ्चमी ऋक् ।

अरूपः सन् विश्वरूपो योऽभ्युदगाद्-
अतनूर्यो विश्वतनूश्चितीपतिः ॥
अमुखो यो विश्वथा मुखेनापृत-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ५ ॥

पदपाठः – अरूपः । सन् । विश्वऽरूपः । यः । अभि । उत् । अगात् ।
अतनूः । यः । विश्वऽतनूः । चितिऽपतिः ॥
अमुखः । यः । विश्वऽथा । मुखेन । आऽपृतः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

Though he is himself without any form, the Purusha manifested himself in multimillion forms. Bodiless himself, he manifested himself with the universe itself as his body and as the lord of all living beings. He has no face as such but he pervades all with the universe itself as his face. I attain that Purusha by means of meditation and concentration of my intellectual powers.

## अन्वयभाष्यम् ।

यः परमः पुरुषः स्वयं अरूपः रूप-रेखा आकारादिविशेषरहितः, सृष्टेः आदितः सन् केवलं सन्मात्रः तथाऽपि व्याप्त्या विश्वरूपः विश्वविभूतियोगपूर्ण एव सन् अभितः आभिमुख्येन प्रत्यक्षं उदगात् उदियाय, इति अनुश्रूयते, लोके सामान्यतः वेदे तु विशेषतः तत्प्रसिद्धिरस्तीति ॥ यः अतनूः स्वयं अशरीरः, तथाऽपि विश्वान्वयेन सः विश्वतनूः विश्वशरीरः तद्विभूतियोगसत्त्वेन सम्पन्नः, चितिपतिः सर्वेषां सचेतनवस्तूनां चेतनानामपि अधिपतिः, चेतनाध्यक्षो भवतीति यावत् ॥ अमुखः स्वयं मुखादिभिः अवयवैः विरहितः, तथाऽपि विश्वथा—विश्वतोमुखेन उदितः सर्वत्र व्याप्तः पूर्णसत्त्वेन निजेन आपृतः समन्तात् पूर्णः सन् बभौ ॥ अस्मिन् अर्थे औपनिषदो यजुर्मन्त्रवर्णः प्रसिद्धः —“ वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ” ( ना. उ. १०-४ ) इति ॥ तं तादृशं परमं पुरुषं तपसा आन्तरयण विमर्शेन बाह्येन संयमेन च धीभिः प्रत्यङ्मुखाभिः सवृत्तिकाभिः प्राप्नोमीति ॥ एवं विश्वसमन्वयेन तद्व्यतिरेकेण च इति लोकवैलक्षण्येन सत्त्वेन प्रतिपादितः— तथा विद्यमानोऽपि सः स्वस्वरूपात् न प्रच्यवते इति तदेतदेव तस्य विशिष्टं सत्त्वं तदनन्यसाधारणमिति वैदिकं दिव्यं परमं सिद्धान्ततत्त्वम् ॥

## COMMENTARY—SUMMARY TRANSLATION

The Purusha, the supreme, has no particular form of his own; he is formless. At the beginning of creation, there was mere existence; he manifested himself by creation and pervasion of all forms. That is what we generally hear in the world, and the Vedas specifically mention it. He has no body of his own, but being fully identified with this universe, he has this universe itself as his body Having the capacity to pervade everything he is the lord of all energy and of all the things having energy. He has no limbs like the face etc., but he has manifested himself in the universe which is full of faces. He fills everything with his fullness. Cf. " All this universe is filled with that Purusha who stands still and straight like a mighty tree in the heavens " (Nār. Up. 10-4). Thus both by identity with the world and by difference from the world, he shows his uniqueness and is described as the unique Purusha. Though he is quite different from the worldly things, his nature remains unchanged. That is why the Vedas describe him as uncommon and quite different in nature from the created world.

### षष्ठी ऋक् ।.

विश्वशीर्षो यो भूमसत्त्वा महीयान्<br>
विश्वचक्षुः प्रति सन्दृग् य उत्तमः ।<br>
यो वा विश्वपादतति प्रचेतन-<br>
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ६ ॥

पदपाठः – विश्वऽशीर्षः । यः । भूमऽसत्त्वा । महीयान् ।<br>
विश्वऽचक्षुः । प्रति । सम्ऽदृक् । यः । उत्ऽतमः ॥<br>
यः । वा । विश्वऽपात् । अतति । प्रऽचेतनः ।<br>
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He has infinite heads. He is full of the essence of all greatness. He is mighty. He has infinite eyes. He is the best among those who have vision. He has infinite legs, and he is the greatest of life-givers. I attain him, by virtue of meditation and intense thinking.

### अन्वयभाष्यम् ।

यः पुरुषः विश्वशीर्षः विश्वशिराः, अत्र शीर्षशब्दः मुखवाचकोऽपि भवितुमर्हति, तेन विश्वमुखः इत्यर्थो लभ्यते, विश्वशब्दः अनन्तार्थकः, अतः एव " विश्वतोमुखः " इति

मन्त्रार्थेन समानो भवति, अथवा "शीर्षं शरीरं तदुत्तमाङ्गत्वात्, तेन विश्वशरीरः" इत्यर्थोऽपि सम्पद्यते। शिरसि पतिते शरीरं पतितं इत्युच्यते, तथा शरीरे पतिते शिरः पतितमिति वदन्ति, विश्वव्याप्तिरेव तस्य विश्वशिरस्त्वं विश्वशरीरत्वं च बोधयतीति, यः भूमसत्त्वः विश्वविभूतिसत्त्वपूर्णः भूमात्मस्वरूपः, अत एव महीयान् सर्वेभ्योऽपि महत्तमः पूजनीयेषु श्रेष्ठतम, यश्च विश्वचक्षुः सर्वदृक्सत्त्वपूर्णः विश्वसाक्षी जगच्चक्षुरिति यावत्॥ विश्वाध्यक्षः इति च तदर्थः सम्पद्यते॥ तथा यः पुरुषः प्रतिसन्दृक् प्रत्यङ् सन्द्रष्टा स्वस्वरूपसन्दर्शी, अत एव उत्तमः सर्वेभ्योऽपि द्रष्टृभ्यः श्रेष्ठः द्रष्टृतमो भवति, अथ वा उत्तमः उत्तमलोकाधिपतिः आदित्यान्तर्यामी पुरुषः विश्वचक्षुः सुसन्दृग् भवति, स एवायं प्रत्यक् सत्त्वेनोदितः सर्वेषां अन्तरात्मा प्रतिसन्दृग् इति अनुश्रूयते। तथा च ऋङ्मन्त्रवर्णो भवति— "सुसन्दृशं त्वा वयं प्रति पश्येम सूर्य। विपश्येम नृचक्षसः" (ऋ.मं. १०-१५८-५) इति॥ यः विश्वपात् सर्वपादसत्त्वः सर्वत्र सर्वदा गमनादिशक्तियुक्तः अतति सातत्येन गच्छति, अथवा विश्वमेव यस्य पादः अंशरूपः विन्यासरूपश्च भवितुमर्हति, "पादोऽस्य विश्वा भूतानि" (ऋ. मं १०–९०–३) इति तदनुश्रवणम्॥ गीतास्मृतिः इदमेव अनुवदति, "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" (भ. गी.) इति॥

यश्च प्रचेतनः केवलं प्रकृष्टचेतनासत्त्वपूर्णः अस्ति, तं तादृशं परमं पुरुषं धीभिः तदनुरूपाभिः व्यापकसत्त्वाभिः तपसा तद्योगानुचरितेन अन्तर्दृक्सत्त्वेन विमर्शेन प्रपद्ये अपरोक्षतः प्राप्नोमीति। अत्रायं विशेषः—तस्य पुरुषस्य विश्वशीर्षत्वादिविभूतितत्त्वावबोधे ऋङ्मन्त्रवर्णः भवति—"विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्"(ऋ.मं १०-८१-३) इति। "सहस्रशीर्षा पुरुषः सहस्राक्षःसहस्रपात्" (ऋ. मं १०–९०-१) इति च। तत्र सहस्रशब्दस्य "सहस्रशः सहस्रधा" इति बहुधाभावेन तदनुश्रवणात् तथा असङ्ख्यातत्त्वेन अनन्तत्वाद्यर्थेन विश्वपर्यायत्वाभ्युपगमाच्च विश्वार्थत्वमङ्गीक्रियते, "सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम" (यजु. सं.) "सहस्रधा महिमानः सहस्रम्" (ऋ.मं.१०-११४-८) "असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम्" (शु. य. सं.) इत्यादीनि तादर्थ्यमेवोपवर्णयन्ति॥ अस्मिन्नर्थे औपनिषदं ब्राह्मणवचनमपि भवति— "युक्ता ह्यस्य हरयः शता दशेति अयं वै हरयः अयं वै दश च शतानि च सहस्राणि बहूनि च अनन्तानि च०। तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम् अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्" (बृ. उ. २-५-१९) इति॥ तथा औपनिषदमार्चं दर्शनमपिविद्यते — तदेतदृचाऽभ्युक्तम् — "विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्। सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः"(प्र. उ. १-८) इति॥

"सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति" (गी.) इति च स्मृतिः॥

तदेतद् व्यतिरेकार्थतत्त्वेऽपि समानमेव,—

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः" (श्वे.उ. ३·१९) इति ॥

"अपादग्रे समभवत् सो अग्रे स्व१राभरत् । चतुष्पाद् भूत्वा भोग्यः सर्वमादत्त भोजनम्" (अथर्व) इति ॥

इत्यादीनि प्रमाणवचनानि तस्य परमपुरुषस्य अनन्तत्वादिगुणपूर्णं महिमानं वर्णयन्ति इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Purusha has infinite heads. 'Śiras' means face also, and so, we can say he has infinite faces. Thus it is equivalent to the mantra, which says that "he has faces all-wise"; or Śiras may mean the whole body, that being the best part of the body. So, it can also mean having infinite bodies. It is said that when the head falls, the whole body is fallen as it were and vice versa also. So, having infinite heads means, he is all-pervasive. He is Bhūmasattvaḥ, i.e. his glory fills the whole universe. Therefore, he is the mightiest of all. He is the best among those worthy of worship. He has infinite eyes: this means that he has the power to see all and everything. So, he is the over-lord of the universe. Again, he sees himself The Purusha who has infinite eyes, is the best of all the seers; he is the lord of the heavens. And he is the Purusha indwelling the Sun. The same Purusha being the indwelling spirit of all, is described as one who sees inward. Cf. "May we having the power to see within, see you as one seeing within. Oh, Sun, we with human eyes see your visible form also" (Ṛg. I-158-5) He has infinite legs This means, he has the power to go everywhere, and as such goes on continually, or it can be that he has the universe itself for his feet. And he can plant his feet firmly. Cf. "The whole universe is his one foot (quarter)" (Ṛg X-90-3). The Gīta also repeats this: "This whole universe, I pervade with but a fraction of mine." He is pure energy.

There is a point here to note. There is a Ṛk to elucidate the magnificance of the Purusha who has infinite heads. "He has eyes all round; faces all round; arms all round; and feet all round" (Ṛg.X-81-3). Again "Purusha has innumerable heads, innumerable eyes, and feet innumerable" (Ṛg. X-90-1). The word 'sahasra' here means innumerable; numberless and infinity are other meanings, and it is used in the place of Viśva. Cf. "On this earth there are thousands of Rudras in thousands of ways" (Tait. Up.). "The magnificence of the Purusha is thousand-fold in thousand forms" (Ṛg. X-114-8). "Thousands mean numberless." "Thousand means many and infinite" (Bṛ. Up. II 5-19). Both the statements of the Ṛgveda and the Upanishads are further confirmed by another Ṛk quoted in the Upanishad. "Those who know the Sun know him as Omnifarious, Omniscient, the refuge of all prāṇas, the light par excellence, the one and the burning one. He has

thousand rays. He exists in hundreds of forms. He is the life of all living beings. He is the Sun who rises " ( Praśn. Up. I-8 ). And again, " He has hands and feet all round. He has eyes and heads and faces all round. He has ears all round He stands encompassing all and everything in the world."

This holds good in the negative description of the Purusha also. Cf. " He has neither hands nor legs; but he is quick and catches hold of anything. He has no eyes, but sees everything. He has no ears, but hears everything " ( Śvetāś. Up. III-19 ). " Being attributeless, at the beginning of creation, he pervaded the sky. Manifesting in multiforms, he made the whole universe as his own " ( Athar. Sam. ).

## सप्तमी ऋक् ।

पुरुषोऽसौ विश्वबाहुर्यः सहस्वान्
विश्वशक्तिर्यो विश्वकर्मा महस्वान् ॥
विश्वकामो यः सोमसत्त्वा मनस्वाँ –
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ७ ॥

पद्पाठः – पुरुषः । असौ । विश्वऽबाहुः । यः । सहस्वान् ।
विश्वऽशक्तिः । यः । विश्वऽकर्मा । महस्वान् ॥
विश्वऽकामः । यः । सोमऽसत्त्वा । मनस्वान् ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

This Purusha has arms all round. He is mighty. He is Omnipotent. He is capable of infinite work and therefore he is very great. He is full of infinite desires He is the essence of all that is sweet and tasteful. He has a mighty mind. I attain that Purusha by meditation and by intense thinking.

## अन्वयभाष्यम् ।

यः असौ विप्रकृष्टः परः पुरुषः विश्वबाहुः सन सहस्वान् बलवीर्यादिसर्वक्रियाशक्तिका भवति, अत एव " विश्वतो बाहु." " विश्वतो हस्त:" इति च अनुश्रूयते (ऋ.मं. १०-८१-३) (तै. सं. ४-२-६-४) तस्यैतदौपनिषदं ब्राह्मणानुवचनम्,–" सर्वेषां कर्मणां हस्तौ एकायनम् " ( बृ. उ. ४ ५-१२ ) इति ॥ " सहस्रबाहुः पुरुषः " (अथर्व सं १९ ६-१) इति ॥ आथर्वणीये सहस्रशब्देन सह योगेन तद्बाहुनिर्देशः ॥

यः सहस्वान् इन्द्रः इति श्रूयते, रुद्र इति च तद्वैद्युतात्मतत्त्वसामान्यात् ॥ तत्र

"बाहुवोर्बलम्" ( ना. उ. १६ ) इति बाहोर्बलकर्मयोगः, "सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि" ( तै. सं. ) इति भगवतः रुद्रस्य बाह्वोः बलादिसर्वक्रियाशक्तिमत्त्वं तथा तदीशितृत्वं च अनुश्रूयते । तत् सर्वमपि बलकर्म इन्द्रस्यैवेति गम्यते ऋङ्मन्त्रवर्णात्, तथाहि– "इन्द्रस्य बाह्वोर्भूयिष्ठमोजः ॥

"बलविज्ञाय: स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः" (ऋ॰ मं. १०-१०३-५) "गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा" (ऋ. मं. १०-१०३-६) इति च ॥

"इन्द्रो मे बले श्रितः" (तै. ) इति च यजुः ॥ यश्च विश्वशक्तिः सर्वशक्तिपूर्णः, विश्वकर्मा सर्वकर्मकर्तृत्वशक्तिपूर्णः, अत एव महस्वान् तेजस्वान् ओजस्वान्, तदेतद् विद्युदात्मं रुद्रियं सत्त्वं भवति ॥ "न वा ओजीयो रुद्र त्वदस्ति" ( ऋ. मं २-३३-१० ) इति तदनुश्रवणम् ॥

तेजोमयस्य सूर्यादेः सर्वकर्मप्रवर्तकत्वं प्रत्यक्षसिद्धमेव, एतेन सूर्येन्द्ररुद्रादितेजोविभूतिपूर्णः स परमः पुरुषः इति सिध्यति ॥ यः सोमसत्त्वः सोमादिरसस्वरूपः चान्द्रमसश्च दिव्यः मनस्वान् आध्यात्मकमानससत्त्वपूर्णः, "चन्द्रमा मनसो जातः" ( ऋ. मं १०-९०-१३ ) इति तदनुश्रवणम्, "यो जात एव प्रथमो मनस्वान्० स जनास इन्द्रः" ( ऋ.मं. २-१२-१ ) इति च तदनुश्रवणात् यस्य इन्द्रात्मता अनुगम्यते ॥ यश्च विश्वकामः सर्वतन्त्रस्वतन्त्रेच्छासङ्कल्पादिशक्तिपूर्णः, इच्छायाः सङ्कल्प–भावनादीनां च मनोबीजसत्त्वात्, "कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्" ( ऋ. मं. १०–१२९–४ ) इति मन्त्रवर्णः ॥ "सर्वेषां सङ्कल्पानां मनः एकायनम्" ( बृ. उ. ४-५-१२ ) इति च ब्राह्मणम् ॥ "कामः सङ्कल्पो विचिकित्सा धीर्ह्रीर्भीरित्येतत् सर्वं मन एव" ( बृ. उ. ) इति च तदनुश्रवणम् ॥ तं तादृशं पुरुषं धीभिः तादृशीभिः व्यापकसत्त्वमयीभिः सर्वधीन्द्रियवृत्तिभिः सर्वत्र व्याप्ताभिः भगवतः दिव्यविभूतिसत्त्वसमन्वयेन तथा बाह्यभौतिकविषयेभ्यः अन्तः प्रत्युपसंहृताभिः तपसा तद्भावानुनिरतेन आध्यात्मकेन आन्तर्येण अलौकिकेन साधनेन तदेकनिष्ठया च अपरोक्षतः तं स्वं पुरुषं प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Purusha, the supreme, is really a very great one. He is above and beyond all. He is a Viśva-bāhu, that is, he is all arms, he can do anything. Cf. "He has arms all round" ( Ṛg. X-81-3 ). "He has hands all round" ( Tait. Sam. IV-2-6-4 ). Upanishads follow up with the statement, "For all the work to be done, the hands are the only means" ( Bṛ. Up. IV-5-12 ). 'Thousand-handed is the Purusha" ( Athar. Sam. XIX-6-1 ). Here is a reference to Purusha with Sahasra, that is innumerable or infinite hands.

He is the possessor of strength. "There is strength in the arms." This

means strength is associated with arms. "Your two arms have thousands of weapons in thousands of forms. You are their lord." Thus it is heard that Bhagavān Rudra has two arms which are capable of doing all or anything and that he is the master of them all. All the work requiring strength is done by Indra only who is lightning itself. This is the inference. "The strength of the arms of Indra is the greatest." "He (Indra) knows the strength of himself and others. He is the ancient one and He is a mighty hero. He can stand his enemies. He is fierce" (Ṛg. X-10-5). "I attain the breaker of the mountains, the obtainer of cows, the wielder of Vajra, the winner of battles, the destroyer of enemies with might" (Ṛg. X-103-6). "There is Indra in my might" says yajus.

And he is all-powered, that is full of all kinds of power. He can accomplish all works. So, he is full of glory and strength. This is the quality of Rudra. Cf. "There is no one mightier than you, Oh, Rudra." It is obvious that Sūrya and others who are full of glory can impel or direct others to do things. So, that Purusha contains in himself all the greatness of Sūrya, Indra, Rudra and others, is established.

He is full of the substance of Soma. He contains the very essence of the Soma plant and the moon which is celestial. He is of the same substance mind is made of. Cf. "Chandra (moon) was born of mind" (Ṛg. X-90-13). He is independent in every respect being full of all desires, determination etc. as his desires and determinations etc. are the seed of mind. At the beginning, there was desire which was the seed of mind. "The main refuge of all the determinations is mind only" (Bṛ. Up. IV-5-12).

## अष्टमी ऋक् ।

पुरुषो यो यज्ञो यज्ञपतिर्दिव्यो
यजमानोऽयं यष्टा यज्ञसाधनः ॥
सर्वहुतं यो यज्ञं यजते सर्वं
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ८ ॥

पदपाठः – पुरुषः । यः । यज्ञः । यज्ञऽपतिः । दिव्यः ।
यजमानः । अयम् । यष्टा । यज्ञऽसाधनः ॥
सर्वऽहुतम् । यः । यज्ञम् । यजते । सर्वम् ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

The Purusha is Yajña or sacrifice. He is the heavenly lord of sacrifice. He is the house-holder who performs the sacrifice. He is the means for the

fulfilment of sacrifice. He performs all the sacrifices and he is also all that is sacrificed, he is all the oblations. I attain that Purusha by concentration of all mental powers and meditation.

## अन्वयभाष्यम् ।

यः परमः पुरुषः यज्ञः स्वयं यज्ञरूपः यज्ञात्मा च, तथा यज्ञपतिः सर्वेषां यज्ञानां अध्यक्षः, दिव्यः देवतात्मा सर्वयज्ञाधिदैवतात्मस्वरूपः सर्वैः यज्ञैः यजनीयः सम्प्राप्यः इति यावत्—"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्" (ऋ. मं १०-९०-१६) इति तदनुश्रवणम् ॥

यश्च अयं आत्मा यजमानः स्वयं यज्ञकर्ता— "आत्मा यज्ञस्य पूर्व्यः" (ऋ. मं. ९-२-१०) इति तदनुश्रुतेः। यष्टा यः स्वयं यज्ञकृत, तथा यज्ञसाधनः यज्ञसाधकः यज्ञसिद्धि-कारणीभूतः इति यावत् ॥ "यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः" (ऋ. मं. १०-५७-२) इति तदनुश्रवणम् ॥ सोऽयं यज्ञः बहुधा अनुश्रूयते ॥ "एवं बहुविधा यज्ञाः वितता ब्रह्मणो मुखे" (भ. गी.) "द्रव्ययज्ञास्तपोयज्ञाः ध्यानयज्ञास्तथापरे। स्वाध्याय-ज्ञानयज्ञाश्च यतयः संशितव्रताः" (भ. गी.) इति ॥ तेषां सर्वेषां यज्ञानामपि चेतनः सोमसत्त्वः आत्मैव प्रथमः याजकः यज्ञसाधकः स्वयं भवतीति सम्पद्यते, "गोषा इन्दो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः" (ऋ. मं. ९-२-१०) इति तदनुश्रावणम् ॥

यश्च पुनः अस्मिन् जगति सर्वं यज्ञं विश्वसृष्ट्यादिरूपं यजते स्वयमेव नित्यमनु-तिष्ठति स्वकर्तव्यतया समाचरति तथैव पुनः सर्वहुतं सर्वस्वहवनरूपं प्रत्युपसंहृतिलक्षणं यज्ञमपि यः स्वयं यजते सर्वमेधसयज्ञस्यापि स एव यजमानः इति भाव ॥ धीभिः ऋत्विक्-स्वरूपैः सर्वैरपि आन्तर्यैः धीन्द्रियैः तपसा तद्योगेन यज्ञादिरूपेण तं पुरुषं प्रपद्ये इति, एतेन सः परमः पुरुषः यज्ञैरेव उपप्राप्यः इति गम्यते ॥ "यज्ञेन वाचः पदवीयमायन्" (ऋ. मं. १०-७१-३) इति ॥ "ब्रह्मायं वाचः परमं व्योम" (ऋ. मं. १-१६४-३७) इति ॥ "यज्ञैरथर्वा प्रथमः पथस्तते" (ऋ. मं. १-८३-५) इति ॥ "यज्ञेनेन्द्रमवसा चक्रे अर्वाक्" (ऋ. मं. ३ ३२-१२) इति ॥ "ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश" (ऋ. मं. १०-६२-१) इत्यादिभिर्मन्त्रवर्णैः सः परमः पुरुषः यज्ञेनैव सम्प्राप्यः इति उपपद्यते ॥ स च यज्ञः तथा यज्ञेन तेन यजनीयः दिव्यो देवतात्मा परमः पुरुषः अपि धीयोगेनैव प्राप्तुं शक्यः इति प्रतीयते, "यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन। स धीनां योगमिन्वति" (ऋ. मं. १-१८-७) इति ऋङ्मन्त्रवर्णे तदनुश्रवणं स्पष्टार्थकम् ॥ यस्मात् सदसस्पतेः सर्वसभाध्यक्षात पुरुषाद् विना ज्ञानिनः अपि यज्ञः न सिध्यति। सः पुरुषः धीनां योगमनुसृत्य प्रकाशते इति तदर्थः ॥ स च धीयोगः आन्तर्यविद्वद्यज्ञसम्बद्ध एव। तस्मिन यज्ञे धीन्द्रियाणामेव वाक्प्रभृतीनां ऋत्विक्स्वरूपत्वमनुश्रूयते,—तथा हि— "तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी०। तपोऽग्निर्दमः शमयिता दक्षिणा वाग्

होता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद् यावद् ध्रियते सा दीक्षा०" ( ना. उ. खं २५ ) इत्यादि ॥

## COMMENTARY—SUMMARY TRANSLATION

The supreme Purusha is himself the act of sacrifice. He is the very soul of sacrifice. He is the lord of all sacrifices. He is a divinity. He is worthy of worship by means of all sacrifices. "By means of sacrifice, the gods worshipped the Purusha, the lord of sacrifice" ( Ṛg. X-90-16 ).

This Ātmā is himself the performer of sacrifices. He is himself the sacrificer. He is the conductor of sacrifice. He is the perfector of sacrifice. He is the cause of the fulfilment of sacrifice. Cf. "He is the great cause in the form of a running thread performing all the good sacrifices" ( Ṛg. X-57-2 ). The sacrifices are manifold. Cf. "Sacrifice in the form of offering material things, sacrifice through penance, sacrifice by meditation ( Brahmayajña ), sacrifice in the form of recital of Vedās, and sacrifice in the form of acquiring knowledge; Yatis who take vows, perform all these sacrifices" ( Gītā ).

Ātmā is the very soul of all those sacrifices. He is, as it were, the first sacrifice. He can easily be said to be the conductor of sacrifices. Cf. "You are the earliest and oldest soul of sacrifice" ( Ṛg. IX-2-10 ). He performs himself every day in this world all the sacrifices which result in the creation of this baffling variety. He performs it every day as a duty. Again, he performs the sacrifice of offering all things which ultimately reduce all things to their original form. He is the master of the sacrifice, the Sarvamedha. With the internal senses in the form of performers of sacrifice and with Tapas in the form of sacrifice, I attain that supreme Purusha. Cf. "With sacrifice they attained the place of Vāk" ( Ṛg. X-71-3 ). "Brahma is the original supreme abode of Vāk" ( Ṛg. I-164-37 ). "Atharva was the first to lay down a path by means of sacrifices" ( Ṛg. I-83-5 ). "( He ) made Indra turn towards him by means of sacrifices which protected him ( Ṛg. III-32-12 ). By all these Ṛks it is to be inferred that he is to be attained by sacrifice only. Without Sadasaspati— the overlord of all the assemblies, the sacrifice of even a wise one is not fulfilled and the Purusha manifests himself in the concentration of mind.

### नवमी ऋक् ।

सर्वहुतस्तपसोऽग्नावात्मन् यज्ञे
विश्वान्येव भूतान्याजुहाव पूरुषः ॥
य आत्मानमेवान्वद्युह्त भूय-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ९ ॥

पद्पाठः – सर्वऽहुतः । तपसः । अग्नौ । आत्मन् । यज्ञे ।
विश्वानि । एव । भूतानि । आऽजुहाव । पुरुषः ॥
यः । आत्मानम् । एव । अनु । अजुहृत । भूयः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

In the Sarvahuta sacrifice ( in which everything is sacrificed ) the Purusha offered everything as sacrifice into the fire of concentration. Again, he sacrificed all the beings in the universe also. Finally he sacrificed himself in himself. I attain that Purusha by concentration and hard thinking.

## अन्वयभाष्यम् ।

तस्य परमपुरुषस्य सर्वमेधस्य यज्ञस्य यज्ञरूपस्य च तपसः अग्नौ आत्मनि चैतन्यज्ञानज्योतिःस्वरूपे यज्ञे यज्ञरूपे तस्मिन् यजनीये स्वस्मिन् अन्तर्यामिणि परमे अग्नौ तस्मिन् परमे यज्ञे च यः पुरुषः विश्वानि सर्वाणि भूतानि हविःस्वरूपाणि भोग्यानि आजुहाव आहुतिरूपेण अशेषेण समर्पयामास, तथा भूयः पुनरपि तस्मिन्नेव यज्ञीये तपोऽग्नौ तं सर्वहुतं यज्ञं अनु अनुसृत्य अन्ते आत्मानं यजमानमपि अजुहोत् हवनरूपेण समर्पयत्, तं परमं पुरुषं तपसा तादृशेन तदनुरूपेणैव प्रत्यक्संयमेन धीभिः सर्वधीन्द्रियवृत्त्युपसंहृताभिः ताभिरेव आत्मवृत्तिभिः विशुद्धसत्त्वाभिः निर्विषयवृत्तिभिः चैतन्ययोगेन प्रपद्ये अपरोक्षतः तादात्म्येन प्राप्नोमि इति तदर्थसद्भावः ॥ अस्मिन् ऋङ्मन्त्रवर्णो भवति— "य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः" ( ऋ. मं. १०-८१-१ ) इति ॥

अत्र यास्कनिरुक्तमपि तमेनमेवार्थमुपबृंहयति — "अत्रेतिहासमाचक्षते—विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुहवाञ्चकार, स आत्मानमेवान्ततो जुहवाञ्चकार ॥ २ ॥ तदभिवादिनी एषा ऋग्भवति — 'य इमा विश्वा भुवनानि जुह्वत्' " ( नि. १०-२६-२) इति ॥ तस्योत्तरा भूयसे निर्वचनाय—"विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम्" ( ऋ. मं. १०–८१–६) ( नि. १०–२७–१ ) इति च ॥ अत्र छन्दोदर्शनेऽपि तत्समानमेव सर्वमेधसयज्ञसन्दर्शनमिति ॥

## COMMENTARY—SUMMARY TRANSLATION

He performed the highest penance and sacrifice called Sarvamedha. Then in the sacred and supreme fire of his own intelligent energy, the Purusha sacrificed all the beings as oblations, which are objects of enjoyment. In the same sacred fire of Tapas which means internal self control, and with all the senses withdrawn, and by meditation without any particular object, I attain him. By communion with him I attain him : " He is the seer, the

sacrificer, and he is one who sacrificed all the beings" ( Ṛg. X-81-1 ). Yāska in his Nirukta, elaborates the same and says, " There is a story in this connection. Viśvakarmā Bhauvana offered all the beings as oblation. Finally he offered himself" ( Nirukta X-26-3 ). For further explanation, Cf. " Oh Viśvakarmā, in order to grow by means of oblations, sacrifice the earth and the sky " ( Ṛg. X-81-6 ).

## दशमी ऋक् ।

सर्वहुतश्चिद् यज्ञात् पुरुषस्तपसः
सहसाऽऽविर्बभूव विश्वथाऽऽत्मना ॥
य आ विवेश चित्तिभिर्विश्वमेतत्
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १० ॥

पद्पाठः – सर्वऽहुतः । चित् । यज्ञात् । पुरुषः । तपसः ।
सहसा । आविः । बभूव । विश्वऽथा । आत्मना ॥
यः । आऽविवेश । चित्तिऽभिः । विश्वम् । एतत् ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

The Purusha, by concentrated effort or penance in the form of the sacrifice known as Sarvahuta ( in which everything is sacrificed ) manifested himself as the universe by means of his own energy. He entered this universe by means of his powers of intelligence. I attain that Purusha by meditation and by intense thought.

## अन्वयभाष्यम् ।

यः सः पुरुषः तस्मादेव सर्वहुतः सर्वस्वहवनरूपाद् यज्ञात् यज्ञरूपात् तपसः नाममात्रावशेषात् चैतन्यसत्त्वात् प्रज्ञानज्योतिषः तथा सहसा आत्मबलेन संवित्–क्रियाशक्ति· समन्वितेन चिदात्मसत्त्वेन सह योगशक्तेः अकस्मात् अन्यनिरपेक्षेण स्वयमेव आविर्बभूव, तच्च विश्वथा वैश्वरूप्येण सत्त्वेन आत्मना चैतन्यस्वरूपेण प्रादुर्बभूव,— विश्वविभूतिपूर्णेन योगेन तथा तद्योगशक्त्या प्राकाश्यं प्राप इति यावत् ॥

यश्च पुनः चित्तिभिः चेतनाशक्तिभिः एतद् प्रत्यक्षं आत्मनः सकाशात् आविर्भूतं विश्वं आविवेश, तेन च विश्वं इदं आत्मसाच्चकार स्वीयमेव सम्भावयामास, तं तादृशं पुरुषं परमं तपसा तादृशेनैव यज्ञरूपेण साधनेन धीभिः तद्भावसम्पन्नाभिः प्रत्यक्सत्त्ववृत्तिसिद्धाभिः प्रपद्ये अपरोक्षतः प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

That Purusha manifested himself as the universe by means of the Sarvahuta sacrifice. That was his Tapas in the form of sacrifice. He manifested by his intelligent energy and light. Through his own might, the essence of his consciousness combined with knowledge and action, he manifested himself independently without any other help. Further, by means of his power of knowledge, he entered this universe which came into existence from himself, and by the same power he made it his own.

## एकादशी ऋक् ।

तपसा स्वरꣳस्तेन यः समुच्छ्वसन्
ऋचो यजूꣳषि च सामान्याजभार ॥
छन्दसैव वाचाऽऽजजान विश्वमिदं
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ११ ॥

पद्पाठः – तपसा । स्वरन् । तेन । यः । सम् । उत्ऽश्वसन् ।
ऋचः । यजूꣳषि । च । सामानि । आऽजभार ॥
छन्दसा । एव । वाचा । आ । जजान । विश्वम् । इदम् ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

The Purusha performed penance in the form of breathing and conceived the Ṛk, Yajus and Sāma mantras. By means of Vāk in the form of Vedic metres, he created this universe. I attain that Purusha, by means of concentration and intense thought.

## अन्वयभाष्यम् ।

यः परमः पुरुषः तेन सर्वमेधस्वरूपेण तपसा स्वान्तःप्रदीप्तेन प्रज्ञानचैतन्यज्योतिस्सत्त्वेन तेन समुच्छ्वसन् प्राणात्मना ऐन्द्राग्नेयसत्त्वेन यः ऋचः गायत्रादिच्छन्दोबन्धसिद्धाः, सामानि राथन्तरादिगीतिविशिष्टानि तथा यजूꣳषि यजनार्थानि च मन्त्रजातानि एवं त्रयीरूपाणि छन्दाꣳसि वेदात्मकानि आ बभार आत्मन्यन्तःसन्दधार इति यावत्, तेन छन्दसा एव छन्दोनिबन्धनसिद्धया मन्त्रात्मिकया वाचा विश्वबीजात्मिकया वाचकाक्षरशक्तिरूपया इदं प्रत्यक्षं विश्वं आ समन्तात् जजान प्रादुर्भावयामास, तथा विश्वरूपेण स्वयं प्रादुर्बभूव इति च—तदर्थः, तं तादृशं पुरुषं तपसा छन्दोऽनुबद्धेन यज्ञरूपेण साधनेन बाह्याभ्यन्तरसत्त्वविशिष्टेन धीभिः छन्दोनिरताभिः प्रपद्ये तं छन्दःपुरुषं प्राप्नोमीति ॥

अत्र यज्ञपुरुषात् छन्दसामाविर्भावे ऋङ्मन्त्रवर्णः — " तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत " ( ऋ॰ मं. १०–९०–८ ) इति ॥ अस्मिन् अर्थे औपनिषदं ब्राह्मणानुवचनमपि प्रसिद्धम् ।—" अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद " ( बृ. उ. २–४–१० ) इति ॥

तदेतदपि मीमांसितं निर्णीतं च ब्रह्ममीमांसायाम्, " शास्त्रयोनित्वात् " (ब्र. सू॰ १–१–३ ) इति ॥ तत्रेदं शारीरकं भाष्यम् — " महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म । न हि ईदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति, यद् यद् विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् सम्भवति,—यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि स ततोऽप्यधिकतरविज्ञानः इति प्रसिद्धं लोके, किमु वक्तव्यम्—अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्याख्यस्य अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद् यस्मात् महतो भूताद् योनेः सम्भवः इति, ' अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः ' इत्यादिश्रुतेः । तस्य महतो भूतस्य सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति । अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणं तस्य ब्रह्मणो यथावत् स्वरूपाधिगमे, शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्म अधिगम्यते इत्यभिप्रायः " अस्य मूलभूतः याजुषो मन्त्रवर्णः —" यच्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृतात् सम्बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्यदेव धारणो भूयासम् " ( शि. उ. ४–१ ) इति ॥ तथा तस्मादेव पुरुषात् छन्दोमयवाङ्मुखात् विश्वस्यास्य जगतः आविर्भावोऽपि अनुश्रूयते, तथा च ऋङ्मन्त्रवर्णः कुत्सार्षयः,–" स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा । आपश्च मित्रं धिषणा च साधन् देवा अग्निं धारयन् द्रविणोदाम् " (ऋ. मं. १–९६–१ ) इति ॥ " स पूर्वया निविदा कव्यताऽयोरिमाः प्रजा अजनयन् मनूनाम् । विवस्वता चक्षसा द्यामपश्च " (ऋ. मं १–९६–२ ) इति च ॥ एतेन छन्दस्वत्या वाचा तथा वैदिकेभ्यः शब्देभ्यः एव जगत्सृष्टिर्बभूवेति अर्थः सम्पद्यते ॥ तथा च मन्त्रवर्णः– " एते असृग्रमिन्दवस्तिरः पवित्रमाशवः । विश्वान्यभिसौभगा " (ऋ. मं. ९–६२–१) इति । तस्येदं ब्राह्मणम् – " एते इति वै देवानसृजत, असृग्रमिति " ॥

तदेतदपि मीमांसितं ब्रह्ममीमांसायाम, " शब्द इति चेन् नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् " ( ब्र. सू॰ १-३-२८ ) " अत एव च नित्यत्वम् " ( ब्र॰ सू. १–३–२९ ) इति च ॥ इत्यादिकमनुसन्धेयम् ॥

## COMMENTARY—SUMMARY TRANSLATION

That supreme Purusha, by his Tapas in the form of sacrifice known as Sarvamedha, breathed out vital air which contains the very essence of Indra and Agni. And by means of that breath, he bore in himself, the Ṛks in the

form of Gāyatrī mantras, the Sāmas which include the songs of Rāthantara, and Yajus which are useful for Yajñas. Thus all the three Vedas were born in him. With the help of Vāk, who was ready to burst forth as metrical compositions, and who contained in herself the seed which blossomed into this universe, he created this whole universe. Here is a mantra which says that the Vedas were born of the Yajña Purusha and the Sarvahuta sacrifice. Cf. " From that supreme Purusha worthy of worship and from the Sarvahuta sacrifice were born the Ṛks, Sāma and Yajus and also all the Chhandas" ( Ṛg X-90-8 ). There is also a confirmation of this in the Upanishads. Cf. " Of this great Being, Brahma, the very breath is the Ṛgveda, Yajurveda, Sāmaveda and Atharvaveda etc. ( Bṛ. Up. II-4-10 ). Further, this is discussed and determined in the Brahma Sūtras. Cf. " He exists being mentioned in Śāstras " ( B. S. I-1-3 ). It is further learnt that this whole universe came into existence on account of that Purusha only. His mouth is the abode of Vāk, that is of all the Vedic literature. That Ṛk is by Kutsa. Cf. " He, the ancient One born with full might bore all the knowledge and the Veda in the form of poetry " ( Ṛg. I-96-1 ). He with the Vāk in the form of Chhandas, created all the beings right from the Hiraṇyagarbha to man etc. ( Ṛg. I-96-2). " From the words of the Veda only, the creation of the world proceeded " is the meaning. This is the Brāhmaṇa of the mantra : " From the word ' Ete ', he created the gods etc." ( Ṛg. IX-62-1 ).

This is also discussed in the Brahma Sūtras, ( Cf. B. S. I-3-28 ). The universe was manifested through the Vedic words, and therefore, the eternal nature of the Vedas is established.

## द्वादशी ऋक् ।

यस्यानन्ताश्च वेदाः संविदो वाचः
शक्तयो नित्याः कृतयः कामाः सत्याः ॥
रचनास्ता अचिन्त्याश्चित्रा गतय-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १२ ॥

पदपाठः – यस्य । अनन्ताः । च । वेदाः । सम्ऽविदः । वाचः ।
शक्तयः । नित्याः । कृतयः । कामाः । सत्याः ॥
रचनाः । ताः । अचिन्त्याः । चित्राः । गतयः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

His, that is the Purusha's Vedas, knowledge and speeches, are infinite. His infinite powers are eternal. His endless works and desires are infallible. His manifestations are unimaginable. His movements are miraculous. I attain that Purusha by means of meditation and intense thought.

## अन्वयभाष्यम् ।

यस्य पुरुषस्य परमस्य आत्मनः वेदाः ज्ञानसत्त्वाः संविदः अन्तरनुभावात्मिका विज्ञानरूपाः वाचः वाजकसत्त्वाः सर्वविद्यात्मकाः ते वेदाः ऋग्वेदादयः अनन्ताः असङ्ख्याताः अन्तरहिताः नित्यसिद्धाश्च सन्ति इति लोके वेदे च प्रसिद्धाः, "अनन्ता वै वेदाः" इति तदनुश्रवणम्, यस्य शक्तयः संविदिच्छाक्रियाचेतनात्मिकाः नित्याः नित्यसिद्धाः, तथा कृतयः व्यस्त-समस्तरूपाः क्रियाः विश्वसृष्टि-स्थिति-प्रतिसंहृतिप्रभृतयः कामाः इच्छा-सङ्कल्पादयः स्वतन्त्राः अनन्ताः सत्यः सत्याः सत्यात्मस्वरूपाः भवन्तीति च सुप्रसिद्धम्, तथा यस्य रचनाः आविर्भाव-तिरोभावादिविलासविरचिताः स्थिति-गति-मति-कृति-विभूति-प्रकृतिप्रभृतयः ताः सर्वा अपि अचिन्त्याः कल्पना–भावना–चिन्तनादिवृत्त्यतीताः भवन्ति । अत एव यस्य गतयः व्याप्ति-विरति-सृष्टि-स्थिति-प्रत्युपसंहृतिप्रभृतयः अनन्तविषयविशेष-सङ्कलिताः चित्राः विचित्राः लौकिकेभ्यः सर्वेभ्योऽपि विषयेभ्यः वस्तुविशेषेभ्यश्च विलक्षणाः तथा चित्राः चयनीयाः सर्वैरपि सम्पाद्याः सङ्ग्राह्याश्च भवन्ति । तं तादृशं परमं पुरुषं तपसा तादृशेनैव दिव्येन ज्ञानचैतन्यभावादिपरितप्तेन विशुद्धसत्त्वेन केवलेन निर्विषयेन विमर्शेन स्वभावात्मकेन तथा धीभिः व्यापकदिव्यभावादिनियन्त्रिताभिः सबाह्याभ्यन्तरसम-भाववृत्तिकाभिः प्रपद्ये तं पुरुषं अपरोक्षतः प्राप्नोमि साक्षात्करोमि इति ॥

### COMMENTARY—SUMMARY TRANSLATION

The supreme Purusha is Ātmā. His Vedas are the essence of knowledge; his own soul-experiences, his powers of expression in words and the Ṛgveda etc., his variety of learning, all these are numberless. That they are endless and eternal is well known in the world. Cf. "Infinite indeed, are the Vedas." His powers of knowledge, his desire, his functions and energy, are eternal and truthful. It is welknown that his actions and his doings are independent and infinite and his desires, his will are independent and numberless. His playful manifestations in the form of appearance, disappearance etc., sthiti, that is being, gati, that is becoming, mati, that is understanding, kṛti, that is working, vibhūti, that is pervasion, prakṛti, that is nature etc. are all beyond imagination, beyond thought, beyond meditation etc. Exactly therefore, his movements like vyāpti— pervasion, virati— cessation, sṛsti— creation, sthiti— existence, upasamhṛti— dissolution etc. are all miraculous. They are all unique and are different from any of the objects and things of this world.

## त्रयोदशी ऋक् ।

यस्य नामान्युत रूपाण्यनन्तानि
वीर्याणि वा कर्माणि कृतान्यकृतानि ॥
अङ्गानि यस्य चिद् भूतानि विश्वानि
तपसा धीभिः पुरुषं तं प्रपद्ये ॥ १३ ॥

पदपाठः – यस्य । नामानि । उत । रूपाणि । अनन्तानि ।
वीर्याणि । वा । कर्माणि । कृतानि । अकृतानि ॥
अङ्गानि । यस्य । चित् । भूतानि । विश्वानि ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

His, that is the Purusha's, names and forms are infinite. Indeed, his prowess and works, executed and unexecuted are also endless. Indeed, all the beings in the universe are his limbs. I attain that Purusha by meditation and intense thought.

## अन्वयभाष्यम् ।

यस्य परमस्य पुरुषस्य तस्य नामानि अभिधानानि तद्गुणबोधकानि विशेषणपदानि सङ्केतरूपाणि च बहूनि बहुधा व्याप्तानि अनन्तानि असङ्ख्यानि अन्तरहितानि नित्यान्येव भवन्तीति यावत, विनष्टेऽपि रूपे नामशेषत्वाभ्युपगमात् ॥ तथा यावन्ति यादृशानि नामानि सन्ति स्युर्वा तावन्ति तादृशान्येव रूपाण्यपि भवन्ति भवेयुश्चेति निर्विवादम्, तान्यपि अनन्तान्येव सन्ति तद्गुण-धर्म-शक्तिविशेषादिविशेषणसत्त्वानि, "रूपं रूपं प्रतिरूपो बभूव०" (ऋ. मं. ६-४०-१७) इति तदनुश्रवणम् ॥ "अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ॥ एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च" (कठाप. २-९) इति च ॥ "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णोगरुत्मान । एकं सद् विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः" (ऋ. मं. १-१६४-४६) इति ॥ "सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति" (ऋ. मं. १०-११४-५) इति च ॥ एवमादीनि वेदमन्त्रवचनानि तस्य पुरुषस्य आत्मनः नामरूपयोः अनन्तत्वावबोधकानि भवन्ति, यस्य च वीर्याणि सामर्थ्यानि तथा स्वतन्त्रसामर्थ्येन समाचरितानि कर्माणि कृतानि इतः पूर्वमेव निर्वर्तितानि, तथा अकृतानि उत्तरत्र कर्तव्यानि क्रियमाणानि च कर्माणि, अकृतकानि अकृत्रिमाणि तस्मिन्नेव निसर्गतः स्वभावतश्च नित्यसिद्धानि चेतनादीनि अनन्तान्येव सन्ति । अस्मिन् अथ च ऋङ्मन्त्रवर्णोऽपि प्रसिद्धः

तत्सुवीर्यातिशयसत्त्वबोधकः, "इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री" (ऋ. मं. १-३२-१) इति ॥ "विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि" (ऋ. मं. १-१५४-१) इति च इन्द्रोपेन्द्रयोः तद्वीर्यकर्मोपवर्णनम् । यस्य च पुरुषस्य इमानि विश्वानि भूतानि अङ्गानि अवयवरूपाणि तत्स्वरूपतत्त्वादिबोधकलिङ्गानि भवन्ति, "पादोऽस्य विश्वा भूतानि" (ऋ. मं. १०-९-३) इति तदनुश्रवणम् ॥ "तदस्य रूपं प्रति चक्षणाय" (ऋ. मं. ६-४७-१८) इति च ॥ "रूपं रूपं मघवा बोभवीति" (ऋ.मं. ३-५३-८) इति च ॥ "इन्द्रियमिन्द्रलिङ्गम्" (पा. सू. ५-२-९३) इति च तल्लक्षणनिर्वचनम् । "इन्द्रो ज्येष्ठ इन्द्रियाय" (ना. उ. ७-९) इति च औपनिषदं तद्वचनम् ॥ "अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा" (मुं.उ. २-१-४) इति च तदुपवर्णनम् ॥ तं तादृशं पुरुषं धीभिः तपसा प्रपद्ये इति ॥

## COMMENTARY—SUMMARY TRANSLATION

The names, nomenclatures, characteristics, peculiar denominations, and symbolic appellations of the Purusha are all numberless and endless and eternal. The forms are inherent in the names and are equal to them. They are also numberless with reference to their quality, nature, speciality etc. Cf. "He (Indra) assumed the very forms which he himself manifested" (Ṛg. VI-40-17)." Agni being one, when he enters into the objects of the world, he assumes just the forms of those objects. Likewise, the soul of all the living beings is also one like Agni and when he becomes the indwelling one, he assumed just the same forms as those of the living beings" (Kaṭha Up.II-9). "The wise refer to the One as many" (Ṛg. I-164-46). "The wise and the seers (Kavi) imagine him as one who is all-energy and one who assumes numerous forms" (Ṛg. X-114-5). Thus the Veda confirms the endlessness of his names and forms.

His might, and actions achieved by strength, actions which are already done and those that are yet to be done, and those which are not artificial, and those which are natural, are all endless. "I declare the powers of Indra, the bearer of the thunderbolt, who manifested them at the beginning of creation" (Ṛg. I-32-1). "I declare the valorous achievements of Vishṇu. He measured all these material worlds" (Ṛg I-154-1). Thus are described the powers and actions of Indra and Upendra.

All these beings are but his limbs. They all express his nature, capacity etc. It is said that "all the beings amount to a quarter of him" (Ṛg. X-9-3). "These forms indicate his distinct characteristics" (Ṛg. VI-47-18). "Indra assumes all forms" (Ṛg. III-53-8). "Indriya means the symbol indicative of Indra etc." (Pāṇ. Sū. V-2-93), such is its derivation. "Āgni is his head;

the moon and the sun are the eyes, the directions are the ears; the Vedas are his speech, the air is his vital breath and this universe is his heart; the earth is his feet. He is certainly the inner soul, the Purusha of all beings (Muṇḍaka Up. II-1-4).

## चतुर्दशी ऋक् ।

यस्यानन्तानि धामानि शरीराणि
शीर्षाणि चक्षूंषि मुखानि पूर्णानि ॥
श्रोत्राणि नासा रसनाश्च वक्त्राणि
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १४ ॥

पदपाठः – यस्य । अनन्तानि । धामानि । शरीराणि ।
शीर्षाणि । चक्षूंषि । मुखानि । पूर्णानि ॥
श्रोत्राणि । नासाः । रसनाः । च । वक्त्राणि ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

Endless are his embodiments, and indeed infinite are his symbols. His heads, eyes and faces are all endless and perfect. So are his ears, noses, tongues and mouths. I attain the Purusha, by means of meditation and thought.

## अन्वयभाष्यम् ।

यस्य पुरुषस्य शरीराणि प्रतीकरूपाणि प्रतिष्ठाधिकरणानि सञ्ज्ञा सञ्ज्ञात्मकानि साङ्केतिकानि भवन्ति, तानि च अनन्तानि अन्त-क्लृप्ति-मर्यादा-सङ्ख्यादिरहितानि, शीर्षाणि शिरांसि शिरःस्थानीयानि उच्चतमानि तात्त्विकानि, दिव्यानि तत्रापि वैशिष्ट्येन अधिदैवतसत्त्वप्रमुख्यानि ज्योतीरसादिस्वरूपाणि, चक्षूंषि दृक्सत्त्वानि ज्योतिर्दर्शनादि-क्रियाकारकाणि ज्ञानप्रधानानि, मुखानि मुखरूपाणि प्रमुख्यानि, पूर्णा पूर्णानि अन्यूनसत्त्वानि सन्ति, तथा श्रोत्राणि श्रवणसत्त्वानि दिग्-व्योमात्मकानि स्वर-नाद-शब्दादिश्रवणज्ञानादि-करणानि च, नासा-रसनाप्रभृतीनि गन्धाघ्राणन–रसास्वादनादिविषयसत्त्वविशिष्टानि, वक्त्राणि श्वासोच्छ्वास-वाक्-स्वरणोच्चारणादिक्रियासत्त्वयुक्तानि प्रसिद्धान्येव, एवं सर्वाण्यपि शीर्षण्यानि अङ्गानि तदङ्गसत्त्वानि च यस्य पूर्णानि अनन्तान्येव भवन्ति, तं तादृशं परमं पुरुषं तपसा तदनुरूपेण साधनेन तेषामेतेषां सर्वेषां शीर्षण्यानां धीन्द्रियाणां योगेन अन्तर्विमर्शेन संयमेन च प्रपद्ये अपरोक्षतः दिव्यभावेन साक्षात्करोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

The numerous bodies of the Purusha are all symbols. They are his locations and indications. They are numberless. They are not determined by end, limit, finitude, or number etc. His heads are those that are worthy of being called heads, are the highest and celestial abodes of the presiding deities. The eyes intended for sight, and the faces or all important limbs, are all perfect, they lack nothing. The ears are the directions in the form of space. The noses and tongues, endowed with the capacity to smell and taste, the mouths which can breathe and make sound etc. and all other limbs are all perfect and infinite.

## पञ्चदशी ऋक् ।

यस्यानन्ता बाहवः पादाः पूर्णाः
प्राणाः प्राणभृतो विश्वे पूरुषाः स्वे ॥
यस्येदमनन्तं भूतं भवद् भव्यं च
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १५ ॥

पद्पाठः – यस्य । अनन्ताः । बाहवः । पादाः । पूर्णाः ।
प्राणाः । प्राणऽभृतः । विश्वे । पुरुषाः । स्वे ॥
यस्य । इदम् । अनन्तम् । भूतम् । भवत् । भव्यम् । च ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

His arms and feet are indeed perfect and infinite. All the beings and all the persons who live and breathe are all his own. His own past, present and future are endless. I attain that Purusha by meditation and thinking power.

## अन्वयभाष्यम् ।

यस्य पुरुषस्य अधि अध्यात्मसत्त्वयुक्ताः बाहवः बल–क्रियादिशक्तिपूर्णाः हस्ताः, तथा पादाः सर्वत्र गमनागमनादिक्रियाशक्तिसम्पन्नाः, तथा प्राणाः प्राणन–शरीरधारणादि-सत्त्वपूर्णाः मरुत्सत्त्वाः, तथा प्राणभृतः सप्राणाः सचेतनाः सशरीराः इमे विश्वे सवऽपि पुरुषाः देवमनुष्यादयः स्वे स्वीयाः निजाङ्गभूताः अनन्ताः स्वात्मानः सदात्मान एव भवन्ति, यस्य च इदं विश्वं अचेतनं जगदपि स्वीयम्, तथा भूतं इतः प्राग् विश्वसृष्टेः विद्यमानं पश्चात् आविर्भूतं वस्तुजातं आदिसृष्टिं प्रारभ्य अद्य यावत् अतीतं विषयजातं, भवत् साम्प्रतिकं प्रवर्तमानं, भव्यं इतः परं उत्तरत्रापि आप्रलयं सम्भाव्यमानं परिवर्तिष्यमाणं च

यस्य इदं अनन्तं कल्पना–भावना–चिन्तनादिवृत्त्यतीतमेव भवति, तं तादृशं अनन्तसत्त्वं पूर्णः पुरुषं धीभिः तस्यैव विशिष्टदिव्यसत्त्वसम्पन्नाभिः तच्चेतनाशक्तिप्रेरिताभिः सवृत्तिकाभिः तपसा तत्प्रापकेन संयमादिरूपेण आन्तर्येण विमर्शेन प्रपद्ये अपरोक्षतः प्राप्नोमीति ॥

" न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वे. उ. ६–८) इत्येवमाद्याः औपनिषदाः प्रमाण-विशेषाः उदाहर्तव्याः ॥

COMMENTARY—SUMMARY TRANSLATION

The hands of this Purusha, which are full of the faculties of strength and varied function, and the feet which are capable of going, not going, coming and not coming, his Prāṇas capable of living, supporting the body and so on, and the living persons and all those bodies with their indwelling souls, from mortals to immortals, are all his own like his own senses and various limbs. Further, existence before creation, existence thereafter, and all existence in future are his own. This universe of his is endless. It is beyond imagination and thought. Cf. "He has neither actions nor instruments of action. Nor is there any one equal to him nor superior to him. It is said that his supreme power is, indeed, manifold, natural and exists in the form of knowledge, strength and function" ( Śvet. Up. VI–8 ). This quotation and others in the Upanishads can be cited as special evidence.

षोडशी ऋक् ।

तत् ते भगवन् विश्वरूपं परीतं
प्रति दर्शय मह्यं पूरुषात्मनि ॥
पदं पश्यामि दर्शतं तपसाऽन्त-
स्तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १६ ॥

पदपाठः – तत् । ते । भगऽवन् । विश्वऽरूपम् । परि । इतम् ।
प्रति । दर्शय । मह्यम् । पुरुष । आत्मनि ॥
पदम् । पश्यामि । दर्शतम् । तपसा । अन्तरिति ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh ! Bhagavan, show me within myself that Omnifarious form of yours which is all-pervasive; by giving me the power to concentrate, endow me with the capacity to realise you who are worthy of being seen, that is the light par excellence which illumines the whole universe.

## अन्वयभाष्यम् ।

हे भगवन्! पुरुष! ते तव तत् पारमैश्वर्यादिपूर्णं परीतं सर्वव्यापकं विश्वरूपं सत्यानन्तत्वादिगुणविशिष्टं आत्मनि अन्त: मह्यं प्रतिदर्शय अपरोक्षत: प्रतिबोधय साक्षात् प्रकाशय, अहं दर्शतं तत्–दर्शनीयं परमं तुरीयं पदं पश्यामि साक्षात् करोमि, तदेव विश्वस्य प्रपञ्चस्य परमार्थस्य च अमृतत्वस्य दर्शयत् प्रकाशकं ज्योति: इति। तत्परञ्ज्योति:-स्वरूप एव स: परम: पुरुष: इति ॥ अस्मिन् अर्थे प्रसिद्ध: ऋङ्मन्त्रवर्ण: नारायणार्षेय:— "पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनाति रोहति" ( ऋ॰मं॰ १०-९०-२ ) इति ॥ अत्र प्रत्यक्ष–परोक्षापरोक्षतत्त्वसिद्धानां अचेतन-प्रचेतन-सचेतनस्व-रूपाणां जगद्-ईश-जीवात्मनां सामरस्येनैव तत्साक्षात्कार: याथार्थ्येन पूर्णो भवितुमर्हति, न तु पुन: एतेषां पृथक् पृथग् ज्ञाने सन्दर्शने पूर्णतामुपैति, तत्तादृशं ज्ञानं एकदेशविषयकं अपूर्णं न्यूनमेव भवतीति सम्पद्यते। तस्मादत्र सामरस्येनैव तत् पूर्णं तत्त्वविज्ञानमृषि: पश्यतीति ॥

॥ इति षष्ठेऽनुवाके तृतीयं पुरुषसूक्तम् समाप्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh ! Bhagavan, oh ! Purusha, show me directly your Omnifariousness full of excellence, majesty etc. which is all-pervasive. Your Omnifariousness is full of truth, infinitude etc. May I see that superior poise of yours, the fourth one ( turīya ) worthy of being seen. It is that which illumines the whole universe.

Thus ends the Third hymn in the Sixth Section.

## अथ चतुर्थं पुरुषसूक्तम् ।

अनुवाकः ६ । सूक्तम् ४ । ऋचः १-१६ ।

पुरुषोऽसौ प्रत्नतमः षोळश, दैवरातो वैश्वामित्रः, पुरुषः, जगती ।

**Now this Purusha Sukta, Fourth in the Sixth Anuvaka**

**Section VI, Hymn 4, Riks 1-16 - PURUSHA**

This hymn beginning with 'Purusho sau pratnatamaḥ' contains sixteen Ṛks. Daivarāta Vaiśvāmitra is the seer, Purusha is the god and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

पुरुषोऽसौ प्रत्नतमो विश्वतस्पतिः
परः परस्मात् तमसस्परि ज्योतिः ॥
विश्वस्यैव द्योतयिताऽऽत्मा प्रत्यङ्
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १ ॥

पदपाठः – पुरुषः । असौ । प्रत्नऽतमः । विश्वतः । पतिः ।
परः । परस्मात् । तमसः । परि । ज्योतिः ॥
विश्वस्य । एव । द्योतयिता । आत्मा । प्रत्यङ् ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

This Purusha is the most ancient one. He is the overlord of the universe. He is the highest among the supreme ones. He is the bright light beyond all darkness. He is certainly Ātmā, the very indwelling soul who illumines the whole of the universe. I attain him by means of meditation and concentration of intellectual powers.

### अन्वयभाष्यम् ।

असौ विप्रकृष्टः पुरुषः विश्वतः अस्मात् जगतः पूर्वः प्रत्नतमः प्राचीनतमः अनादिसिद्धः पतिः ईशानः विश्वस्य अध्यक्षः परस्मात् दिव्यात् प्रकाशकात् तेजोमयात् सर्वस्मादपि वस्तुनः अधिदैवतात् परः श्रेष्ठतमः परोक्षसिद्धः अस्ति, तथा तमसः अन्धकारमयात् अज्ञानात् अभावात् विकार-विनाशादि भावात् अचेतनाच्च परि उपरि विश्वातीतं ज्योतिः परञ्ज्योतिःस्वरूपः इति भावः, तथा विश्वस्यैव जगतः अस्य द्योतयिता प्रकाशयिता परमः देवतात्मस्वरूपः सर्वान्तरः प्रत्यङ् आत्मा केवलं चेतनः ज्ञान-चैतन्य-ज्योतिस्स्वरूपः अस्ति, तादृशं तमिमं पुरुषं तपसा आन्तर्येण विमर्शेन केवलेन धीभिः तादृशतपस्संशिताभिः विशुद्धसत्त्वाभिः प्रपद्ये आत्मन्येव अपरोक्षतः प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Purusha is the most ancient being. He is the first as well as foremost. He has no beginning. He is the Over-lord of this universe. He is the best of all the things celestial; he is illuminating and effulgent. He is invisible to our senses. He is the light beyond all darkness; the darkness means ignorance, non-existence, destruction, constant change. He is the light par excellence. He illumines all and everything in this universe. He is the most supreme god. He is the inner soul which is pure energy, the energy of light.

### द्वितीया ऋक् ।

असौ दिव्यो विश्वरूपः सन् पुरुषो
दिव्येन ज्योतिषा चक्षुषा प्रतीक्ष्यः ॥
यः सुसन्दृगेव ज्योतिरात्माऽऽन्तर-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ २ ॥

पदपाठः – असौ । दिव्यः । विश्वऽरूपः । सन् । पुरुषः ।
दिव्येन । ज्योतिषा । चक्षुषा । प्रति । ईक्ष्यः ॥
यः । सुऽसन्दृक् । एव । ज्योतिःऽआत्मा । आन्तरः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

This Purusha, the shining and Omnifarious being is capable of being seen by divine eyes full of light. He the luminous one with a penetrating sight is the Indwelling Ātman. I attain him by meditation and deep thought.

### अन्वयभाष्यम् ।

असौ विप्रकृष्टः दिव्यः पुरुषः दिवि मण्डले अन्तः प्रतिष्ठितः आदित्यः तदन्तर्यामी च अलौकिकः भौतिकात् परतरः अधिदैवतसत्त्वः विश्वरूपः स्वेन रूपेण प्रचेतनेन विश्वतो व्याप्तः, सन् सत्स्वरूपः, अत एव दिव्येन तदनुरूपेण तत्साजात्यसत्त्वविशिष्टेन ज्योतिषा ज्योतिस्सत्त्वेन चक्षुषा आन्तर्येण प्रज्ञानेत्रेण प्रति प्रातिलोम्येन प्रत्यङ्मुखेन ईक्ष्यः दर्शनीयः ईक्षितुं योग्यश्च भवति, तदिदं तद्दर्शनस्वरूपम—स एव स्वयं "सुसन्दृक्" इति, सम्यग् द्रष्टा इति द्रष्टृत्वरूपेणैव तद्दर्शनम् न तु दृश्यरूपतयेति भावः। अस्मिन्नर्थे सुस्पष्टार्थकं ऋङ्मन्त्रदर्शनम्—"सुसन्दृशं त्वा वयं प्रति पश्येम सूर्य । विपश्येम नृचक्षसः" ( ऋ. मं. १०-१५८-५ ) इति ॥ तथा च औपनिषदं ब्राह्मणानुवचनम् — "एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" ( प्र. उ. ३-९ ) इति ॥

यः तादृशः सुसन्दृगेव सन् स्वयं सन्द्रष्टा ज्योतिरात्मा चैतन्यज्योतिस्स्वरूप, आन्तरः प्रत्यगात्मा सर्वान्तर्यामी नित्यसिद्धः प्रतितिष्ठति, तं तादृशं पुरुषं धीभिः प्रत्यङ्मुखाभिः दिव्यभावसम्पन्नाभिः तपसा तद्योगेन अन्तःसत्त्वेन विमर्शेन प्रपद्ये अपरोक्षतः तादात्म्येन प्राप्नोमीति ॥

COMMENTARY—SUMMARY TRANSLATION

This divine Purusha dwells in the orb of the sun in the sky. He is beyond the material universe. He is the presiding deity of the universe. He pervades all-round with his energy. He is existence itself. Therefore, it is possible to see him only with divine sight or with the eye of knowledge which consists of light. He is himself a very good seer, and as such he is to be seen as a seer and never merely as an object of sight. Cf. "Oh, Sūrya, may we see you as a good seer. We have only human eyes. Allow us to see you" ( Ṛg. X–158–5 ). Again, "He is the seer; it is he who touches, hears, smells, tastes, thinks, knows and does. He is the Ātmā with extra-ordinary experience" ( Praśna Up. III–9 ). He is a very good seer himself. He is the energy of light. He is the indweller of all, the inner soul.

तृतीया ऋक् ।

यस्यैता अनन्ता भूतयो वितता
रश्मयस्ते ज्योतिष्मन्तः प्रचेतनाः ॥
यस्य शिवाः शान्ताः सन्दृशो मनीषा-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ३ ॥

पदपाठः – यस्य । एताः । अनन्ताः । भूतयः । विऽतताः ।
रश्मयः । ते । ज्योतिष्मन्तः । प्रऽचेतनाः ॥
यस्य । शिवाः । शान्ताः । सम्ऽदृशः । मनीषाः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

Infinite indeed are his glories which have spread all round. Those rays of his are luminous and full of vital energy. His vision is full of benevolance, calmness, and full of insight. I attain him by means of meditation and deep thought.

## अन्वयभाष्यम् ।

यस्य पुरुषस्य वितताः विश्वतः विशेषेण च व्याप्ताः विभूतयः सर्वगुणैश्वर्यादि योग-पूर्णाः सत्त्वमूर्तयः शक्तिस्वरूपाः अनन्ताः असङ्ख्याता अन्तरहिताः कल्पना–भावनाद्यतीताश्च भवन्ति, तद्विभूतियोगसत्त्वोदिताः ज्योतिष्मन्तः ज्योतिःप्रतीकाः ते रश्मयः किरण-रूपाः प्रचेतनाः केवलं प्रज्ञान–चैतन्यसत्त्वाः सन्ति, यस्य च सन्दृशः संविदादिसत्त्वपूर्णाः दृष्टयः शिवाः कल्याणरूपाः शान्ताः आत्मशान्तिरससम्प्लुताः मनीषाः प्रबोधसत्त्वाः सौमनस्येषयित्र्यः भवन्ति, धीभिः तादृशीभिरेव सत्त्वमयीभिः पूर्णात्मना सह संयोगार्हाभिः अन्तरात्मवृत्तिभिः तपसा अन्तर्विमर्शन तं परमं पुरुषं प्रपद्ये तादात्म्येन अपरोक्षतः प्राप्नोमीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Endless are his powers of glory They are full of all virtues and magnificence. They are pervading everywhere. His rays filled with his greatness and light are pure energy. His powers of sight blended with knowledge are auspicious. They are full of the essence of inner peace. Being full of knowledge, they inspire the mind.

## चतुर्थी ऋक् ।

यो विश्वेषां सौमनस्यः प्रियतमो
यो भद्रो भद्रतमो भगवान् भर्गः ॥
यो वा रसो यो रसतमः शन्तम-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ४ ॥

पद्पाठः – यः । विश्वेषां । सौमनस्यः । प्रियऽतमः ।
यः । भद्रः । भद्रऽतमः । भगऽवान् । भर्गः ॥
यः । वा । रसः । यः । रसऽतमः । शम्ऽतमः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He is good-willed to one and all. He is the dearest of all. He is the most auspicious. He is the best of the auspicious. He is a Bhagavān and Bharga the brightest. He is the essence of bliss indeed and the best of bliss. He is beatitude itself. I attain him by means of meditation and deep thinking.

## अन्वयभाष्यम् ।

यः पुरुषः विश्वेषां प्राणभृतां कृते सौमनस्यः सुष्ठुतममानससत्त्वरसमयः दिव्यसौमसत्त्व-पूर्णः अतः एव तादृशसौजन्य-सौमनस्यादिदिव्यसौम्यसत्त्वरसप्रदः, तथा प्रियतमः अत्यन्तं प्रेमरसमयः यश्च भद्रः मङ्गलमयः बलिष्ठः भजनीयश्च भद्रतमः सर्वमाङ्गल्यसत्त्वरसपूर्णः अनन्यशरण्यः, भवति । यः परमः पुरुषः भगवान् सर्वैश्वर्यपूर्णः सर्वसत्त्वगुणादिसम्पन्नः, भर्गः ज्योतिर्मयः विश्वपरिपाकादिशक्तियोगोर्जितो भवति । "भर्गः" इति रुद्रस्य भगवतः विशिष्टं नामधेयम्, प्रसिद्धं च तत् "हरः स्मरहरो भर्गः त्र्यम्बकस्त्रिपुरान्तकः" इति ॥

स च भर्गात्मा रुद्रः सौमनस्यार्थं यजनीयो भवति । "यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य" ( ऋ. मं.१-४२-११ ) इति, "सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रस्तन्महो नमो नमः" ( ना. उ. १३-२ ) इति च ॥

अथवा "भर्गस्" इति नपुंसकं पदं ज्योतिःपरम्, "भर्गो देवस्य धीमहि" ( ऋ. मं ३-६२-१० ) इति तदनुश्रवणम् ॥ "धियो यो नः प्रचोदयात्" ( ऋ. मं. ३-६२-१० ) "आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम" ( ऋ. मं ३-५९-३) "तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम" ( ऋ. मं. ३-५९-४ ) इति च ॥ एवं भद्राय सौमनस्याय च धीप्रेरकस्य तस्य आदित्यान्तःपुरुषस्य भर्गस्समाश्रयणेन तदनुध्यानादिसंविधानदर्शनात् भर्गः परञ्ज्योतिस्स्वरूपो भगवान् परमात्मैव भवितुमर्हतीति प्रतीयते, यः रसः स्वयं रसमयः आनन्दसत्त्वः । "रसो वै सः । रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात् कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति" ( तै. उ. ७ ) इति तदनुश्रवणात् रसशब्दः आनन्दार्थकः इति गम्यते । यः रसतमः परमानन्दरससत्त्वपूर्णः, "एषोऽस्य परम आनन्दः एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" ( बृ. उ. ४-३-१२ ) इति औपनिषदं ब्राह्मणानुवचनम् । एवमेव रसः सः संविन्मयः, रसतमः प्रज्ञानघनः, सर्वज्ञानसारभूतत्वात् । तथा च ब्राह्मणम् "स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघनः, एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" ( बृ. उ. ४-५-१३ ) इति ॥ यश्च शन्तमः अत्यन्तं शान्ति-सुख-माङ्गल्यादिसत्त्वपूर्णो भवति, तं तादृशं पुरुषं तपसा शान्ति-सत्त्वादिरसमयेन धीभिः आनन्दरसलीनाभिः प्रज्ञानसत्त्वमयीभिः प्रपद्ये अपरोक्षतः तादात्म्येन प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

The Purusha is well-inclined to all living beings; he is full of good-will. And again he is full of intense love. He is full of auspiciousness; he is the strongest and most worshipful. He is the only refuge of all, being full of all auspicious things. He is Bhagavān full of all the glories. He is a Bharga,

that is one full of splendorous light. Bharga, as is well-known, is a name of Rudra. Cf. "To secure for ourselves good-will, we worship Rudra" ( Ṛg. V-42-11 ). "All are Rudra" "Purusha is indeed Rudra" ( Nārā. Up. 13-2 ). Thus, Rudra is to be worshipped for securing the good-will of gods. Or the word Bharga, when neuter, means light. Cf. "We meditate on the light of god" ( Ṛg. III-62-10 ). "We observe the vow of Āditya; may we secure the good-will of Mitra ?" ( Ṛg. III-59-3 ). "May we secure the good-will and the auspicious blessings of god" ( Ṛg. III-59-4 ). Bharga is the great divinity of all glories ( Bhagavān ) in the form of the light par excellence.

He is the essence itself: the essence of bliss. Cf. "He is indeed Rasa, the essence. By getting that Rasa, this ( soul ) becomes possessed of the bliss" ( Tai. Up. VII ). The word Rasa also means delight. Rasātmā means full of supreme delight. Cf. "This is his supreme bliss. All the living beings live by getting an iota of this delight" ( Bṛ. Up. IV-3-13 ). Likewise, Rasa means knowledge. So Rasātmā means solid knowledge, the essence of all knowledge. Cf. "Just as a lump of salt is internally as well as externally of the same essence, this Ātmā is throughout the same, he is solid knowledge itself" ( Bṛ. Up. IV-5-13 ). And he is the most auspicious as he is full of peace, delight and light.

## पञ्चमी ऋक् ।

यो विश्वेषां पूरुषाणां परिणेता
सुपथाऽन्तः प्रचेतनः पुरोहितः ॥
गुरूणां यो गुरुतमो यो गरीयाँ-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ५ ॥

पदपाठः – यः । विश्वेषाम् । पुरुषाणाम् । परि । नेता ।
सुऽपथा । अन्तरिति । प्रऽचेतनः पुरःऽहितः ॥
गुरूणाम् । यः । गुरुऽतमः । यः । गरीयान् ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He is the good guide of all persons; he is the leader who leads by a good path and through knowledge which is within oneself. He is the best preceptor of all preceptors who are the revered ones. I attain that Purusha by means of meditation and intense thinking.

## अन्वयभाष्यम् ।

यः पुरुषः विश्वेषां पुरुषाणां देव–मानवादीनां सर्वेषां प्राणिनां परिणेता सञ्चालयिता सामान्यतः अनुग्रहीता स्वचैतन्यसत्त्वप्रदानेन इति भावः, यः पुरोहितः अग्रगामी मार्गदर्शी च भवन् सदसद्विवेकशालिनां मानवानां प्रचेतसा वारुणेन सन्मनःसत्त्वेन अन्तःप्रेरितेन सदसद्विवेकतः सुपथा सन्मार्गेण ऋजुतरेण निष्कण्टकेन परिणेता प्रणयिता परितः गमयिता स्वमभीष्टं परमं पदं प्रति प्रापयिता भवतीति तदर्थः । "परिणेता मतीनां विश्वदेवो अदाभ्यः", "सोमः पुनानश्चम्योर्विशद्धरिः" (ऋ. मं. ९–१०३–४) इति तदनुश्रवणम्, तथा "अग्नेनय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्" (ऋ. मं. १ १८९-१) इति ॥ "ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्" (ऋ. मं. १-९०-१) इति च ॥ इत्यादिभिः मन्त्रैः सन्मार्गेण ऋजुमार्गेण च सा देवतात्मैव प्रार्थ्यते ॥ अत एव यः सन्मार्गदर्शी सर्वेषामपि गुरुः, तथा सर्वेषां गुरूणामपि गुरुतमः श्रेष्ठतमः अग्रपूज्यो भवति इति प्राज्ञैरभिमन्यते, एतेन सर्वेषामपि वेदानां विद्यानामपि सर्वासां संविदां च अमृतत्वान्तानां अधिपतित्वमेव तद्गुरुत्वस्य परमं लक्षणं भवितुमर्हतीति प्रतिज्ञायते, तद्यथा सर्ववेदाधिपतित्वम्—"गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते०" (ऋ. मं. २-२३-१) इति ॥ तथा भगवतो रुद्रस्य सर्वविद्याधीश्वरत्वम्— "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम्" (ना. उ. १७-५) इति ॥ अमृतत्वाधिपतित्वं परमपुरुषस्य अनुश्रूयते— "उतामृतत्वस्येशानः" (ऋ. मं. १०-९०-२) इति, "उतामृतत्वस्येश्वरः" (अथर्व सं. १९) इति च ॥ तस्यैव पुरुषस्य तस्मादेवकारणात् परमगुरुत्वं विश्वस्यापि जगतः इति उपदिष्टम् । "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः । स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्" (यो. सू. १-२४-२५) इति ॥ अतः एव यः गरीयान् परमः पूज्यः सर्वहिततमः, ब्रह्मविद्यादिप्रदानेन सर्वानुग्राहकत्वात्, "उत्पादक–ब्रह्मदात्रोः गरीयान् ब्रह्मदः पिता" (मनु. स्मृ. २) इति ॥ "त्वमेव पूज्यश्च गुरुर्गरीयान्" (गी. ११) इति च तदनुस्मरणात् ॥ अत एव यः प्रत्यक्षसिद्धो गुरुस्वरूपः इत्युक्तं भवति ॥

"गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

इति च सुप्रसिद्धं वचनं सर्वेषां विदुषामभिमतमेव, अस्मिन् अर्थे औपनिषदं दर्शनमपि भवति, "तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः" (छां. उ. ७-२६-२) इति ॥ "त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति" (प्र. उ. ६-८) इति च तदनुश्रवणम् ॥ तं तादृशं परमं पुरुषं धीभिः तादृशगुरु-

भावादिसुविनीतादिभिः परमश्रद्धामयीभिः तपसा त्रिकरणयोगादिचरितेन गुरुशुश्रूषादिना प्रतप्तेन शुद्धसत्त्वेन प्रपद्ये शरणं प्राप्नोमि सर्वस्वभावेन इति ॥

## COMMENTARY—SUMMARY TRANSLATION

The Purusha is the guide of all people, of all living beings including immortals and mortals. He is the leader, who goes first indicating the road as it were, to all men who are blessed with the power of discrimination, and leads all men by a path which is the best, which is straight and not thorny. He is the one who takes all to the supreme place desired by all. Cf. " He is the leader of all minds. He is the god of all gods He is Soma, the purifier and attracts all the living beings " ( Ṛg. IX–103-4 ).Again, " Agni, lead us by good paths. Oh ! god, you possess all the knowledge " ( Ṛg. I–189–1 ). " May Varuṇa and Mitra, the learned ones, lead us along the straight path " ( Ṛg. I–90–1 ). So, he who shows the good path is the preceptor of all. He is the preceptor of preceptors. He deserves to be worshipped first. Cf " Īśvara is a unique Purusha, untouched by misery, by action and its result and by the weaknesses of the body. He is the preceptor of the ancients also, being beyond time" ( Patañjali Yoga Sūtra 1-24 & 25 ). So, the best of preceptorship is ascribed to him, that is to Purusha. So, he is the master of all learning. Cf. " Īśāna, the ruler of all learning: the lord of all beings ". ( Nār. Up ). He is the most worshipped and the greatest well–wisher. Cf. " Between the father who gives us body and the giver of the knowledge of Brahma, the latter is the greater " ( Manu 2 ). " You are certainly the worshipful one and the guide " (Gīta 11). It is therefore evident that Purusha is the guide and the preceptor. Cf. " Bhagavān Sanatkumāra takes him beyond darkness that is ignorance, him whose impurities of heart have been cleansed " ( Chhānd. Up. VII–26–2 ); " You are eertainly our father who took us across to the other shore of ignorance " ( Praśna VI- 8 ).

### षष्ठी ऋक् ।

पुरुषोऽसौ ब्रह्मणस्पतिर्विश्ववेदा
ऋचां यजुषां साम्नां छन्दसामृषिः ॥
यो विश्वेषाꣳ ऋषीणाꣳ ऋषितम-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ६ ॥

पदपाठः – पुरुषः । असौ । ब्रह्मणः । पतिः । विश्वऽवेदाः ।
ऋचाम् । यजुषाम् । साम्नाम् । छन्दसाम् । ऋषिः ॥

यः । विश्वेषाम् । ऋषीणाम् । ऋषिऽतमः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

This Purusha is Brahmaṇaspati, the lord of the power of speech and omniscient. He is the seer of Ṛk, Yajus and Sāma mantrs. He is indeed the only seer and the best of all the seers. I attain him, by means of meditation and deep thought.

## अन्वयभाष्यम् ।

असौ दिव्यः पुरुषः ब्रह्मणः वाक्सत्त्वस्य अधिपतिः विश्ववेदाः सर्वज्ञः सर्ववेदसत्त्व-पूर्णः, तस्मात् ऋग्-यजुः-सामसञ्ज्ञाभिः प्रसिद्धानां छन्दसां वेदानां गायत्रादीनां च सर्वेषां ऋषिः द्रष्टा दर्शयिता च स्वयमेव अस्ति, यः एकर्षिः प्रधानः विश्वसन्द्रष्टा अत एव एकर्षिनाम्नाऽपि वेदे प्रसिद्धः, " पूषन् एकर्ष यम सूर्य० " ( ई. उ. १६ ), " स्वयं जुह्वत एकर्षि श्रद्धयन्तः " ( मुं. उ. ३-२-१० ) इति च तदनुश्रवणम् ॥

यः ऋषीणां सर्वेषामपि मन्त्रद्रष्टॄणां द्रष्टृतमः ऋषिश्रेष्ठः, " तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे छन्दांसि जज्ञिरे । तस्माद् यजुस्तस्मादजायत " ( ऋ. मं. १०-९०-९) इति तदनुश्रवणम् । "य इमा विश्वा भुवनानि जुह्वद् ऋषिर्होता न्यसीदत् पिता नः" ( ऋ.मं. १०-८१-१ ) इति च ॥ अथवा ऋषिशब्दः प्राणवाचकः श्रूयते, " तस्यासत ऋषयः सप्ततीरे इति प्राणावा ऋषयः प्राणानेवैतदाह " ( बृ. उ. २-२-३ ) इति च ॥ " सप्तर्षयः प्रतिहिता शरीरे " इति च ॥ " सप्त वै शीर्षण्याः प्राणाः " इति स्पष्टोऽर्थः, एतेन एकर्षिः मुख्यः प्राणः, सोऽयमेव ऋषितमः चेतनात्मस्वरूपः इति च अर्थः सम्पद्यते । तं तादृशं पुरुषं धीभिः छन्दोनिरताभिः प्राणमयीभिः तपसा तद्योगेन सत्यमन्त्राचरितेन अन्त-र्विमर्शन संयमेन च प्रपद्ये अपरोक्षतः प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

This is Purusha, the lord Brahma, the lord of Vāk. He is omniscient. So, he is the seer and one who reveals the Vedas, which are known as Ṛk, Yajus and Sāma in the metres Gāyatrī and others. He is the most important seer of the universe and so, he is celebrated in the Vedas as the only seer. Cf. " Oh ! Purusha, who are the only seer ( Ekarshi ) " ( Īśa. 16 ). "Brahma is to be taught to those who perform sacrifices and who have full faith in the only seer ( Ekarshi )." ( Muṇḍ. Up. III-2-10 ). He is the best of the seers, or the word Ṛshi is also used in the sense of Prāṇa, as in " By its banks the seven Ṛshis had their abodes ". Prāṇas are, indeed, the Ṛshis. The statement means here the Purusha only" ( Bṛ. Up. II-2-3 ). Thus, by the word ' Ekarshi ' the Chief vital air ( Mukhya Prāṇa ) is meant. He is the best seer, as he is the very essence of energy.

## सप्तमी ऋक् ।

यो भूतानां विधृत्यै विश्वेषां वाग्भि -

र्भूर्भुवः स्व१र्नि दधे त्रीणि पदानि ॥

विश्वेषु यो भूतेषु पदं तुरीयं

तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ७ ॥

पदपाठः – यः । भूतानाम् । विऽधृत्यै । विश्वेषाम् । वाग्भिः ।

भूः । भुवः । स्व१रिति स्वः । नि । दधे । त्रीणि । पदानि ॥

विश्वेषु । यः । भूतेषु । पदम् । तुरीयम् ।

तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

For the dwelling and support of all beings he created with the help of his Vāk the three abodes, Bhūḥ, Bhuvaḥ and Svaḥ. He has placed in the inmost heart of all beings, the fourth foot, that is the Turīya or the spirit. I attain that Purusha by means of meditation and deep thought.

## अन्वयभाष्यम् ।

यः पुरुषः भूतानां विश्वेषां अचेतनानां तथा सचेतनानां च स्थावराणां जङ्गमानां च प्राणिजातानां विधृत्यै सन्धारणार्थं वाग्भिः स्वकीयवाक्छक्तिभिः विश्ववाचकाभिः "भूः भुवः स्वः" इति त्रीणि पदानि निदधे कल्पयामास, तथा यः विश्वेषु भूतेषु अन्तः स्वं तुरीयं चैतन्यमयं पदं स्थापयामास, तं परमं पुरुषं तपसा तदनुरूपेण सयमेन धीभिः धीयोगेन प्राप्नोमीति ॥ अत्र "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" (ऋ. मं. १०-९०-३) इत्यनेन सः चतुष्पात् पुरुषः स्तूयते, तानि चत्वारि पदानि तस्य अन्यत्रापि श्रूयन्ते, "इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम्" (ऋ. मं. १-२२-१८) इति ॥ अत्र त्रयाणां पदानां निर्देशः, तद् भुवनत्रयमेव पदत्रयमिति, "तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः" (ऋ. मं. १-२२-२०) इति च ॥ तत् परमं पदमेव तुरीयं पदमिति सम्पद्यते, वाग्भिः सह स्थापितत्वात् वाचो देव्या अपि तानि चत्वारि पदानि समानान्येव भवन्ति ॥ "चत्वारि वाक् परिमिता पदानि" (ऋ. मं. १-१६४-४५) इति तदनुश्रवणं, एतेन तयोः वाक्-पुरुषयोरेकरूपता अवगम्यते इति ॥

COMMENTARY—SUMMARY TRANSLATION

To hold and support all the beings, the inert and the living ones, the immobile, and the mobile, he created with his powers of speech all the three

worlds, Bhū, Bhuvaḥ and Svaḥ. Likewise, inside of all the beings he placed his fourth foot in the form of pure conscious energy. Cf. " All these beings are only one-fourth of his being; the other three parts which are immortal are in the sky " ( Ṛg. X-90-3 ). This Ṛk speaks of Purusha with four feet or four parts. And the ' four feet ' of his are also spoken of elsewhere. Cf. " Vishṇu strode this universe and he took three steps " ( Ṛg. I-22-18 ). This is a reference to his three steps or feet. " The wise see always that supreme abode of Vishṇu " ( Ṛg. I-22-20). That supreme abode of Vishṇu is the fourth foot or Turīya. The four steps were taken with the help of Vāk and so Vāk is also said to have four feet. Cf. " The Vāk has four feet " ( Ṛg. I-164-45 ).

## अष्टमी ऋक् ।

अग्निनेन्द्रेण सवित्राऽऽत्मना
यो अन्तः पृथिव्यामन्तरिक्षे दिवि ॥
ज्योतिंष्पदानि नि दधे भूयस्त्रीणि
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ८ ॥

पदपाठः – अग्निना । इन्द्रेण । सवित्रा । आत्मना ।
यः । अन्तरिति । पृथिव्याम् । अन्तरिक्षे । दिवि ॥
ज्योतिंष्पदानि । नि । दधे । भूयः । त्रीणि ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He placed on the earth, in mid-air and in the sky, his own three feet which are refulgent in the form of Agni, Indra and Savitā. I attain the Purusha, by meditation and the intense use of mental faculties.

## अन्वयभाष्यम् ।

यः पुरुषः आत्मना चैतन्यज्योतिःस्वरूपेण अग्निना पृथिव्यां अस्मिन् लोके, इन्द्रेण वैद्युतेन अन्तरिक्षे मध्यमे लोके सवित्रा दिव्येन दिवि अमुष्मिन् उत्तमे लोके च एतानि ज्योतिष्पदानि अधिदैवतसत्त्वानि त्रीणि पदानि भूयः पुनः निदधे स्थापयामास, तं तादृशं पुरुषं धीभिः ज्योतिस्त्रयात्मकदेवतानिरताभिः तपसा तदनुसन्धानेन यज्ञेन धीयोगेन च प्रपद्य प्राप्नोमीति ॥

COMMENTARY—SUMMARY TRANSLATION

The Purusha, with his energy in the form of light, placed his three feet in the form of Agni. On this earth, in the form of Indra or lightning in mid-air, and in the form of the sun or Savitā in the sky.

## नवमी ऋक् ।

यो भूतैर्ज्योतिषाऽद्भिर्भूम्या च त्रिभि-
स्त्रिवृतोऽस्य विसृष्ट्यै विश्वस्य भूयः ॥
त्रीणि पदानि नि दधे ता त्रिवृतानि
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ९ ॥

पदपाठः – यः । भूतैः । ज्योतिषा । अत्ऽभिः । भूम्या । च । त्रिऽभिः ।
त्रिऽवृतः । अस्य । विऽसृष्ट्यै । विश्वस्य । भूयः ॥
त्रीणि । पदानि । नि । दधे । ता । त्रिऽवृतानि ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He planted his three feet in the form of the three elements, light, water and air made triple or threefold in order to create this universe. I attain that Purusha by means of meditation and deep thought.

## अन्वयभाष्यम् ।

यः पुरुषः " ज्योतिः आपः भूमिः " इति एतैः त्रिभिः भूतैः त्रिवृतः त्रिगुणीभूतस्य अस्य प्रत्यक्षसिद्धस्य विश्वस्य सर्वस्य जगतः विसृष्ट्यै प्रादुर्भावार्थं ता तानि त्रिवृतानि प्रत्येकशः त्रिगुणीकृतानि त्रीणि भूतत्रितयात्मकानि पदानि निदधे कल्पयामास, तानि एतानि त्रिवृतानि सम्भावयामास, एतानि त्रिवृदितानि भूतानि निर्ममे, तं तादृशं पुरुषं परं दिव्यं चेतनात्मानं त्रिवृतेन त्रिवृत्करणकृत्स्नेन धीयोगेन तपसा भूतत्रयसामरस्यविज्ञानेन तथा तदुदितेन एकीभावेन तद्भूतत्रयाधिष्ठानभूतं मूलं पुरुषं प्राप्नोमीति ॥

COMMENTARY—SUMMARY TRANSLATION

To create this universe which consists of the three elements, light, water and earth, he planted his three feet each one of them being tripled. This process of permutation and combination is called Trivṛtkaraṇa in the Upanishads. It is thus that varieties of names and forms are created.

## दशमी ऋक् ।

यो ज्योतिषाऽद्भिर्भूम्याऽन्नेन रेतसा
तनूभृतः सञ्जजान विश्वाः प्रजाः ॥
चित्तिभिस्ताः सुचेतनाश्चक्रे भूय-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १० ॥

पदपाठः – यः । ज्योतिषा । अत्ऽभिः । भूम्या । अन्नेन । रेतसा ।
तनूऽभृतः । सम् । जजान । विश्वाः । प्रऽजाः ॥
चित्तिऽभिः । ताः । सुऽचेतनाः । चक्रे । भूयः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

He who is of the nature of spirit, created in abundance all the living beings who have bodies, by means of three elements, light, water, earth; he provided food and senses, invested them with vital energies; he energised them. I attain that Purusha by means of meditation and deep thought.

## अन्वयभाष्यम् ।

यः पुरुषः चेतनात्मा ज्योतिषा अद्भिः भूम्या च इत्येतैः त्रिभिः भूतैः तथा तदेतद्भूतत्रयसत्त्वोदितेन त्रिवृता अन्नेन तत्सारभूतेन रेतसा च इत्येतैः पञ्चभिः आवश्यकैः वस्तुसत्त्वैः तनूभृतः सशरीराः इमाः सर्वाः प्रजाः अभितः अजनयत् आभिमुख्येन प्रत्यक्षाः जनयामास, तथा ततश्च चित्तिभिः निजचेतनाशक्तिभिः ताः इमाः स्वीयाः प्रजाः सुचेतनाः सञ्चेतनाः सम्भावयामास, तं तादृशं पुरुष धीभिः सचेतनाभिः त्रिवृदिताभिः त्रितत्त्वसत्त्वसंहिताभिः तपसा सत्त्वसंशितेन आन्तयण संयमेन प्रपद्ये अपरोक्षतः प्राप्नोमीति ॥

COMMENTARY—SUMMARY TRANSLATION

With the help of the three elements of light, water and earth and with the help of food which was produced by triplicating them, and with the help of the senses which are the essence of good ( in all five ingredients go to make a living thing ), he created all these sentient living beings who possess bodies. Then by means of his energy, he endowed all with energy.

## एकादशी ऋक् ।

अग्निनेन्द्रेण सवित्राऽऽत्मना तेजसा-
ऽद्भिरन्नैर्वाचा प्राणेन मनसा चित्त्या ॥

चत्वारि ता पदान्यात्मन् यो दधेऽन्त-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ ११ ॥

पदपाठः – अग्निना । इन्द्रेण । सवित्रा । आत्मना । तेजसा ।
अत्ऽभिः । अन्नैः । वाचा । प्राणेन । मनसा । चित्त्या ॥
चत्वारि । ता । पदानि । आत्मन् । यः । दधे । अन्तरिति ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

With the help of the gods, Agni, Indra, Savitā and Ātmā and in the form of light, waters, food and speech, as also vital airs, mind and conscious energy he planted his four feet in the soul of beings. I attain the Purusha by means of meditation and thought power.

## अन्वयभाष्यम् ।

भौमेन अग्निना अधिदैवतेन, तेजसा अधिभूतेन वाचा तेजोमय्या अध्यात्मसत्त्वया, तथा अन्तरिक्षेण इन्द्रेण दैवतेन, अद्भिः भौतिकाभिः रसमयीभिः प्राणसत्त्वाभिः, तथा आपोमयैः प्राणैः अध्यात्मकैः, सवित्रा दिव्येन अन्नैः भौतिकैः मनःसत्त्वैः, मनसा अन्नमयेन अध्यात्मकेन भावनासत्त्वेन, एवं त्रिवृदितैः त्रिभिः धातुसत्त्वैः प्रत्येकशः त्रिवृत्कृतैः सह आत्मना-चिता चेतनया तुरीयया यः सर्वेषां प्राणभृतां शरीरिणां अन्तः आत्मन् आत्मनि शारीरके जीवात्मनि ता तानि चत्वारि पदानि दधे स्थापयामास, धीभिः ताभिरेव एताभिः त्रिकरणात्मिकाभिः वाक्–प्राण–मनोरूपाभिः सचेतनाभिः त्रिवृदिताभिः सह समुदितेन धीयोगेन तपसा वाक्–प्राण–मनःसंयमेन तत्संशितेन शुद्धसत्त्वेन तं परमं पुरुषं अपरोक्षतः प्राप्नोमि साक्षात्करोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

He planted his four feet in the inner heart of all beings with the help of Agni of this earth, who is the presiding deity ( Adhidaiva ), with the help of light which is elemental ( Adhibhūta ), with the help of Vāk, which is full of light (Adhyātma), then again with the help of Indra of mid-air (Adhidaiva), with the help of waters ( Adhibhūta ), with the help of Prāṇa, full of liquids ( Adhyātma ); then again with the help of Savitā the celestial one ( Adhidaiva ), with the help of food composed of the elements ( Adhibhūta ), with the help of Manas - which is born of food ( Adhyātma ); with the help of these supporting elements made triple, and with the help of the soul full of

energy which is the fourth foot. He placed his four feet within the inner heart of all possessing bodies and intellects, as well as powers of speech, vital airs and mind.

## द्वादशी ऋक् ।

वैश्वानरोऽयं पुरुषोऽन्तः प्रथम-
स्तेजसाऽऽत्माऽपरः प्रज्ञाताऽऽन्तमः ॥
यः प्रचेतनः प्रत्यङ्ङति तुरीय-
स्तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १२ ॥

पदपाठः – वैश्वानरः । पुरुषः । यः । प्रथमः ।
तेजसा । आत्मा । अपरः । प्रऽज्ञाता । आऽअन्तमः ॥
यः । प्रऽचेतनः । प्रत्यङ् । अति । तुरीयः ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

This inner Purusha is the first known as Vaiśvânara. Tejas is the second. The third is Prajña who is the innermost. The fourth is pure conscious energy dwelling in the deepest recesses of all and different from and transcending all these three. I attain that Purusha by means of meditation and concentrated thought.

## अन्वयभाष्यम् ।

यः अयं अन्तरात्मा वैश्वानरः स्थूलशरीराभिमानी प्रथमः पूरुषः, तेजसा आत्मा तेजःशरीरः तैजसाभिधानः अपरः द्वितीयः, प्रज्ञः प्रज्ञानसत्त्वः परः अन्तरः आन्तरतरः प्राज्ञसञ्ज्ञकः तृतीयः, ते एते त्रयः पूरुषाः जागृति–स्वप्न–सुषुप्तिरूपावस्थात्रयसाक्षिणः, यः प्रचेतनः केवलं चेतनः प्रत्यङ् आन्तरतमः अति शरीरत्रयं अवस्थात्रयं च अतीतः तुरीयः तुरीयपदाभिधः, स एव अतितुरीयोऽपि तुरीयातीतो भवति अमात्रः इति यावत्, तं पुरुषं सर्वान्तर्यामिणं धीभिः तदेकानुसन्धानपराभिः तस्मिन् प्रलीनाभिः तपसा केवलेन विमर्शेन प्रपद्ये अपरोक्षतः तादात्म्येन प्राप्नोमीति । तदिदं तत्त्वं माण्डूक्योपनिषदि विस्तरशः प्रतिपादितं सर्वमपि अनुसन्धेयम् ॥

## COMMENTARY—SUMMARY TRANSLATION

This Purusha in this body is Vaiśvânara. He presides over the physical body. He is the first. The second who has a body of light is known as Tejas.

The third with a body consisting of knowledge is known as Prajña, and is still deeper. These three 'persons' are so named as they are the lords of the three states of wakefulness, dream and sleep. Prachetana is different from all these and transcends them. His name is Turiya. Though called Turiya, he transcends Turiya also, as he is beyond measure and reach. That Purusha, known as such, is the inner soul of all. Refer to Māṇḍūkyopanishad, for fuller treatment of this subject.

## त्रयोदशी ऋक् ।

पूरुषो यः पञ्च जनान् सञ्जजान
तान् प्रति विष्टः पाञ्चजन्यो बभूव ॥
यस्याङ्गानि पञ्चजना विश्वे इमे
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १३ ॥

पदपाठः – पुरुषः । यः । पञ्च । जनान् । सम् । जजान ।
तान् । प्रति । विष्टः । पाञ्चऽजन्यः । बभूव ॥
यस्य । अङ्गानि । पञ्च । जनाः । विश्वे । इमे ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

The Purusha, indeed, created the Pañchajana (sentient beings). He entered them and himself became Pāñchajanya. His five limbs are all these Pañchajana I attain that Purusha, with the help of meditation and by the full use of mental powers.

## अन्वयभाष्यम् ।

यः परमः पुरुषः पञ्च पञ्चविधान् जनान् त्रिवृत्कृतैः त्रिभिः तेजोऽबन्नैः सचेतनान् प्राणिवर्गान् सञ्जजान उत्पादयामास तद्रूपेण स्वयमाविर्बभूव, अथवा पञ्चजनाः इति, मनुष्यनाम पञ्चभ्यो जायन्ते इति, पञ्चभिर्वा आकाशादिभिः भूतैः, तथा ज्योतिर्जलभूमि-अन्नरेतःसत्त्वैः प्रजाताः इति च, तत्रापि द्यु-पर्जन्य-पृथिवी-पुरुष-योषितृस्वरूपेभ्यः – श्रद्धा-सोम-वर्ष-अन्न रेतःसत्त्वानां पञ्चभ्यः आहुतिभ्यः प्रजाताः पुरुषरूपाः सचेतनाः प्रज्ञाः पञ्चजनाः इति प्रसिद्धाः मनुष्यनामानः, "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" (छां॰ उ. ५ ९-१) (बृ. उ॰ ६-२-९-१३) इति तदनुश्रवणम् ॥ तदेतत् पञ्चाग्निविद्यातत्त्वं ब्रह्ममीमांसायां निर्णीतम्, तदिह अनुसन्धेयम् ।

यास्कस्तु पञ्चजनशब्दस्य उभयविधं अर्थं दर्शयामास, "गन्धर्वाः पितरो देवाः

असुराः रक्षांसीत्येके, चत्वारो वर्णाः निषादः पञ्चमः इत्यौपमन्यवः" (नि. ३-८-१) इति ॥ यश्च—तानिमान् पञ्चजनान् पुनः स्वस्मात् आविर्भूतान् प्रतिविष्टः चेतनात्मस्वरूपेण आविष्टः सन् पाञ्चजन्यः इति एतन्नाम्ना स्वरूपेण च बभूव स्वतःसिद्धः प्रसिद्धिं जगौ, अत एव यस्य पुरुषस्य त इमे पञ्चजना एव पञ्च अङ्गानि अवयवात्मकानि अधिप्रजतत्त्वेन प्रतिकॢप्तानि भवन्ति, तं तादृशं पुरुषं धीभिः तदनुगताभिः तथा पञ्चतत्त्व विशिष्टाभिः तपसा तद्योगेन पाञ्चजन्यतत्त्वपूर्णस्य पुरुषस्य विमर्शेन प्रपद्ये अपरोक्षतः प्राप्नोमीति ॥

अत्र तदेतत् पुरुषशब्दार्थनिर्वचने प्रधानं लिङ्गम्,—"तान् प्रतिविष्टः पाञ्चजन्यो बभूव" इति, एतस्मिन्नर्थे सुस्पष्टार्थो मन्त्रवर्णो भवति, "पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः। पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्" (बृ. उ. २-५-१८) इति, उदाहृतोऽयं मधुविद्यायाम् ॥ तस्येदं औपनिषदं ब्राह्मणानुवचनम्,—"स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किञ्चनानावृतम्, नैनेन किञ्चनानावृतम्" इति ॥

"वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" (ना. उ. १०-४) इति ॥

तदेतदेव तस्य पुरुषस्य पुरुषत्वम् यत् स्वतः पूर्णत्वम्, सर्वतः पूर्णत्वं चेति, तत्र उदाहृत एव ऋङ्मन्त्रवर्णः, "गोषा इन्दो नृषा अस्य श्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः" (ऋ. मं. ९-२ १०) इति ॥ ततोऽपि विशिष्टार्थकं ऋङ्मन्त्रवर्णान्तरं सुप्रसिद्धम्—"हंसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद् वरसद् ऋतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्" (ऋ. मं. ४-४०-५) इति ॥

तस्य निर्वचनोपबृंहितं ब्राह्मणानुवचनम्—"वरसदित्येष वै वरसद् वरं वा एतत् सद्मनां यस्मिन् एष आसन्नस्तपति" (ऐ.ब्रा.) इति ॥ अत्र "आसीदति" इत्यर्थः शुचिषत् इत्यादिषु सर्वत्रापि सिद्धः, तेन पुरुषु बहुषु आसन्नः पुरुषः इत्यर्थः सम्पद्यते ॥ अत्र त एते पञ्चजनाः पञ्चभिर्जायन्ते पञ्चभ्यो जन्यन्ते इति अर्थात् पुरुषु प्रवेशात् प्रादुर्भवन्ति इति च सङ्केतोदिते तात्त्विकेऽर्थे किञ्चिद् वैदिकं रहस्यं प्रतीयते, तस्य परमपुरुषस्य प्रज्ञानादिसत्त्वेभ्यः वाक्-प्राण-मनः-श्रोत्र-नेत्रप्रभृतिभ्यः दिव्येभ्यः करणेभ्यः प्रादुर्भूतानां अग्नि-वायु-सोम-दिक्-सूर्य-प्रभृतीनां पुरुषसत्त्वानां प्रधानानां पञ्चानां देवतात्मनां सशरीरेषु बहुषु पुरुषेषु प्रवेशात् पञ्चजनसञ्ज्ञा मनुष्याणां तात्त्विकार्थप्रयुक्ता इति वैदिकं मन्त्रहृदयम्, "चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत" (ऋ. मं. १०-९०-१३) "दिशः श्रोत्रात्" (ऋ. मं. १०-९०-४) इति च ॥ एवं पञ्चानां पुरुषावयवानां निर्देशात् पञ्चभिश्च तद्दैवतैः विशिष्टाः तेभ्यः प्रजाताश्च "पञ्चजनाः" वेदसङ्केतः तदार्षयदर्शनाङ्कितः, तत्र क्रमेण मनःप्रभृतीनां तेषां "सोमः सूर्यः (इन्द्रः-अग्निः) इन्द्राग्नी वायुः दिशः" इति ते पञ्चदेवतात्मानः प्रसिद्धाः,

तेषां च आध्यात्मकसत्त्वपराणि पञ्चकरणानि च प्रसिद्धानि, सर्वेषामपि अन्तर्हितानि अपरोक्षाण्येव भवन्ति, "मनः, चक्षुः, वाक् (मुखं), प्राणः, श्रोत्रं" चेति ॥ तथा तेषां अग्न्यादीनां पुरुषे अस्मिन् अन्तःप्रवेशादपि तेषु उपस्थितेश्च पुरुषत्वं प्रतीयते, "अग्निर्वाग्भूत्वा मुखं प्राविशत्" (ऐ. उ. २-४) इत्यादि वचनमेव तदुपोद्बलकम् । एतेषां समष्ट्या प्राणसञ्ज्ञाऽपि श्रूयते, "ते वा एते प्राणा इत्येवाख्यायन्ते न वाचो न चक्षूंषि न मनांसीति" इति ॥

प्राणापानादयस्तेऽपि पञ्चप्रसिद्धाः तेषां पुरुषे अस्मिन् अन्तः प्रतिष्ठितानामपि ब्रह्मपुरुषसञ्ज्ञया उपदेशः श्रूयते, "ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः" (छां. उ. ३-१३-६) इति । पञ्चानां तेषां अदितिरूपत्वेन अखण्डात्मना श्रूयते पञ्चजनानाम् "विश्वे देवा अदितिः पञ्चजनाः" (ऋ. मं. १-८९-१०) इति ॥ तथा पञ्चसत्त्वात्मिका इयं मानवी प्रजा पाञ्चजन्या श्रूयते ॥ "यत् पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत" (ऋ. मं. ८-६३-७) इति ॥ अत्र पञ्च धीन्द्रिय-तद्देवता-सत्त्वसम्पन्नया प्रजया इन्द्रे ईश्वरे यत् स्तुतिरूपाः उद्घोषाः क्रियन्ते इति सर्वत्रापि पञ्चानां योगः उपदिष्टोऽनुश्रूयते ॥

## COMMENTARY—SUMMARY TRANSLATION

He, the supreme Purusha, created Pañchajana, fully conscious human beings, with the help of elements in permutation and combination.

Pañchajana is the name of human beings. They are born from the five elements. They are born from the combination of light, water, earth, food and seed ( semen ); They were born of five oblations as it were of sky, rain, earth, male and female; they are virtually Śraddhā-faith, Soma-nutritive force, Varshā-rain, Anna-food and Retas-seed. They are thus known as the elements which were invested with consciousness. " Thus the waters of the sky become known as a person when they reach ( the stage of semen ) the fifth oblation." ( Chhān. V-9-1 ) and ( Bṛh. VI-2-9 to 13 ).

This is the principle involved in Pañchāgni Vidyā and it is discussed in Brahma Mīmāmsā ( written by Vāsishtha Gaṇapati Muni ).

Yāska refers to this matter and describes it : " Some hold that these Pañchajanas are, Gandharvas, Pitṛs, Devas, Asuras, and Rākshasas. Aupamanyus hold that Pañchajanas are the four castes, i.e., Brāhmaṇa, Kshatriya, Vaiśya, Śūdra and the fifth is Nishādas ( Nirukta III-8-1 ). Thus he refers to the two meanings of the word Pañchajana.

He, the Purusha, entered into those Pañchajanas, whom he himself had created, with the help of consciousness and became Pāñchajanya. He assumed a corresponding form.

His five limbs are these Pañchajana.

In deriving the word Purusha, the statement, " He entered into them and became Pāñchajanya " is to be noted. It is so expressly stated in a mantra. Cf. " He created living bodies with two legs and four legs as his abode. Then with conscious energy, he entered the cities ( Pura ) in the form of bodies and so he is called Purusha. " This is quoted in Madhu-Vidyā ( Bṛ.. Up. II-5-18 ). See again, " Indeed it is this Purusha who entered all ' cities ' and became Puri-Śayaḥ ( i.e. he who dwells in cities ). There is nothing that is not covered or occupied by him."

" In the sky is one who stands firm like a tree. All this is full of that Purusha " ( Nārā. Up. 10-4 ). Thus, he is perfection itself and is all-pervasive; this is the characteristic of Purusha.

There is another well-known Ṛk, which illustrates this point better. " As Haṁsa-the sun-he dwells in the sky full of light. As Vasu—the air—in mid-air. As Hotā, in the altar—the earth, as a guest in the house. He is in man in the form of Truth and right action" ( Ṛg. IV-40-5 ) Aitareya Brāhmaṇa further elaborates this derivation— " This Sun is the Varasad, i e., he who resides in the best of the houses; the house where he dwells and burns as Agni, is the best " Here Āsannaḥ means Āsīdati. In Śuchishad and other words, it means that he is everywhere. " He is Purusha because he dwells in many Purus or places. "

In the statements, " They, that is, persons are born from the five elements ( Pañchabhirjāyante ) and " they manifest themselves by entering the bodies." there is a Vedic secret conveyed and indicated by the symbols Vāk, Prāṇa, Manas, Śrotra and Netra. They are the divine instruments of the Parama Purusha. From them were born Agni, Vāyu, Soma, Dik and Sūrya, in the form of the five gods. By their entry into the bodies, the human beings came to be known as Pañchajanas. This is the sense conveyed by the Vedic texts. Cf. " Chandramā was born from mind, Sūrya from the eye, Indra and Agni were born from the face and Vāyu from Prāṇa ( of the Purusha )" ( Ṛg. X-90-13 ). " Directions ( were born ) from the ears ( of the Purusha )" ( Ṛg. X-90-14 ). From the reference here to the five gods born from the Purusha, the inference is that the Pañchajanas were born from those gods. This is the secret contained in the Veda. " Soma, Sūrya, Indrāgnī, Vāyu and Dik " are the five gods who preside over the five well known senses, mind, eye, face ( Vāk ), breath or nose, and ear. These gods, viz., Soma and others enter into the human beings confirming his ( man's ) Purushatva. Cf " Agni became Vāk and entered ( his ) face " etc ( Aitareya Up II-4 ). These ( five gods ) are known collectively as Prāṇa also. Cf. " These are said to be Prāṇas. "

The division of Prāṇa into Prāṇa, Apāna and others is well known and they are referred to as Brahma Purushas also in the Chhāndogya ( III-13-6 ).

One statement says: " The Pañchajanas, that is, all human beings and gods are from Aditi " ( Ṛg. I–89–10 ); this confirms that they are all from the infinite power and are indivisible. Thus human progeny is one with the five forms of energy referred to and its existence is inseparable from the primeval Purusha.

" The progeny of Pañchajana invoked Indra" ( Ṛg. VIII-63-7 ). The great invocatory voice of the people in the form of praise to Indra, is heard on all sides. They are endowed with internal senses and they praise the presiding deities.

## चतुर्दशी ऋक् ।

पुरुषोऽसौ छन्दसाऽऽत्मा प्रति वाच-
मृचो यजूंषि सामानि च च्छन्दांसि ॥
छन्दस्पदानि दधे छन्दस्सु चित्ती
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १४ ॥

पदपाठः – पुरुषः । असौ । छन्दसा । आत्मा । प्रति । वाचम् ।
ऋचः । यजूंषि । सामानि । च । छन्दांसि ॥
छन्दःऽपदानि । दधे । छन्दःऽसु । चित्ती ।
तपसा । धीभिः । पुरुषम् । तम् । प्र । पद्ये ॥

This Purusha is the Ātmā with the power of producing the Vedic metres. With the help of Vāk, he had had the vision of the Ṛgveda, Yajus and Sāma Vedas. He planted his feet as it were in the form of metres in the Vedic Mantras. I attain that Purusha by means of meditation and intense use of the mental powers.

## अन्वयभाष्यम् ।

असौ दिव्यःपरः पुरुषः छन्दसा छन्दस्सत्त्वेन संहितः सन् आत्मा छन्दोमयः पुरुषः छन्दःशरीरः सम्पन्नः इति यावत्,—" स वा अयमात्मा वाङ्मयो मनोमयः चक्षुर्मयः श्रोत्रमयः छन्दोमयः पुरुषः " ( ऐ. आ. ) इति स्पष्टार्थकं तदनुश्रवणम् । सः वाचं निजां स्वानुरूपां स्वानुगुण्यां छन्दस्वतीं प्रतिपन्नः सन्- ऋग्–यजुः–सामरूपाणि छन्दाँसि त्रीणि विद्यात्मकानि ज्ञानरूपाणि पदानि सन्ददर्श इति अध्याह्रियते, तानि वेदरूपाणि छन्दः-

पदानि गायत्र–त्रैष्टुभ–जागतसञ्ज्ञानि भवन्ति, तेष्वेव छन्दस्सु छन्दःसंहितेषु मन्त्रेषु पदानि त्रीणि अधिनिदधे, अधिष्ठानरूपेण स्थापयामास, अतः एव सः छन्दःपुरुषः इति प्रसिद्धिं जगौ। अस्मिन् अथ ऋङ्मन्त्रदर्शनं दैर्घतमसार्षेयम् —" यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत। यद्वा जगज् जगत्याहितं पदं य इत् तद्विदुस्ते अमृतत्वमानशुः" ( ऋ. मं. १–१६४–२३ ) इति ॥ तं तादृशं छन्दःपुरुषं। धीभिः छन्दोनिरताभिः तपसा मन्त्रयोगादिसाधितेन संयमेन प्रपद्ये आषयेण सन्दृक्सत्त्वेन प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

This is Purusha, the highest, and is one with the power to create Chhandas. He, Ātmā, became a Chhandomaya Purusha, with Chhandas as his body. Cf. " Indeed, it is this Ātmā who became Purusha, full of speech, replete with mind and Prāṇa, with all eyes and all ears, and all Vedas Chhandomaya " ( Aitareya Āraṇyaka ). Through the power of speech, suitable to him, he had the vision of the Vedas, Ṛg, Yajus and the Sāma. They were all Vedas in the form of Vidyās, sacred knowledge. The Vedas are in the form of metres known as Gāyatrī, Trishtup and Jagatī. He planted his three feet in the form of Vedas in the mantras. So he came to be known as Chhandaḥ - Purusha. For this meaning see the Ṛk of Dīrghatamas. " In the metre Gāyatrī he placed his foot in the form of Gāyatrī; in the metre Trishṭup, he placed his foot in the form of Trishtup; in the metre Jagatī, he placed his foot in the form of Jagatī. One who knows these becomes immortal " ( Ṛg. I-164-23 ).

### पञ्चदशी ऋक्।

अस्यामेव तन्वांऽ३तस्यं विश्वरूपं
जन्मनीहैव चक्षुषाऽन्तर्दिव्येनं ॥
भवेयं सुकृती विदाऽनुदृश्य
तपसा धीभिः पुरुषं तं प्र पद्ये ॥ १५ ॥

पदपाठः – अस्याम्। एव। तन्वाम्। तस्यं। विश्वऽरूपम्।
जन्मनि। इह। एव। चक्षुषा। अन्तरितिं। दिव्येनं ॥
भवेयम्। सुऽकृती। विदा। अनुऽदृश्यं।
तपसा। धीभिः। पुरुषम्। तम्। प्र। पद्ये ॥

In this same body, in this birth only, with the help of divine insight and the help of supreme intuition, I shall realise the existence of the Purusha within myself and be blessed foreever. I attain that Purusha with the help of meditation and intense thought.

## अन्वयभाष्यम् ।

तस्य परोक्षस्य परमस्य आत्मनः पूर्णपुरुषस्य विश्वरूपं विश्वविभूतिसत्त्वपूर्णं सच्चिदानन्दस्वरूपं दिव्ययोगाभ्युदीर्णं ऐश्वर्यसत्त्वं अस्यामेव दृश्यमानायां इदानीं विद्यमानायां तत्परमपुरुषात्मकसर्वसत्त्वसम्पन्नायां सचेतनायां तपःसंशितायां विशुद्धसत्त्वायां तन्वां जन्मनि अस्मिन्नेव इहैव अस्मिन्नेव लोके जागृतिसत्त्वे अप्रमादादिवृत्तितत्त्वे स्वप्रबोधयुक्ते चक्षुषा अनेन दिव्येन दिव्यभावादिसत्त्वसम्पन्नेन अन्तः चित्सत्त्वेन आत्मनि विदा सविदा तत परं रूपं अनुदृश्य साक्षात्कृत्य अयमहं सुकृती कृतकृत्यः धन्यः भवेयं भविताऽस्मीति सुदृढेन निश्चयेन एतादृशेन महत्वाकाङ्क्षोदितेन सदुद्देशेन चिरात् आचरितेन तपसा बाह्येन नियमेन आन्तरेण उच्चतरेण च संयमेन धीभिः धीयोगेन तेन दिव्येन तं परमं पुरुषं प्रपद्ये अपरोक्षतया स्वानुभवेन स्वान्तरेव प्राप्नोमीति ॥

### COMMENTARY—SUMMARY TRANSLATION

Ātmā is the supreme Purusha, the perfect one. His Viśvarūpa, with the mighty power of becoming all and everything, is in highest exultation In this body only which is existing now, and is one which is invested with all the powers of that supreme Purusha, I shall attain the highest by purifying and sharpening my powers by meditation. In this birth only, and here in this world. in this wakeful state, without being deflected by lapses, I shall attain self-realisation by knowing myself and the Purusha. With the help of these eyes which are endowed with superhuman powers, I shall see the supreme Viśvarūpa and become a blessed one, a Sukṛtī. Let me be fortunate enough to realise the truth here and now.

## षोडशी ऋक् ।

तत् तें भगवन् विश्वरूपं परीतं
प्रतिं दर्शय मह्यं पुरुषात्मनिं ॥
पदं पश्यामि दर्शतं तपसाऽन्त-
स्तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ १६ ॥

पद्पाठः – तत् । ते । भगऽवन् । विश्वऽरूपम् । परि । इतम् ।
प्रति । दर्शय । मह्यम् । पुरुष । आत्मनि ॥
पदम् । पश्यामि । दर्शतम् । तपसा । अन्तरिति ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

अयं मन्त्रः तृतीये पुरुषसूक्ते व्याख्यातः ॥

This Ṛk has already been commented upon and translated in the 16th mantra in the third hymn of this Section.

॥ इति षष्ठेऽनुवाके चतुर्थं पुरुषसूक्तम् समाप्तम् ॥

॥ इति षष्ठः पुरुषोऽनुवाकः सम्पूर्णः ॥

Thus ends the fourth hymn in the Sixth Section.

Thus ends the Sixth Section dedicated to Purusha

अथ सप्तमः अब्दैवत्यानुवाकः ।

अनुवाकः ७ । सूक्तम् १ । ऋचः १-१० ।

अथ प्रथमं अप्सूक्तम ।

आपो दिव्याः सरस्वत्यः दश, दैवरातो वैश्वामित्रः, आपः, अनुष्टुप् ।

**Now this the Ap Sukta, First in the Seventh Anuvaka**

**Section VII: Hymn 1: Riks 1-10-AP**

This hymn beginning with 'Āpo Divyāḥ Sarasvatyaḥ' contains ten Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi, Āpaḥ is the god and the meter is Anushṭup.

## अथ प्रथमा ऋक् ।

आपो दिव्याः सरस्वत्यः पयस्वत्योऽभि वर्षत ।
इन्द्रेण सवित्रेषितास्तेजसौषधिभिर्महीम् ॥ १ ॥

पदपाठ :- आपः । दिव्याः । सरस्वत्यः । पयस्वत्यः । अभि । वर्षत ॥
इन्द्रेण । सवित्रा । इषिताः । तेजसा । ओषधिऽभिः । महीम् ॥

Oh, Heavenly Waters! flowing in a liquid mass, and driven by Savitā (Sun) through the power of the lightning of Indra, pour down on this earth (and make it) full of vegetation.

## अन्वयभाष्यम् ।

दिव्याः अन्तरिक्षभवाः व्योमोदिताश्च सरस्वत्यः परस्परसङ्घातत्वात्, पयस्वत्यः अम्बुरससङ्घातरूपत्वात् । अत्र, विशेषेण सामान्यं विशिष्यते ॥ हे आपः ! सवित्रा परमेण कर्त्रा ऐन्द्रेण वैद्युतेन तेजसा करणेन ईरिताः सत्यः ओषधिभिः शीकरेषु बीजात्मना लीनाभिः महीं इमम प्रति अभितः वर्षतेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Waters! you are born in the mid-air. You are literally Sarasvatī because you mass together. You are Payasvatayḥ because you are liquid waters. Oh! Waters, urged by the Sun through the lightning of Indra who is full of action, rain over the earth and make it full of vegetation, the seeds of which are in you in a subtle form.

## द्वितीया ऋक् ।

साकमिन्द्रेण या यूयमापः प्राणाः पृथिवीषु ।
ता आ यात रसैरन्नैरमृतैर्वनस्पतिभिः ॥ २ ॥

पदपाठः – साकम् । इन्द्रेण । याः । यूयम् । आपः । प्राणाः । पृथिवीषु ।
ताः । आ । यात । रसैः । अन्नैः । अमृतैः । वनस्पतिऽभिः ॥

Oh, you Waters ! you are the very life ( vital powers ) of this earth along with Indra. May you come down with the juices, the foods, the ambrosia and herbs.

## अन्वयभाष्यम् ।

हे आप: ! याः यूयं इन्द्रेण मध्यमाग्निना वैद्युतेन साकं पृथिवीषु पृथिवीसंस्थेषु शरीरेषु प्राणाः प्राणसत्त्वरसरूपाः स्थ, ताः यूयं रसैः विश्वसारभूतैः।।अन्नैः विश्वोपजीव्यैः अमृतैः सुधामयैः वनस्पतिभिः सह आयात, ओषधिः प्राप्याः वनस्पतयो व्याख्याताः इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Waters ! along with Indra, who is lightning and is called Madhyamāgni, you are the very life of the earth; come down with the necessary juices and food for sustenance of all, also with Amṛta, full of ambrosia, and with the medicinal herbs.

## तृतीया ऋक् ।

आपो देव्यः सँस्रवन्त्यः पुनः पुनः पर्वतेभ्यः ।
पार्थिवेन मामुपाप्ता ज्योतिषा सङ्गमयत ॥ ३ ॥

पदपाठः – आपः । देव्यः । सम्ऽस्रवन्त्यः । पुनःऽपुनः । पर्वतेभ्यः ।
पार्थिवेन । माम् । उप । आप्ताः । ज्योतिषा । सम् । गमयत ॥

Oh, presiding deities of Waters ! flowing again and again from the mountains, and coming towards me, bring about my union with the light on earth.

## अन्वयभाष्यम् ।

पर्वतेभ्यः पुनः पुनः निरन्तरं संस्रवन्त्यः अजस्रधारया प्रवहन्त्यः हे आपः देव्यः ! देवतात्मिका नदीरूपाः मां इमं उपागताः स्नान–पानादिकाले पार्थिवेन ज्योतिषा सङ्गमयत संयोजत, अप्सु हि वूढः अग्निः इति अनेन गम्यते, अस्मिन् अर्थे ऋङ्मन्त्रवर्णः प्रसिद्धः, "अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशंभुवम्" (ऋ. मं. १०–९–६) इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh, presiding deities of Waters ! flowing from mountains without any break, with a continuous flow, and coming towards me, may you unite me with the light on this earth at the time of bath and drink. It is said that Agni is hidden in waters. Cf. " Some told me that all the medicines and Agni who renders all people happy, are hidden in the waters" ( Ṛg. X–9-6 ).

## चतुर्थी ऋक् ।

मधुमत्यो हि मातर आपो देव्य इहागताः ।

मर्त्यं पुनीत मामाप्तं सद्यो धियो विभूतये ॥ ४ ॥

पदपाठः – मधुऽमत्यः । हि । मातरः । आपः । देव्यः । इह । आऽगताः ।

मर्त्यम् । पुनीत । माम् । आप्तम् । सद्यः । धियः । विऽभूतये ॥

Oh, presiding deities of Waters ! you, sweet mothers, having come here, do purify me, who is a mortal, so that I may prosper.

## अन्वयभाष्यम् ।

मधुमत्यः मधुररसवत्त्वात्, मातरः जीवनप्रदत्वात् । हे आपो देव्यः ! इह आगताः सत्यः आप्तं मां सद्यः धियः विभूतये वृद्धये ऐश्वर्याय ज्ञानादिप्रकाशार्थं पुनीत, दोष-विमुक्तो हि धिया वर्धते, हिः पादपूरणार्थः, तथा निश्चयार्थो वा भवतीति ॥

### COMMENTARY—SUMMARY TRANSLATION

You are sweet being sweetness itself You are mothers because you give life. Oh, presiding deities of Waters ! may you come here and purify me, the mortal one, so that I may prosper. He who is free from impurities will certainly prosper through his intellect.

## पञ्चमी ऋक् ।

यो वो जनयिताऽमृतो यो वाऽप्सु भवतीषु ।
मयि सन्धत्त तेन तदग्निनाऽप्सुमता तेजः ॥ ५ ॥

पदपाठः – यः । वः । जनयिता । अमृतः । यः । वा । अप्ऽसु । भवतीषु ।
मयि । सम् । धत्त । तेन । तत् । अग्निना । अप्सुऽमता । तेजः ॥

May you, Oh Waters ! establish me in the light and glory of Agni who is the essence of all, who is within you and gives birth to you and is immortal.

## अन्वयभाष्यम् ।

अमृतः क्षय–विकारादिरहितः यः वः युष्माकं जनयिता उत्पादकः सन् राजते ज्योतीरूपेण, किञ्च यः भवतीषु अप्सु प्रति तिष्ठति वा, तेन अप्सुमता जल–रससत्त्ववता अग्निना मयि तत दिव्य तेजः सन्धत्त सन्धारयतेति आप एव प्रार्थ्यन्ते ॥

अत्र "अप्सुमता" इति अलुप्तसप्तमीबहुवचनान्तेन समस्तं मतुप् प्रत्ययान्तं तृतीयैकवचनान्तं च पदम्, तदेत छांदसं रूपम् आर्षम्, "अग्नयेऽप्सुमते स्वाहा" इति यजुर्मन्त्रवर्णे तदनुश्रवणम्, तथा ब्राह्मणानुवचनमपि भवति, "अग्नयेऽप्सुमतेपुरोडाशमष्टाकपालं निर्वपति" (ऐ. ब्रा. पं. ७–३२–६) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

He, that is Agni, is immortal, free from waste and change. He gives birth to you. Further, he is in you, oh Waters ! He is full of your essence; may you bless me with the glory of Agni. Thus the Ṛshi invokes the Waters.

## षष्ठी ऋक् ।

इममाग्नेय्य एनसः पुन र्मा संस्कुरुतापः ।
दिव्यो रसो यो युष्मासु मयि तं भरतामृतम् ॥ ६ ॥

पदपाठः – इमम् । आग्नेय्यः । एनसः । पुनरिति । मा । सम् । कुरुत । आपः ।
दिव्यः । रसः । यः । युष्मासु । मयि । तम् । भरत । अमृतम् ॥

Oh Waters ! born of Agni, may you purify me again from the sins. May you fill me with celestial essence, the ambrosia which is in you.

CD–50

## अन्वयभाष्यम् ।

आग्नेय्यः अग्निदुहितरः हे आपः ! इमं मा मां पुनः संस्कुरुत, एनसः पापदोषादि-कल्मषात् संशोधयतेति यावत्, यः युष्मासु दिव्यो रसः नित्यं प्रतिष्ठितोऽस्ति, तं रसं अमृतं अमृतसधर्मत्वात् अमृतं भरतेति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Waters ! daughters of Agni, purify me again from the sins and from all the results of imperfection, abnormality etc. There is a celestial essence in you. That essence which is the equivalent of ambrosia, you please fill me with it.

## सप्तमी ऋक् ।

अप्स्वन्तर्भवतीषु मग्नमिममु शन्तमैः ।
भेषजैर्मधुभी रसैः पुनर्मा संस्पृशताऽऽपः ॥ ७ ॥

पदपाठः – अप्ऽसु । अन्तरिति । भवतीषु । मग्नम् । इमम् । ऊम् इति । शम्ऽतमैः ।
भेषजैः । मधुऽभिः । रसैः । पुनरिति । मा । सम् । स्पृशत । आपः ॥

Oh Waters ! I who am immersed in your holy waters, should be again touched by you with pleasant, sweet and medicinal essences.

## अन्वयभाष्यम् ।

भवतीषु पूज्यासु अप्सु अन्तः मग्नं इमं मा मां उशन्तमैः सुखकरैः मधुभिः प्रियत्वात् रसैरेव भेषजैः, हे आपः ! पुनः संस्पृशतेति ॥ अस्मिन् अर्थे ऋङ्मन्त्रवर्णः — " आपश्च विश्व भेषजीः " ( ऋ.मं. १–२३–२० ) "आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम्" ( ऋ. मं. १०–३७–६ ) इति च तदनुश्रवणम् ॥

### COMMENTARY—SUMMARY TRANSLATION

I am already immersed in you, oh sacred Waters ! With pleasurable, sweet and medicinal essences, Oh Waters ! touch me again. Cf. " The Waters are universal medicines " ( Ṛg. I–23–20 ). " The waters are medicines for all. Let them serve as medicine" ( Ṛg. X–37–6 ).

## अष्टमी ऋक् ।

आपो यन् मे दुरुदितं स्मृतं वा यदु दुरिष्टम् ।
यद् वा कृतं दुष्करणं ततः पुनीत विश्वतः ॥ ८ ॥

पदपाठः – आपः । यत् । मे । दुःऽउदितम् । स्मृतम् । वा । यत् । ऊम् इति । दुःऽइष्टम् ॥
यत् । वा । कृतम् । दुःऽकरणम् । ततः । पुनीत । विश्वतः ॥

Oh Waters, purify me and free me from all evil words used by me, free me from remembrance of evil things and bad intentions as well as wicked deeds.

## अन्वयभाष्यम् ।

हे आपः ! यत् मे मम दुरुदितं दुरुक्तं, यद् दुरिष्टं वा स्मृतं कामेन सङ्कल्पितं, यद् वा कृतं आचरितं दुष्करणं दुष्टं कर्म ततः त्रिविधात् वाचिक-मानसिक-कायिकरूपात् विश्वतः समस्तात् पापदोषकल्मषादेः पुनीतेति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh Waters! I might have uttered bad words, or intended something bad, or planned bad things, or I might have done something bad or that which is prohibited. From all these misdeeds, oral, mental and physical, purify me completely.

## नवमी ऋक् ।

यद् वोऽपरं दुश्चरितं तेजसो ब्रह्मणो हरत् ।
तद् वो रसेन पुनर्मे कृतं समु प्र वहत ॥ ९ ॥

पदपाठः – यत् । वा । अपरम् । दुःऽचरितम् । तेजसः । ब्रह्मणः । हरत् ।
तत् । वः । रसेन । पुनरिति । मे । कृतम् । सम् । ऊम् इति । प्र । वहत ॥

Or, may be I have done something bad which keeps me away from self-realisation and the glory of Brahma. Wash away all that sin from me, with your waters.

## अन्वयभाष्यम् ।

ब्रह्मणः तेजसः आत्मज्ञानात् ब्रह्मवर्चसाच्च हरत् अपाहरत् परं, यद् वा दुश्चरितं, तत् वः युष्माकं अब्देवतानां रसेन दिव्येन कृतं कलुषं पुनः प्रवहत सङ्क्षालयत, उकारः पादपूरण इति ॥

### COMMENTARY—SUMMARY TRANSLATION

I might have done something bad which deprives me of self-knowledge, or the glory of Brahma. Wash away all that from me with your heavenly waters.

## दशमी ऋक् ।

यदादित्येनाप्सुहितं तपसाऽपां वृषभेण ।
आपः सन्धत्त तन्मयि ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पदपाठ :– यत् । आदित्येन । अप्ऽसु । हितम् । तपसा । अपाम् । वृषभेण ।
आपः । सम् । धत्त । तत् । मयि । ज्योतिः । विश्वस्य । दर्शयत् ॥

May you, Oh Waters ! endow me with the light placed in you by Āditya ( the sun ), who by burning heat causes rains. That light illumines the whole universe.

## अन्वयभाष्यम् ।

अपां वृषभेण सेचकेन आदित्येन तपसा तपनेन यत् अप्सुहितं पोषितं, तत् दर्शयत् विश्वस्य जगतः प्रकाशकं ज्योतिः हे आपः! मयि सन्धत्तेति ॥ अत्र आदित्यस्य अपां वर्षकत्वे दैर्घतमसाषयं ऋङ्मन्त्रदर्शनं भवति— "दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि" ( ऋ० मं. १–१६४–५२ ) इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Āditya causes rain by tapas, the burning heat. May you endow me with the light placed in you by Āditya, the light which illumines the whole universe.

॥ इति सप्तमेऽनुवाके प्रथमं अप्सूक्तम् समाप्तम् ॥

Thus ends the First Hymn in the Seventh Section.

## अथ द्वितीयं अप्सूक्तम् ॥

अनुवाकः ७ । सूक्तम् २ । ऋचः १-११ ॥

अपो देवीः प्रतिपद्ये एकादश, दैवरातो वैश्वामित्रः,
आपः, त्रिष्टुप् । अन्त्या जगती ॥

**Now this Apsukta, Second in the Seventh Anuvaka**

**Section VII, Hymn 2, Riks 1 - 11—AP**

This hymn beginning with 'Apo Devīḥ Pratipadye' contains eleven Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi; Āpaḥ is the god, and the metre is Trishṭup, the last Ṛk is in Jagatī.

## अथ प्रथमा ऋक् ।

अपो देवीः प्रति पद्ये स्वरन्तीः
सरस्वतीः स्वः१ स्रवन्तीः पृथिवीः ॥
पावमान्यो रसवत्यः पवित्रा-
स्ता आपो देव्यः स्वमीं मां पुनन्तु ॥ १ ॥

पद्पाठः – अपः । देवीः । प्रति । पद्ये । स्वरन्तीः ।
सरस्वतीः । स्व१रिति स्वः । स्रवन्तीः । पृथिवीः ॥
पावमान्यः । रसऽवत्यः । पवित्राः ।
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

I am attaining the deities who preside over the Waters. The deities are pervading the sky and flowing to the earth with resonance and are full of fluid essences. May these sacred Waters which are purificatory and full of essences purify me who is their own.

## अन्वयभाष्यम् ।

स्वरन्तीः ऐन्द्रेण वैद्युतेन तेजसा स्तनयित्नुना घनगर्जनादिरूपेण सह शब्दायमानाः पृथिवीः पृथुभूताः दिवि व्याप्ताः रसात्मना लोकत्रयात्मकं विश्वं व्यापृताः इति वा तदर्थः, अथ वा तिस्रः पृथिवीः पृथिवी-अन्तरिक्ष-द्यौः इति त्रिभुवनात्मिकाः प्रति स्वः स्वर्लोकात् प्रकाशकाच्च आदित्यात्, ज्योतिरात्मनः सकाशात स्रवन्तीः प्रच्यवन्तीः, सरस्वतीः बहुजल-सङ्घातात्मकसरःसंयुताः देवीः दिव्यसत्त्वमयीः, अपः अप्सञ्ज्ञकाः रसात्मकदेवताः

सुखार्थं प्रपद्ये ॥ ताश्च रसवत्य: जीवनानन्दरसपूर्णा: पवित्रा: स्वयं परिशुद्धा: स्वभावत: निर्मला: निर्दुष्टाश्च भवन्ति, तथा पावमान्य: पवित्रीकरणसमर्था: सत्य: प्राणसञ्जीवनसत्त्वा: ता: आपो देव्य: अब्देवता: स्वं स्वकीयं ईं एनं शरणं प्रपन्नं मां पुनन्तु पावयन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

They are 'Svarantīḥ': they resound with thunder and lightning of the clouds, caused by Indra. They pervade the whole sky or they pervade all the three worlds. They flow towards the three worlds, the earth, mid-air and sky, from the Svar or Āditya (the sun), who is all light. They take the form of moving waters and also lakes which are collections of waters. They are all celestial, carrying the name of Apaḥ, the deities of waters. I attain them for my well-being. They contain the essence which makes life blissful. They are pure by nature and they are capable of purifying others. As such, they are capable of giving new life. May such deities presiding over Waters, purify me who is theirs only, and who has gone to them for protection.

## द्वितीया ऋक् ।

अपो देवीर्यो दिवः सं ससर्ज
य आदित्यो अप्स्व१न्तः प्रति विष्टः ॥
ज्योतिषा मां दिव्येन सं सृजन्तु
ता आपो देव्यः स्वमीं मां पुनन्तु ॥ २ ॥

पदपाठः – अपः । देवीः । यः । दिवः । सम् । ससर्ज ।
यः । आदित्यः । अप्ऽसु । अन्तरिति । प्रति । विष्टः ॥
ज्योतिषा । माम् । दिव्येन । सम् । सृजन्तु ।
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

Āditya (the sun) created Water-deities (Apo-devīḥ) from the sky. He entered into them. May these Water-deities bring about my union with celestial glory and may Water-deities purify me who is their own.

## अन्वयभाष्यम् ।

यः आदित्य: दिव: सकाशात् स्वस्थानात् देवी: दिव्या: स्वरसरूपा: अप:संससर्ज वृष्टिरूपेण उत्पादयामास, यश्च पुन: तासु अप्सु अन्त: प्रति प्रातिलोम्येन विष्ट: वैद्युत-

ज्योतीरूपेण प्राविवेश, तेनैव दिव्येन आदित्येन ज्योतिषा ताः आपः देव्यः देवताः स्वं आत्मीयं ई एनं मां संसृजन्तु संयोजयन्तु, तथा ताः देव्यः देवतारूपाः दिव्याः आपः मां पुनन्तु सर्वदोषेभ्यः सद्यः एव पवित्रीकुर्वन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

Āditya generated those Waters, heavenly and full of fluid essences, from the sky, his own abode, in the form of rain. He entered into them himself in the form of the brilliant light of lightning. With that light of Āditya may those Water-deities uniteme; may they purify me who belong to them.

## तृतीया ऋक् ।

अपो देवीरन्तरिक्षात् ससर्ज<br>
यो अप्स्व१न्तरनुप्रविष्ट इन्द्रः ॥<br>
इन्द्रेण मां ज्योतिषा सं सृजन्तु<br>
ता आपो देव्यः स्वमीं मां पुनन्तु ॥ ३ ॥

पदपाठः — अपः । देवीः । अन्तरिक्षात् । ससर्ज ।<br>
यः । अप्ऽसु । अन्तरिति । अनु । प्रऽविष्टः । इन्द्रः ॥<br>
इन्द्रेण । माम् । ज्योतिषा । सम् । सृजन्तु ।<br>
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

Indra created the Water-deities from the mid-air and he himself entered into them. May those Water-deities unite me; with the brilliant light of Indra and also purify me, who is their own.

## अन्वयभाष्यम् ।

यः इन्द्रः मध्यमलोकाधिपतिः अन्तरिक्षात् स्वस्थानात् देवीः दिव्याः अपः ससर्ज, यश्च तासु अप्सु अन्तः रसे विद्युता वैद्युतेन ऐन्द्रेण ज्योतिषा पुनः अनु प्रविष्टः प्राविवेश, ताः देव्यः आपः तैनैव स्वात्मीयेन आन्तर्येण ज्योतिषा तेजःसत्त्वेन मां संसृजन्तु, तथा ई एनं मां पुनन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

Indra, the lord of the mid-air, created the heavenly waters from the mid-air. And he entered into them himself in the form of the light of lightning. May those Water-deities unite me with the brilliance of lightning and purify me who belongs to them.

## चतुर्थी ऋक् ।

अपो देवीर्यः पृथिव्याः ससर्ज
यो अग्निरप्स्व१न्तरन्वाविवेश ॥
ज्योतिषाऽप्सुमता मा सं सृजन्तु
ता आपो देव्यः स्वर्मीं मां पुनन्तु ॥ ४ ॥

पद्पाठः – अपः । देवीः । यः । पृथिव्याः । ससर्ज ।
यः । अग्निः । अप्ऽसु । अन्तरिति । अनु । आविवेश ॥
ज्योतिषा । अप्सुऽमता । माम् । सम् । सृजन्तु ।
ताः । आपः । देव्यः । स्वम् । ईम् । मां । पुनन्तु ॥

Agni created those Water-deities from the earth, and himself entered into them. May those Water-deities unite me with that light of Agni contained in the waters and purify me who is their own.

## अन्वयभाष्यम् ।

यः अग्निः पार्थिवः पृथिव्याः सकाशात् स्वस्थानात् दिव्याः अपः ससर्ज पर्वतनिर्झरीमुखेन उत्पादयामास, यश्च तासु अप्सु अन्तः ज्योतिषा भौमेन सह अनु अनन्तरमेव आ समन्तात् सर्वतः विवेश, ताः देव्यः देवतारूपा' आपः तेन निजेन अप्सु-ता अप्सम्बन्धिना ज्योतिषा मां संसृजन्तु, तथा ई एनं स्वकीयं मां पुनन्तु पवित्रीकुर्वन्तु इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Agni of the earth, created the heavenly waters from the earth in the form of torrents flowing from the mountains. Following them he entered into those waters in the form of heat in the earth. May those Water-deities unite me with that heat and light of Agni ( Fire-god ) and also purify me who his their own.

## पञ्चमी ऋक् ।

या दिव्या इह धीतिभिर्निहिताः
सुषुम्णैः सह धीभिश्च चित्तिभिः ॥
मातरः पुत्रमिव मामुपाप्ता-
स्ता आपो देव्यः स्वर्मीं मां पुनन्तु ॥ ५ ॥

पद्पाठः – याः । दि॒व्याः । इ॒ह । धी॒तिऽभिः । निऽहि॑ताः ।
सु॒ऽसु॒म्नैः । स॒ह । धी॒भिः । च॒ । चित्तिऽभिः ॥
मा॒तरः । पु॒त्रम्ऽइ॑व । माम् । उ॒पऽआ॒प्ताः ।
ताः । आपः । दे॒व्यः । स्वम् । ई॒म् । माम् । पु॒न॒न्तु ॥

Here are those Waters which are celestial and are blended with light, intellectual powers, vital energy, and with pleasing essences. May those Water-deities nourish me as mothers do a son and purify me who is their own.

## अन्वयभाष्यम् ।

याः दिव्याः द्युलोकसंस्थाः तथा दिवः प्रच्युताः आपः इह अस्मिन् भुवने भुवि धीतिभिः जलसन्धारकाभिः तेजःशक्तिभिः निहिताः सन्धृताः, तथा सुसुम्नैः सुष्ठुसुम्नैः—सुखकरै रसैः धीभिः बुध्यादीन्द्रियवृत्तिरूपाभिः प्राणशक्तिभिः चित्तिभिः चेतनाशक्तिभिश्च सह संहिताः ताः आपो देव्यः विश्वमातरः सत्यः इह लोके मातरः स्वं पुत्रमिव स्वीयं रसं प्रदातुं तेन प्राणयितुं सुखयितुं च मां उपप्राप्ताः सत्यः, ईं एनं मां निजोपासनापरं स्वसेवनपरं च पुनन्तु पावयन्तु दोषादिभ्यः रक्षन्तु, पतनकारकेभ्यः असद्विषयेभ्यश्च प्रतिनिवर्तयन्तु इति ॥

## COMMENTARY—SUMMARY TRANSLATION

The Waters have their abode in the sky. They are sustained by the powers of light and lightning which bring down water to the earth. With pleasing essences, with the powers of the vital force in the form of intellect, and with the powers of life-giving energy, may those Water-deities nourish me like the mothers who nourish their children. Let them give me new life and make me happy. May they purify me, who is devoted to them and may they protect me from abnormalities and bad things which cause my fall.

## षष्ठी ऋक् ।

यद् वा॒चा दु॑रु॒क्तं सु॒धि॑तं म॒म
यन्मन॑सा दु॒रि॑तं जु॒ष्टमन्तः ॥
यन्मे धीभिः सन्धृ॑तं दु॒ष्टं किञ्चित्
ता आपो॑ दे॒व्यः स्वमीं मां पु॑नन्तु ॥ ६ ॥

पद्पाठः – यत् । वाचा । दुःऽउक्तम् । सुऽधितम् । मर्म ।
यत् । मनसा । दुःऽइतम् । जुष्टम् । अन्तरिति ॥
यत् । मे । धीभिः । सम्ऽधृतम् । दुष्टम् । किम् । चित् ।
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

From bad words which I might have uttered, from prohibited thoughts which I might have entertained, from the sins which might have been committed by my intellect, may those Water-deities save me and purify me who is their own.

## अन्वयभाष्यम् ।

यद्वा मम देवतोपासनापरायणस्य प्रपञ्चपरमार्थादिसाधननिरतस्य वाचा वागिन्द्रियेण दुरुक्तं वचः दुष्टं शास्त्रनिषिद्धं असत्यादिवचनं यत् उच्चरितं भवेत्, तथा दुरुदितं शास्त्रतः दुष्टमिति निर्दिष्टं अत एव पुनः विशेषेण प्रतिषिद्धम्, "न दुरुक्ताय स्पृहयेत्" (ऋ॰ मं॰ १–४१–९) इति, तादृशं असद्विषयजातं मे मम मनसा अन्तःकरणेन मतं अङ्गीकृतं, तथा धीभिः बुध्यादिभिः सर्वैः ज्ञानेन्द्रियैः सवृत्तिकैः अभि अभितः सर्वप्रकारेण सन्धत्तं सन्धृतं एनः अधःपतनकारणं दोषादिकं यत् स्यात्, तस्मात् सर्वस्मादपि दोषजातात् ताः आपोदेव्यः स्वकीयं ईं एनं मां पुनन्तु पावयन्तु इति ॥

### COMMENTARY—SUMMARY TRANSLATION

I, who am devoted to gods, and busy in performing duties both temporal and spiritual might have committed sins of omission and commission by uttering improper words and by my mind thinking prohibited thoughts. It is directed that "one should not indulge in bad words" (Ṛg. I-41-9). I might have entertained thoughts about bad or harmful objects. May those Water-deities purify me their own man, and free me from the sins committed by my mind and by all my senses.

## सप्तमी ऋक् ।

यदिन्द्रियैः कर्मणा दुष्कृतं मे
यत् कृतं पद्भ्यां दुर्गतं ममैनः ॥
पाणिभ्यां यद् दुर्गृभीतं गृहीतं
ता आपो देव्यः स्वमीं मां पुनन्तु ॥ ७ ॥

पद्पाठः – यत् । इन्द्रियैः । कर्मणा । दुःऽकृतम् । मे ।
यत् । कृतम् । पत्ऽभ्याम् । दुःऽगतम् । मम । एनः ॥
पाणिभ्याम् । यत् । दुःऽगृभीतम् । गृहीतम् ।
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

May those Water-deities purify me who is their own, from sins committed by my senses and from actions of going astray with my legs, and from my acts of acceptance by hand of unworthy things.

## अन्वयभाष्यम् ।

इन्द्रियैः कर्मेन्द्रियैः तथा तेषां कर्मणा च यत् दुष्कृतं दुष्टं कर्म कृतं आचरितं, तथा पद्भ्यां पादाभ्यां यत् दुर्गतं दुष्टं गमनागमनादिकं इतस्ततः निरर्थकं दुरुद्देशकृतं वा स्यात्, तथैव पाणिभ्यां यत् खलु दुर्गृहीतं दुष्प्रतिग्रहादिकं स्वीकृतं भवेत्, अस्ति वा तेन च मम निष्पन्नं यत् एनः दोषादिकं कल्मषजातं तस्मात् सर्वस्मादपि दुरितादिदोषात् ताः आपो देव्यः मां इमं पुनन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

I might have performed sinful actions with the help of my senses and by their movements. I might have gone wrong or come off the right way. My hands might have received unworthy things. All these sins might have been committed by me. May the Water-deities purify me of all such sins and errors.

## अष्टमी ऋक् ।

यद् वा श्रोत्रेण दुःश्रुतं श्रुतं मे
यन्मे त्वचा संस्पृष्टं दुष्टमेनः ॥
चक्षुषा दृष्टं दुर्दृष्टं यदेन-
स्ता आपो देव्यः स्वमीं मां पुनन्तु ॥ ८ ॥

पद्पाठः – यत् । वा । श्रोत्रेण । दुःऽश्रुतम् । श्रुतम् । मे ।
यत् । मे । त्वचा । समऽस्पृष्टम् । दुष्टम् । एनः ॥
चक्षुषा । दृष्टम् । दुःऽदृष्टम् । यत् । एनः ।
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

May the Water-deities purify me who is their own, of all the bad words heard by my ears, from the vicious things touched by my skin ( body ) and free me from the sin of having seen prohibited things.

## अन्वयभाष्यम् ।

मम श्रोत्रेण दुःश्रुतं अश्राव्यं शास्त्रनिषिद्धं च यत् श्रुतं भवेत्, तथा त्वचा त्वगिन्द्रियेण दुष्टं असद्वस्तुजातं यत् संस्पृष्टं व्यामोहात् स्पर्शनालिङ्गनादिरूपं कृतं च स्यात्, तथा चक्षुषा च दुर्दृष्टं दुष्टं दृश्यं यत् दृष्टं तेन च निष्पन्नं यद् यद् एनः मम अस्ति तस्मात् सर्वस्मादपि दोषजातात् ताः आपो देव्यः मां पुनन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

I might have heard by my ears what ought not to be heard according to the Śhāstras. I might have touched by my skin what ought not to have been touched and I might have seen with my eyes sinful things through mistake. From the sins accruing from all these, may those Water-deities purify me who is their own.

## नवमी ऋक् ।

यन्मे जिह्वया दूरसः स्वदितो
यदन्तरुदरे धृतो दूरसः ॥
यन्नासिकाभ्यां दुराघ्रातमेन-
स्ता आपो देव्यः स्वमीं मां पुनन्तु ॥ ९ ॥

पदपाठः — यत् । मे । जिह्वया । दुःऽरसः । स्वदितः ।
यत् । अन्तरिति । उदरे । धृतः । दुःऽरसः ॥
यत् । नासिकाभ्याम् । दुःऽआघ्रातम् । एनः ।
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

My tongue might have tasted forbidden things, my stomach might have borne within itself forbidden food, and my nose might have smelt bad odours. From all that kind of sin, may the Water-deities purify me who is their own.

## अन्वयभाष्यम् ।

जिह्वया रसनेन्द्रियेण दूरसः शास्त्रनिषिद्धो दुष्टो रसः, स्वभावतः दुष्टः वाङ्-मनोभावादिभिः दुष्टो वा यत् स्वदितः स्वरसेन आस्वादितः जिह्वाचापल्येन भक्षितः, तथा पुनः सः दुष्टो रसः उदरे अन्तः यत् सन्धृतः, तथा नासिकाभ्यां यत् दुराघ्रातं दुष्टो गन्धो

गृहीत:, तेन च एतैः सर्वैः दुर्विषयै: मम निष्पन्नं यद् यद् एन: भवति– तस्मात् सर्वस्मादपि दोषात् ता: आपो देव्य: मां पुनन्तु पवित्रं सम्भावयन्तु इति ।

COMMENTARY—SUMMARY TRANSLATION

The forbidden food and their essences which are bad by nature, or which are experienced as bad by any of my senses should have been shunned by me. Such things I might have tasted with relish or for the satisfaction of my tongue. I might be having them in my stomach. With the nose, I might have smelt bad odours. All these might have resulted in sin; from all this sin, may the Water-deities purify me who is their own.

## दशमी ऋक् ।

यच्छिश्नेन दुश्चरितं चरितं
पुनः सङ्गतं पुनर्यन्म एनः ॥
सर्वं तदेनो मम निर्मृजन्तु
ता आपो देव्यः स्वमीं मां पुनन्तु ॥ १० ॥

पदपाठः – यत् । शिश्नेन । दुःऽचरितम् । चरितम् ।
पुनरिति । सम्ऽगतम् । पुनरिति । यत् । मे । एनः ॥
सर्वम् । तत् । एनः । मम । निःऽमृजन्तु ।
ताः । आपः । देव्यः । स्वम् । ईम् । माम् । पुनन्तु ॥

Whatever forbidden actions might have been committed by my generative organ and whatever sins may be there on account of such actions, may all of them be washed off by the Water-deities since I am their own.

## अन्वयभाष्यम् ।

शिश्नेन जननेन्द्रियेण यत् दुश्चरितं दुष्टं चरितं वीर्यनाशादिकारणीभूतं कर्म यदाचरितं, तच्च अज्ञानेन इन्द्रियपारतन्त्र्येण तथा विषयोपभोगादिलोलुपतया च पुनः पुनः मे सङ्गतं सङ्घटितं यद् यद् एन: अस्ति मयि सञ्चितं तत् सर्वमपि मम दुष्कृतापराधसर्वस्वं ता: आपो देव्य: निर्मृजन्तु निःशेषेण शोधयन्तु, ततश्च स्वीयं इमं मां पुनन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

Sins have been committed by my generative organ, mainly due to actions which result in the destruction of semen, may be on account of ignorance or want of control over the senses or it may be excessive and frequent indulgence in sensuous enjoyment. All that sin committed by me

by error or transgression, may the Water-deities cleanse and purify me who is their own.

एकादशी ऋक् ।

नमस्ते गङ्गे यमुने सरस्वति
समापो मातरो मृळयत मह्यम् ॥
विश्वं ममैनो वहत ज्योतिषाऽऽत्मन्
दर्शयत ज्योतिर्विश्वस्य दर्शयत् ॥ ११ ॥

पदपाठः – नमः । ते । गङ्गे । यमुने । सरस्वति ।
सम् । आपः । मातरः । मृळयत । मह्यम् ॥
विश्वम् । मम । एनः । वहत् । ज्योतिषा । आत्मन् ।
दर्शयत । ज्योतिः । विश्वस्य । दर्शयत् ॥

Salutations to you Oh deities, and mothers the Ganges, the Yamunā and the Sarasvatī. May you grant me happiness and wash away all my sins by the light of the supreme soul. And may you show me the Light Divine that illumines the whole universe.

अन्वयभाष्यम् ।

हे गङ्गे ! यमुने ! सरस्वति ! रसवति देवि ते तुभ्यं नमः नमस्कृतिः अस्तु, हे आपः ! मातरः ! मह्यं मदर्थं संमृळयत मृडयत सुखयत, स्वरसेन मां रसयत इति भावः, मम विश्वं एनः नीचैः पतनकारणीभूतं दुर्वृत्तं दुश्चिन्तनं दौर्मनस्यादिकं सर्वं दोषजातं ज्योतिषा सुवीर्यवत्तरेण रससत्त्वेन च सह ज्योतिरात्मनि चैतन्यज्योतिरात्मनि वहत प्रणयत प्रापयत, तथा विश्वस्य दर्शयत् प्रकाशकं ज्योतिःस्वरूपं मदर्थं शुद्धसत्त्वाय मह्यं दर्शयत प्रकाशयत, मां इमं तस्य ज्योतिरात्मनः साक्षात्कारपात्रं सम्भावयत इति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Water-deities, Gaṅgā, Yamunā and Sarasvati, full of essences, salutations to you. Oh mothers, may you gladden me, delight me with your essence. May you carry away all my sin which degenerate me. Wash off my evil habits, bad thinking, wicked-mindedness etc. Fill me with the light of the Ātmā, which is all-energy. And also, may you show me the Light that illumines the whole universe and make me a pure one worthy of realising the same.

॥ इति सप्तमेऽनुवाके द्वितीयं अप्सूक्तम् समाप्तम् ॥

Thus ends the Second hymn in the Seventh Section.

## अथ तृतीयं अप्सूक्तम् ॥

अनुवाकः ७ । सूक्तम् ३ । ऋचः १-८ ॥

या सवितुः स्व १ः स्रवतीह अष्टौ, दैवरातो वैश्वामित्रः,

आपः, त्रिष्टुप् । अन्त्ये द्वे जगत्यौ ॥

**Now the Apsukta, third in the Seventh Anuvaka**

**Section VII, Hymn 3, Riks 1- 8—AP**

This hymn beginning with 'Yā savituḥ Svaḥ Sravantīha' contains eight Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi; Āpaḥ is the god, the metre is Trishṭup, the last two mantras are in Jagatī.

### अथ प्रथमा ऋक् ।

या सवितुः स्व १ : स्रवन्तीह दिव्या
प्राणचित्तिर्या प्राणाँश्चेतयन्ती ॥
सावित्री सा वरुणानी वहन्ती
तस्यै ते देवि गङ्गे नमोऽस्तु ॥ १ ॥

पदपाठः – या । सवितुः । स्व१रिति स्वः । स्रवन्ती । इह । दिव्या ।
प्राणऽचित्तिः । या । प्राणान् । चेतयन्ती ॥
सावित्री । सा । वरुणानी । वहन्ती ।
तस्यै । ते । देवि । गङ्गे । नमः । अस्तु ॥

She who descends from the sky and from Savitā (the sun) and is divine in essence, is one with the powers of Prāṇa, the vital powers. She revives the life-forces in the world. She who is associated with Savitā and Varuṇa (god of Waters) is flowing continuously. Oh Divine Ganges, my salutations to you.

### अन्वयभाष्यम् ।

सवितुः सर्वभूतप्रसवितुः आदित्यस्य सकाशात् स्वः स्वर्लोकात् स्वस्थानात् या स्वर्गङ्गा दिव्या दिव्यरससत्त्वपूर्णा इह अस्मिन् लोके संस्रवन्ति वर्षण-प्रवाहादिरूपेण प्रच्यवमाना, प्राणचित्तिः प्राणसञ्चेतनाशक्तिरूपा, प्राणसञ्जीवनादिचितिशक्तियुक्ता अत एव प्राणान् तनूभृतां प्राणसत्वं चेतयन्ती वा सर्वौषधिसत्त्वेन प्रेरयन्ती आयुरारोग्यादिपूर्णेन प्राणसत्त्वेन तान् सुचेतनान् कुर्वन्ती सावित्री सवितृदैवत्या औष्णतेजःसत्त्वा सा वहन्ती

अखण्डप्रवाहरूपा, वरुणानी वारुण्यदिव्यरससत्त्वा वरुणशक्तिरूपा च भवती गङ्गानाम्ना- सुप्रसिद्धा अस्ति, हे गङ्गे ! देवि ! देवतात्मिके ! तस्यै तादृशायै यथोक्तसर्वगुणपूर्णायै ते तुभ्यं नमः नमस्कृतिः अस्तु, इह गङ्गायाः सवितुः प्राणस्य च अधिभूताधिदैवताध्यात्म- कतत्त्वत्रयसामरस्यं ऋषिः पश्यति इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Āditya is Savitā, the Sun. He is the sole cause of the conception and the birth of all on this earth. Gaṅgā is born of Savitā. Her place is in the high sky. She comes from there. She is Svargaṅgā, heavenly Gaṅgā. She who flows down with the rains, has the power which can revive life here. She energises all the living beings and inspires them with health and longevity through the vegetation in this world. She has in her, abundance of light and heat, which are the characteristics of Savitā; she has also the light and essence of Varuṇa and she is the very form and power of Varuṇa. She is well known by the name Gaṅgā. Oh Gaṅgādevi, you are full of all those virtues described above, salutations to you.

The Ṛshi sees here that Gaṅgā, Savitā and Prāṇa which are the principles of Adhibhūta, Adhidaiva and Adhyātma ( physical, psychological and spiritual ) are substantially one and are harmoniously blended.

## द्वितीया ऋक् ।

या भूम्नो यमादग्नेः सँस्रवन्ती
सं पृथिव्याः पर्वतेभ्यः प्रजाता ॥
सा मनश्चित्तिरग्नायी महती
तस्यै ते देवि यमुने नमोऽस्तु ॥ २ ॥

पद्पाठः – या । भूम्नः । यमात् । अग्नेः । सम्ऽस्रवन्ती ।
सम् । पृथिव्याः । पर्वतेभ्यः । प्रऽजाता ॥
सा । मनःऽचित्तिः । अग्नायी । महती ।
तस्यै । ते । देवि । यमुने । नमः । अस्तु ॥

She issues forth from Agni who is the great controller. She is here born of the earth and from the mountains. She has great mental energy. She is born of Agni and is very great. Oh Devi Yamunā, salutations to you.

## अन्वयभाष्यम् ।

या खलु भूम्नः व्यापकस्य भूमात्मनः यमात् यमयितुः अग्नेः भौमात् इह पृथिव्यां संस्रवति, तस्य अग्नेः सर्वभूतजातयमयितृत्वेन यमसञ्ज्ञाप्रसिद्धिरनुश्रूयते वेदे, "यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्" ( ऋ. मं. १–६६–८ ) इति ॥ ततः अग्नेः संस्रवन्ती तथा तेजसा प्रेरिता च सती पृथिव्याः सकाशात् पुनः पर्वतेभ्यः निर्झररूपेण सम्प्रजाता प्रादुर्भूता सा मनश्चित्तिः मानसचितिसत्त्वयुक्ता अग्नायी अग्निदेवत्या तच्छक्तिरूपा महती पूज्या भौमान्नसत्त्वा च भूमिसमृद्धान्नसत्त्वपूर्णा च भवति । हे यमुने ! देवि ! तस्यै ते नमः अस्तु इति, अत्र यमुनायाः जलरूपायाः अग्नेः मनसश्च अधिभौतिकादि-तत्त्वत्रयसामरस्यमृषिः पश्यति ॥

### COMMENTARY—SUMMARY TRANSLATION

Agni is the controller of all. Cf. "Those who are born are controlled and those to be born are also controlled by Agni" ( Ṛg. I-66-8 ). Agni controls all and so he is known as Yama. Inspired by his light, She is born of mountains in this world. She has abundant mental energy. She is a power associated with Agni. She has the power of creating abundant food in this world. Oh ! you goddess, salutations to you. Here the Ṛshi identifies Yamunā, Agni in the form of waters, and the mind respectively with the Adhibhūta, Adhidaiva and Adhyātma aspects of the same eternal and primal reality.

## तृतीया ऋक् ।

या विद्युतं इन्द्रादन्तरिक्षात् परि
सं स्रवन्ती याऽध्यमृता समूळ्हा ॥
इन्द्राणी स्वर्वती वाक्चितिः सा
तस्यै देव्यै सरस्वत्यै नमोऽस्तु ॥ ३ ॥

पदपाठः – या । विऽद्युतः । इन्द्रात् । अन्तरिक्षात् । परि ।
सम्ऽस्रवन्ती । या । अधि । अमृता । सम्ऽऊळ्हा ॥
इन्द्राणी । स्वःऽवती । वाक् । चितिः । सा ।
तस्यै । देव्यै । सरस्वत्यै । नमः । अस्तु ॥

Indeed, from lightning, Indra and the mid-air, she gushes forth and is immortal and hidden. She is Svaravatī, is Indrāṇī that is born of Indra, and she is the power of speech. Salutations to her who is Devī Sarasvatī.

## अन्वयभाष्यम् ।

या खलु इन्द्रात् मध्यमात् अन्तरिक्षात् लोकात् विद्युतः सकाशात् संस्रवन्ती च्यवमाना अधि अधिष्ठानरूपा अमृता अमृतरससत्त्वा समूळ्हा समूढा गुह्या अस्ति सन्धिरूपत्वाद् गुप्तगामिनी इति प्रसिद्धा, सन्धिस्थानायतनत्वाद् वा, तच्च द्यावा-पृथिव्योः गङ्गा-यमुनयोश्च तयोः उभयोरेव प्रत्यक्षत्वदर्शनात्, रोदस्योः सितासितयोश्च नद्योः तथा प्रसिद्धेः, सा मध्यमा इन्द्राणी इन्द्रदैवत्या ऐन्द्री स्वरवती सूक्ष्मस्वरयुक्ता वाक् वाग्रूपा चितिः चेतनात्मिका तेजोमयवाग्रससत्त्वसम्पन्ना सरस्वती भवति, तस्यै देव्यै सरस्वत्यै सरिद्रूपायै नमः अस्तु इति ॥ अत्र सरस्वत्याः नद्याः इन्द्रस्य वाचश्च भौतिकादितत्त्वत्रयसामरस्यमृषिः पश्यति ॥

### COMMENTARY—SUMMARY TRANSLATION

She flows from Indra, from mid-air and lightning. She is ambrosia itself and is hidden from our sight. She is in the middle of the rivers, the Ganges and the Jamuna, and so, she is known as flowing unseen. She resides in a place where Dyau and Pṛthvī meet. Dyāvāpṛthvī and the rivers the Gaṅgā and the Yamunā are visible as the white and the blue colours. She is at the meeting place of both and is invisible. She is the power of Indra. She is Svaravatī, having a very soft voice. She has a glorious power of speech. Salutations to her, the goddess Sarasvatī who is in the form of a river. Here, Sarasvatī, Indra and Vāk are equated with the three principles of Ādhibhautika, Ādhidaivika and Ādhyātmika.

## चतुर्थी ऋक् ।

नमस्तेऽस्तु गङ्गे वरुणान्यै
नमस्तेऽस्तु यमुनेऽग्नाय्यै ॥
नमस्तेऽस्तु सरस्वतीन्द्राण्यै
नमो वोऽस्त्वापो देव्यो मातरः ॥ ४ ॥

पदपाठः – नमः । ते । अस्तु । गङ्गे । वरुणान्यै ।
नमः । ते । अस्तु । यमुने । अग्नाय्यै ॥
नमः । ते । अस्तु । सरस्वति । इन्द्राण्यै ।
नमः । वः । अस्तु । आपः । देव्यः । मातरः ॥

Salutations to you, Oh ! Ganges who are Varuṇānī; to you Jamunā who are Āgneyī, to you Sarasvatī who are Indrāṇī. Salutations to you all, Oh ! Water-deities who are the mothers.

## अन्वयभाष्यम् ।

हे गङ्गे ! ते तुभ्यं वरुणान्यै वरुणपत्न्यै वरुणदेवत्यायै तद्रसशक्त्यै नमः अस्तु, हे यमुने ! अग्नाय्यै अग्निशक्तिरूपायै ते नमः अस्तु, हे सरस्वति ! तुभ्यं इन्द्राण्यै इन्द्रदेवत्यायै वैद्युतज्योतिःसहचारिण्यै रससत्त्वायै नमः अस्तु, हे देव्यः दिव्यशक्तितत्त्वयुक्ताः मातरः वः युष्मभ्यं नमः अस्तु । अत्र प्रत्यक्षासु भौतिकासु सरित्सु गङ्गाप्रभृतिषु वारुणादिदिव्यदेवतातत्त्वं ऋषिः पश्यन् एतन्मन्त्रमुखेन अनुश्रावयति । ताश्च दिव्यशक्तयो वेदे प्रसिद्धाः, तथा च ऋङ्मन्त्रवर्णः मेधातिथेरार्षेयः, "इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये" (ऋ. मं. १-२२-१२) इति ॥ तिस्रः सरिदश्च वेदे प्रसिद्धाः, लोकेऽपि अस्मिन् प्रत्यक्षसिद्धाः नदीरूपाः, "इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या" (ऋ. मं. १०-७५-५) इति ॥

अत्र सामान्यतः सर्वासामपां वरुणदेवताधितत्त्वात् तद्द्वारा भुवनत्रयाधिष्ठातॄणां अग्नीन्द्रवरुणानां सत्त्वमनुश्रूयते, तासु अप्सु अग्न्यादीनां अन्तर्हितत्वात्, तथा च औपनिषदो यजुर्मन्त्रवर्णः, "नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय वारुण्यै नमोऽद्भ्यः" (ना. उ. ५-१) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh ! Ganges, salutations to you. You are the wife of Varuṇa and Varuṇa is your god. Oh ! Jamunā, who are the power of Agni, salutations to you. Oh Sarasvati ! salutations to you who have Indra as your god. Oh Water-deities possessed of heavenly powers, mothers of all, salutations to you.

Here the Ṛshi visualises the powers of the invisible gods Varuṇa and others in the form of rivers which are visible to the eye. He describes them as such. These heavenly powers are very well known in the Vedas. The seer Medhātithi sings of them. Cf. " I invoke here Indrāṇī, Varuṇānī and Āgneyī for our welfare in order that we may have a drink of Soma" (Ṛg. I-22-12). The three rivers are well-known in the Veda and are seen also in this world. Cf. "Meet me oh Gaṅgā, Yamunā and Sarasvatī" (Ṛg. X-75-5).

Generally all the waters or fluids are presided over by Varuṇa. Agni, Indra and Varuṇa, who preside over all the three worlds, have their essence in waters. Likewise, there is a Yajurveda mantra quoted in the Upanishads, "Salutations to Agni, Indra and to Varuṇa, who are in essence in the waters" (Nārāyaṇīya Up. 5-1).

## पञ्चमी ऋक् ।

आपो देव्यै गङ्गायै नमस्ते ।
यमुनायै नमस्तेऽमृतायै ॥
सरस्वत्यै ऋतायै नमस्ते ।
रसंवत्यै दैवतायै नमः ॥ ५ ॥

पदपाठः – आपः । देव्यै । गङ्गायै । नमः । ते ।
यमुनायै । नमः । ते । अमृतायै ॥
सरस्वत्यै । ऋतायै । नमः । ते ।
रसंऽवत्यै । दैवतायै । नमः ॥

Oh ! Water-deities, oh goddess Gaṅgā, salutations to you who are divine; salutations to you Yamunā who are Amṛta ( ambrosia ), salutations to you Sarasvatī who are Ṛtā ( the right path ) and salutations to the Water-deities who are full of essences.

## अन्वयभाष्यम् ।

हे आप: ! देव्यै दिवमधिष्ठितायै गङ्गायै सत्यात्मिकायै प्राणसत्त्वायै ते नम:, अमृतायै मन:सत्त्वायै यमुनायै ते नम:, ऋतायै वाक्सत्त्वायै सरस्वत्यै नम: । एवं समष्टिरूपेण प्रवहन्तीनां अपां जीवनानन्दामृतादिरससत्त्वं दिव्यज्योति:सत्त्वं च स्वत:सिद्धमनुश्रूयते "ओ३म् आपो ज्योतिरसोऽमृतं ब्रह्म भूर्भुव: सुवरोम्" (ना. उ. १५-२) इति ॥ सुप्रसिद्धोऽयं गायत्रीशिरोमन्त्र: यजु:स्वरूप: ॥

## COMMENTARY—SUMMARY TRANSLATION

Salutations to you Oh ! Water-deities; to the goddess Gaṅgā who is in the sky and who is the very body of truth, the power of life; to the Yamunā who is Amṛtā, the power of mind; to Sarasvatī, the power of speech. Salutations to all the deities together, who preside over the waters. The waters flowing here ( in this world ) in the form of rivers have, it is learnt, the power of giving life, bliss, and immortality. Evidently they convey heavenly light. The waters are full of light, juicy essence, ambrosia and Brahma. They are also in the form of Bhūḥ, Bhuvaḥ and Svaḥ.

## षष्ठी ऋक् ।

अमूमुत्तरां वरुणानीं गङ्गा-
मिमामग्नायीं तां यमुनां पूर्वाम् ॥
ऐन्द्रीं मध्यमां तां सरस्वतीं
प्राणैर्मनसा वाचा च प्र पद्ये ॥ ६ ॥

पदपाठः – अमूम् । उत्ऽतराम् । वरुणानीम् । गङ्गाम् ।
इमाम् । अग्नायीम् । ताम् । यमुनाम् । पूर्वाम् ॥
ऐन्द्रीम् । मध्यमाम् । ताम् । सरस्वतीम् ।
प्राणैः । मनसा । वाचा । च । प्र । पद्ये ॥

The highest heavenly Gaṅgā is presided over by Varuṇa. Yamunā the first on earth is presided over by Agni. Sarasvatī who is in between is presided over by Indra. I invoke and worship them with all my powers, with my mind and with my speech.

## अन्वयभाष्यम् ।

अथ अधिभौतिकादितत्त्वत्रयसामरस्ययोगेन तासां गङ्गादीनां उपासनां उपदिशति। अमूं विप्रकृष्टां उत्तरां द्युपदसंस्थां भूमौ उत्तरतः हिमगिरेः सकाशात् अवतरन्तीं वरुणानीं उत्तमलोकाधिष्ठात्रीं वरुणदैवत्यां दिव्यां गङ्गां प्राणैः प्राणसन्धारणार्थं प्रपद्ये इति उत्तरत्र अन्वयः। तथा इमां एतल्लोकाधिष्ठात्रीं पूर्वां पूर्वतः प्रथमलोकात् प्रवहन्तीं अग्नायीं अग्निदैवत्यां यमुनां मनसा प्रपद्ये, मध्यमां मध्यमलोकाधिष्ठात्रीं भूमौ तु सितासितयोः सरिदोः गङ्गायमुनयोः तयोरेव सन्धिरूपां अत एव गुप्तगामिनीं तां परोक्षां ऐन्द्रीं इन्द्रदैवत्यां सरस्वतीं वाचा प्रपद्ये । अत्र क्रियासत्त्वैः प्राणैः भावनासत्त्वेन मनसा ज्ञानसत्त्वप्रधानया वाचा च वरुणाग्नीन्द्रशक्तिरूपाः ताः गङ्गा–यमुना–सरस्वतीः भावयामि, तथा प्राण–मनो–वाग् वृत्तिभिः सन्धारयामि, ता एताः तिस्रः सरिदः अन्तरात्मनि सिद्धाः चिदात्मनः सकाशात् अजस्रधारया नित्यं प्रवहन्तीः अनुसन्दधामि क्रियाभावनासंविच्छक्तिरूपाः ताः करणत्रयेण समुपास्ये इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Now we are told about the devoted worship of the Gaṅgā, Yamunā and Sarasvatī by equating them with the physical, psychological and spiritual forces. The Gaṅgā is heavenly. She who is in the highest and the remotest sky descends on this earth. She is Varuṇānī, that is presided over by Varuṇa.

The Yamunā who is here on this earth is presided over by Agni. The Sarasvatī who is in between these two rivers, and also is their very confluence, is hidden and is invisible. She is presided over by Indra. I worship and attain them respectively with the life-forces which represent action, with mind which is mainly deliberative, and with speech which leads to knowledge. I take it that the Gaṅgā, Yamunā and Sarasvatī are full of the powers of Varuṇa, Agni and Indra; and so I worship them with Prāṇa, Manas and Vāk. These three rivers or forces are there continuously active and issuing from Chidātmā (supreme consciousness) and flowing towards the Ātmā. I meditate on them all.

## सप्तमी ऋक् ।

भवंत्यो गङ्गा यमुना सरस्वती
आपो मातरो मृळयन्तु मामिह ॥
आपो देव्यस्तिस्रो मातरस्ता मम
मातरः पुत्रमिव स्वमीं मामवन्तु ॥ ७ ॥

पद्पाठः – भवंत्यः । गङ्गा । यमुना । सरस्वती ।
आपः । मातरः । मृळयन्तु । माम् । इह ॥
आपः । देव्यः । तिस्रः । मातरः । मम ।
मातरः । पुत्रम्ऽइव । स्वम् । ईम् । माम् । अवन्तु ॥

May the revered Gaṅgā, Yamunā and Sarasvatī who are Water-deities bless me here with happiness. Those Water-deities are my three mothers. May they protect me as theie own son.

## अन्वयभाष्यम् ।

भवत्य: पूज्याः गङ्गा यमुना सरस्वती च परस्परं सङ्गताः मातरः सत्यः तेन स्वेन सामरस्येन सिद्धरसेन इदं विश्वं सर्वं प्राणिसङ्घपूर्णं मृळयन्तु सुखयन्तु । तथा ताः आप: देव्य: अब्देवतात्मान: मम अस्य विश्वस्य च मातरः पुत्रमिव विश्वं मां च चेतनार्थं ईं शरीरं च सदा अवन्तु प्राणसञ्जीवनेन रक्षन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

May the revered Gaṅgā, Yamunā and Sarasvatī who are really three in one, bless this universe which is full of living beings, by the harmony and happiness achieved by their very union. Likewise, those Water-deities are my mothers, and mothers of this universe. May they protect me and protect

this universe, so that we may get all the energy for our life. May these waters protect this body also for the purpose of realising the truth.

अष्टमी ऋक् ।

नमस्ते गङ्गे यमुने सरस्वति
समापो मातरो मळयत मह्यम् ॥
विश्वं ममैनो वहत ज्योतिषाऽऽत्मन्
दर्शयत ज्योतिर्विश्वस्य दर्शयत् ॥ ८ ॥

पदपाठः – नमः । ते । गङ्गे । यमुने । सरस्वति ।
सम् । आपः । मातरः । मळयत । मह्यम् ॥
विश्वम् । मम । एनः । वहत । ज्योतिषा । आत्मन् ।
दर्शयत । ज्योतिः । विश्वस्य । दर्शयत् ॥

Oh Gaṅgā, Yamunā and Sarasvatī, salutations to you. May you all bless me, oh Water-deities. May you wash away all my sins and purify me. Show me the light which illumines the whole universe.

अन्वयभाष्यम् ।

हे गङ्गे ! यमुने ! सरस्वति ! भवत्यः रसवत्यः विश्वप्राणसञ्जीवनसत्त्वरसपूर्णाः सौमनस्याः सन्मानससत्त्वरसप्रदाः दिव्यसोमरससत्त्वस्वरूपाः हे मातरः ! आपः ! युष्मभ्यं नमः अस्तु । यूयं स्वेन दिव्यरसेन विश्वं मळयत सुखयत, मम विश्वं एनः दोषजातं ज्योतिरात्मनि वहत, मां निमृजत शुद्धसत्त्वं सम्भावयत, अन्तरात्मनि ज्योतिषा स्वकीयेन विश्वस्य दर्शयत् प्रकाशकं तत् परमं ज्योतिः दर्शयत पवित्रीकरणेन तत्साक्षात्कारपात्रं मां कुरुत इति भावः ॥

॥ इति सप्तमेऽनुवाके तृतीयं अप्सूक्तम् समाप्तम् ॥

COMMENTARY—SUMMARY TRANSLATION

You are Rasavatyaḥ ( full of essence ); you have the power of reviving the whole universe; you are capable of blessing your devotees with goodwill, and you contain in yourselves the heavenly life giving Soma rasa. Oh ! Water-mothers, salutations to you. May you delight the universe with your heavenly essence. By Tapas, may you purify me. Within the self, with your light, show me the supreme light which illumines the whole universe. That is, by purifying me, make me worthy of realising it.

Thus ends the Third Hymn in the Seventh Section.

अथ चतुर्थं अप्सूक्तम् ।

अनुवाकः ७ । सूक्तम् ४ । ऋचः १-७ ॥

विद्युतोऽमूं ज्योतिषः सप्त, दैवरातो वैश्वामित्रः, आपः, त्रिष्टुप् ।

अन्त्यास्तिस्रो जगत्यः ॥

**Now this the Apsukta, Fourth in the Seventh Anuvaka**

**Section VII, Hymn 4, Riks 1-7 - AP**

This Hymn beginning with 'Vidyutomūm jyotishaḥ' contains seven Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi. Waters are the gods, and the metre is Trishṭup, and the last three are in Jagatī.

अथ प्रथमा ऋक् ।

विद्युतोऽमूं ज्योतिषः प्रजातां दिव्यां
मातरमीं सहसा स्व१ः स्वरन्तीम् ॥
रुद्राणीं स्वर्धुनीं तामिमां गङ्गा-
मपो देवीः शरणं प्रति प्र पद्ये ॥ १ ॥

पदपाठः – विऽद्युतः । अमूम् । ज्योतिषः । प्रऽजाताम् । दिव्याम् ।
मातरम् । ईम् इति । सहसा । स्व१रिति स्वः । स्वरन्तीम् ॥
रुद्राणीम् । स्वःऽधुनीम् । ताम् । इमाम् । गङ्गाम् ।
अपः । देवीः । शरणम् । प्रति । प्र । पद्ये ॥

She (Ganges) is born of the light of lightning; she is the heavenly mother. Soft is the sound as she moves. She is the consort of Rudra and the sky is full of her sound. I take refuge in Gaṅgā who is the goddess of Waters.

अन्वयभाष्यम् ।

विद्युतः विद्युतः अधि-ज्योतिषः अधिदैवतसत्त्वात् सम्प्रजातां प्रत्यक्षेण प्रादुर्भूतां, सहसा बलेन स्वः दिवि ईं इति सूक्ष्मनिनदरूपेण स्वरन्तीं शब्दायमानां मातरं विश्वमातृस्वरूपां विश्वोत्पादनसत्त्वां मातृवत् स्वरसेन विश्वसञ्जीवनपरां ईं एनां स्वर्धुनीं आकाशधमनरूपां तेजोध्वनिस्वरूपां च रुद्राणीं रुद्रेण सरवेण वैद्युतेन ज्योतिषा संहितां स्वरसत्त्वात्मिकां अत एव रुद्रपत्नी इति वेदे विश्रुतां तां परोक्षसिद्धां दिव्यां व्योमसंस्थां इमां भुवि प्रत्यक्षं प्रवहन्तीं गङ्गां अपः देवीः अब्देवतात्मिकां आत्मपावनार्थं शरणं सम्प्रपद्ये अनन्यशरण्यां सम्भावयामीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Born of the light of lightning, she makes a fine sound in the sky. She is the mother of the universe, capable of generating the universe and of revising the universe. She is blowing in the sky a sweet sound. She is one with Rudra. She is the light of lightning combined with sound and full of essence. She is the wife of Rudra and reputed to be so. She is invisible as a heavenly being in the sky, but she flows here on earth as Gaṅgā, the goddess of Waters. I worship her with great devotion as the only resort for the purification of my soul.

## द्वितीया ऋक् ।

महीं मातरं विश्वस्यैव योनिं
दिव्यां रुद्रेण स्वः स्रवन्तीं भुवम् ॥
रुद्राणीं रुद्रतनूं तामिमां गङ्गा-
मपो देवीः शरणं प्रति प्र पद्ये ॥ २ ॥

पदपाठ :– महीम् । मातरम् । विश्वस्य । एव । योनिम् ।
दिव्याम् । रुद्रेण । स्वरिति स्वः । स्रवन्तीम् । भुवम् ॥
रुद्राणिम् । रुद्रऽतनूम् । ताम् । इमाम् । गङ्गाम् ।
अपः । देवीः । शरणम् । प्रति । प्र । पद्ये ॥

She (Ganges) is the great and the revered one; she is the mother of this universe; she is a heavenly being flowing downward with Rudra to the earth; she is Rudrāṇi, the very body of Rudra. That Gaṅgā, who is the goddess of Waters, I worship and bow down.

## अन्वयभाष्यम् ।

महीं महतीं पूज्यां च सतीं विश्वस्यैव जगतः समग्रस्य योनिं आदिकारणभूतां केवलं रसात्मिकां मातरं आदिजननीम्, "तमिद् गर्भं प्रथमं दध्र आपः" (ऋ. मं. १०-८२-६) इति ऋङ्मन्त्रवर्णः, "अप एव ससर्जादौ" इति च मनुः ॥ याः आपः स्थूलभूतानां जलानां सूक्ष्मसत्त्वानां रसानां च मूलभूताः विद्युच्छक्तेरपि आश्रयभूताः भवन्ति, याभ्यश्च पुनः विद्युदाविर्भवति, ता एवात्र अप्शब्दार्हा इति भावः ॥

दिव्यां द्युलोकस्थतेजःसम्बन्धिनीं रुद्रेण विद्युदात्मना विश्वप्राणसत्त्वेन सह स्वः दिवः सकाशात् भुवं प्रति संस्रवन्तीं वर्षणतः अवतरन्तीं रुद्राणीं भगवतः रुद्रस्य पत्नी-

स्थानीयां रुद्रतनूं रुद्रस्य विद्युदात्मनः स्थूलाधंशरीररूपां तां इमां गङ्गां अब्देवतात्मिकां शरणं प्रपद्ये ॥ अत एव सगरकुलपावनार्थं संस्तुतां आकाशगङ्गां तां पृथिवीं प्रति वर्षणरूपेण अवतरन्तीं रुद्रः स्वीयैः विद्युत्किरणरूपैः केशैः ज्योतिर्मयैः सन्दधारेति पौराणिकानां कथाप्रसिद्धिः सङ्गच्छते इति ॥

## COMMENTARY—SUMMARY TRANSLATION

She is the great and worshipful goddess, the original source of this universe, the first mother in the form of fluid-essence. Cf. " He created waters first " ( Manu Smṛ.), "The Waters bore the first embryo " ( Ṛg. X-82-6 ). She is the origin of the waters and subtle essences which we see: she is the support of the very power of lightning; from waters lightning is born; she is the heavenly being related to the light of the sky; she is one with the lightning which is universal life, flowing down to the earth from the sky; she comes down to earth in the form of a water-fall; she is the wife of Bhagavān Rudra, the physical body of Rudra which is the lightning. It is such Gaṅgā, the deity of Waters whom I worship.

Therefore, the Gaṅgā of heaven was invoked by Bhagīratha for purifying the race of Sagara, and when she descended to earth in the form of a mighty cascade, Rudra bore her in his matted hairs in the form of rays of lightning. This is the story well-known in mythology.

### तृतीया ऋक् ।

रुद्राणां मातरं विद्युतः स्रचं
सरस्वतीमन्तरिक्षे स्वरन्तीम् ॥
रौद्रेण ज्योतिषा पुनतीं गङ्गा-
मपो देवीः शरणं प्रति प्र पद्ये ॥ ३ ॥

पदपाठः – रुद्राणाम् । मातरम् । विऽद्युतः । स्रचम् ।
सरस्वतीम् । अन्तरिक्षे । स्वरन्तीम् ॥
रौद्रेण । ज्योतिषा । पुनतीम् । गङ्गाम् ।
अपः । देवीः । शरणम् । प्रति । प्र । पद्ये ॥

She is the mother of Rudras, flowing down from lightning; she is the Sarasvatī, making sweet sounds in the mid-air; she is purifying all with the light of Rudra; that Gaṅgā who is the goddess of Waters, I worship.

## अन्वयभाष्यम् ।

रुद्राणां एकादशप्राणानां मातरं निर्मात्रीं जीवनरसप्रदानेन रक्षन्तीं वर्धयन्तीं च, "माता रुद्राणां० अमृतस्य नाभिः" (ऋ. मं. ८-१०१-१५) इति मन्त्रवर्णे "मा गामनागामदितिं वधिष्ट" इति वाग्रससत्त्वायाः गां इति निर्देशात् सा रुद्राणां प्राणात्मनां माता रसात्मैवेति गम्यते, तथा "दशेमे पुरुषे प्राणाः आत्मैकादशः" (बृ. उ. ३-९-४) इति च ॥ एकादशप्राणानां रुद्रात्मत्वं अनुश्रूयते, तथैव "आपोमयः प्राणः" (छां. उ. ६-७-१) इति प्राणस्य अब्रसमयत्वं उपदिश्यते ॥ विद्युतः सकाशात् स्रुचं स्रवन्तीं विद्युच्छक्तेः प्राणसत्त्वं स्रावयन्तीं वा, अन्तरिक्षे स्वरन्तीं माध्यमिकया वाचा सह शब्दायमानां सरस्वतीं वाक्सत्त्वां रसात्मिकां च रुद्रेण वैद्युतेन सस्वरेण ज्योतिषा पविना पुनतीं पावनस्वभावां पावयित्रीं पावमानीं तां दिव्यां इमां दिव्यसत्त्वां देवतात्मिकां गङ्गां शरणं प्रपद्ये आत्मानं पावयितुं प्रत्यक्षं प्राप्नोमीति ॥

### COMMENTARY—SUMMARY TRANSLATION

She is the creatrix of the eleven Prāṇas, protecting them and making them grow with the very life-force. Cf. "She is the mother of Rudras and the very origin of Ambrosia" (Ṛg. VIII-101-15). "She is, being the very essence, the mother of Rudras; again, these ten Prāṇas are in an individual and the soul is the eleventh" (Bṛ. Up. III-9-4). Here, it is known that the eleven Prāṇas are Rudras. Further, "Prāṇa is full of Waters." (Chhā. Up. VI-7-1). This shows that Prāṇa is full of the essence of waters.

She is flowing forth from lightning or she is pouring the life-essence from lightning. She is Sarasvatī, resounding in the mid-air, with Vāk, presiding there; she is the force of Vāk or the essence, which purifies with the lightning of Rudra who wields the thunderbolt. That Gaṅgā, the heavenly one, I worship as the last refuge in order to purify myself.

## चतुर्थी ऋक् ।

प्राणानां तां जनित्रीं सहस्वतीं
मरुतां वाऽधि रुद्रियाणामन्तः ॥
धियश्चित्तीरनुचेतन्तीं गङ्गा-
मपो देवीः शरणं प्रति प्र पद्ये ॥ ४ ॥

पदपाठः — प्राणानाम् । ताम् । जनित्रीम् । सहस्वतीम् ।
मरुताम् । वा । अधि । रुद्रियाणाम् । अन्तः ॥

धियः । चित्तीः । अनु । चेतन्तीम् । गङ्गाम् ।
अपः । देवीः । शरणम् । प्रति । प्र । पद्ये ॥

She is indeed the generator of Prāṇas, full of strength; she is the mother, indeed of Maruts who are the sons of Rudra; she is the energiser of energy itself. That Gaṅgā who is the goddess of waters I worship.

## अन्वयभाष्यम् ।

प्राणानां दशानां सर्वेषां ज्ञान-कर्मेन्द्रियाणां जनित्रीं जनयित्रीं सहस्वतीं बलवतीं उत वा अपि वा रुद्रपुत्राणां रुद्रात् वैद्युतात् पुरुषात् आविर्भूतानां मरुतां वायुरूपाणां मरुद्देवता-स्वरूपाणां च जनयित्रीं, तथा चित्तः चैतन्यशक्तेः परस्याः चित्तीः चेतनात्मिकाः संविद्–इच्छा–क्रियाशक्तीः प्रति अनुसृत्य प्रत्यञ्चि अन्तरात्मनि चेतन्तीं चेतमानां तथा प्राणान् चेतयन्तीं तां इमां गङ्गां अब्देवतात्मिकां प्राणसञ्चेतनार्थं शरणं सम्प्रपद्ये सत्कामनया प्राप्नोमि इति ॥

### COMMENTARY—SUMMARY TRANSLATION

She is the mother of the ten Prāṇas and of the ten senses of knowledge and action. She is full of strength and she is the mother of Maruts, the gods in the form of Vāyu, born of Rudra, the lightning personified. She is the very power of energy. She energises the powers of knowledge, desire and action. Such Gaṅgā who is the very form of the goddess of waters, I worship.

## पञ्चमी ऋक् ।

पावका अमृतास्ताः सरस्वती-
दिव्या धियश्चित्तीः सन्दधानाः ॥
प्रवहन्तीर्विश्वमेनः सहमाना
अपो देवीः शरणं प्रति प्र पद्ये ॥ ५ ॥

पदपाठः – पावकाः । अमृताः । ताः । सरस्वतीः ।
दिव्याः । धियः । चित्तीः । सम्ऽदधानाः ॥
प्रऽवहन्तीः । विश्वम् । एनः । सहमानाः ।
अपः । देवीः । शरणम् । प्रति । प्र । पद्ये ॥

She is that eternal ambrosia, the purifier; she is full of Rasa, the essence; she is heavenly; she is the source of all the intellects and energy; she is ever flowing, enduring all the sin. She is the goddess of Waters. I worship her.

## अन्वयभाष्यम् ।

अमृतां अक्षयरसात्मिकां पावकां स्वयं पवित्रां पावकवत् अन्येषां पावयित्रीं, रसवतीं सर्वप्रियप्राणसञ्जीवनीयरसोपेतां तां दिव्यां निसर्गनिर्मलां धियः बुध्यादिसर्वेन्द्रियवृत्तीः तथा तन्मूलभूताः चितः चेतनाशक्तिकलाः सन्दधानां सन्धारयन्तीं, प्रवहन्तीं अखण्डधाराप्रवाहरूपेण वर्तमानां विश्वं एनः नीचैः पतनकारणीभूतं सर्वं दोषजातं सहमानां तद्दोषप्रक्षालनादिभारं निर्वहन्तीं अब्देवतारूपां तामिमां गङ्गां शरणं प्रपद्ये इति ॥

### COMMENTARY—SUMMARY TRANSLATION

She is always full of imperishable essence. Herself being pure, she is purifying others like the fire, the purifier. She is the essence which resuscitates life, which is dear to all—she is heavenly and pure by nature; she supports all the projections of intellect. She is like the sparks of energy, flowing incessantly, enduring all the sins which degenerate and cause all the errors. She is responsible for washing off all sins. That Gaṅgā, who is the goddess of Waters, I worship.

## षष्ठी ऋक् ।

आपो देव्यो मम जीवसे ब्रह्मणे
तपसा सूर्यं दृशे शिवा भवन्तु ॥
श्रद्धयाऽद्भिरुपवसँ स्तपसाऽह-
मपो देवीः शरणं प्रति प्र पद्ये ॥ ६ ॥

पद्पाठः – आपः । देव्यः । मम । जीवसे । ब्रह्मणे ।
तपसा । सूर्यम् । दृशे । शिवाः । भवन्तु ॥
श्रद्धया । अत्ऽभिः । उपऽवसन् । तपसा । अहम् ।
अपः । देवीः । शरणम् । प्रति । प्र । पद्ये ॥

May the Water-deities be auspicious to me for life, for the glory of Brahma and for my seeing the Sun eternally. Fasting only with water and full of faith and performing penance, I shall worship the goddess of Waters.

## अन्वयभाष्यम् ।

ताः एताः आपः देव्यः मम जीवसे चिरजीवनाय हेतवे ब्रह्मणे ब्रह्मवर्चसाय तपसे तपोयोगादिसाधनाचरणाय सूर्यं सर्वान्तर्यामिणं स्थावरजङ्गमात्मानं दृशे द्रष्टुं च शिवाः कल्याणकारिण्यो भवन्तु ॥ अयमहं श्रद्धया सहितः सद्भावनया नियतः सन् अद्भिः जलरसैः उपवसन् जलमात्राशनेन तदुपवासव्रतं आचरन् तपसा तेन अनशनरूपेण व्रतेन ताः दिव्याः अब्देवताः शरणं सम्प्रपद्ये सर्वात्मना प्राप्नोमीति ॥ अत्र "तप इति तपो नानशनात् परं यद्धि परं तद् दुर्धर्षं तद्दुराधर्षं तस्मात् तपसि रमन्ते" (ना. उ. २१–२) इति औपनिषदं ब्राह्मणानुवचनमेव प्रमाणम् ॥

## COMMENTARY—SUMMARY TRANSLATION

May those Water-deities be gracious to me and bless me with a long life for the glory of Brahma and for the power to perform Tapas, to practise yoga and to use other means of purification, so that I may be able to realise the Sun, the inner controller of all and the very soul of all immobile and mobile things on earth. Living on waters only and observing the fast, I worship those Water-deities. Thereby I attain the favour of the goddess of Waters. Cf. "There is no Tapas that excels non-eating. Because that which is transcendent cannot be attained or can be attained only with difficulty" (Nār. Up. 21–2).

## सप्तमी ऋक् ।

नमस्ते गङ्गे यमुने सरस्वति
समापो मातरो मृळयत मह्यम् ॥
विश्वं ममैनो वहत ज्योतिषाऽऽत्मन्
दर्शयत ज्योतिर्विश्वस्य दर्शयत ॥ ७ ॥

पदपाठः – नमः । ते । गङ्गे । यमुने । सरस्वति ।
सम् । आपः । मातरः । मृळयत । मह्यम् ॥
विश्वम् । मम । एनः । वहत । ज्योतिषा । आत्मन् ।
दर्शयत । ज्योतिः । विश्वस्य । दर्शयत ॥

## अन्वयभाष्यम् ।

अयं मन्त्रः पूर्वस्मिन् सूक्ते व्याख्यातः ॥

Already commented upon and translated ( Vide, the 8th mantra of the previous hymn ).

॥ इति सप्तमेऽनुवाके चतुर्थं अप्सूक्तं समाप्तम् ॥

॥ इति सप्तमः अब्देवत्यानुवाकः सम्पूर्णः ॥

Thus ends the Fourth hymn in the Seventh Section.

Thus ends the Seventh Section dedicated to Ap.

## अथ अष्टमः वैश्वदेव्योऽनुवाकः ।

### अथ प्रथमं गोसूक्तम् ।

अनुवाकः ८ । सूक्तम् १ । ऋचः १-१० ।

गावो रसेन गव्येन दश, दैवरातो वैश्वामित्रः, गावः, अनुष्टुप् ।

**Now this the Gosukta, First in the Eighth Anuvaka**

**Section VIII. Hymn 1. Riks 1-10**, Go,The COW

The First Hymn beginning with 'Gāvo Rasena gavyena' contains ten Ṛks; Daivarāta Vaiśvāmitra is the Ṛshi; Cows are the god and the metre is Anushṭup.

### अथ प्रथमा ऋक् ।

गावो रसेन गव्येन पृथिवी वनस्पतिभिः ।
अमुष्य तपसाऽदितिर्वर्धयन्तु मयि तेजः ॥ १ ॥

पद्पाठः – गावः । रसेन । गव्येन । पृथिवी । वनस्पतिऽभिः ।
अमुष्य । तपसा । अदितिः । वर्धयन्तु । मयि । तेजः ॥

May the cows with their products, the earth with all its vegetation, and Aditi ( the mother of gods ) with the heat and light of the sun increase the tejas (power and brilliance ) in me.

### अन्वयभाष्यम् ।

गावः गोमातरः गव्येन स्वात्मीयेन रसेन पयसा दुग्धादिना वा गोरसेन, पृथिवी इयं सर्वेषां प्राणिनां अपि जीवनाधारभूता भूमाता वनस्पतिभिः ओषधिवनस्पतिप्रभृतिभिः सह युक्ता सती, तथा अदितिः अखण्डात्मिका देवमाता द्यौः अमुष्य आदित्यस्य तपसा सर्वविमर्शमूलेन दिव्येन ज्योतिषा मयि शरीरे अन्तः मनसि प्राणे वाचि च तेजः दिव्यं सत्त्वं वर्धयन्तु इति ॥

COMMENTARY—SUMMARY TRANSLATION

May the motherly cows with their milk and other products, the earth with her herbs, trees and rich vegetation, and Aditi with the sun's heat and light which are the source of all the powers of intelligence increase divine strength in me, in the body, the mind, in the breath or vital air and in my speech.

## द्वितीया ऋक् ।

स्वं वत्सम्िव धेनवो मामभ्यायात पयोभिः ।
प्र यच्छत पयो मह्यं वत्सस्यं मे जीवनाय ॥ २ ॥

पदपाठः – स्वम् । वत्सम्ऽइव । धेनवः । माम् । अभि । आ । यात । पयःऽभिः ।
प्र । यच्छत । पयः । मह्यम् । वत्सस्यं । मे । जीवनाय ॥

Oh you milch cows, come to me full of milk just as you go to your calves. Give me who am your son, milk to live by.

## अन्वयभाष्यम् ।

हे धेनवः! पयोभिः स्वं निजं वत्समिव मां इमं गोसेवापरायणं अभ्यायात, मह्यं पयः प्रयच्छत, किमर्थं वत्सस्य पुत्रभूतस्य मे मम जीवनायेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh you milch cows, come to me with your milk in the same way as you go to your calves. I am always engaged in your service. Treat me as your calf. Give me milk. Why? So that I, your son, may live and prosper.

## तृतीया ऋक् ।

रौद्रं यदन्तर्धेनवो भवतीषु प्रतिष्ठितम् ।
तत् सृजत पयोऽजस्रं वत्सस्यं मे जीवनाय ॥ ३ ॥

पदपाठः – रौद्रम् । यत् । अन्तः । धेनवः । भवतीषु । प्रतिऽस्थितम् ।
तत् । सृजत । पयः । अजस्रम् । वत्सस्यं । मे । जीवनाय ॥

Oh milch cows, you have the milk associated with the god Rudra. Make it flow incessantly for me your son, so that I may live and prosper.

## अन्वयभाष्यम् ।

हे धेनवः! भवतीषु पूज्यासु युष्मासु अन्तः दोहनात् पूर्वं रौद्रं रुद्रदेवताकं यत् पयः प्रतिष्ठितं भवति, इति श्रुतिप्रसिद्धम्, "रौद्रं गविसत्" (ऐ. ब्रा.) इति च ब्राह्मणम्, तत् पयः अजस्रं सन्ततं सृजत, वत्सस्य मम जीवनायेति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh milch cows, in you who are adorable, there is milk associated with Rudra. Cf. "The milk in the cow is associated with Rudra" (Aita. Brā.). Make that milk flow freely and always, so that I, your son, may live and prosper.

## चतुर्थी ऋक् ।

यद् वायव्यं सं विसृष्टं स्वेन वत्सेनोत पीतम् ।

स्तन्यं तद् दत्त दोग्ध्रे मे वत्सस्य मे जीवनाय ॥ ४ ॥

पदपाठः – यत् । वायव्यम् । सम् । विऽसृष्टम् । स्वेन । वत्सेन । उत । पीतम् ।

स्तन्यम् । तत् । दत्त । दोग्ध्रे । मे । वत्सस्य । मे । जीवनाय ॥

Give me who am milking you that milk which is associated with Vāyu after being drunk by the calf, so that I, your son, may live and prosper.

## अन्वयभाष्यम् ।

यत् संविसृष्टं ऊधसि सन्त्यक्तं वायव्यं वायुदेवताकं पयः भवति, "वायव्यमुपावसृष्टम्" (ऐ॰ ब्रा.) इति च ब्राह्मणम्, उत स्वेन निजेन वत्सेन पीतम् पीतावशिष्टं स्तन्यं दुग्धं तत् दोग्ध्रे मे मह्यं दत्त, वत्सस्य मम जीवनायेति ॥ अत एव वत्सेन अपीतं दुग्धं अप्रशस्तमिति सिध्यति, एतेन च अग्निहोत्रार्थं पानार्थं च अनुचितं तत् शास्त्रतः प्रतिषिद्धमिति प्रतीयते "शास्त्राय च सुखाय च" इति न्यायेनेति ॥

## COMMENTARY—SUMMARY TRANSLATION

The milk that oozes from your udder, oh cow, is associated with Vāyu. Cf. "The milk oozing from the udder, is associated with Vāyu" (Aita. Brā.). It is the milk which remains after being drunk by your calf. Give me who am milking that surplus milk, so that I, your son, may live.

## पञ्चमी ऋक् ।

यदाश्विनं सत् सुधारं दुह्यमानमिहाश्विनौ ।

अमृतं तत् कल्पयतां वत्सस्य मे जीवनाय ॥ ५ ॥

पदपाठः – यत् । आश्विनम् । सत् । सुऽधारम् । दुह्यमानम् । इह । आश्विनौ ।

अमृतम् । तत् । कल्पयताम् । वत्सस्य । मे । जीवनाय ॥

The stream of milk during milking is associated with Aśvins. May the Aśvins render the milk into Ambrosia for me, your son, to live and prosper.

## अन्वयभाष्यम् ।

यत् सुधारं सुष्ठुधारया दुह्यमानं पयः आश्विनं अश्विदेवताकं सत् प्रसिद्धं वेदे, "आश्विनं दुह्यमानम्" (ऐ· ब्रा.) इति च ब्राह्मणम् ॥ "दुहामश्विभ्यां पयो अघ्न्येयं" (ऋ.मं. १–१६४–२७) इति च ऋङ्मन्त्रवर्णः ॥ तदिह अश्विनौ देवौ तौ ज्योतीरसात्मानौ सन्तौ अमृतं कल्पयतां स्वेन दिव्येन सर्वौषधसत्त्वपूर्णेन रसेन साक्षादेव सुधासत्त्वं भावयताम्, अत एव "धारोष्णममृतोपमम्" इति प्रसिद्धम्, "प्रायः पयोऽत्र गव्यं तु जीवनीयं रसायनम्" (अ. .हृ) इति च आयुर्वेदतत्त्वम्, तच्च अमृतकल्पनं वत्सस्य मम जीवनाय कल्पतामिति ॥

### COMMENTARY—SUMMARY TRANSLATION

The milk that is drawn out in streams while milking is associated with Aśvins. It is said so in the Vedas: Cf. "The milk that is being drawn is associated with Aśvins" (Aita. Brā.). "The cow which makes the milk flow through the Aśvins is not to be killed" ( Ṛg. I-164-27 ). May the Aśvins, the twin gods presiding over light and all juices or essences, render the milk into Ambrosia. This means that the Aśvins, in virtue of the essences of all herbs. should render the the milk into Ambrosia. Therefore, the well-khown statement, "The hot stream of milk resembles Amṛta." Ayurveda (Ashṭāṅga Hṛdaya) holds, "generally cow's milk is life-giving and rejuvenating." Give me the milk, oh motherly cows, so that I, your son, may live.

## षष्ठी ऋक् ।

इदं ते सोम कवोष्णं दुग्धं गव्यं मधु पयः ।
सौम्यमिदमस्तु पेयं वत्सस्य मे जीवनाय ॥ ६ ॥

पदपाठः – इदम् । ते । सोम । कवऽउष्णम् । दुग्धम् । गव्यम् । मधु । पयः ।
सौम्यम् । इदम् । अस्तु । पेयम् । वत्सस्य । मे । जीवनाय ॥

Oh Soma, this lukewarm and fresh-drawn cow's milk is associated with you and is sweet like honey. May this be a mild drink for me, your son to live and prosper.

## अन्वयभाष्यम् ।

हे सोम ! ते तुभ्यं त्वदर्थं इदं कवोष्णं ईषदुष्णं गव्यं गोसम्बन्धि मधु मधुस्थानीयं पयः, दुग्धं दुग्ध्वा सङ्गृहीतम्, अत एव सद्योदुग्धं पयः सोमदैवत्यं भवतीति श्रूयते, "सौम्यं

दुग्धम्" (ऐ. ब्रा.) इति ब्राह्मणम्। तदिदं पेयं पानयोग्यं पयः सौम्यं सोमपानसमानं आनन्दसत्त्वमयं सौमनस्यं च अस्तु, वत्सस्य मम जीवनायेति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh Soma, this lukewarm freshly drawn milk from the cow is sweet as honey and is for you. Therefore, such milk becomes associated with the god Soma. Cf. "Fresh-drawn milk gets associated with god Soma" (Aita. Brā.). This is so drinkable. May it become equal to the soma drink full of the essence of delight and that which pleases the mind. May it be available to me for life, to me, who is your son.

## सप्तमी ऋक्।

इमं मां वत्सं धेनवः सूप तिष्ठत मातरः ।
कामं दुहाना अमृतं पयः सन्धत्त सुवीर्यम् ॥ ७ ॥

पदपाठः – इमम्। मा। वत्सम्। धेनवः। सु। उपऽतिष्ठत। मातरः।
कामम्। दुहानाः। अमृतम्। पयः। सम्। धत्त। सुऽवीर्यम् ॥

Oh motherly milch cows, always stand by me who are your son, and give abundant milk which is energising and is like nectar.

## अन्वयभाष्यम्।

हे धेनवः! मातरः! भवत्यः अमृतं अमृतसधर्मकं पयः कामं यथेच्छं पर्याप्तं मनोरथं च दुहानाः सत्यः मां इमं धेनूपासकं सत्त्वशुद्धिसाधनतत्परं वत्सं सुष्ठु उपतिष्ठत सम्यक् सर्वदा उपतिष्ठध्वम्, तथा सुवीर्यं ब्रह्मवर्चसकरं वीर्यवत्तरं पयः सन्धत्तेति, अनया ऋषिः गवां सान्निध्यं अभिवृद्धिं दुग्धसमृद्धिं च याचते, गवामेव तासां अमृतरसनिधिरूपत्वात्, "अमृतस्य नाभिः" (ऋ. मं. ८–१०१–१४) इति तदनुश्रवणम्, "दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय" (ऋ. मं. १–१६४–२७) इति, "उप ह्वये सुदुघां धेनुमेतां सुहस्तो गो धुगुत दोहदेनाम्" (ऋ. मं. १–१६४–२६) इति च दुग्धसन्दोहनार्थं धेनोरुपाह्वानमनुश्रूयते ॥ तथैव यजुर्मन्त्रवर्णोऽपि भवति अस्मिन्नर्थे प्रमाणपदम् यज्ञादिसिद्धिप्रदम्, "आप्यायध्वमघ्न्या देवभागम्." (तै. सं. १–१–१) "आप्यायध्वमघ्न्या इन्द्राय भागम्" (शु. य. सं. १–१ – ) "ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः" (शु. कृ. य. १–१–१) इति च गोसमृद्धिप्रार्थना ॥

COMMENTARY—SUMMARY TRANSLATION

Oh motherly milch cows, who are giving Ambrosia-like milk and milk which is capable of satisfying any desire to the full. stand by me firmly and constantly. I am devoted to you and am practising self-purification. Be full of milk which brings me Brahma Varchas, the vigour and luminosity of Brahma. By this, the Ṛshi prays that the cattle be always with him and be always increasing. The cows are treasures of Ambrosia. "( They are ) the origin and source of Amṛta" ( Ṛg VIII-101-14 ). "The milch cows favoured by the Aśvins, are not to be killed. Let them prosper" ( Ṛg. I-164-27 ). "I who am milking this cow with a good hand call this cow a godly cow" ( Ṛg. I-164-26 ). Thus calling the cow for being milked is well-known. There is another Yajurmantra also with the same meaning.

## अष्टमी ऋक् ।

गव्यैः पुनीत पुनर्मां धेनवः पञ्चभी रसैः ।
पवित्रं पुनः पयसा चिरं गावो जीवयथ ॥ ८ ॥

पदपाठः – गव्यैः । पुनीत । पुनरिति । माम् । धेनवः । पञ्चऽभिः । रसैः ।
पवित्रम् । पुनरिति । पयसा । चिरम् । गावः । जीवयथ ॥

Oh milch cows, purify me again with the five essences of the cow. Oh cows, render me pure with milk and bless me with longevity.

## अन्वयभाष्यम् ।

हे धेनवः ! पुनः गव्यैः स्वात्मीयैः पञ्चभिः गोमूत्र–गोमय–दुग्ध–दधि–घृतरूपैः रसैः मां पुनीत, हे गावः ! तेन पञ्चगव्येन पुनीतं पवित्रं अपि मां उत्तरत्रापि पयसा चिरंजीवयथ इति, अनया पञ्चगव्येन आत्मनः पवित्रतां चिरं जीवितं च कामयमानः ऋषिः तदर्थं गोमातरं प्रार्थयते ॥

COMMENTARY—SUMMARY TRANSLATION

Oh milch cows, purify me again with the five essences of the cow, namely, the cow-urine, the cow-dung, milk, curds and ghee. Oh ye cows, having thus purified me with the five essences of the cow, make me a long-lived one. Here is a prayer by the Ṛshi to the mother cow, wishing for longevity and self-purification by the Pañcha Gavya ( mixture of five essences mentioned ).

## नवमी ऋक् ।

साकं वत्सेन दोग्ध्र्योऽमां वत्सं रक्षत मातरः ॥
युष्मान् त्सायमथं प्रातरुपायांतमिमं स्तन्यैः ॥ ९ ॥

पद्पाठः – साकम् । वत्सेन । दोग्ध्र्यः । माम् । वत्सम् । रक्षत । मातरः ।
युष्मान् । सायम् । अथ । प्रातः । उत । आऽयांतम् । इमम् । स्तन्यैः ॥

Oh milch mother-cows, protect me your son with milk who am coming to you morning and evening along with your calves.

## अन्वयभाष्यम् ।

हे दोग्ध्र्यो मातरः! वत्सेन निजेन साकं सहमिलिताः सत्यः भवत्यः वत्सं स्वकीयं भावितं सन्तं पुत्रभूतं मां सायं सायंसन्ध्यायां अथ पुनः प्रातःसन्ध्यायां च युष्मान् उप समीपे प्रति आयातं आगतं इमं मां गोसेवकं जनं निजं भक्तं स्तन्यैः पयोभिः संरक्षतेति ॥ अनया गोमातृभ्यः आत्मरक्षां ऋषिर्याचते, चिरसान्निध्येन तासां अनुदिनं अनुसन्ध्यं च नियतया उपासनया तपस्यन् गोसेवाव्रतपरायणः इति विशेषः ॥

COMMENTARY—SUMMARY TRANSLATION

Oh milch mother-cows, along with your calves, protect me with milk. I am your son and devotee coming to you in the morning and evening. The Ṛshi prays for protection from the mother cows by long and close association with them and by devoting himself to their service every morning and evening.

## दशमी ऋक् ।

गावो मे नित्यं सुपूतं स्रावयन्तु रसं स्वीयम् ।
पयोऽध्यन्तः प्र चेतयेज्ज्योतिर्विश्वस्य दर्शयत् ॥१०॥

पद्पाठः – गावः । मे । नित्यम् । सुऽपूतम् । स्रावयन्तु । रसम् । स्वीयम् ।
पयः । अधि । अन्तः । प्र । चेतयेत् । ज्योतिः । विश्वस्य । दर्शयत् ॥

May the cows make flow a stream of their pure milk which awakens in me the light of the sun, which illuminates the whole universe.

## अन्वयभाष्यम् ।

यत् पयः सत्त्वबुद्धि–सत्त्वशुद्धि–मनःशान्त्याद्यभिवर्धकगुणयुक्तं विश्वस्य सकलप्रपञ्चस्य दर्शयत् प्रकाशयत् सर्वावभासकं आदित्यं दिव्यं तत् परं ज्योतिः ज्योतिस्तत्त्वं अन्तः अधि–आत्मनि सम्यक् प्रबोधयेत् तत् तादृशं सुपूतं स्वयं पवित्रं गव्यं आत्मीयं पयः रसात्मकं अमृतं एवमेताभिः ऋग्भिः संस्तुताः गोमातरः मे मदर्थे स्रावयन्तु वर्षयन्तु इति ॥ अत्र गव्येन पयसा निर्वर्तितेन जीवनेन परिशुद्धान्तःकरणस्य स्वयमेव तदात्म–ज्योतिः प्रकाशते, स्वेन दिव्येन स्वरूपेण आविर्भवतीति यावत्, अनया ऋचा आत्मचैतन्य-ज्योतिषः प्रबोधं, तथा तत्र कारणीभूतं केवलं सात्त्विकं गव्यं पयश्च ऋषिः याचते, एतेन सत्त्वाहारात् सत्त्वशुद्धिर्भवितुमर्हतीति गम्यते । एतस्मिन् अर्थे औपनिषदं ब्राह्मणानुवचनमनुश्रूयते— "आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" ( छां. उ. ७-२६-२ ) इति ॥ तस्मात् सत्त्वशुद्ध्यर्थं गोरस एव सर्वथा संसेवनीयः इति ॥

॥ इति अष्टमेऽनुवाके प्रथमं गोसूक्तम् समाप्तम् ॥

### COMMENTARY—SUMMARY TRANSLATION

Cow's milk has the virtue of promoting and developing bright intellect and of purifying the body and mind. May that milk awaken in me the heavenly light par excellence, that same light which illuminates the whole universe. Let the mother-cows allow the flow of that kind of milk which is like nectar. These Ṛks are in praise of mother-cows.

By drinking cow's milk only, the internal organs become purified, and the light of Ātman begins to glow. It bursts out with its natural and heavenly effulgence.

The awakening of the light of the Ātman and its cause, namely the pure and purifying cow-milk are indicated here. It is further stated that good and pure food contributes to the purification of body and mind. Cf. "Pure food results in pure body and mind. Stable and clear memory accompanies a pure body and a pure mind. Intellect helped by good memory shatters all the knots of ignorance" ( Chhā. Up. VII--26-2 ).

Thus ends the first hymn in the eighth Section.

## अथ द्वितीयं गोसूक्तम् ।

अनुवाकः ८ । सूक्तम् २ । ऋचः १-१० ।

गावो मातरः पवित्रैः दश, दैवरातो वैश्वामित्रः, गावः सरस्वती श्रीः सोम इन्द्रः सविता आपः इति प्रत्यृचं देवताः, अष्टम्याः अग्निर्वायुः सूर्यः प्रजापतिश्च, नवम्या गावः, दशम्या ज्योतिः आदित्यं च, अनुष्टुप् ।

**Now this the Gosukta, Second in the Eighth Anuvaka**

**Section VIII, Hymn 2, Riks 1-10,** Go, The COW

The second hymn beginning with 'gāvo mātaraḥ pavitraiḥ' contains ten Ṛks; Daivarāta Vaiśvāmitra is the Ṛshi; Cows, Sarasvatī, Shrīḥ, Soma, Indra, Savitā, Āpaḥ are respectively the gods in seven Ṛks; Agni, Vāyu, Sūrya, Prajāpati are the gods in the eighthṚk; Cows are gods in the ninth; Light and Āditya are gods in the tenth Ṛk; and the metre is Anushṭup.

## अथ प्रथमा ऋक् ।

गोमातरः सुपवित्रैर्मेध्यैर्वो रसैः प्रपीतैः ।

मृत्योः सूपैमि तत् सत्यममृतोऽहं परिपूतः ॥ १ ॥

पदपाठः – गोमातरः । सुऽपवित्रैः । मेध्यैः । वः । रसैः । प्रऽपीतैः ।

मृत्योः । सु । उपं । एमि । तत् । सत्यम् । अमृतः । अहम् । परिऽपूतः ॥

Oh cow-mothers, having drunk your milk and other essences which are pure and sacred, and being purified as well as freed from falsehood, I attain truth and immortality.

## अन्वयभाष्यम् ।

हे गावो मातरः ! वः युष्माकं मेध्यैः स्वतःशुद्धैः देवतादियज्ञार्हैः पवित्रैः पवित्रीकरणसमर्थैः पविना त्राणदैः रसैः प्रपीतैः संसेवितैः पूतः पवित्रीकृतवाङ्मनःप्राणशरीरः सन् अत एव अमृतः अहं अस्मिन् लोके तथा अस्मिन्नेव शरीरे मृत्योः सकाशात् मरणस्वभावात् अनृतत्वात् क्षय-विकारादिरूपात् निर्मुक्तः सन् तत् परमं सत्यं अमृतत्वं उपैमि प्राप्नोमीति । अत्र स्वयं व्रताचरणे प्राशनार्थं पञ्चगव्यानि सङ्ग्रहिष्यन् ऋषिः प्रथमतः एतया ऋचा गाः मातृःप्रार्थयते । एतेन अन्योऽपि तथा प्रार्थयेत् इति अर्थात् सिध्यति ॥

COMMENTARY—SUMMARY TRANSLATION

Oh cow-mothers, drinking your milk which is naturally pure and sacred as well as worthy of being used in the sacrifice for gods, I have become pure in Vāk (speech), prāṇa (vital breath), manas (mind) and pure in body.

I have become immortal. Even in this body freed from mortality which is untruth and which is characterised by constant change and waste, I shall attain truth and immortality. In order to observe the vows, the Ṛshi requires Pañcha Gavya ( the five essences of the cow ). He prays to the cows for that Pañcha Gavya. This establishes that the first duty before observing the vows, is to take 'Pañcha Gavya' and pray to the cow-mothers.

## द्वितीया ऋक् ।

सरस्वत्यः सुपवित्रं मूत्रं विसृजत मह्यम् ।
सारस्वतमिदं मूत्रं गव्यं कल्पतां पीतये ॥ २ ॥

पदपाठः – सरस्वत्यः । सुऽपवित्रम् । मूत्रम् । विऽसृजत । मह्यम् ।
सारस्वतम् । इदम् । मूत्रम् । गव्यम् । कल्पताम् । पीतये ॥

Oh milch cows, let your urine flow. It is greatly purificatory and sacred. May the cow-urine associated with Sarasvatī be worthy of my drink.

## अन्वयभाष्यम् ।

हे सरस्वत्यः ! रसवत्यः गावः ! सुपवित्रं पवित्रीकरणसमर्थं मूत्रं मह्यं मदर्थं पवित्रार्थं विसृजत, इति गोमूत्रं सङ्ग्रहिष्यन् ऋषिः प्रार्थयते, अथ सारस्वतं सरस्वतीदेवताकं सङ्गृहीतं तदिदं गव्यं गोसम्बन्धि मूत्रं पीतये प्राशनार्थं कल्पतां योग्यं अस्तु इति ॥ अनेन उत्तरार्धेन समग्रया ऋचा वा तत् सङ्गृहीतं गोमूत्रं अभिमन्त्रयते, पञ्चगव्यकल्पे तथा अभिमन्त्रयीत ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh milch cows, for purposes of purification, pass the urine for me. Thus he prays and collects the urine. May this urine associated with the goddess Sarasvatī be worthy of my drink, says he. By this mantra, Sarasvatī in the form of urine, becomes worthy of my drink. By this latter half or the complete Ṛk, the Ṛshi consecrates the collected urine.

## तृतीया ऋक् ।

यद् वो विसृष्टं पुरीषं शुद्धं गृहीतं भूतये ।
इदं सौभाग्यमस्मभ्यं गव्यमा वहतु श्रियम् ॥ ३ ॥

पदपाठः – यत् । वः । विऽसृष्टम् । पुरीषम् । शुद्धम् । गृहीतम् । भूतये ।
इदम् । सौभाग्यम् । अस्मभ्यम् । गव्यम् । आ । वहतु । श्रियम् ।

Oh milch cows, cow-dung which you throw out is pure and collected for our prosperity and welfare. May this cow-dung bring us riches and affluence.

## अन्वयभाष्यम् ।

हे गावः ! वः युष्माकं यत् पुरीषं विसृष्टं भवति, शुद्धं तद्विसर्जनसमये अन्तरिक्षस्थं ग्राह्यम्, भूमिष्ठमपि तद्गोमयं उपरितनं अधस्तनं च परित्यज्य मध्यस्थमेव ग्राह्यं इति विहितम, तथा सङ्गृहीतं तद्गोमयं भूतये ऐश्वर्यार्थं समर्थं श्रीदेवताकं भवतीति भावः ॥ तदिदं सौभाग्यं सौभाग्यप्रदं सर्वदोषसंशोधकत्वात्, पवित्रतादिविशिष्टश्रेष्ठगुणाधायकत्वाच्चेति, गव्यं गोसम्बन्धि तत् गोमयं अत्र अस्मिन् पञ्चगव्ये श्रियं लक्ष्मीं आवहतु । अनया गोमयं सङ्गृण्हन्–सङ्गृह्य च पूर्वेणार्धर्चेन संस्तुत्य उत्तरेणार्धर्चेन तदभिमन्त्रयीत ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh cows, the cow-dung which you pass, is pure. It is preferable to collect it before it falls to the ground. The mid portion of cow-dung is to be collected leaving the first and the last, when it once falls on the ground. The cow-dung so collected is associated with Śrī, the goddess of wealth. This cow-dung is for one's good fortune as it cures all evils. May it bring us the goddess of wealth. Thus the cow-mother is to be praised with the former half of the mantra while.dung is being collected and the same is to be consecrated with the latter half of the mantra.

## चतुर्थी ऋक् ।

यद् वो दुग्धं मयस्करं धेनवः सौम्यममृतम् ।
इदं सौमनसायं नः पयः सोममा वहतु ॥ ४ ॥

पदपाठः – यत् । वः । दुग्धम् । मयःऽकरम् । धेनवः । सौम्यम् । अमृतम् ।
इदम् । सौमनसायं । नः । पयः । सोमम् । आ । वहतु ॥

Oh milch cows, may your milk which is pleasant, ambrosia-like invoke Soma, the moon in order to strengthen the mind.

## अन्वयभाष्यम् ।

हे धेनवः ! वः युष्माकं यत् खलु दुग्धं मयस्करं सुखकरं सौम्यं सोमदैवत्यं अत एव सत्त्वगुणमयं अमृतं सुधारसमयं तदिदं पयः नः अस्माकं सौमनसाय सत्त्वबुद्धिसमृद्धये तथा सद्विषयेषु प्रवृत्तये च सोमं मनसोऽधिदैवतं चन्द्रमसं दिव्यं आवहतु अस्मिन् पञ्चगव्ये आनयतु इति ॥ अनया ऋचा गोदुग्धं सङ्गृह्य ऋषिः तदभिमन्त्रयते दिव्यभावोदयाय ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh milch cows, may your milk which is pleasant, full of Sattva guṇa and of the essence of Ambrosia, help the promotion of goodwill in us, so that it may incline towards doing good only. May it invoke Soma, the presiding deity of mind, to purify this essence of Pañcha gavya. The Ṛshi consecrates with this mantra the milk collected for promoting divine consciousness.

## पञ्चमी ऋक् ।

यदिन्द्रियमिन्द्रहव्यं गव्यं दधि सँस्कृतं नः ।
इन्द्रो बलेन समस्मिन्नादधातु पुनः प्राणान् ॥ ५ ॥

पदपाठः – यत् । इन्द्रियम् । इन्द्रऽहव्यम् । गव्यम् । दधि । सम्ऽकृतम् । नः ।
इन्द्रः । बलेन । सम् । अस्मिन् । आ । दधातु । पुनरिति । प्राणान् ॥

May Indra infuse strength into the curds which are prepared for us, curds which strengthen all senses, and curds which are associated with Indra.

## अन्वयभाष्यम् ।

हे गावः ! यत् खलु इन्द्रियं चक्षुरादि सर्वेन्द्रियमूलभूतस्य प्राणसत्त्वस्य अनुग्राहकं तेजः, अथो अपि च ऐन्द्रं इन्द्रदैवत्यं गव्यं दधि नः अस्मदर्थं संस्कृतं आतञ्चनेन घनीभावसम्पन्नमस्ति । "आप्यायध्वमघ्न्या इन्द्राय भागम्" (शु. य. सं. १-१) इति यजुः, "ऐन्द्रं दध्यमावास्यायाम्" इति च दध्नः इन्द्रदेवताकत्वे वचनम्, "इन्द्रियं वा एतदस्मिंल्लोके यद्दधि, यद्दध्नाऽभिषिञ्चति इन्द्रियमेवास्मिंस्तद्दधाति" (ऐ.ब्रा.) इति च ब्राह्मणानुवचनम् । अस्मिन् पञ्चगव्ये मेलनार्थं गृहीते अस्मिन् दध्नि इन्द्रः प्राणाधिदेवतात्मा बलेन स्वेन सुवीर्येण वैद्युतेन तेजसा पुनः प्राणान् स्वसत्त्वभूतान् आदधातु पूरयतु इति, अत्र "ऐन्द्रः प्राणो अङ्गे अङ्गे विबोध्यत्" (तै.), "इन्द्रो मे बले श्रितः" (तै.) इत्यादीनि प्रमाणवचनानि उदाहरणीयानि ॥ अनया ऋचा तत् संस्कृतं संसिद्धं दधि द्रव्यं ऋषिः अभिमन्त्रयते, दिव्यभावाय ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh cows, curds contain the power which blesses all the senses such as the eyes etc. with vital power. It is associated with Indra. Curds for us are prepared well by making them hard by putting coagulating matter. Into the curds taken for mixing in the Pañcha Gavya, may Indra, the presiding deity of Prāṇas, pour his vital power with the strength of lightning.

With this mantra, the Ṛshi consecrates the curds.

## षष्ठी ऋक् ।

यद् वा तेज उन्मथितं गवां घृतं मूलं वाचाम् ।

तदादित्येन ज्योतिषा पुनः सङ्गच्छतामिदम् ॥ ६ ॥

पदपाठः – यत् । वा । तेजः । उत्ऽमथितम् । गवाम् । घृतम् । मूलम् । वाचाम् ।

तत् । आदित्येन । ज्योतिषा । पुनरिति । सम् । गच्छताम् । इदम् ॥

Ghee is the very power of the cow extracted by churning ( milk ). It is the essence and the origin of speech. May this ghee be invested with the light of Āditya.

## अन्वयभाष्यम् ।

यत् उन्मथितं दध्नः उन्मथनात् समुदितं तेजः तेजःस्वरूपं गवां घृतं प्रसिद्धं तेजोमयमिति । " तेजो वा एतत् पशूनां यद् घृतं यद् घृतेनाभिषिञ्चति तेज एवास्मिँस्तद्दधाति" ( ऐ. ब्रा. ) इति ब्राह्मणम् ॥ " गवि देवासो घृतमन्वविन्दन् " ( ऋ. मं. ४–५८–४ ) इति मन्त्रवर्णः, यच्च वाचां चतसृणां शरीरेऽन्तः आत्मनि आहत–प्रेरित–स्वरित–उच्चरितानां परापश्यन्तीमध्यमावैखरीरूपाणां मूलं हेतुभूतं इति च प्रसिद्धम् । अत एव "तेजोमयी वाक् " (छां.उ. ६–५–४) " तेजो वै घृतम् " इति च अनुश्रूयते ब्राह्मणानुवचनम् ॥ तदिदं अस्मिन् पञ्चगव्ये मेलनार्थं गृहीतं घृतं आदित्येन दिव्येन ज्योतिषा पुनः अस्मिन् दिव्यसत्त्वसम्पादनार्थं सङ्गच्छताम् इति । ऋषिरनया ऋचा गृहीतं घृतं पुनरभिमन्त्रयते पञ्चगव्यसत्त्वसिध्यर्थम् ॥

COMMENTARY—SUMMARY TRANSLATION

The ghee produced by churning the curds is known as Tejomaya. " The ghee of the cattle is indeed Tejas, " says the Brāhmaṇa. " The Devas got the ghee from out of the cows, " says the Ṛk ( Ṛg. IV-58-4 ). Vāk has four forms, the sound in the soul, the inspired, the resounded, and the expressed. That ghee is the original source of Vāk is well-known. So, " Vāk is full of Tejas " ( Chhā. Up. VI–5–4 ). Tejas is ghee, says the Brāhmaṇa.

May this ghee which is collected for being mixed with thc Pañcha Gavya, be invested with Tejas of Āditya. The Ṛshi consecrates with this mantra the ghee of Pañcha Gavya.

## सप्तमी ऋक् ।

सरस्वत्यो या अमृता आपो दिव्याः पावमान्यः ।

ताभिरद्भिरिमे गव्याः साकं पुनन्तु मां रसाः ॥ ७ ॥

पद्पाठः – सरस्वत्यः । याः । अमृताः । आपः । दिव्याः । पावमान्यः ।
ताभिः । अत्ऽभिः । इमे । गव्याः । साकम् । पुनन्तु । माम् । रसाः ॥

May these essences of the cows purify me with the waters which are full of essences, which are like nectar as well as heavenly and purificatory.

## अन्वयभाष्यम् ।

याः आपः सरस्वत्यः रसवत्यः दिव्याः अम्बुसङ्घातरूपाः वृष्टेः पूर्वं मेघरूपेण दिवि अन्तर्हिताः अमृताः अमृतात्मसधर्मिण्यः पावमान्यः दोष–पापादिपावनसत्त्वाः तथा तत्रापि कुशैः सह सम्मिलिताः सत्यः पावनसत्त्वशालिन्यो भवन्ति विशेषतः, “ एकविंशत्या दर्भपिञ्जूलैः पावयन्ति ” ( ऐ. ब्रा.) इति ब्राह्मणम्, ताभिः कुशसहिताभिः अद्भिः साकं कुशोदकैः सह इति यावत्, इमे गव्याः गोमूत्रादयः पञ्च गोरसाः मां पुनन्तु इति ॥

अनया ऋचा ऋषिः कुशोदकमभिमन्त्रयते, तथा मेळयति च पञ्चगव्येन सह दिव्यसत्त्वभावोदयार्थम् ॥

### COMMENTARY—SUMMARY TRANSLATION

The waters are full of essences. They are a collection of hidden waters in the sky in the form of clouds before raining. They are as good as Ambrosia. They are capable of curing and purifying us from all errors, sins etc. Especially when they are united with Kuśa grass, they get the power of purification. Cf. “ With a bundle of twenty-one pieces of darbha or Kuśa grass ( the waters ) purify ” says the Brâhmaṇa. With those waters combined with Kuśa, may these essences of cows, viz., cow-urine etc. purify me.

With this mantra, the Ṛshi consecrates the waters with Kuśa and mixes the same with Pañcha Gavya to invest it with divine qualities.

## अष्टमी ऋक् ।

गोभ्यः सरस्वत्यै श्रियै सोमायेन्द्राय सवित्रे ।
अद्भ्यो भूर्भुवः स्वः स्वाहा जुहोम्यग्नौ रसान् गव्यान् ॥ ८ ॥

पद्पाठः – गोभ्यः । सरस्वत्यै । श्रियै । सोमाय । इन्द्राय । सवित्रे ।
अत्ऽभ्यः । भूः । भुवः । स्व१रिति स्वः । जुहोमि । अग्नौ । रसान् ।
गव्यान् ॥

To the cows, Sarasvatī, Śrī, Soma, Indra, Savitā and the waters, I offer cows' products as oblations saying Bhūḥ, Bhuvaḥ, and Svaḥ.

## अन्वयभाष्यम् ।

अग्नौ पुरतः वेदिसदने प्रतिष्ठापिते इध्मह्वनादिना च प्रदीप्ते अग्निमुखादिना संसिद्ध पावके गव्यान् गोमूत्रादीन् सम्मिलितान् पञ्च रसान् कुशोदकैः सह सम्मेलनेन यथाविहितैः मन्त्रैः अभिमन्त्रितान् गवादिभ्यः सप्तभ्यः आवाहितदेवताभ्यः जुहोमि समर्पयामि, तत्र "गावो मातरः पवित्रैः" इत्यादिकया प्रत्येकया ऋचा, भूरिति अग्नये, भुव इति वायवे, स्वः इति सूर्याय, समस्ताभिस्तिसृभिः प्रजापतये च स्वाहा समर्पितमस्तु ॥ एवं स्वाहाकारान्तया एकादश आहुतीः जुहोमि इति ॥ एतेन तथा जुहुयात् इति अर्थोऽपि सम्पद्यते ॥

### COMMENTARY—SUMMARY TRANSLATION

In this fire, ignited in front, and kindled by putting the sticks and made ready with Agni, I offer the oblations of all the bovine products (Pañcha Gavya) along with Kuśodaka. I consecrate the mixture with the prescribed mantras and offer to the cows etc. and the seven gods who are invoked with the mantras beginning with 'cow-mothers,' with one mantra for each. Again, I offer oblations, with Bhūḥ to Agni, Bhuvaḥ to Vāyu and Svaḥ to Sūrya; and with all the three to Prajāpati and with Svāhā with every one of them. Svāhā means, may it be offered. Thus with the mantra ending with Svāhā, I offer the eleven oblations. So it is indicated that the oblations be offered in this manner.

## नवमी ऋक् ।

गावो वो मूत्रं पुरीषं यदु दुग्धं दधि सर्पिः ।
पावकान् वो रसानिमान् प्राश्नामि पञ्च पूतये ॥ ९ ॥

पदपाठः — गावः । वः । मूत्रम् । पुरीषम् । यत् । ऊम् इति । दुग्धम् । दधि । सर्पिः ॥
पावकान् । वः । रसान् । इमान् । प्र । अश्नामि । पञ्च । पूतये ॥

Oh cows, cow-urine, cow-dung, curds, milk and ghee which are the well-known five substances of yours are purificatory. For the purification of my body, I swallow them.

## अन्वयभाष्यम् ।

हे गावः! वः युष्माकं यत् मूत्रं पुरीषं दुग्धं दधि घृतं च इति प्रसिद्धं गोरसपञ्चकं तान् इमान् पावकान् पवित्रसत्त्वान् पञ्च रसान् पूतये आत्मनः शरीरेन्द्रियादेः समग्रस्य सत्त्वशुद्धये प्राश्नामि इति ॥ उकारः पादपूरणः ॥ अत्र ऋषिः तत् हुतावशिष्टं पञ्चगव्यं एतयर्चा प्राश्नाति ॥ अत्र यद्यपि "जुहोमि–प्राश्नामि" इत्यादिकं उत्तमपुरुषेणैव हवनादिकरणं

अनुश्रूयते, तथाऽपि यः इमं पञ्चगव्यकल्पमाचरेत् सः सर्वोऽपि जनः एवं मेलनं हवनादिकं च अनुतिष्ठेत् इति विध्यर्थोऽपि सम्पद्यते । एतेन पञ्चगव्यव्रतकल्पो व्याख्यातः इति वेदितव्यम् ॥

COMMENTARY—SUMMARY TRANSLATION

The Pañcha Gavya left over after offering the oblations is to be swallowed with this mantra. Here, the first person singular form, like Juhomi and Prāśnāmi, are used to indicate that the person himself performs the sacrifice. Even then, all those who perform the 'homa' of Pañcha Gavya have to do the mixing, offering oblations etc., as prescribed here.

## दशमी ऋक् ।

इदं वो व्रतेन रसैः पञ्चभिर्गव्यैः सुपूतः ।
उपैमि तपसाऽदित्यं ज्योतिर्विश्वस्य दर्शयत् ॥ १० ॥

पदपाठः – इदम् । वः । व्रतेन । रसैः । पञ्चऽभिः । गव्यैः । सुऽपूतः ।
उप । एमि । तपसा । आदित्यम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

Being purified by observing Go-Vrata ( observance in connection with the cow ) with the five bovine essences, I attain the light of Āditya, which illumines the whole universe.

## अन्वयभाष्यम् ।

हे गावः ! वः युष्माकं व्रतेन गोसेवारूपेण पयोव्रतेन तथा पञ्चगव्यादिरूपेण व्रतेन च नित्ययुक्तः सन्, तथा पञ्चभिः गव्यैः रसैः प्रपूतः पवित्रः अहं परिशुद्धशरीरेन्द्रियान्तःकरणात्मयुक्तः तपसे अर्हः सन्, तथा तेन तपसा शुद्धसत्त्वेन योगादिरूपेण साधनेन विश्वस्य जगतः दर्शयत् प्रकाशकं तत् आदित्यं दिव्यं परमं ज्योतिःस्वरूपं उपैमि प्राप्नोमीति ॥

अत्र यद्यपि सामान्यतः बाह्यदृष्ट्या गोस्तवनं गोसेवादिव्रतं पञ्चगव्यादिव्रतं च प्रतिपादितमिति प्रतीयते तथाऽपि सर्वदेवतात्मनः इन्द्रादित्यादिज्योतिःपुरुषस्यैवेदं व्रतमित्युन्नीयते, गवां सर्वदेवताधिष्ठानरूपत्वात्, गोशब्दस्य च वाग्–इन्द्रादिज्योतिःपरत्वाच्चेति ॥ तथा हि—" उतादः परुषे गवि " (ऋ. मं. ६-५६-३) इति गोशब्देन आदित्यस्य निर्देशः " आदित्योऽपि गौरुच्यते " ॥ इति यास्कः, तथा इन्द्रस्यापि गोस्वरूपत्वं, गवां च इन्द्रात्मत्वमनुश्रूयते ॥ " गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ॥ इमा या गावः सजनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् " ( ऋ. मं. ६-२८-५ )

इति इन्द्रस्य आदित्यात्मता, सूर्यस्य इन्द्रात्मता च, "यदद्य कच्च वृत्रहन् उदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे " ( ऋ. मं. ८–९३–४ ) इति ॥

एवमेव वाचः देव्याः आदित्यमातुः गोशब्देन निर्देशः, " गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ " ( ऋ. मं.१–१६४–२८ ) इति ॥ " अयं स शिङ्क्ते येन गौरभीवृता" ( ऋ.मं. १–१६४–२९ ) इति च ॥ एवमेव गवां रुद्रमातृत्वादिस्वरूपतत्त्वं उक्तं तत् सर्वमपि सङ्गच्छते तत्त्वदृशैव तदर्थोन्नयनेन तत्समन्वयात् ॥ तथा हि— " माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः ॥ प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट " ( ऋ. मं. ८–१०१–१५ ) इति ॥ " वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम् ॥ देवीं देवेभ्यः पर्येयुषीं गामा मा वृक्त मर्त्यो दभ्रचेताः" ( ऋ. मं. ८–१०१–१६ ) इति ॥

तदेतत् गोः—वाचश्च उभयोः तत्त्वं समानरूपेण आश्रावितं भवति ॥ एवं अस्याः सर्वदेवताधिष्ठानरूपायाः गोः व्रतमपि सार्वभौमस्य सर्वान्तरात्मनः इन्द्ररूपस्य आदित्यस्यैव व्रतं भवतीति प्रतिज्ञायते, गोव्रतस्य आदित्यव्रतस्य च उद्दिष्टं फलं समानमेव अनुश्रूयते सत्त्वशुद्धिरूपं निष्पापत्वं सौमनसत्वादिकं च । तथा हि— " प्र स मित्रमर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्" ( ऋ. मं. ३–५९–२ ) इति ॥ " आदित्यस्य व्रतमुपक्षियन्तो वयं मित्रस्य सुमतौ स्याम " ( ऋ. मं. ३–५९–३ ) इति च ॥ " तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम " ( ऋ.मं ३–५९–४ ) इति च ॥ अत्र अयं ऋषिः तदिदं सर्वं अर्थसत्त्वं सूक्ष्मदृशा अनुदृश्य उभयोः गोसूक्तयोः अन्तिमे मन्त्रे अनेन गोव्रतेन प्राप्यं परमं फलरूपं दिव्यं परं पदं दर्शयति ॥

" गावो मे यं सुपूतं स्रावयन्तु रसं स्वीयम । पयोऽध्यन्तः प्रचेतयेज्ज्योतिर्विश्वस्य दर्शयत् " ( छं. द. अनु. ८–१–१० ) इति ॥

" इदं वो व्रतेन रसैः पञ्चभिर्गव्यैः सुपूतः । उपैमि तपसाऽऽदित्यं ज्योतिर्विश्वस्य दर्शयत् " ( छं. द. अनु. ८-२-१० ) इति च ॥

॥ इति अष्टमेऽनुवाके द्वितीयं गोसूक्तं समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh cows, being purified by observing the Go-Vrata, the devotional observance, the Payovrata ( during which only cow's milk is drunk ) and the Pañcha Gavya Vrata, I become fit for austerities with a purified body and mind; and then by means of Yoga, I attain the light of Āditya which illumines the whole universe.

Here, for all appearances, it looks as though, generally, there is the praise of the cows, and observances involving cows' milk and Pañcha Gavya etc. But, it is to be interpreted that this is a vrata ( observance ) to Purusha only, who contains all gods and shines as Indra, Âditya etc. The cow contains all the gods, and the word ' Go ' indicates the very light and power which is Vâk, Indra, Âditya etc. It is transcendent. Cf. "In this bright cow" ( Ṛg. III-56-3 ); the cow here means Âditya; Yâska confirms this saying that " Âditya also is cow." So, the words Indra and ' Go ' are mutually inter-changeable. Cf. " the cows are the wealth, the cows are Indra, may they give me ( whatever I want ). " These cows are Indra, Oh, people" ( Ṛg. VI-38-5 ). Indra is also Âditya: "Now, oh killer of Vṛtra, that is the dark man, oh Sūrya, the purpose with which you rose has brought all under your sway, oh, Indra ! " ( Ṛg. VIII-93-4 ). Vâk, the mother of Âditya is indicated by the word ' Go '. Cf. " The cow caresses the rising Sun, her calf with a sound of love and Âditya makes a sound of love " ( Ṛg. I-164-28 ). And likewise, in reply to the cow whom he has accepted as mother, the cow is referred to as the mother of Rudra etc. Cf. " She is the mother of Rudras; daughter of Vasus; sister of Âdityas; the treasure of Ambrosia. And so, I tell the inquisitive people ' do not kill the cow, who is innocent and mother of all ' " ( Ṛg. VIII-101-35 ). Again, " She is a goddess and comes to me from the gods. Such a cow, the little-minded man kills " ( Ṛg. VIII-101-16 ). So the Vedas describe Vâk and the cow as one and the same.

Thus, we assert that the vow to the cow, which is the refuge of all gods, is indeed a vow to Âditya, who is Indra himself, the lord of the whole universe. The result of the vows to the cow and to Âditya, namely, the purification of body and mind, sinlessness, good will and so on are the same or similar. Cf. " Oh Mitra, Âditya, may he who observes your vows be rich in food, and be protected by you. He is neither killed nor conquered. Sin does not touch him from far or near " ( Ṛg. III-59-2 ). Again, " We having taken the vow to Âditya, are in the good books of Mitra " ( Ṛg. III-59-3 ). " May we be in the auspicious and good books of him ( Âditya ) who deserves a sacrifice " ( Ṛg. III-59-4 ).

Having all these in mind, with a discerning eye, the Ṛshi concluded the two hymns on the cow with this last mantra, which shows that the excellent result of the vow to the cow is the attainment of the supreme state of supra-consciousness.

Thus ends the second Hymn dedicated to the cow in the Eighth Section.

---

## अथ तृतीयं वैश्वदेव्यं सूक्तम् ।

अनुवाकः ८ । सूक्तम् ३ । ऋचः १-८ ।

नमस्ते देव सवितः अष्टौ, दैवरातो वैश्वामित्रः, विश्वेदेवाः, जगती ।
सविता वायुः इन्द्रः अग्निः सोमः आपः सरस्वती ब्रह्मणस्पतिः
इति प्रत्यृचं दैवताः ।

**Now this the Vaishvadevya Sukta, Third in the Eighth Anuvaka**

**Section VIII, Hymn 3, Riks 1-8,** VIŚVEDEVĀḤ

The third Hymn beginning with 'Namaste Deva Savitaḥ' contains eight Ṛks, Daivarāta Vaiśvāmitra is the Ṛshi; Viśvedevāḥ are the gods and the metre is Jagatī.

### अथ प्रथमा ऋक् ।

नमस्ते देव सवितर्दिवस्पते
तपसा स्व१ः सममुष्मिंस्तपतेऽन्तः ॥
अमुमादित्यं व्रतपतिं ब्रह्मणा
धीभिस्तपसोपवसन् प्र पद्ये ॥ १ ॥

पदपाठः – नमः । ते । देव । सवितः । दिवः । पते ।
तपसा । स्व१रिति स्वः । सम् । अमुष्मिन् । तपते । अन्तः ॥
अमुम् । आदित्यम् । व्रतऽपतिम् । ब्रह्मणा ।
धीभिः । तपसा । उप । वसन् । प्र । पद्ये ॥

Oh god Savitā, lord of the heavens, salutations to you who are blazing with tapas in the sky. I attain this Āditya who fulfils all vows. I attain him by staying near him and with mantras, intellect and austerities.

### अन्वयभाष्यम् ।

हे सवितः! विश्वस्य प्रसवितः! दिवस्पते! स्वर्लोकाधिपते! अमुष्मिन् परमे व्योमनि स्वः–अन्तः दिव्ये मण्डले तपसा अनवरतं तपसा तेजसा तपते तपस्यते ते तुभ्यं नमः, अमुं दिव्यं व्रतपतिं सर्वेषां व्रतानामधिपतिं सर्वकर्मसाक्षिणं आदित्यं अदितिपुत्रं ब्रह्मणा मन्त्रेण धीभिः सवितृप्रेरितैः बुद्ध्यादिभिः सर्वैरान्तर्यैः करणैः तद्धीयोगेन उपवसन् आत्मनः समीपे अन्तः निवसन्, तेन उपवासात्मकेन विषयाणां अनशनरूपेण एतेषु बाह्येषु विषयेषु प्रवृत्त्या तत्सेवनादिरहितेन निर्विषयात्मकेन केवलेन विमर्शरूपेण तपसा तत्तपोरूपादिव्रतरक्षण-

द्वारा तत्सिद्धये च पूर्णफलानुभवार्थं व्रतपतिं आदित्यं तमेव सम्प्रपद्ये अनन्यशरण्यभावेन प्राप्नोमीति ॥

अत्र अमुष्य आदित्यस्य व्रतपतित्वे प्रमाणात्मकं यजुः, तथा तस्य द्युलोकगृहपतित्वे ब्राह्मणानुवचनं च भवति ॥ " आदित्य व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राध्यताम्" ( तै. य. ) इति ॥ दर्शपूर्णमासादिव्रतग्रहणे समिधाधानमन्त्रः ॥ अमुष्य आदित्यस्य गृहपतित्वमपि अनुश्रूयते— " असौ वै गृहपतिः सोऽमुष्य लोकस्य गृहपतिः" (ऐ. ब्रा. ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Savitā, salutations to you who are the lord of the heavens, the lord of the sky and who are practising austerities incessantly and shining with blazing light in the high sky. You are the divine lord of vows. With mantras, with the intellect and with all internal senses inspired by Savitā, and with mind concentrated on you, I attain you through abstinence from sense-objects. I attain you by meditating on you to the exclusion of all other internal as well as external objects. Cf. " Āditya, lord of vows, I have undertaken the vow. May your grace help me to get through it and may it fructify for me " ( Tai. Yaj.). This mantra is repeated at the time of undertaking a vow and is used when offering the Samidha, the sacred stick, the twig to the sacrificial fire. " This Āditya is a Gṛhapati, i.e. the house-holder of the heavens " ( Ait. Brā. ).

## द्वितीया ऋक् ।

नमस्तेऽस्तु वायो देव गृहपते-
ऽन्तरिक्षे ज्योतिषा पवमानाय ॥
अमुं रुद्रपुत्रं तं मध्यमं सन्तं
प्राणैस्तपसोपवसन् प्र पद्ये ॥ २ ॥

पदपाठः – नमः । ते । अस्तु । वायो । इति । देव । गृहऽपते ।
अन्तरिक्षे । ज्योतिषा । पवमानाय ।
अमुम् । रुद्रऽपुत्रम् । तम् । मध्यमम् । सन्तम् ।
प्राणैः । तपसा । उपऽवसन् । प्र । पद्ये ॥

Salutations to you, Oh Vāyu ( wind-god ) the lord of the house and one who blows shining in the mid-air, I attain this son of Rudra who is in mid-air, by austerities of my vital breath and abstinence from sense-objects.

## अन्वयभाष्यम् ।

हे वायो ! देव—गृहपते ! अन्तरिक्षाधिपतित्वात् तस्य वायोः तद्गृहपतित्वम्, अतः अन्तरिक्षे स्वस्थाने बहिः अन्तःशरीरे च ज्योतिषा तेजःसत्त्वेन पवमानाय प्रवहते पावयते च ते नमः । अमुं मध्यमं मध्यमलोकाधिपतिं तं परोक्षसिद्धं नीरूपं सन्तं रुद्रपुत्रं रुद्राद् विद्युदात्मनः सकाशात् आविर्भूतं सन्तम्, प्राणैः तत्प्रेरितैः वायुसत्त्वैरेव आन्तर्यैः सर्वैः प्राणरूपैः करणैः उपवसन् निर्विषयात्मकेन अनशनरूपेण केवलं वायुसेवनरूपेण नियमेन तपसा आन्तर्येण संयमेन तं वायुरूपं मुख्यं प्राणं आन्तर्यतमं प्रपद्ये प्राप्नोमि इति ॥

अत्र वायोः व्रतपतित्वे प्रमाणात्मकं यजुः, गृहपतित्वे ब्राह्मणवचनं च भवतः । " वायो व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम " (तै.) (शु. य.) इति ॥ सोऽयं यज्ञीये व्रते समिधाधानमन्त्रः । " वायुर्वै गृहपतिः सोऽन्तरिक्षलोकस्य गृहपतिः " (ऐ.ब्रा.) इति ॥

### COMMENTARY—SUMMARY TRANSLATION

Oh God Vâyu ! salutations to you who are the lord of this body and who are in the mid-air externally. That is your abode. You blow with the power of light and purify all things also. This is the lord of mid-air who is born of Rudra, the purifying deity. I attain him by penance of internal senses which are themselves prâṇas ( life breaths ). I attain him by meditation on him. I practise living on air only, and with tapas, that is internal restraint, I attain Vâyu, who is the chief vital air and who is the innermost power.

Cf. " Vâyu is indeed the lord of the house. He is the householder of the mid-air " ( Ait. Brâ. ). And again, Oh Vâyu, Vratapati, I undertake the vow and may your grace help me to get through the same and may it fructify for me " ( Tait. Sam. ). This is a mantra used when offering Samidha, the sacred stick to the sacrificial fire.

## तृतीया ऋक् ।

नमस्तेऽस्त्विन्द्र ब्रह्मणस्पते
विद्युतः सहसाऽन्तरिक्षे स्वरते ॥
अमुं मरुत्सयुजमिन्द्रं ब्रह्मणा
वाचा तपसोपवसन् प्र पद्ये ॥ ३ ॥

पदपाठः – नमः । ते । अस्तु । इन्द्र । ब्रह्मणः । पते ।
विऽद्युतः । सहसा । अन्तरिक्षे । स्वरते ॥

अमुम् । मरुत्सऽयुजम् । इन्द्रम् । ब्रह्मणा ।

वाचा । तपसा । उपऽवसन् । प्र । पद्ये ॥

Salutations to you, Oh Indra, the lord of all mantras, who moves as sound in the mid-air, with the strength of lightning. This Indra is united with the Maruts. I attain him by fasting, by speech, by mantra and by tapas.

## अन्वयभाष्यम् ।

हे इन्द्र ! देव ! ब्रह्मणः सर्वस्यापि वेदस्य वाग्रूपस्य अधिपते ! विद्युतः ज्योतिषः सहसा बलेन अन्तरिक्षे स्वस्थाने स्वरते शब्दायमानाय इन्द्राय ते नमः अस्तु । अमुं विप्रकृष्टं सन्तं मरुत्सयुजं मरुद्गणेन सह युक्तं इन्द्रं ब्रह्मणा मन्त्रेण वाचा आत्मन्यन्तर्हितया उपवसन् निर्विषयः सन् तेन वाक्प्रवृत्तिरहितेन अनशनेन मौनव्रतरूपेण तपसा सम्प्रपद्ये अन्तर्निष्ठया प्राप्नोमीति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Indra, lord of all Vedas, salutations to you, who with the power of lightning move with sound in your own region. I attain you by abstinence from sense-objects. Indra is united with the Maruts. I attain him by the vow of silence, and by internal restraint.

## चतुर्थी ऋक् ।

नमस्ते अग्ने देव होतर्विश्पते

तेजसाऽन्तः पृथिव्यां प्रति ज्वलते ॥

इमं वैश्वानरं हविषा ब्रह्मणा

वाचा यजेऽहमुपवसन् प्र पद्ये ॥ ४ ॥

पद्पाठः – नमः । ते । अग्ने । देव । होतः । विश्पते ।

तेजसा । अन्तः । पृथिव्याम् । प्रति । ज्वलते ॥

इमम् । वैश्वानरम् । हविषा । ब्रह्मणा ।

वाचा । यजे । अहम् । उपऽवसन् । प्र । पद्ये ॥

Salutations to you, Oh Agni, who are the priest and the lord of the people. You are blazing with light on the earth. I attain this Vaiśvānara by offering oblations, by mantras and speech, I attain him by restraint of senses and meditation.

## अन्वयभाष्यम् ।

हे अग्ने ! देव ! होतः ! देवानां आह्वान-हविर्हवनादिकर्तः ! हे विश्पते ! प्रजानां अधिपते ! तुभ्यं व्रतपतये सत्य–मौन–शुचि–अनशनादिरूपाणां सर्वेषां यज्ञियानां व्रतानां अधिपतये स्वयं तत्समानव्रताय अग्नये तुभ्यं नमः अस्तु । एतेन अग्निरेव व्रतपतिः, तथा यजमानवत् तद्यज्ञसिद्धये स्वयमपि व्रती इत्युक्तं भवति । एतस्मिन् अर्थे बहवः ऋग्–यजु-र्मन्त्राः सन्ति—" त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः " ( ऋ. मं. ८–११–१ ) इति, " अग्निः शुचिव्रततमः " ( ऋ. मं. ८–४४-२१ ) इति च ऋचः ॥ " अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् " (तै.) इति दम्पत्योः यज्ञीय-व्रतग्रहणे समिधाधाने यजुर्मन्त्रः ॥ एवमेव अग्नि–यजमानयोः समानं यज्ञीयव्रताश्रयणानु-श्रवणम्—" अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि० सहनौ व्रतपते व्रतिनोर्व्रतानि" ( तै. सं) इति ॥ तस्मै यज्ञीयव्रतबद्धाय वेदिषदे यज्ञसिध्यै यज्ञवेद्यां प्रतिष्ठिताय तथा वेदिरूपायां समग्रायां पृथिव्यां अन्तः तपसा तेजसा प्रज्वलते सूक्ष्मेन तेजसा स्वयं प्रदीप्ताय ते नमः ॥ " इयं वेदिः परो अन्तः पृथिव्याः " ( ऋ. मं. १–१६४–३५ ), " वेदिमाहुः परमन्तं पृथिव्याः " (तै.) इति च तदनुश्रवणम् ॥

तं इमं वैश्वानरं विश्वेषां नराणां अन्तः शरीरवेदिकायां प्रतिष्ठितं एवं अन्तर्बहिरपि सिद्धं तं अग्निं हविषा पयसा घृतेन अन्नेन च त्रिवृतेन ब्रह्मणा मन्त्रेण च समन्त्रकेन स्वाहा-कारान्तेन वाचा निजान्तरया अग्निसत्त्वसम्पन्नया अन्तर्बहिरपि अहं यजे तद्यजनमनुतिष्ठामि, एतेन यज्ञेन तथा यज्ञार्थं यज्ञसिद्धयै च अन्तः उपवसन् अन्तर्निष्ठः सन् तथा अनशनादिव्रत-माचरन् तं अग्निं यज्ञपतिं प्रपद्ये प्रत्यक्षं प्राप्नोमीति ॥ अस्मिन् अर्थ यजुर्मन्त्रवर्णः, " अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात् सत्यमुपैमि " (शु.य. सं.) इति, " अनृतात् सत्यमुपैमि । मानुषाद्दैव्यमुपैमि । दैवीं वाचं यच्छामि " ( तै. ब्रा० ) इति च ॥ तदेतत् सर्वं व्रतं व्रतपतिः यज्ञपतिः सत्यं परमं ब्रह्मापि श्रद्धयैव प्राप्तुं शक्यम्, तस्मात् सा परा निष्ठारूपा श्रद्धैव उपवासादिषु यज्ञेषु व्रतेषु च प्रधानं साधनं कारणमिति च सम्पद्यते । " श्रद्धे श्रद्धापयेह नः " ( ऋ. मं. १०–१५१–५ ) " श्रद्धां यज्ञमारभे " ( तै. ), " श्रद्धया विन्दते वसु " ( ऋ. मं. १०–१५१–४ ) इति च तदनुश्रावणम् । " व्रतेन दीक्षामाप्नोति दीक्षया दक्षिणां दक्षिणया श्रद्धां श्रद्धया सत्यमाप्यते " ( शु. य. सं) इति च ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Agni, salutations to you who are the agent bringing down the gods and giving them oblations; you are the lord of all people, the lord of all vows as well. The Vratas or vows are: true speech, silence, cleanliness, fast etc. You are yourself observing similar vows.

There are many mantras in the Ṛgveda and the Yajurveda, bearing out this meaning. Cf. " You are Agni, the lord of Vrata ( vow ) or the protector of Vrata " ( Ṛg. VIII-11-1 ) " Agni is the best of those pure-minded vow-takers " ( Ṛg. VIII-44-21 ). " Oh, Agni, lord of Vrata, I undertake the vow, let me get through it by your grace and may it fructify for me " (Tait. Sam.). This mantra is used when Samidha is offered by the husband and wife when they take the sacrificial vows. " Agni, lord of Vrata, you are the lord of all the Vratas. Both you and I have to take vows equally " ( Tait. Sam. ).

Salutations to you, who sit, at the sacrificial altar with a sacred vow to see that the sacrifice is properly concluded. The whole earth is the sacrificial altar, in which you glow with subtle light. Salutations to you who are kindled by yourself. Cf. " In the innermost part of the earth, there is the altar " ( Ṛg. I-164-35 ). They say that there is the super-altar in the innermost part of the earth.

There is a mantra as follows: Cf. " Agni, the lord of vows, I undertake a vow. Let me achieve it by your grace. Let it fructify for me. By this vow, I will reach the truth from the untruth " ( Śukla Yaj. Sam. ). " I attain truth from untruth; I attain divinity from mortality; I utter divine speech " ( Tait. Brāh. ). All the vows, the lord of vows, the Yajus, the sacrifice, the lord of sacrifice, the truth, and the Supreme Brahma also is attainable by faith. Therefore, supreme faith is the major factor in sacrifice and vows like fast etc. Cf. " Oh Śraddhā, make us have faith and devotion " ( Ṛg. X-151-5 ). ( The whole sūkta is called Śraddhā Sūkta ). " I begin the sacrifice which is itself Śraddhā " ( Tait. ). " By keeping the vow, one gets initiated. Through initiation one gets consecrated. Consecration leads to piety (dakshiṇā ); from piety one gets faith; by faith Satya is attained. And Satya is the ultimate ( Śukla Yaj. Sam. ).

### पञ्चमी ऋक् ।

नमस्ते देव सोमामृतापां पते
मां वत्सं स्वं रसैराप्यायस्वामृतैः ॥
विश्वस्यैव जनितारं मनसाऽन्तः
सोमं तं तपसोपवसन् प्र पद्ये ॥ ५ ॥

पद्पाठः – नमः । ते । देव । सोम । अमृत । अपाम् । पते ।
माम् । वत्सम् । स्वम् । रसैः । आ । प्यायस्व । अमृतैः ॥
विश्वस्य । एव । जनितारम् । मनसा । अन्तः ।
सोमम् । तम् । तपसा । उपऽवसन् । प्र । पद्ये ॥

Salutations to you, Oh Soma, you who are immortal and lord of essences. Regale me your son, with your essences which are like Ambrosia. I attain that Soma which is the creator of this whole universe. I attain him by my internal powers, by tapas and by abstinence from sense objects.

## अन्वयभाष्यम् ।

हे सोम ! रसात्मन् ! देव ! देवतात्मन् ! अमृत ! अमृतात्मक सत्यस्वरूप ! अपां रसात्मनां अधिपते ! ते नमः, ते तव सुतं सुतवत् संवृत्तं मां इमं त्वदुपासकं अमृतैः रसैः अक्षय्यैः अविकृतैः सत्त्वमयैः आप्यायस्व तर्पय, अमुं परं देवतात्मानं विश्वस्यैवास्य जगतः जनितारं जनयितारं सर्वासां चिच्छक्तीनां अध्यक्षं तं परं दिव्यं देवतात्मानं मनसा सौम्येन सोमसत्त्वात्मकेन अन्तःकरणेन हृदयेन उप वसन् अन्तर्निष्ठः सन् अनशनादिरूपेण बाह्यविषयेषु अप्रवृत्त्यात्मकेन व्रतेन आत्मन्येव अन्तर्निष्ठया प्रपद्ये स्वरसेन प्राप्नोमीति ॥ सोमस्य विश्वजनयितृत्वं अनुश्रूयते — "सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः । जनिताऽग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः" (ऋ. मं) इति ॥ सोमस्य तस्य आनन्दादिरसात्मता च स्वतःसिद्धा ॥ "यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव" (ऋ. मं. ९-११३-११) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Soma, salutations to you who are full of Rasa ( essence ), who are heavenly, immortal and the lord of essences. May you gratify me, your son who is devoted to you. Bless me with your essences which are perennial, changeless and full of virility. You are the great god, the creator of this whole universe, the lord of all the powers of knowledge. I attain Soma, by the powers of my mind which is the internal organ presided over by Soma. I attain him by the vow of non-eating and living with restraint within and with love. Cf. "Bless me with that condition of consciousness, in which Ānanda ( bliss ), moda ( delight ), muda ( joy ), pramoda ( great joy ) abide and where all the desires of desire itself are fulfilled. Make me an immortal. Oh Soma, flow for the sake of Indra" ( Ṛg. IX-113-11 ).

## षष्ठी ऋक् ।

नमो वोऽस्तु देवीर्मातरो म आपो
विश्वस्मादेनसो मां पुनीत सद्यः ॥
पावमानीस्ताः शिवा विश्वभैषजी-
रद्भिरुपवसंस्तपसा प्र पद्ये ॥ ६ ॥

पद्पाठः – नर्मः । वः । अस्तु । देवीः । मातरः । मे । आपः ।
विश्वस्मात् । एनसः । माम् । पुनीत । सद्यः ॥
पावमानीः । ताः । शिवाः । विश्वऽभेषजीः ।
अत्ऽभिः । उपऽवसन् । तपसा । प्र । पद्ये ॥

Salutations to you, oh my mothers in the form of so many deities. Pray purify me now from all the sins. I attain the purifying waters, which are auspicious and medicinal by abstinence from food and by restraint and austerities.

## अन्वयभाष्यम् ।

हे आपः ! देव्यः ! देवतात्मानः ! मे मम मातरः मातृस्थानीयाः मातृवत् सम्माननीयाः सेवनीयाश्च स्थ, वः युष्मभ्यं ताभ्यः नमः अस्तु ॥ मां एनं विश्वस्मात् त्रिकरणादिकृतात् सर्वस्मात् एनसः नीचैः पतनकारणीभूतात् कल्मषात् सद्यः पुनीत पावयत मोचयत, पावमानीः पवित्रीकरणस्वभावाः विश्वभेषजीः सर्वौषधिरससत्त्वरूपाः ताः शिवाः कल्याणकारणीभूताः मङ्गलमयीः अपः अब्देवतात्मिकाः ताभिरेव अद्भिः उपवसन् अपोऽशनरूपेण तेन उपवासात्मकेन तपसा अनशनरूपेण व्रतेन प्रपद्ये तादृशपरमव्रतसिध्यर्थं तथा पाप–रोग–दोषादिसर्वकल्मषनिवारणार्थं तद्द्वारा आत्मनः सत्त्वशुद्ध्यर्थं च ताः अपः एव सर्वस्वभावेन शरणं व्रजामीति ॥ अत्र अनशनमेव परमं तपः सर्वार्थसिद्धिकारणीभूतमिति प्रतीयते । "तप इति तपो नानशनात् परं यद्धि परं तद्दुर्धर्षं तद्दुराधर्षं तस्मात् तपसि रमन्ते" (ना. उ॰ २०-२) इति तदनुश्रवणम् ॥ तत्रापि यदनशनरूपं तपः निर्दिष्टं तत् अपामशनेनापि सिध्यति इति गम्यते, "अपोऽश्नाति । तन्नेवाशितं नेवानशितम्" (तै.ब्रा.) इति तदनुश्रवणम् ॥ तदेतत् स्वरूपं लक्षणमनशनस्य यत् खलु अशितमपि अनशितमिवैव भवितुमर्हति इति मन्यते, तथा च विहितमनुश्रूयते — "यदशितमनशितमिव ( भवति ) तदश्नीयात्" ( श. ब्रा. १–१–२ ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh water-deities, you are my mothers. You are as good as my mother, so worshipful and worthy of my service. Salutations to you. Purify me immediately from all sins committed by the three instruments of action, viz., body, speech and mind, the sins which pull down all. You are the purifiers by nature and you have the powers of all medicines, you ( they ) are auspicious. I attain you, water-deities, by fasting, with waters only as my food, and by tapas. I attain you for the accomplishment of my vow and for the

purification of myself through removal of sin, disease, error etc. I take refuge in you, oh water-deities. "There is no tapas greater than non-eating" ( Nârâ. Up. 20-2 ). It is further known that Tapas in the form of non-eating bears fruit when the vow of drinking water only goes along with it. "Drinking of water only means neither eating nor non-eating" ( Tai. Brā.). So, this is the form and characteristic of real fast. "Though it (water) is drunk, it is as good as non-eating." Cf. "By eating ( drinking ) which it becomes as good as non-eating. That is the well-known dictum." ( Śata. Brâ. 1-1-2)

## सप्तमी ऋक् ।

नमस्ते देवि सरस्वति सुनीत्यै
रसवत्यै धीभिः संविदा स्रवन्त्यै ॥
वाचमिमां दिव्यां स्वरवतीं परां
वाचा यजेऽहमुपवसन् प्र पद्ये ॥ ७ ॥

पदपाठः – नमः । ते । देवि । सरस्वति । सुऽनीत्यै ।
रसऽवत्यै । धीभिः । सम्ऽविदा । स्रवन्त्यै ॥
वाचम् । इमाम् । दिव्याम् । स्वरऽवतीम् । पराम् ।
वाचा । यजे । अहम् । उपऽवसन् । प्र । पद्ये ॥

Salutations to you, Oh Devi Sarasvati, who are the good guide full of all essences, and who express yourself through the projections of intellect and knowledge. I attain Vâk ( speech ), the divine and Supreme One, who is full of resonance. I attain speech, through tapas and restraint from all sense-objects.

## अन्वयभाष्यम् ।

हे सरस्वति ! देवि ! सुनीत्यै सुनीतिरूपायै स्वाश्रितान् सन्मार्गेण नयन्त्यै, रसवत्यै अमृतानन्दादिसर्वरसयुक्तायै, धीभि: बुध्यादिभि: सर्वैरपि ज्ञानेन्द्रियै: सह योगेन संविदा संविदात्मिकया चेतनया स्रवन्त्यै अन्तर्बहिरपि रसरूपेण स्वरस्वरूपेण च वर्षन्त्यै ते नम: ॥ अमूं देवीं दिव्यां ज्योतिष्मतीं रस-शब्दादिप्रवाहरूपां स्वरवतीं ज्ञानसत्त्वपूर्णां तां शब्दतन्मात्रात्मिकां परां सर्वधीन्द्रियेभ्यः परतरां आन्तरतमां प्रत्यगात्मसत्त्वां वाचा सत्यादिधर्मगुणसन्नियतया वाचिकया मौनमुद्रात्मिकया प्रतीचीनया परया वाचा तपसा वाक्संयमादिरूपेण व्रतेन उपवसन् आत्मनि अन्तः सन्निष्ठया लीन: सन् तां परां वाचं प्रपद्ये तामेवानुसृत्य तदर्थात्मानं परां देवतां प्राप्नोमीति ॥ अस्मिन्नर्थे ऋङ्मन्त्रवर्णाः अपि भवन्ति प्रमाणभूताः,

"पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः । तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति" (ऋ. मं. १०–१७७–२) इति, "प्रतीचीं जग्रभा वाचमश्वं रशनया यथा" (ऋ. मं. १०–१८–१४) इति च ॥ "नानु ध्यायाद् बहूञ्छब्दान् वाचो विग्लापनꣳहि तत्" (बृ. उ. ४–४–२१), "तस्माद् ब्राह्मणः पांडित्यं निर्विद्य मौनेन तिष्ठासेत्" (बृ. उ. ३–५–१) इति च औपनिषदं तद्दर्शनम अध्यात्मतत्त्वोपबृंहितम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Oh Goddess Sarasvati, you are the very embodiment of good conduct. You lead those who take refuge in you, by a good path. You are full of all essences of Amṛta, Ānanda etc. You express yourself with energy. You are full of knowledge and light which manifest themselves in the form of resonant sounds. Salutations to you. This deity expresses herself in the form of essences and subtle sound, beyond all internal senses. She is the very substance of the in-dwelling soul. I attain her by controlled speech, by truth in the form of silence, by mind turned inward, and with tapas in the form of abstension of talk etc. and by inwardness. I attain the supreme Vāk: Following her, I attain the Ātmā, the Supreme God, the expression of Vāk. ' The soul-in the form of energy and the sun invest Vāk with sound. The Prāṇa, the vital air which is the musician resounds her, the Vāk within the heart. The Seers protect her, the Vāk, luminous with knowledge, the characteristic of Ākāśa, the inspirer of mind, within the innermost soul." (Ṛg. X-17-7-2). "Control her, the Vāk as you do a horse with reins" (Ṛg. X-18-14). The Upanishads also say the same thing. "One should not contemplate on too many words. That is certainly exhausting the Vāk" (Bṛ. Up. IV-4-21). "Therefore those who know Brahma should remain silent forgetting all scholarship and learning" (Bṛ. Up. III-5-1).

### अष्टमी ऋक् ।

तत् ते भगवन् इन्द्र ब्रह्मणस्पते
संविदाऽयं तपस्यन् अनु तुरीयम् ॥
पदं पश्यामि दर्शतं सम्परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत्  ॥ ८ ॥

पदपाठः – तत् । ते । भगऽवन् । इन्द्र । ब्रह्मणः । पते ।
सम्ऽविदा । अयम् । तपस्यन् । अनु । तुरीयम् ॥

पदम् । पश्यामि । दृशतम् । सम् । परि । इतम् ।

तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

## अन्वयभाष्यम् ।

एतन्मन्त्रार्थः पूर्वं व्याख्यातः ॥

अस्मिन् सूक्ते विशेषतः प्रत्येकस्मिन् "तपसा–उपवसन्" इति उपवाससञ्ज्ञकं अनशनरूपं यत् तपः दर्शितं तदेव किञ्चिद् विमृश्यते ॥ अस्मिन् लोके सर्वेषामपि प्राणभृतां "अशनं–अनशनं" इति च नियते सदा प्रवृत्ते द्वे वृत्ती भवतः, तत्र सर्वेषु विषयेषु व्याप्तिरूपा प्रवृत्तिरेव अशनं तथा तेभ्यो विषयेभ्यः असद्वस्तुसम्बद्धेभ्यः अनिष्टेभ्यश्च निवृत्तिरेव अनशनम् ॥ "अश् व्याप्तौ" (१२६४) इति धात्वर्थयोगात् ॥ तथैव बाह्येषु तेषु विषयेषु अप्रवृत्तिरपि अनशनरूपैव भवितुमर्हति, या तु औदासीन्यस्थितिरिति प्रसिद्धा ॥ "नैनमंहो अश्नोति" (ऋ. मं. ३–५९–२) "न तमश्नोति कश्चन" (ऋ.मं. १०–६२–९) इति च तदनुश्रवणम् ॥ एवमेव "अश् भक्षणे" (१५२४) इति धात्वर्थात् अशनं नाम भक्षणं, तथा अदनीयं अन्नं च भवितुमर्हति । "सर्वं स पूतमश्नाति स्वदितं मातरिश्वना" (ऋ. मं. ९–६७–३१) इति तद्दर्शनम् ॥ "अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यते" (बृ. उ. २–२) इति च ॥

"न तमश्नोति कश्चन न तदश्नाति किञ्चन" इति तयोरुभयोर्योगेन निदर्शनम् ॥ अत्र अनशनं नाम भक्षणात् निवृत्तिरूपं अभुक्तिरूपं च भवितुमर्हति ॥ एतत्सत्त्वद्वयसहिते एते उभे वृत्ती इति शास्त्रसङ्केतः, एतद् वृत्तिद्वयमभिलक्ष्यैव तस्य चेतनात्मनः पुरुषस्य सर्वेषु पुरुषेषु अन्तरनुप्रवेशः अनुश्रूयते, "त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत् साशनानशने अभि" (ऋ.मं. १०–९०–४) इति ॥ अत्र तादृशवृत्तिद्वयसहिते ते "साशनानशने" स्थावरजङ्गमात्मके अचेतन-सचेतनरूपे च इति तदर्थः सम्पद्यते । अत एव सामवेदे आथर्वणीये च अशनानशनयोरेव अनुश्रवणं इति प्रतीयते ॥ "ततो विष्वङ् व्यक्रामदशनानशने अभि" (सा. आ. कां. ६–४–४) (६१८) इति ॥ "ततो व्यक्रामद् विष्वङ् अशनानशने अनु" (अ. सं. १९–६–२) इति ॥ "पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्" (बृ.उ.) इति च ॥ एतस्मिन् अर्थे औपनिषदं ब्राह्मणानुवचनमपि भवति, "सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत्० । ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्रापतन् , तं अशनापिपासाभ्यामन्ववार्जयत् । ता एनमब्रुवन् आयतनं नः प्रजानीहीति यस्मिन् प्रतिष्ठिता अन्नमदामेति (ऐ.उ. २-१-५) । तत्र पुरुषाणां सर्वेषामपि प्राणभृतां अशनापिपासात्मकं वृत्तिसत्त्वं दर्शयन्ति ॥

तद्वदेव अनशनमपि अनुश्रूयते उपकोसलविद्यायां उपनिषदि प्रपञ्चितम्, "स ह

व्याधिनाऽनशितुं दध्रे, तमाचार्यजायोवाच ब्रह्मचारिन् अशान किं नु नाश्नासीति, स होवाच बहव इमेऽस्मिन् पुरुषे कामाः नानात्ययाः व्याधिभिः परिपूर्णोऽस्मि नाशिष्यामीति" (छां.उ. ४-१०-३)। अभक्षणरूपं अनशनं तपोव्रतरूपेण अनुष्ठितमनुश्रूयते, तच्च मानसिक व्याधिनिवृत्तये कारणीभूतं ज्ञानोदयादिसाधनीभूतं चेति प्रतीयते, तथा अन्यत्रापि तदनशनं यमस्यापि संयमने शक्तं तीक्ष्णं शस्त्रमिव संवृत्तं दृश्यते, "तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन् अतिथिर्नमस्यः॥ नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व" (कठोप. १-९) इति॥ अत एव तस्य अनशनस्यैव परमतपःस्वरूपत्वं प्रतिज्ञायते। "तप इति तपो नानशनात् परं तद्दुर्धर्षं तद्दुराधर्षम्। तस्मात् तपः परमं वदन्ति" (ना. उ. २१-२) इति च॥ तत्र अशनानशनयोः तयोः सर्वेन्द्रियाणां आत्मन्यन्तर्मुखेन उपनयन–संयमन–संशोधनादिसत्त्वसम्पन्नयोः संविधानं तदनुष्ठानं च वैदिके यज्ञादौ प्राचामृषीणामाचार्याणां च आचारपरम्परागतं इदानीमपि दरीदृश्यते तत्सदाचरणम्, यज्ञीयादि व्रतादेशे तयोरुभयोरपि अशनानशनयोः सत्त्वं प्रतीयते समानरूपेण, यज्ञीये व्रते–– "अथातोऽशनानशनस्यैव" (श. ब्रा. १–१–१) इति तदुपदेशात्॥ तत्र अशनरूपं व्रतम्, "पयो वै ब्राह्मणस्य व्रतम्" (तै.) इति॥ "एकं स्तनं व्रतं कुर्वीत द्विस्तनं त्रिस्तनं व्रतम्" इत्यादि विधानं विद्यते पयसः अशने, "कृच्छ्रातिकृच्छ्रं पयसा दिवसानेकविंशतिम्"(म. स्मृ.) इति मनुः॥ एवं कृच्छ्रादिव्रते दुग्धस्य अशनं विहितम्॥ "अथ पार्वणस्थालीपाकः तस्य दर्शपूर्णमासाभ्यामुपवासः" (आ. गृ. सू.) इति उपवासविधानं तदनशनरूपम्॥ त्रेताग्नीनां च अग्निहोत्रिणां दर्शपूर्णमासेष्टौ तद्व्रतादेशे तु— "यदशितमनशितमिव (भवति) तदश्नीयात्" (श. ब्रा. १-१) इति॥ तदनशनानुविधानं च अशनसहक्लृप्तम्, तन्निर्वचनमपि अन्यत्र अनुश्रूयते — "अपोऽश्नाति। तन्नेवाशितं नेवानशितम्" (तै. ब्रा.) इति॥ "अब्भक्षो वायुभक्षश्च" (म.स्मृ.) इति तदनुवचनं उद्देशान्तरेण विहितं दृश्यते॥ एवमेव उपनयनादिव्रतेऽपि तदशनं शास्त्रतो नियमितं ब्रह्मचारिणां कृते, "अक्षारलवणाशी स्यात्" (आ. गृ. सू.) इति॥ तथा "मधु–मांस–उच्छिष्ट–ताम्बूलादीनामनशनं च विहितम्"। तदेतद् विवाहव्रते वधूवरयोरुभयोरपि समानमेव, "अक्षारलवणाशिनौ अधःशायिनौ ब्रह्मचारिणौ स्याताम्" (आ. गृ. सू.) इति॥

तथैव आयुर्वेदेऽपि आयुरारोग्यादिसिध्यर्थं अशनानशनयोः तयोरुभयोरपि समाश्रयणमुपदिश्यते, "हिताशी स्यान्मिताशी स्यात् कालभोजी जितेन्द्रियः। पश्यन् हि सकलान् रोगान् बुद्धिमान् विषमाशनात्" (च. सं.) इति॥ तदेतत् सत्त्वशुद्धिद्वारा ज्ञानोदयेऽपि समानमेव भवितुमर्हति। "हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति" (ब्र. सू. शा. भाष्ये भामती) इति॥

एवं ज्वरादिरोगनिवृत्तये चिकित्सारूपेण अनशनं प्रशस्यते, "ज्वरादौ लङ्घनं प्रोक्तम्" इति, "लङ्घनं परमौषधम्" इति च॥ तथैव यज्ञे योगे ज्ञानोपनादौ च पात्रतादि-

सिध्यर्थं युक्ता सत्त्वशुद्धिरेव प्राधान्येन समुद्दिष्टा । सा च प्राणसन्धारणार्थं जीवनार्थं च प्रत्यहं अनिवार्यतया सेवनीयाभ्यां अशनानशनाभ्यामेव सिध्येत् इति सर्वशास्त्रसम्मतं तत्त्वम्, अत एव तादृशेन सन्नियतेन आहारेण प्राणसन्धारणद्वारा सर्वेषामपि इन्द्रियाणां सत्त्वशुद्धया सर्वत्रापि विषयेषु नियता प्रवृत्तिः, तेभ्यो निवृत्तिः, तथा आत्मनि अन्तः निष्ठात्मिका अप्रवृत्तिरपि भवितुमर्हतीति प्रतिज्ञायते, तथा च तदनुश्रवणम्— "आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" (छां. उ. ७–२६–२) इति ॥ "युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा" (भ. गी.) इति च स्मृतिः ॥ एतेन "आह्रियते इति आहारः" इति व्युत्पत्तेः अन्नरसादीनां भक्षणं इति प्रथमोऽर्थः, तथा श्रोत्रादिभिः इन्द्रियैः शब्दादीनां विषयाणां आहरणं तद्ग्रहणं तथा तदुपसेवनमपि अन्योऽर्थः, एवं आहारशब्दस्य तथा तदाहाररूपस्य अशनस्यच स्वरूपं लक्षणमित्युक्तं भवति ॥

तद्विपरीतमेव अनशनस्य स्वरूपम् । तथा च अन्नरसादीनां अभक्षणम्, विषयेषु अप्रवृत्तिः, तेषां असेवनं च तल्लक्षणं भवति ॥ तदनुवचनं च दृश्यते — "विषया विनिवर्तन्ते निराहारस्य देहिनः । रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते" (भ. गी.) इति ॥

तदेतदुभयरूपं अशनं अनशनं च जीवेशयोः मनुष्यदैवतयोः यथाक्रमं गुणधर्मात्मकं वृत्तिरूपं सत्त्वं इति अनुश्रूयते । तथा च ऋङ्मन्त्रवर्णः दैर्घतमसार्षयः — "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ॥ तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति" (ऋ. मं. १–१६४–२०) इति ॥ "न वै देवा अश्नन्ति न पिबन्ति एतदेव अमृतं दृष्ट्वा तृप्यन्ति" (छां. उ. ३-६-१) इति च ब्राह्मणम् ॥

अत्र एते सुस्पष्टार्थके अशनानशनात्मके भुक्ति–अभुक्तिरूपे द्वे वृत्ती भवतः, एतेन अशनं नाम विषयेषु प्रवृत्तिः, भुक्तिः संसक्तिः इत्यर्थः सम्पद्यते, तथा अनशनं नाम विषयेषु अप्रवृत्तिः, अभुक्तिः, विमुक्तिः, स्वरूपस्थितिः इति च अर्थात् सिध्यति ॥

"अग्ने नय सुपथा राये अस्मान्" (ऋ. मं. १-१८९-१) इति ॥ "ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्" (ऋ. मं. १-९०-१) इति च सत्पथप्रवृत्त्यर्थकं वेदानुवचनं तत्प्रार्थनादिरूपम् ॥ "न दुरुक्ताय स्पृहयेत्" (ऋ.मं. १-४१, ९) "मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम् । सुम्नैरिद् व आ विवासे" (ऋ. मं १-४१-८) इति च निवृत्त्यर्थकं वचनम् ॥ उभयार्थकमपि भवति, "इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण संशिशाधि । ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम" (ऋ. मं. ८-४२-३) इति ॥ "क्रतुं दक्षं वरुण संशिशाधीति वीर्यं प्रज्ञानं मयि संशिशाधीत्येव तदाह" (ऐ. ब्रा.) इति च ब्राह्मणम् ॥ तथा "मृत्योर्मुक्षीय माऽमृतात्" (ऋ. मं. ७-५९-१२) "मुमुग्ध्य१स्मान् निधयेव बद्धान्" (ऋ. मं. १०-७३-११) "असतो मा सद् गमय ।

तमसो मा ज्योतिर्गमय । मृत्योर्माऽमृतं गमय" (बृ. उ. १-३-२८) इति च त्रीणि यजूंषि भवन्ति ॥

॥ इति अष्टमेऽनुवाके तृतीयं वैश्वदेव्यं सूक्तं समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

This is already commented upon.

In this Hymn, one finds 'Tapasā upavasan' repeated ( except in the last mantra ) indicating that fast, non-taking of food, is the illuminative Tapas. It will be helpful to probe into it a little further.

In this word, all the living beings have two attitudes, viz., 'eating and non-eating.' Of these two, the one Pravṛtti ( which means active interest in all objects ) is eating, the other Nivṛtti ( which means turning away from all the objects ), is non-eating. The word 'Aśana' is derived from the root 'Aś' to occupy ( 1264 ). Further, the Apravṛtti meaning disinterestedness in external objects is also non-eating ( positive and negative aspects of the same tendency ). Cf. "Sin does not touch him" ( Ṛg. III–59–2 ). "None touch him" ( Ṛg. X-62-9 ). Likewise, there is another root ( 1524 ) which means 'eat' from which also Aśana is derived, meaning eating. Aśana is food because it is Adanīya, eatable. Cf. "Whatever is relished is eaten by Mātariśvan, even the inhaled air ( Apāna vāyu ) is 'eaten' by man, as it were ( Ṛg. IX-67-31 ). It is Anna because it is ( adyate atti cha bhūtāni ) eaten by all the creatures, and it eats also all the creatures. ( Bṛ. Up. II–2 ). So, Anaśanam, foodlessness means both abstaining from food positively and non-taking of food negatively. So, the Veda posits by the word Anaśana both these tendencies. Having these two tendencies in mind, it is stated that Purusha, the energy entered into all the bodies. Cf. "The Purusha, having three feet is beyond all. And his one foot pervades the whole universe. With that foot he pervaded all the beings" ( Ṛg. X–90–4 ). So in this world also, the mobile and the immobile have these tendencies, i. e., eating and non-eating which means evidently, they are either alert or inert. Therefore, it is said in the Atharvaṇa Veda, "he entered into all, following eating and non-eating" ( Athar. XIX–6-2 ). "Purusha entered the bodies" ( Bṛ. Up. ). There are other statements in another Upanishad, confirming this point. Cf. "He created one ( Purusha ) from the waters and gave him all the senses, speech etc." ( Ait. Up. ).

He created all these gods, Agni etc. presiding over all the senses and put them in this great ocean, i. e., all the living beings. The creator put into the first being ( Purusha ) hunger and thirst. They ( the gods ) said to him ( the first born ), "Show me the place where we can eat sitting" etc. ( Ait-Up. II-1 & 5 ). Thus it is pointed out that all the living beings have hunger and thirst.

Elsewhere in the Upakosala Vidyā it is said, " He was melancholic and did not eat. The wife of the teacher told him, ' Brahmachāri, please eat; why do you not eat ?' He said, ' This person ( which is myself ) has many desires of manifold nature. I am full of sorrows. Therefore, I do not eat ' " (Chhānd. Up. IV-10-3). Fast as non-eating, was then observed as Tapas, not only for the removal of mental ills, but also for obtaining knowledge etc. Elsewhere also, it is seen that the vow of fasting proved to be a very sharp weapon in controlling the god of death, Yama. Cf. "Oh Brahman, you stayed in my house for three nights fasting and so, as guest you are worthy of being honoured. Oh Brahman, salutations to you. May I be blessed with auspiciousness Therefore, please ask for three boons" ( Kaṭha Up. ). Therefore, this Tapas of fasting is a great spiritual practice. This Tapas is none other than non-eating. There is no Tapas greater than non-eating. The place of Tapas of non-eating is very high inasmuch as it is unassailable and difficult to practise. Fasting, therefore, is the greatest Tapas.

It is eating and non-eating that are mainly responsible for withdrawing, restraining, and purifying all the senses. The theory and practice of eating and non-eating are handed down by the ancient traditions and are observed in Vedic sacrifices etc. even now. When the sacred and sacrificial vows are undertaken, these two, eating and non-eating, are of equal importance according to the Śatapatha Brāhmaṇa ( I-1-1 ). "Milk is the food for a Brāhmaṇa undergoing a vow" (Tait. Up.). The vow of taking milk from four teats of a cow, then reducing it to three teats and one teat and so on is the practice for those who take to milk as food in a sacrificial vow. "Kṛchchhrātikṛchchhra vows are to be observed with milk as food for twentyone days" (Manu, Yājñavalkya Smṛti). So, milk is the food during the vow.

" Now regarding Pārvaṇa Sthālīpāka, which is to be observed on new and full moon days " (Āp. Gṛ. Sūtra). Thus the fast which is non-eating is enjoined during Darśa and Pūrṇamāsa. The Agnihotris are instructed during Darśa and Pūrṇamāsa thus : " Only that is to be eaten, by eating which it is as good as non-eating" ( Śata. Brāh. ). Elsewhere, the practice of anaśana, non-eating is explained: "He eats (drinks) water which is neither eating nor non-eating " ( Tait. Brāh. ). Likewise, with regard to the vow of Upanayana eating is restricted by Śastra for Brahmachāris: "One should be non-eater of pungent or saltish things" (Āp. Gṛ. Sū.). Again, "one should not eat honey, meat and the left-overs, tāmbūla etc." This restriction is common to both the bride and the bridegroom during the vow of marriage. "They shall not eat pungent or saltish things and they must be chaste" (Āp. Gṛ. Sū.). Likewise, in Ayurveda also, it is said that one has to resort to both eating and non-eating for getting full span of life, health etc. Cf. "One must eat salutary food; ;must eat within limitation;

must eat at regular intervals and must observe continence. The wise must know that all diseases spring from irregular and unwholesome food habits (Charaka). Further, non-eating is advised at the start of fevers. Cf. "Non-eating is the best medicine."

Thus in sacrifice and in the practice of Yoga, knowledge and upāsanā etc. purification of body and mind for getting eligibility is insisted upon. That purification of body and mind is possible by daily eating and non-eating which is inevitable and which is within limits for retention of life in the body and for keeping oneself alive." Thus with controlled eating and restricted non-eating, it is possible to get the regulated projection (pravṛtti), rejection (nivṛtti) and non-projection (Apravṛtti) of every sense with regard to its objects. We assert so, and it is so said also. "The purity of eating secures the purity of the body and mind which is the undoing of all knots" ( Chhā. Up. 7-26-2 ). " In respect of one who is regular in eating and doing, during sleep and wakefulness....yoga kills all sorrows" (Gītā).

Thus, as per derivation, Āhāra is that which is received, includes both eating of food and drinks and enjoyment of sound, touch, form, taste and smell of the various objects by senses like the ear etc. That is the form of Aśana. The contrary of it is Anaśana. Cf. " The sense objects retire if one fasts; but the tendency of the senses to enjoy survives; that also dies when one envisages the Supreme beyond " (Gītā: II-59).

It is said in the Vedas that both for the Jīvātmā and Paramātmā and for mortals and gods, these eating and non-eating are their characteristics respectively. Cf.: A Ṛk of Dīrghatamas: " There are two bright feathered ones, Jīvātmā and Paramātmā who are friends in company with each other on the same tree; one eats the sweet fruit and the other watches without eating" ( Ṛg. I-164-20 ). And again, "The gods do not eat nor drink but they are satisfied by the mere sight of the food offered" (Chhā. Up. III-6-1). This much is evident that eating and non-eating, i. e., enjoyment and non-enjoyment are the two aspects in life : non-eating means being aloof from sense objects, absolute detachment; contrary to that is turning towards sense objects, enjoyment and indulgence in sense objects. " Oh Agni, lead us to attain wealth by the good path " ( Ṛg. I-189-9 ). " May Varuṇa and Mitra, the wise ones, lead us by the straight path " ( Ṛg. I-90-1 ). Thus, the Veda also says in the form of a prayer that one should go by the right path alone. "Ohe should not aspire after making a bad speech or doing bad things " ( Ṛg. I-41-9). " Oh gods, I shall not complain against him who hurts or curses or praises me. I shall serve you for my own good " ( Ṛg. I-41-8 ). So runs the prohibitory statement. There are statements which commend and prohibit also. Cf. " Oh god Varuṇa, sharpen the Kratu and Daksha for my sake; they develop the intellect. May we board the ship by which we may cross over all ills " ( Ṛg. VIII-42-3 ). " Oh Varuṇa, sharpen the Kratu

and Daksha. In this mantra, he prays that his powers of knowlege and that of action may be shapened well" ( Ait. Brā. ). Again, " Release me from mortality and not from immortality" ( Ṛg. VII-59-12 ). "Release me from ignorance just as those who are bound are released" ( Ṛg. X-73-11 ). "Lead me from non-existence to existence; from darkness to light and from mortality to immortality" ( Bṛ. Up. I-3-28 ). Thus run these three Yajus in both the senses, i. e., Pravṛtti and Nivṛtti.

Thus ends the Third hymn dedicated to Viśvedevāḥ in the eighth Section.

---

अथ चतुर्थं द्विदैवत्यं अग्नीषोमीयं सूक्तम् ।

अनुवाकः ८ । सूक्तम् ४ । ऋचः १-९ ।

अग्निरयं पार्थिवं ज्योतिः नव, दैवरातो वैश्वामित्रः, अग्नीषोमौ, जगती ।

**Now this the Agneeshomeeya Sukta, Fourth in the Eighth Anuvaka**

**Section VIII, Hymn 4, Riks 1-9,** AGNĪ-SOMA

The fourth Hymn beginning with " Agnirayam Pārthivam Jyotiḥ," contains nine Ṛks. Daivarāta Vaiśvāmitra is the Ṛshi; Agni-Soma are the gods; and the metre is Jagatī.

अथ प्रथमा ऋक् ।

अग्निरयम् पार्थिवं ज्योतिष्पचनम्
सोमो दिव्यः शीतरश्मी रसोऽमृतम् ॥
मिथुयाऽन्वेव विश्वथाऽभ्युदीयतु-
स्तावग्नीषोमौ मृळयतां स्वं विश्वम् ॥ १ ॥

पद्पाठः – अग्निः । अयम् । पार्थिवम् । ज्योतिः । पचनम् ।
सोमः । दिव्यः । शीतऽरश्मिः । रसः । अमृतम् ॥
मिथुया । अनु । एव । विश्वऽथा । अभि । उत् । ईयतुः ।
तौ । अग्नीषोमौ । मृळयताम् । स्वम् । विश्वम् ॥

This Agni is the earthly flame of light that heats and cooks. Soma the celestial light is the moon with cool rays, full of essence and Ambrosia. The twins combined and manifested themselves everywhere as everything. May those Agnī-Soma twins make this universe a happy one.

## अन्वयभाष्यम् ।

अग्निः अयं प्रसिद्धः भौतिकः उत देवतात्मेति च, सोऽयं इह पार्थिवं पृथिवीसम्बद्धं ज्योतिः ज्योतिरात्मा पृथिव्याः अधिपतिः, पचनं पाकादिकारकं तत् तेजोमयत्वात्, औष्ण्य-प्रकाशादि धर्मयोगात्, "अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम्" ( ऋ. मं. ८-४४-१६ ) इति तदनुश्रवणम् । सोमः प्रसिद्धः प्रत्यक्षसिद्धः दिव्यः द्युलोकसंस्थः, शीतरश्मिः शान्तशीतलकिरणः रसः रसात्मा अमृतं सुधांशुः, ताविमौ उभौ देवतात्मानौ मिथः परस्परं योगेन अनु अन्वितौ सन्तौ अधरोर्ध्वतानौ अन्योऽन्योत्तानौ वा मिथुनीभूतौ दम्पती इव संवृत्तौ विश्वथा विश्वतोरूपेण अभितः उदीयतुः तेजोरससत्त्वाभ्यां प्रत्यक्षतः उदयं प्रापतुः, तेन च इदं सर्वं जगत् अग्नीषोमात्मकं बभूव । "अग्नीषोमात्मकं जगत्" इति तदनुवचनम्, तौ अग्नीषोमौ स्वं स्वकीयं इदं विश्वं मृळयतां मृडयताम् आत्मीयज्योतीरससत्त्वेन नित्यं सुखयताम् इति ॥

### COMMENTARY—SUMMARY TRANSLATION

This famous Agni god belongs to the earth. He is the light related to this earth. He is heat and light useful for burning and cooking etc. Cf. "Agni is the head and summit of heaven and the lord of the earth" (Ṛg. VIII-44-16). The famous Soma ( moon ) who is visible to the eye is in the sky, calm and cool. These two reputed gods are mutually united. They are facing each other; they are united like husband and wife. They rose up before the eyes of all. They are the heat-light combination. This whole universe is pervaded by Agni-Soma. May these two, Agni and Soma be gracious to this universe which is their very body. Let them make this universe happy with their heat-light and essence.

## द्वितीया ऋक् ।

अग्निर्देवो देवानां मुखं हविर्भुक्

सोमो दिव्यं हव्यममृतं तदन्नम् ॥

देवते ते विश्वेषां तनूः प्रत्यृते

तावग्नीषोमौ मृळयतां स्वं विश्वम् ॥ २ ॥

पदपाठः – अग्निः । देवः । देवानाम् । मुखम् । हविःऽभुक् ।
सोमः । दिव्यम् । हव्यम् । अमृतम् । तत् । अन्नम् ॥
दैवते इति । ते इति । विश्वेषाम् । तनूः । प्रति । ऋते इति ।
तौ । अग्नीषोमौ । मृळयताम् । स्वम् । विश्वम् ॥

Agni is god; he is the mouth of the gods as he is the one who consumes the oblations. Soma is the celestial god; he is the oblation and Ambrosia, the celebrated food. These two gods are pervading the bodies of all. May these Agni and Soma gods render this universe which is their own body happy and blissful.

## अन्वयभाष्यम् ।

सोऽयं अग्निः देवः स्वयं देवतात्मा तेजोमयः, तथा देवानां सर्वेषां मुखं मुखस्थानीयः, अत एव हविर्भुक् सर्वदेवतानां हविषां भोक्ता, तस्मात् सर्वेषां देवानां कृते यज्ञेषु अग्निमुखे एव सर्वाणि हवींऽषि हूयन्ते । "यच्चिद्धि शश्वता तना देवं देवं यजामहे । त्वे इद्धूयते हविः" इति तदनुश्रवणम् । सोमः दिव्यं हविः हविःस्वरूपः, भोग्यरूपः, अमृतं अमृतरसात्मा, तत् परं श्रेष्ठं अन्नम्, ते इमे दैवते देवतात्मके तथा भोक्तृ-भोग्यस्वरूपे मिथः संसृष्टे सती विश्वेषां प्राणभृतां विश्वाः तनूः शरीराणि प्रत्यृते प्रतिगते सम्प्राप्ते भवतः, तौ दिव्यौ अग्नीषोमौ देवतात्मानौ स्वीयं इदं विश्वं सुखयताम् इति ॥

अत्र अयमग्निः सर्वेषां अस्माकं अन्तःशरीरे वैश्वानररूपेण सिद्धः सन् हविषां भोक्ता भवति, सौम्यं सोमदैवत्यं अन्नमेव भोग्यमन्नं हविः इति विशिष्टं अध्यात्मं तत्त्वम् ॥ अस्मिन् अर्थे ऋङ्मन्त्रदर्शनं भवति विश्वामित्रार्षेयम्, "अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् । अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम" ( ऋ॰मं. ३–२६–७ ) इति, "त्रिधातुरर्को रजसो विमानः अजस्रं ज्योतिर्हविरस्मि सर्वम्" इति, "अग्निरन्नादः", "एष ह वै सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" ( छां.उ. ५–१०–४ ) इति च तदनुवचनम् ॥ "अहमन्नम् ३, अहमन्नादः ३, अहमन्नमन्नमदन्तमद्मि" ( तै. भृ. उ. १०–६ ) इति च तदनुश्रवणम् अध्यात्मतत्त्वोपबृंहितम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Agni is himself a god and is lustrous. He is the mouth of all the gods. So, he consumes all the oblations offered to the various gods. Therefore, all the oblations to various gods are offered through the mouth of Agni. Cf. " Whatever permanent oblations we offer to each god, all those are offered through you only " ( Ṛg. I–26–6 ). Soma is known as an oblation of nectar. Therefore, it is an excellent and the best food. These two gods ( Agni and

Soma ) are the enjoyer and the enjoyed, created for each other and are united. They have entered into the bodies of all the living beings. May these Agni–Soma gods be gracious to this universe.

This Agni dwells inside all bodies as Vaiśvānara. He is the enjoyer of all oblation. That is the spiritual principle. Viśvāmitra says in this connection, " I am Agni by birth knower of all and everything; nectar is in my mouth; I am the inexhaustible heat–light. I am the oblation" (Ṛg. III-26-7). Again, " I am inexhaustible heat-light and all oblations I am " ( Sāma Veda ). " This is indeed the King Soma." " He is the food of gods. Him the gods eat " ( Chhā. Up. V-10-4 ). " I am the food. I am the food–eater. I eat him who eats food " ( Tai. Up. III-10-6 ).

## तृतीया ऋक् ।

अग्निरयमन्तश्चिता ज्योतिषा वाक्<br>
सोमोऽन्नवानन्नचितं तन्मनः ॥<br>
ते आत्मन्यन्तर्मिथोऽधि प्रतीरिते<br>
तावग्नीषोमौ मृळयतां स्वं विश्वम् ॥ ३ ॥

पदपाठः – अग्निः । अयम् । अन्तः । चिता । ज्योतिषा । वाक् ।<br>
सोमः । अन्नऽवान् । अन्नऽचितम् । तत् । मनः ॥<br>
ते इति । आत्मनि । अन्तरिति । मिथः । अधि । प्रति । ईरिते इति ।<br>
तौ । अग्नीषोमौ । मृळयताम् । स्वम् । विश्वम् ॥

This is Agni, who is Vāk ( power of speech ) within ( the body ) with knowledge and light. Soma possesses food, and mind is born of food. They inspire each other within the soul, being inspired themselves. May they, Agni and Soma be gracious to their own universe.

## अन्वयभाष्यम् ।

सोऽयमेव अग्निः सर्वेषां अन्तः आत्मनः ज्योतिषा स्वेन तेजःसत्त्वेन चिता चेतनया संविदा सञ्चिता वाक् स्वयं वाग्रूप एव भवति । "मुखादिन्द्रश्चाग्निश्च" ( ऋ. मं. १०-९०-१३ ) इति ऋङ्मन्त्रवर्णः, "मुखादग्निरजायत" ( शु. य. सं.३०–१३ ) "मुखं निरभिद्यत मुखाद् वाग् वाचोऽग्निः" ( ऐ.उ. १-४ ) "अग्निर्वाग्भूत्वा मुखं प्राविशत्" ( ऐ. उ. २–४ ) इति च स्पष्टार्थकं तदनुश्रवणम् वाचः अग्निस्वरूपत्वे प्रमाणम्, तस्या वाचः ज्योतीरूपत्वमपि संवित्सत्त्वसिद्धम्, तथा हि — " अस्तमित आदित्ये याज्ञवल्क्य

चन्द्रमस्यस्तमिते शान्तेऽग्नौ किञ्ज्योतिरेवायं पुरुषः इति वागेवास्य ज्योतिर्भवतीति, वाचैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते" (बृ. उ. ४–३–५) इति, "तेजोमयी वाक्" (छां. उ. ६–५–४) इति, "अग्निर्म वाचि श्रितः" इति च ॥

एतस्मिन्नर्थे स्पष्टार्थकः ऋङ्मन्त्रवर्णः, "त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा" (ऋ. मं. २–१–११) इति ॥ सोमः रसात्मा अन्नवान् सर्वरससारभूतत्वात्, अन्नचितं सोमसत्त्वेन अन्नेन उदितं भवति तत् सौम्यं मनः, "अन्नमयꣳहि सोम्य मनः" (छां. उ. ६–५–४) इति ॥ "चन्द्रमा मनसो जातः" (ऋ. मं. १०–९०–१३) "हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमाः" (ऐ. उ. १-४) "चन्द्रमा मनो भूत्वा हृदयं प्राविशत्" (ऐ. उ. ३-४) इति च ॥ एतस्मिन् अर्थे स्पष्टार्थको मन्त्रवर्णः —"मनश्चिन् मनसस्पतिः" (ऋ. मं. ९–)"त्वे पितो महानां देवानां मनो हितम्" (ऋ. मं. १-१८७-६) इति च ॥ ते इमे वाङ्मनश्च उभे अन्तः सर्वेषां आत्मनि अधिष्ठिते, तथा मिथः सङ्गते प्रति प्रत्यङ्मुखेन प्रेरिते च भवतः, तौ अग्नीषोमौ वाङ्मनःसत्वौ सन्तौ स्वतः स्वीयाभ्यां ज्योतीरससत्त्वाभ्यां इदं निजं विश्व सुखयताम् इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This is Agni certainly living within all the bodies, with his power of knowledge and light; he is Vāk. Cf. "From his mouth were born Indra and Agni" (Ṛg. X-90-13). "From mouth was born Agni" (Śukla Yaju. Sam. 30–13). "The mouth opened and from the mouth Vāk was born and from Vāk was Agni born" (Ait. Up I-4). "Agni became Vāk and entered the mouth" (Ait. Up. II-4). Vāk in considered to be light, to show that she is knowledge. "Yājñavalkya, when the sun is set, when the moon is set, and when fire is put out, which is the light and power in virtue of which a person continues to live? The answer is, speech is itself his light, by the light of Vāk he lives" (Bṛ. Up. IV-3-5). Again, "Vāk is full of light" (Chhā. Up. VI-5-4). Another Ṛk is clear on this point: "Oh Agnideva, you are the infinite giver to those who offer oblations to you. You are Hotṛ, i. e., Vāk and Bhāratī who prosper on account of Vāk" (Ṛg. II-1-11).

Soma, full of essence, is the possessor of food, and is the essence of all food. From Soma as food, mind is born. Cf. "Oh peaceful one (saumya), mind is certainly the essence of food" (Chhā. Up. VI-5-4). "Chandramā, that is Soma (moon) was born of mind" (Ṛg. X-90-13). "Heart opened and from the heart was born mind and from mind Chandramā" (Ait. Up. I-4). Again "Chandramā (Soma) became mind and entered the heart" (Ait. Up. III-4). Another Ṛk makes the point clearer: "Soma is mind and the lord of mind too" (Ṛg. IX).

These two, Vāk and mind, are in the soul of all. They become mutually

inspired. These two, the very substances of speech and mind, are Agni and Soma, and may they be gracious to this universe by bestowing light and essence.

## चतुर्थी ऋक् ।

सो अग्निः सोमे सोमोऽग्नावधि हितौ
मिथुनं स्वं तनुतां विश्वमात्मना ॥
ज्योतिषाचान्नेन वाचा मनसाऽन्त-
स्तावग्नीषोमौ मृळयतां स्वं विश्वम् ॥ ४ ॥

पद्पाठः – सः । अग्निः । सोमे । सोमः । अग्नौ । अधि । हितौ ।
मिथुनम् । स्वम् । तनुताम् । विश्वम् । आत्मना ॥
ज्योतिषा । च । अन्नेन । वाचा । मनसा । अन्तः ।
तौ । अग्नीषोमौ । मृळयताम् । स्वम् । विश्वम् ॥

Agni is in Soma and Soma is in Agni and thus they are united together. Let them of themselves expand in the universe outward. With their light and food, with Vâk and mind, may Agni snd Soma bless their universe.

## अन्वयभाष्यम् ।

सोऽयमग्निः ज्योतिरात्मा सोमे दिव्ये रसात्मनि अधिसंस्थितः । अत्र द्वितीयार्थे सप्तमी । सोमं–अग्निं अधिष्ठितः इति तदर्थः । तथा सः सोमः रसात्मा अग्नौ अग्निं ज्योतिरात्मानं अधिष्ठितः, एवं मिथः सँस्पृतौ तादात्म्येन सम्पूर्णतया प्राप्तौ सन्तौ, आत्मना स्वेन सत्त्वेन विश्वं इदं मिथुनं मिथुनात्मकं सन्तनुतां विस्तारयताम्–तेजोरसात्मकं तथा बीज-क्षेत्ररूपं अत्र ब्रह्माण्डे बही रचयतां इति भावः। तथैव पुनः तौ अन्तः सर्वेषां शरीरे आत्मनि च सचेतने ज्योतिषा ज्योतिःस्वरूपया वाचा, अन्नेन अन्नसत्त्वेन मनसा च आविर्भूतौ अन्योऽन्यात्मप्रतिष्ठया सिद्धौ भवतः। तदिदं औपनिषदं तत्त्वं सुप्रसिद्धमेव, "वाङ् मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितम्" (ऐ. उ. १-१) इति तदनुश्रवणम् ॥ तौ अग्नीषोमौ वाङ्मनःसत्त्वरूपौ अन्तः स्वं सत्त्वं वर्धयताम्, तेन च स्वकीयं इदं विश्वं मृळयताम् इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Agni is full of light. He is located in the celestial essence. Likewise, Soma the essence is in Agni. They are thus entwined completely. Let

them expand this universe which is formed by them, with their substance. Let them create the visible universe, which is now formed by light and the essence only, in the form of concrete seed and field. Likewise, Vāk in the form of light and mind in the form of food co-exist in the body and soul of all. Cf. "May my Vāk be established in mind and mind be established in my Vāk" ( Ait. Up. I-1 ). May these two flourish within the body and soul and bless their own universe.

## पञ्चमी ऋक् ।

अग्निर्ज्योतिषा पूरुषोऽसौ सरस्वान्
सोमो रसाढ्यः सा सती सरस्वती ॥
उषासानक्ताभ्यामेतौ वृतौ मिथ-
स्तावग्नीषोमौ मृळयतां स्वं विश्वम् ॥ ५ ॥

पदपाठः – अग्निः । ज्योतिषा । पुरुषः । असौ । सरस्वान् ।
सोमः । रसाढ्यः । सा । सती । सरस्वती ॥
उषसानक्ताभ्याम् । एतौ । वृतौ । मिथः ।
तौ । अग्नीषोमौ । मृळयताम् । स्वम् । विश्वम् ॥

Agni is the Purusha in the form of the sun with light, he is Sarasvān. Soma is full of essence and is Sarasvatī, the wife. They are united with each other as at the time of dawn in the morning. May Agni and Soma bless this universe of theirs.

## अन्वयभाष्यम् ।

अयं अग्नि: ज्योतिषा तेजोमयबीजसत्त्वेन युक्तः पुरुष: पुरुषसत्त्व:, असौ दिव्यः आदित्य: सरस्वान् दिव्यरसास्पदीभूत: अपां वर्षकत्वात्, "दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् । अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि" ( ऋ. मं. १-१६४-५२ ) इति तदनुश्रवणम् ॥ सोम: स: दिव्य: परोक्षतया सिद्धः रसात्मा क्षेत्रसत्त्वरूपा सती जाया अमुष्य सूर्यस्य सरस्वतः शक्तिरूपा सरस्वती इति सम्पद्यते, तौ इमौ अग्नीषोमात्मकौ सूर्याचन्द्रमसौ अहोरात्राभ्यां तत्कालशक्तिदेवताभ्यां ज्योतीरसाधिष्ठिताभ्यां उषोरात्रिभ्यां मिथः वृतौ मिथुनरूपेण संसृष्टौ तौ अग्नीषोमौ स्वीयमिदं विश्वं जगत् मृळयतां सुखयतां तेजोरसाभ्यामिति ॥

COMMENTARY—SUMMARY TRANSLATION

This Agni is the celestial Âditya with light, the Purusha with the seed of light. Âditya is the refuge of all light-essences, the essences in the form of waters. Cf. " I invoke for protection, the sun who is the celestial power, full of energy and satisfying the universe with rains " (Ṛg. I-164-52). The celestial Soma is full of invisible liquid essences. He is like Sarasvatī, the wife of Âditya. Soma is Sarasvatī, the power of Sarasvān, Âditya. Agni and Soma are united like a pair, like the Dawn and the Night. May Agni and Soma bless their own universe with their light and essence.

## षष्ठी ऋक् ।

अग्निरयं वैश्वानरोऽन्तर्विश्वभुक्
सोमो मनस्तदुपाहितं सदन्नम् ॥
अन्नादोऽन्नं च प्रति संसृष्टौ मिथ-
स्तावग्नीषोमौ मृळयतां स्वं विश्वम् ॥ ६ ॥

पदपाठः – अग्निः । अयम् । वैश्वानरः । अन्तरिति । विश्वऽभुक् ।
सोमः । मनः । तत् । उप । आऽहितम् । सत् । अन्नम् ॥
अन्नऽअदः । अन्नम् । च । प्रति । सम्ऽसृष्टौ । मिथः ।
तौ । अग्नीषोमौ । मृळयताम् । स्वम् । विश्वम् ॥

This Agni is Vaiśvānara, who is inside the body and eats all food. Soma is mind, which is as food of the soul. The eater and the food are united together. May Agni and Soma bless this universe of theirs.

## अन्वयभाष्यम् ।

सोऽयं अग्निः सर्वेषां प्राणभृतां अन्तः शरीरे अन्तर्हितः जाठराग्निरूपः वैश्वानरः चिदात्मा च सन्, विश्वभुक् विश्वस्य भोक्ता संवृत्तः इति भावः, सोमः रसात्मा मनः मनः-सत्त्वः, तच्च मनः अन्नं भोग्यं अन्नमयत्वात्, तत् अन्नरूपं भोग्यात्मकं च सत् मनः आत्मनः उप उपाधिरूपेण, आहितं सन्निहितम्, चेतनात्माधिष्ठितम्, सूक्ष्मं करणं शरीरं च भवति, एवं अन्नादः भोक्ता अग्निः आत्मा, अन्नं भोग्यं सोमः मनः च प्रति प्रत्यङ्मुखेन प्रत्यञ्चि आत्मनि मिथः योगेन संसृष्टौ सङ्गतौ भवतः, तौ एतौ अग्नीषोमौ ज्योतीरससत्त्वौ आत्म-मनःस्वरूपौ स्वकीयं इदं विश्वं जगत्, तथा विश्वसत्त्वयुक्तं शरीरं च स्व-स्व-सत्त्वेन तेजोरस-रूपेण मृळयतामिति ॥

ऋङ्मन्त्रवर्णेऽपि एतौ द्विदैवत्यसत्त्वौ सुप्रसिद्धौ— "अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्राबभूवथुः" ( ऋ. मं. १–९३–९ ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Agni is Vaiśvānara, the fire which is located in the stomach and soul also, in the bodies of all living beings. He is the enjoyer of all. Soma, full of all essences is mind, which is enjoyable food. And as such, the mind is food for the soul. Thus, the enjoyer of food and the enjoyable food are together in the body. These two, Agni and Soma are light and essence respectively and are Ātmā ( the soul ) and manas ( mind ), also. May these two bless this universe and this body containing the essence of all with their substance. A Ṛk says: " Oh Agni and Soma, enjoying the same wealth of knowledge and being invoked together, may you accept our invocations, you and the ones reserved for the protection of the universe by the gods" ( Ṛg. I-93-9 )

## सप्तमी ऋक् ।

अग्निरयं ज्योतिषा वाचा मुखेन
सयुङ् मध्यमो विद्युता स इन्द्रः ॥
सोमो रसो मनसस्पतिर्हृदय्यो३ऽन्त-
स्ताविन्द्रासोमौ मृळयतां स्वं विश्वम् ॥ ७ ॥

पदपाठः – अग्निः । अयम् । ज्योतिषा । वाचा । मुखेन ।
सऽयुक् । मध्यमः । विऽद्युता । सः । इन्द्रः ॥
सोमः । रसः । मनसः । पतिः । हृदय्यः । अन्तरिति ।
तौ । इन्द्रासोमौ । मृळयताम् । स्वम् । विश्वम् ॥

This Agni, united with light, word and the mouth is Indra of the middle regions, united with lightning. Soma is full of essences, the lord of the mind, and is associated with heart. May Indra and Soma bless this universe of theirs.

## अन्वयभाष्यम् ।

सः अयं अग्निः चेतनासत्त्वः सन्, ज्योतिषा वाचा च तथा ज्योतिःसत्त्वेन स्वाविर्भावैकस्थानेन, मुखेन च सयुक् सहयुक्तः, मध्यमः अन्तरिक्षाध्यक्षः, विद्युता निजवैद्युततेजसशक्त्या सः इन्द्रः स्वयं सः अग्नि इन्द्रात्मैव भवति इत्यभिप्रायः । " त्वमग्न इन्द्रो

वृषभः सतामसि" (ऋ. मं.) इति तदनुश्रवणम्, "मुखादिन्द्रश्चाग्निश्च" (ऋ. मं. १०–९०–१३) इति च तयोः सहयोगेनैवाविर्भावः अनुश्रूयते ॥

तेन ज्योतीरसात्मानौ मुख्यौ वाक्सत्त्वमुखौ च सन्तौ तौ एकरूपौ द्विदैवत्यसत्त्वेन "इन्द्राग्नी" भवतः, त्रिष्वपि भुवनेषु समानभावेन व्याप्तियोगात् ॥ तथा च ऋङ्मन्त्रवर्णः — "यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः" इति तदनुश्रवणम् ॥ सोमः सः दिव्यः रसात्मा मनसः अधिपतिः सन् स्वयः मनःसत्त्वः हृदय्यः अन्तर्हृदयसन्निष्ठः प्रसिद्धः वेदेषु, "चन्द्रमा मनसो जातः" (ऋ.मं. १०-९०-१३) "मनश्चित्–मनसस्पतिः" (ऋ. मं. ९– ) इति मन्त्रवर्णः, "हृदयान्मनो मनसश्चन्द्रमाः", "चन्द्रमा मनो भूत्वा हृदयं प्रविशत्" (ऐ. उ.) इति च ब्राह्मणम् ॥ "चन्द्रमा मे मनसि श्रितः । मनो हृदये" (तै.) इति च यजुः ॥ एवमेतौ मिथः संसक्तौ मुखहृदयस्थानौ मध्यमोत्तमभुवनाधिष्ठानौ च सन्तौ इन्द्रासोमौ स्वेन ज्योतीरससत्त्वेन इदं आत्मीयं विश्वं मृळयतामिति ॥ तदेतदेव तयोर्महत्त्वम्, "इन्द्रासोमा महि तद् वां महित्वं युवं महानि प्रथमानि चक्रथुः ॥ युवं सूर्यं विविदथुर्युवं स्व१र्विश्वात माऽस्यहतं निदश्च" (ऋ. मं. ६–७२–१) इति तदनुश्रवणम् ॥

## COMMENTARY—SUMMARY TRANSLATION

This Agni is energy united with light and Vāk, and the mouth, the place where he ( she ) manifests himself. He is Indra, the lord of the mid-air, with his own power which manifests itself as lightning; Cf. "From the mouth of the Supreme Indra and Agni, Purusha was born" ( Ṛg. X–90–13 ). From this it is clear that these two are of the same origin. But being independent, they are known separately as Indra and Agni. Further, they pervade the whole of the three worlds. Cf. "Indra and Agni are in this lower earth, in the mid-world and in the highest world as well."

Soma is full of essences and the lord of the mind. He dwells in the heart. Thus they are ( Indra and Soma ) united jointly. Dwelling in the mouth and heart and in the mid-world and in the highest world, may these two, Indra and Soma bless their universe. Cf. "Oh Indra and Soma, that greatness of yours is worthy of worship. You did all the great things at the beginning of creation. You two brought forth the sun and the sky. You two killed all darkness and the wicked ones as well" ( Ṛg. VI–72–1 ).

### अष्टमी ऋक् ।

अग्निर्दिव्यो ज्योतिषाऽभ्य१श्नोति विश्वं
सोमः स्वेन रसेन दिव्येनात्मना ॥

अश्विनौ तौ पूरुषौ नासत्यौ समौ
तावग्नीषोमौ मृळयतां स्वं विश्वम् ॥ ८ ॥

पद्पाठः – अग्निः । दिव्यः । ज्योतिषा । अभि । अश्नोति । विश्वम् ।
सोमः । स्वेन । रसेन । दिव्येन । आत्मना ॥
अश्विनौ । तौ । पुरुषौ । नासत्यौ । समौ ।
तौ । अग्नीषोमौ । मृळयताम् । स्वम् । विश्वम् ॥

The celestial Agni pervades the universe with light. Soma pervades the universe with his essences and the celestial soul. Those are the twin Aśvins, the twin Purushas. They are truly in existence and are similar. May Agni and Soma bless the universe of theirs.

## अन्वयभाष्यम् ।

सोऽयं अग्निः दिव्यः आदित्यात्मकः सवितृप्रसूतत्वात्, ज्योतिषा तेजः किरणमुखेन प्राणसत्त्वेन विश्वं एतत् जगत् अभि अभितः सर्वतः अश्नोति व्याप्नोति, सोमः दिव्य एव स्वयं दिव्येन स्वेन रसेन आत्मना सचेतनेन मनःसत्त्वेन विश्वं अश्नोति, अत एव तौ " अश्विनौ " इत्याख्यायेते, तौ मिथः संसक्तौ उभावपि एकात्मानौ समौ समानौ व्याप्त्या स्वरूपादिवृत्त्या च सिद्धौ, पूरुषौ पुरुषसत्त्वौ सर्वेष्वपि पुरुषेषु प्राणभृत्सु अन्तः प्रतिष्ठितत्वात्, तथा प्राण–मनःसत्त्वात्मकौ तौ अश्विनौ नाम्ना स्वरूपेण व्यापकत्वसिद्धेन तेजोरससत्त्वेन सिद्धौ, नासत्यौ एतन्नामानौ सत्यात्मकौ च भवतः । अत्रेदं यास्कनिरुक्तम्— " सत्यावेव नासत्यौ इत्यौर्णवाभः, सत्यस्य प्रणेतारौ इत्याग्रायणः, नासिकाप्रभवौ बभूवतुरिति वा " ( नि. ६-१३-१ ) इति ॥ प्राणापानस्वरूपौ स्तः, न सत्यौ असत्यौ, न असत्यौ नासत्यौ इति च तन्निर्वचनम्, तथा, " अथ कस्मादश्विनौ व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषाऽन्यः " ( नि. १२-१-३ ) इति, " अश्वैरश्विनावित्यौर्णवाभः " ( ४ ), " तत् कावश्विनौ–द्यावापृथिव्यावित्येके " ( ५ ), " अहोरात्रौ इत्येके " ( ६ ), " सूर्याचन्द्रमसावित्येके " ( ७ ), " राजानौ पुण्यकृतावित्यैतिहासिकाः " ( नि. १२-१८ ) इति च ॥

अस्मिन् छन्दोदर्शने तु " अग्नीषोमौ, इन्द्रासोमौ, तथा इन्द्राग्नी च अश्विनौ " इति स्तूयेते इत्येव विशेषः, तौ एतावेव अग्नीषोमौ ज्योतीरससत्त्वरूपत्वात्, तौ स्वेन ज्योतीरसैकसत्त्वेन इदं विश्वं मृडयताम् इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This Agni, the celestial one, as he is born of the sun, is truly Āditya. With his rays which are life forces, he pervades this universe. Soma also is celestial and with his essences and the mind, he pervades the universe.

Therefore, they are Aśvins ( the root 'aś' to pervade ). They are one, and equally pervasive. They two are Purushas ( Puru+shas ), as they are in all living beings, as life-force and as power of mind. They are twin Aśvins by name. They are truly twins and are truthful. Yāska says in this connection : " The truthful alone are Nāsatyas, so says Aurṇavābha. They are leaders of the Truth, so says Āgrāyaṇa, or they were born from the nose ( i.e. Prāṇa and Apāna ) " ( Nir. VI-13-1 ). " Absence of truth is asatya : absence of untruth is nāsatya, is the derivation. Likewise, the two Aśvins pervade the whole universe, one by the essence and the other by light " ( Nir. XII-1-3 ). Aśvins are so by aśvas, the fast-going rays, so says Aurṇavābha. " Who are those Aśvins ? Some say the sky and the earth. Some others say, they are day and night. Some else say, They are the sun and the moon. The historians say, They are the two meritorious kings " ( Nir. XII-18 ). The Chhando Darśana also proves that Agni and Soma, Indra and Soma and Indra and Agni are the Aśvins. May these two, being light and essence, bless this universe of theirs.

## नवमी ऋक् ।

अग्नायी वाक् सत्याऽक्षरा ब्रह्म साक्षात्
सोम आत्मेन्द्रः पूरुषो ब्रह्म परम् ॥
सन्मिथुनं प्रत्नं समानं तदेकं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ९ ॥

पदपाठः – अग्नायी । वाक् । सत्या । अक्षरा । ब्रह्म । साक्षात् ।
सोमः । आत्मा । इन्द्रः । पुरुषः । ब्रह्म । परम् ॥
सत् । मिथुनम् । प्रत्नम् । समानम् । तम् । एकम् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

Vāk is the power of Agni, is truth, is indestructible and is Brahma itself. Soma is the soul, Indra, Purusha, and the supreme Brahma. These two are an eternal pair. They are equal in all respects, so they are one. The pair is that light par excellence which illumines the universe.

## अन्वयभाष्यम् ।

अग्नायी अग्नेः शक्तिरूपा तत्सती वाक् वाचकसत्त्वात्मिका सत्या सत्यवस्तुना वाच्यार्थरूपेण परेण सह तादात्म्येन नित्यसिद्धत्वात्, अक्षरा क्षयविकारादिरहितत्वात्

ब्रह्म बृहत्वात् व्यापकत्वाच्च, साक्षात् प्रत्यक्षसिद्धत्वाद् वाचः, सोमः सोऽयं आत्मा चेतनः, इन्द्रः पारमैश्वर्यादि सर्वगुणसत्त्वपूर्णत्वात्, सर्वेन्द्रियाधिष्ठानरूपत्वात्, सर्वश्रेष्ठत्वाच्च, तत् परं ब्रह्म परोक्षसिद्धत्वात्, प्रत्यगात्मस्वरूपत्वाच्च, तदेतदुभयं सामरस्येन सिद्धम्, सत् सद्रूपं सदात्मकं च, प्रत्नं सर्वतः प्रथमं अनादिसिद्धं समानं समाननामरूपादियोगात्, मिथुनं युगलीभूतम्, तत् एकं तादात्म्ययोगेन एकात्मकत्वात्, तत् विश्वस्य अस्य समग्रस्य जगतः दर्शयत् प्रकाशकं परमं ज्योतिः परञ्ज्योतिःस्वरूपमेव तदग्नीषोमवस्तुतत्त्वमिति ॥

॥ इति अष्टमेऽनुवाके चतुर्थं अग्नीषोमीयं सूक्तं समाप्तम् ॥

COMMENTARY—SUMMARY TRANSLATION

Vāk is expression and is the wife and power of Agni. She is satya, the truth, as she is invariably one with that Existence, which is the supreme one and which she expresses. She is indestructible. She is herself visible Brahma as she is all-pervasive and self-evident. This Soma is Ātmā, the Soul. He is Indra as he is full of all the overlordship, excellent and the resort of all the senses etc. And he is Indra as he is the Supreme Brahma because of his invisibility and as he is the indwelling soul also. This pair is blended as one, is the Existence itself, is eternal and is identified with each other, being equal in name, form etc. That one is the light par excellence which illumines the whole universe.

Thus ends the Fourth hymn dedicated to Agni-Soma in the eighth Section.

---

अथ पञ्चमं अदितिसूक्तम् ।

अनुवाकः ८ । सूक्तम् ५ । ऋचः १-७ ।

रुद्रस्य या संवित् सप्त, दैवरातो वैश्वामित्रः, अदितिः, जगती ॥

**Now this the Aditi Sukta, Fifth in the Eighth Anuvaka**

**Section VIII, Hymn 5, Riks 1-7** — ADITI

The fifth hymn beginning with 'Rudrasya yā Saṁvit' contains seven Ṛks; Daivarāta Vaiśvāmitra is the Ṛshi; Aditi is the goddess; and Jagatī is the metre.

अथ प्रथमा ऋक् ।

रुद्रस्य या संविद् विद्युता स्वरन्ती
सन्दृक् प्रतीच्यनु वाचा ब्रह्मणाऽऽत्मन् ॥

विश्वस्यैव प्रसूत्या अभवत् पराची
सा प्रथमा माता परमं व्योमादितिः ॥ १ ॥

पदपाठः – रुद्रस्य । या । सम्ऽवित् । विऽद्युता । स्वरन्ती ।
सम्ऽदृक् । प्रतीची । अनु । वाचा । ब्रह्मणा । आत्मन् ॥
विश्वस्य । एव । प्रऽसूत्यै । अभवत् । पराची ।
सा । प्रथमा । माता । परमम् । विऽओम । अदितिः ॥

The power of consciousness of Rudra which flashes in the form of lightning, and his power of intelligence which turns inwards and expresses itself in the form of speech ( mantras ) is manifest Brahma: these go forth for the creation of the universe; that power is Aditi, the mother, the measurer, the formless sky.

## अन्वयभाष्यम् ।

रुद्रस्य भगवतः विश्वप्राणसत्त्वस्य चेतनात्मनः । " कद् रुद्राय प्रचेतसे०" ( ऋ. मं. १-४३-१ ) इति ऋङ्मन्त्रमुखेन आश्रावितस्य तस्य या परा संवित् सञ्ज्ञानस्वरूपा, तथा विद्युता वैद्युतया चैतन्यज्योतिरात्मिकया शक्त्या स्वरन्ती सूक्ष्मतमया व्योमतन्मात्रया स्फुरन्ती रुद्रस्य सन्दृक् दृक्छक्तिस्वरूपा प्रतीची प्रत्यक्चितिसत्त्वा आत्मन् आत्मनि स्वीये परमे चेतने वस्तुनि ब्रह्मणा प्रत्यक्षब्रह्मरूपया वाचा संविन्मात्रया अनुस्वरन्ती अव्यक्तस्वरात्मिकया अनुद्रुतव्योमात्मिका सती, विश्वस्यैव अस्य समग्रस्य जगतः प्रसूत्यै प्रसवार्थं या पराची पराङ्मुखा अभवत् बभूव । आदिसृष्टौ प्रथमतः रुद्रात्मनः सकाशात् उन्मेषरूपेण आविरास, सा परा परोक्षसिद्धा परमस्य प्रचेतनात्मनः तस्य रुद्रस्य आदिमा सन्दृगेव सर्वेषां जगदादीनां देवानां प्रथमा आदिमा माता मानवती तथा विश्वस्यापि जगतः स्वान्तःसन्धारणेन मात्री निर्मात्री प्रसवित्री च सती सैव परमव्योमात्मिका अदितिः अखण्डसत्तात्मिका विश्वाधार-शक्तिस्वरूपा च भवति ॥

अत्रेदं किञ्चिदेव विमृश्यते दिग्दर्शनार्थं अदितेः स्वरूपतत्त्वम् । " अदितिः " सा दाक्षायणी देवमाता इति च प्रसिद्धा वेदे, दक्षस्तु आदित्यः, दक्षादभ्युदितत्वात् सा दाक्षायणी, तथा देवानां आदित्यादीनां प्रसवितृत्वात् सा देवमाता इति सम्मानितेति प्रतीयते, अस्मिन् अर्थे दाक्षायण्याः अदितेरेव ब्रह्मवादिन्याः आर्षं ऋङ्मन्त्रदर्शनं भवति— " अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव । तां देवा अन्वजायन्त भद्रा अमृतबन्धवः" (ऋ. मं. १०-७२-५ ) इति ॥ तथा " अदितेर्दक्षो अजायत दक्षाद्वदितिः परि " ( ऋ. मं. १०-७२-४ ) इति च ॥ तत्र दक्षादित्योः आदित्यादितिसञ्ज्ञयोः ज्योतिर्व्योमात्मकयोः

प्रकाश-प्रदेशस्वरूपयो: परस्परं प्रादुर्भावसत्त्वं अनुश्रूयते, तच्च याथातथ्यमपि लोके अप्रसिद्धं असम्भाव्यं विरुद्धं कल्पनातीतमिति च प्रतीयते, तदेतदेव आशङ्क्य कृतं तन्निर्वचनं सन्निर्णयेन यास्काचार्येण, तत्र "तत् कथमुपपद्येत" इति आक्षेपवचनम्, तत्समाधानवचनं तु— "समानजन्मानौ स्यातामिति" इति, "अपि वा देवधर्मेण इतरेतरजन्मानौ स्याताम्, इतरेतरप्रकृती" ( नि. ११–१३–४ ) इति च तत्र व्यापकत्वं प्रकाशकत्वं विश्वसन्धारकत्वादिकं च तयोरुभयोरपि अदिति–आदित्ययो: समानं सत्त्वम्, तस्मादेव तयो: परस्परं कार्यकारणभाव: दिव्य: कार्यकारणभाव: दिव्य: तथा अलौकिक एवेति तदभिप्राय: । अस्ति तादृशमेव निदर्शनान्तरमपि, "यश्छन्दसामृषभो विश्वरूप: । छन्दोभ्योऽध्यमृतात् सम्बभूव । स मेन्द्रो मेधया स्पृणोतु" ( तै. शी॰ उ. ४–१ ) इति ॥

अत्र छन्दोवर्षक: इन्द्र:, तथा इन्द्रप्रकाशकं छन्द:, इति वाग्-वस्तुनो: ( वाचक–वाच्यार्थरूपयो:) परस्पराविर्भावरूपं तत् समानं सत्त्वं नित्यसिद्धमेवेति भाव: ॥ एवमेव अग्ने: अदितिरूपत्वमनुश्रुतं सङ्गच्छते, "त्वमग्ने अदितिर्देव दाशुषे" ( ऋ. मं. २-१-११ ) "यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता" ( ऋ. मं. १–९४–१५ ) इति तदनुश्रवणम् ॥ "अग्निरप्यदितिरुच्यते" ( नि. ११-२३-५ ) इति तन्निरुक्तम् । एतस्मिन् अर्थे त्रितस्य आर्षेयं ऋङ्मन्त्रादर्शनमपि भवति ॥ "असच्च सच्च परमे व्योमन् दक्षस्य जन्मन्नदितेरुपस्थे । अग्निर्ह न: प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनु:" ( ऋ. मं. १०-५–७ ) इति ॥

एवं सेयमदिति: परमव्योमात्मिका, तदन्तर्हितवैद्युताग्निसत्त्वा आदित्याविर्भावकारणीभूता क्षेत्रात्मिका आधारशक्तिरूपा, तथा वैद्युताग्निरूप: रुद्र: इन्द्रात्मक: स: अदिते: प्रादुर्भावहेतुभूत: ज्योतिर्बीजसत्त्व: बीजात्मक: ज्योति:सत्त्व: भवति, तस्मात् तयोरन्योऽन्यजन्मसत्त्वं स्वत एव नित्यसिद्धं इति ॥

## COMMENTARY—SUMMARY TRANSLATION

Bhagavān Rudra is the universal life-force or energy. "When shall we offer praises to Rudra, the greatest energy?" (Ṛg. I–43-1). That power or energy has the highest power of knowledge. That power sounds and flashes with the finest embryonic elements of the sky (Tanmātrā). She has very good power of sight. She turns inwards. In her own poised energy, she murmurs in the form of Vāk indistinctly because, the sky is not yet formed. Vāk is manifest Brahma. For giving birth to the entire universe, that power turned outward and manifested herself in the opening of Rudra's eyes. That power or energy is the invisible form of the supreme energy which transcends all. She was the first sight of Rudra and mother of all the gods, from whom the universe originates. She was the first to measure within herself the whole of the universe. She is Aditi, the highest

formless sky. Her powers are immeasurable and the refuge of all powers which are the origin of this universe.

Let us discuss something here, just to understand and indicate the principle of Aditi. It is well-known that Aditi is the daughter of Daksha and mother of all gods. Daksha himself is an Āditya. She is Dākshāyaṇī, because she gave birth to Dakshas or Ādityas. There are Ṛks ' seen ' by Aditi Dākshāyaṇī, the seer, which express this sense. " Oh Daksha, Aditi was born as your daughter, and the auspicious gods who are related to nectar, were born of her " ( Ṛg. X–72–5 ). " Daksha was born of Aditi and Aditi was born of Daksha " ( Ṛg. X–72–4 ). Thus we hear that Daksha and Aditi known as Āditya and Aditi, are light and the sky, in the form of illumination and its place, and are mutually generators of each other. The sun shines because there is the sky to shine in. The sky is seen because there is the sun who makes it visible. Thus they are generators of each other.

Though that is the fact, it is not known in the world, and further it is considered unnatural, contrary to the fact, even improbable and beyond comprehension. Hence Yāska also considered this point and he has said: " How can it be possible ? " The answer is " they may have been born at one and the same time " or " there may be reciprocity of birth due to the nature of gods, both Āditya and Aditi being of the same nature having common characteristics " ( Nir. XI-13–4 ). Pervasion, illumination, acting as the support of the universe etc., are common to both. They are mutually cause and effect; they are divine and invisible.

There is another example of the same type. Cf. " He who is the creator of Vedas and is omnifarious, manifested himself from the same nectar like Vedas " ( Tait. Śikshā Up. 4–1 ).

Likewise, Agni is also considered the Aditi. Cf. " Oh Agni, you are Aditi to the offerer of oblations " ( Ṛg. II-1-11 ); and " Oh Agni of good wealth and Aditi the taintless, you bless us with auspicious powers " ( Ṛg. I–94-15 ); and " Agni also is said to be Aditi " ( Nir. XII–23–5 ). From the Ṛk of Trita the seer, it is clear: " Both non-existence and existence existed in the highest sky. During the birth of Daksha by the side of Aditi, Agni was the first to be born of Truth. In the ancient ages, the male and the female were in one entity and together " ( Ṛg. X–5–7 ).

Thus, this famous Aditi is herself the highest sky. She is the substance of the fire of lightning concealed there in the sky. She is the cause of the manifestation of Āditya or the sun as the space for manifestation. The sun is the fiery part of lightning. He is identical with Rudra and Indra and is the cause of the manifestation of Aditi and the seed of all light.

That is the secret of their mutual and simultaneous birth.

## द्वितीया ऋक् ।

अदि॑तिर्या माता दे॒वाना॒मेका॑ य॒-
द॒पदी॑ सा वाचाऽभ॑वच्चतु॒ष्पदी ॥
ब्रह्म॑णाऽऽण्डमि॒दं सु॑षुवे ब॒हि॒र्धा
सु॒पर्णं इ॑वात्मन् सम्भृ॑तं॒ विश्व॑म् ॥ २ ॥

पद्पाठः – अदि॑तिः । या । माता । दे॒वाना॑म् । एका॑ । यत् ।
अ॒पदी॑ । सा । वा॒चा । अभ॑वत् । चतु॑ःऽपदी ॥
ब्रह्म॑णा । आ॒ण्डम् । इ॒दम् । सु॒सुवे॒ । ब॒हिः॒ऽधा ।
सु॒पर्णः॑ऽइ॑व । आ॒त्मन् । सम्ऽभृ॑तम् । विश्व॑म् ॥

Aditi is the mother of gods. She is one (without any characteristics like name, form, number, magnitude, parts etc.). With Vāk she became four-footed 'fourfold.' She conceived this egg of the universe through Brahma and brought it out, like a bird which nourishes its egg within its body.

## अन्वयभाष्यम् ।

या अदितिः आदिभूता देवानां विश्वेषां देवतात्मनां माता प्रसवित्री जननी स्वस्मिन् अन्तः, परमे व्योमनि गर्भरूपेण धारयित्री च, एका प्रधाना एकात्मिका अखण्डसत्त्वा स्वयं अपदी अंश–मात्रा–मान–पाद–मर्यादादिरहिता सती, वाचा आत्मीयया परमव्योमतन्मात्रात्मिकया पूर्णबिन्दुसत्त्वया सह सा चतुष्पदी चतुष्पात्सत्त्वपूर्णा यत् खलु अभवत् समपद्यत, सैव ब्रह्मणः परमात्मनः चैतन्यसत्त्वात् विनिःसृतं विश्वबीजं आत्मन् आत्मनि स्वस्मिन् परमे व्योमनि गर्भरूपेण सम्भृतं इदं विश्वं विश्वरूपं अण्डं तत् अखण्डं एकात्मकं ब्रह्माण्डसञ्ज्ञकं बहिर्धा बाह्येन भौतिकतत्त्वयुक्तेन भुवनरूपेण सुषुवे बहिरुत्ससर्ज, "सुपर्ण इव" इति दृष्टान्तप्रदर्शनं लोके प्रत्यक्षसिद्धम्, यथा पक्षिणः सकाशात् अण्डाविर्भावः इति, तत्र सा देवानां माता सा अदितिः अष्टौ पुत्रान् प्रथमतः सुषुवे, तस्मात् सा अष्टपुत्रा इति प्रसिद्धिं जगौ, "अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि । देवाँ उप प्रैत् सप्तभिः परा मार्ताण्डमास्यत्" (ऋ. मं. १०–७२–८) इति तदनुश्रवणम् ॥ मन्त्रान्तरं च भवति, "सप्तभिः पुत्रैरदितिरुप प्रैत् पूर्व्यं युगम् । प्रजायै मृत्यवे त्वत् पुनर्मार्ताण्डमाभरत्" (ऋ. मं. १०–७२–९)

ते च अष्टौ देवतात्मानः अदितिपुत्रत्वेन संस्तुता यजुषि अनुश्रूयन्ते— "मित्रश्च वरुणश्च । धाता चार्यमा च । अंशुश्च भगश्च । इन्द्रश्च विवस्वाँश्च" (तै. आ.) इति ॥

" आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिष्मान् विभासः । कश्यपोऽष्टमः० " ( तै. आ. ) इति च तेषां नाम-रूपादिविशेषानुश्रवणम् । तत्रापि आरोगादिरूपाः ते सप्त विभासान्ताः आदित्यरश्मीनां वर्णविशेषबोधका भवन्ति इति विवेकः ॥

## COMMENTARY—SUMMARY TRANSLATION

Aditi is the mother of all gods. She bore them all as an embryo within her womb, the high sky and delivered them all. She is all-important, the first and infinite, being indivisible and one. She had no divisions whatsoever within herself in the form of part, portion or boundary. Being one with Vāk, the qualitative substance of ākāśa, or the sky, she developed into a fourfold entity complete in every way. She is the sky or infinite space; she received the seed of the universe from Brahma, the Supreme Ātman, in the form of energy; she grew in her womb this universe like an egg, which was not mutated, not parted and bore the name Brahmāṇda. When it became concretised or materialised, she delivered it in the form of the universe, like a bird laying an egg.

Aditi, the mother of gods gave birth to eight sons. She is known as the mother of eight sons. Cf. " Eight were the sons of Aditi born of her body. With seven she associated the gods, and the last on Mārtāṇda, she established in the sky for creation and destruction of the universe" ( Ṛg. X-72-9 ). All those eight are gods enumerated in the Yajur Veda: " Mitra, Varuṇa, Dhātā, Aryamā, Aṁśu, Bhaga, Indra and Vivasvat" ( Tait. Ār. ). Again, the same authority says: " Āroga, Bhrāja, Paṭara, Pataṅga, Svarṇara, Jyotishmān, Vibhās, and Kaśyapa is the eighth" ( Tait. Ār. )

### तृतीया ऋक् ।

असौ माताऽदितिर्विश्वमिदं सुषुवे
भूतैस्त्रिभिर्ज्योतिषाऽद्भिः पृथिव्या ॥
त्रीणि पद्भिर्भुवनानि विममे तेभिः
सह वाचा धमन्ती ब्रह्मणस्पतेः ॥ ३ ॥

पदपाठः — असौ । माता । अदितिः । विश्वम् । इदम् । सुषुवे ।
भूतैः । त्रिऽभिः । ज्योतिषा । अत्ऽभिः । पृथिव्या ॥
त्रीणि । पत्ऽभिः । भुवनानि । विऽममे । तेभिः ।
सह । वाचा । धमन्ती । ब्रह्मणः । पतेः ॥

This mother Aditi gave birth to the universe with the coordinated help of the three elements, light, water and earth. She measured the universe into three worlds with those three elements as her three feet. She achieved this feat of creating the universe through the power of expression of Brahmaṇaspati.

## अन्वयभाष्यम् ।

सा असौ दिव्या अदितिः माता विश्वनिर्मात्री आदिजननी ज्योतिषा सरूपेण तेजसा अद्भिः सरसैर्जलैः पृथिव्या सान्नया भूम्या च इत्येतैः त्रिभिः भूतैः सम्मिलितं त्रिवृतं इदं प्रत्यक्षं विश्वं जगत् सुषुवे, तच्च स्वीयैः तैः अपि अधिभौतिकैः त्रिभिः पद्भिः अंशात्मकैः पादैः त्रीणि भुवनानि सर्वेषां भूतानां अधिष्ठानरूपाणि त्रेधा विभागशः विममे पृथक् पृथक् कल्पयामास । मूलतः एकमेव स्थितं तदिदं ब्रह्माण्डं द्यावापृथिवी अन्तरिक्षं चेति विबभाज इति भावः । "यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः" ( ऋ. मं. ७–१०१–४ ) इति तदनुश्रवणम् ॥ तच्च ब्रह्मणस्पतेः परमपुरुषस्य प्रचेतनात्मनः वाचा वाचकशक्त्या सह धमनात् फूत्काररूपात् सा व्योमात्मिका अदितिः इदं विश्वं जनयामास स्वान्तर्हितं बहिरुत्ससर्जेति भावः ॥

एतस्मिन् अर्थे ब्रह्मवादिन्याः अदितेरेव आर्षेयं मन्त्रदर्शनं भवति, "ब्रह्मणस्पतिरेता सङ्कर्मार इवाधमत् । देवानां पूर्व्ये युगेऽसतः सदजायत" ( ऋ. मं. १०–७२–२ ) इति ॥

## COMMENTARY—SUMMARY TRANSLATION

This celestial Aditi is the creator of this whole universe with the help of the three elements, light, water and earth. With her three feet in the form of these elements, which are her own parts, she measured out the universe into three worlds, which are the habitation of all beings. All these three worlds were originally one Brahmāṇḍa which she divided into sky, earth and mid-air. Cf. "The ether in which all the worlds were located expanded into three worlds" ( Ṛg. VII-101-4 ).

That universe was effected through the power of expression of Brahmaṇaspati. Aditi the highest formless sky gave birth to the universe. This is described in a mantra by Aditi herself, a philosopher ( Brahmavādinī ): "Brahmaṇaspati blew the bellows like a smith. In the early age of gods, the universe in the form of non-existence came into existence" ( Ṛg. X-72-2 ).

## चतुर्थी ऋक् ।

अदितिः सा परमा द्यौरुत्तमा स्व१-
ज्योतिस्तद् भूतं भुवनं सूर्यस्योर्ध्वम् ॥

विश्वेषां तद् देवानां ज्योतिषां विधृति-
विश्वस्यैव मूर्धा पिता भूतानां पतिः ॥ ४ ॥

पदपाठः – अदितिः । सा । परमा । द्यौः । उत्ऽतमा । स्व१ रिति स्वः ।
ज्योतिः । तत् । भूतम् । भुवनम् । सूर्यस्य । ऊर्ध्वम् ॥
विश्वेषाम् । तत् । देवानाम् । ज्योतिषाम् । विऽधृतिः ।
विश्वस्य । एव । मूर्धा । पिता । भूतानाम् । पतिः ॥

That Aditi is the highest and the Supreme heaven indicated by the Vyāhṛti Svaḥ. She is the first celestial light, and shining forever, she is even above the sun. She is the basic support of all light and all the gods. She is certainly at the head of the entire universe. She is the father and lord of all the elements.

## अन्वयभाष्यम् ।

सा अदितिः परमा परतमा श्रेष्ठतमा उत्तमा सर्वस्मात् उच्चतमा द्यौः द्युमत्तमा दीप्ततमा स्वः प्रकाशात्मिका, अथवा "स्वः" इति व्याहृतिः, तृतीया तद्यजुर्मन्त्रात्मिका तथा तदर्थरूपा च, तदेव स्वःपदवाच्यं ज्योतिः ज्योतीरूपं भूतं प्रथमम्, ऊर्ध्वं भुवनं च भवितुमर्हति, तथा सूर्यस्य तत् अधिष्ठानरूपम्, तच्च पदं स्थानं विश्वेषां देवानां देवतात्मनां आदित्यादीनां ज्योतिषां तेजसां ज्योतिरात्मनां च विधृतिः सन्धारका आधारशक्तिरूपा, विश्वस्य अस्य जगतः मूर्धा शिरःस्थानीया, सा द्यौरेव तस्य परमपुरुषस्य शीर्षात्मिका भवति, तच्छिरस एव दिवः आविर्भावात् शिरःस्वरूपात् ज्योतिषो वा दिवः उदयात् । "शीर्ष्णो द्यौः समवर्तत" (ऋ. मं. १०-९०-१४) इति तदनुश्रवणम् । तथा स एव द्यौः सर्वेषां भूतानां पिता जनकः पालकश्च भवति, तथा पतिः अधिपतिः अधिष्ठाता च स एवास्ति । "द्यौर्मे पिता जनिता" (ऋ. मं. १-१६४-३३), "द्यौर्वः पिता पृथिवी माता" (ऋ. मं. १-१९१-६) इति च तदनुश्रवणम् ॥ "जाया भूमिः पतिर्व्योम" "मिथुनं वा अतस्थतुः" ॥ इति च यजुः (तै.) ॥

## COMMENTARY—SUMMARY TRANSLATION

The famous Aditi is the best and the highest. She is the brightest. She is herself light. Likewise, she is Svaḥ, the third Vyāhṛti. She is the mantra of Yajurveda and its meaning also. That is the meaning of the word Svaḥ. She is the first element, the light, and the highest world even above the sun. She is the support of all the gods, beginning with Āditya and of all the lights. She is the head of all this universe, the head of the

Parama Purusha. Cf. "From the head, Dyau, sky was born" ( Ṛg. X-90-14 ). She is the generator of all the elements and their protector also. She is the lord of the high sky where she dwells. Cf. "Dyau, the sky is my father the all-generator" ( Ṛg. I-164-33 ). "Dyau is our father and earth is our mother" ( Ṛg. I-191-6 ), "and the earth is wife and the sky is husband," says the Yajus ( Tait. ).

## पञ्चमी ऋक् ।

अदितिः सा पृथिवीयमवमा भू-
मही भूतमिदं भुवनं स्वमग्नेः ॥
इयं विश्वेषां मर्त्यानां विधृति-
स्तस्थुषोऽसौ जगतः सवित्री माता ॥ ५ ॥

पद्पाठः – अदितिः । सा । पृथिवी । इयम् । अवमा । भूः ।
मही । भूतम् । इदम् । भुवनम् । स्वम् । अग्नेः ॥
इयम् । विश्वेषाम् । मर्त्यानाम् । विऽधृतिः ।
तस्थुषः । असौ । जगतः । सवित्री । माता ॥

The famous Aditi is the earth, the lower one. She is indicated by Bhūḥ, the first Vyāhṛti. She is the element of earth; this is the home of Agni. This earth is the support of all the mortal beings; indeed, this earth is the mother of most of the immobile and mobile things.

## अन्वयभाष्यम् ।

सा परोक्षसिद्धा अदितिः इति तन्नाममात्रेण श्रुता सैव इयं अस्माकं सन्निहिता अवमा अधस्तना पृथिवी पृथुभूता सुप्रसिद्धा सर्वाश्रयीभूतत्वात्, तथा इयं भूः भूरिति यजुर्मन्त्रात्मिका प्रथमा व्याहृतिरूपा तदर्थरूपा च, मही महती पूज्या च, इदं प्रत्यक्षं भूतं अन्तिमम्, अग्नेः तेजोमयस्य स्वं निजं भुवनं अधिष्ठानम् । "अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम्" ( ऋ. मं. ८-४४-१६ ) इति मन्त्रवर्णात् । "अग्निर्वै गृहपतिः सोऽस्य लोकस्य गृहपतिः" (ऐ. ब्रा.) इति च ब्राह्मणम् । इदं पृथिवी इति नामरूपात्मकं अन्त्यं भूतं भुवनरूपं च विश्वेषां मर्त्यानां क्षय-विकारादिसहितानां सर्वेषां प्राणभृतां विधृतिः आधारभूतम्, सा इयं तस्थुषः स्थावरमिति प्रसिद्धस्य अचेतनस्य भूतजातस्य तथा जगतः जङ्गमरूपस्य सचेतनस्य जन्तुजातस्य च एवं चराचरप्राणिजातस्य स्वं पदं स्वकीयं स्थानं माता जननी धारयित्री च भवतीति ॥

## COMMENTARY—SUMMARY TRANSLATION

The invisible Aditi, who is known by name only, is this very earth, the lower one. She is Pṛthivī, the earth, as she is the abode of all. Likewise, she is this Bhūḥ, the first of the Vyāhṛtis, the very Yajur mantra and its meaning also. She is great and respectable. This earth which is the last element to be created, is the residence or home of Agni, the splendourous one. Cf. " This Agni is the lord of earth and the head, the peak of the sky " ( Ṛg. VIII–44–16 ). " Agni is the master of the house, the house-master of this world " ( Ait. Brāh. ). This earth is the last of the elements and of the worlds; it is the support of all mortals, who are subject to change, decay and death. This is the home of inert things known as immobile and also of alert things known as mobile, and of all the beings. She is the mother, and also the supporter of all.

### षष्ठी ऋक् ।

अदि॑तिः सा म॑ध्यमा भुवोऽन्तरि॑क्ष-
मापस्तद् भूतं पदमिन्द्र॑स्य गुह्य॑म् ॥
उभयो॑र्लोकयो॑र्विद्युतो॑ विधृ॑ति-
म॑ध्यं सत् सन्ध्यं विश्व॑स्याधि नाभिः ॥ ६ ॥

पदपाठः – अदि॑तिः । सा । मध्यमा । भुवः । अन्तरि॑क्षम् ।
आपः । तत् । भूतम् । पदम् । इन्द्र॑स्य । गुह्य॑म् ॥
उभयोः । लोकयोः । विऽद्युतः । विऽधृ॑तिः ।
मध्य॑म् । सत् । सन्ध्यम् । विश्व॑स्य । अधि । नाभिः ॥

Aditi is the middle of the universe. She is indicated by the middle Vyāhṛti, Bhuvaḥ. She is the element Āpaḥ, waters, which is the secret home of Indra. She is the support of both the worlds, Dyau ( heaven ) and Pṛthvī ( earth ) and of lightning as well. The middle one ( which she is ) is the meeting place ( of both ) and it is the very centre of the universe.

### अन्वयभाष्यम् ।

सा अदितिः मध्यमा मध्यमभुवनात्मिका सती अन्तरिक्षं इति अभिधानेन प्रथिता तत् परोक्षं सिद्धं सन्धिरूपत्वात्, " भुवः " इति यजुर्मन्त्रात्मकं द्वितीयं व्याहृतिसञ्ज्ञकं तदर्थात्मकं च, तथा तदेव आपः अप्सञ्ज्ञकं रसात्मकं भूतम्, इन्द्रस्य अधिपतेः पदं स्थानं भवति ॥ तच्च गुह्यं गूढं पदं भुवनं इति श्रूयते, " समूळ्हमस्य पांसुरे " ( ऋ. मं.

१–२२–१७ ) इति तदनुश्रावणम्, "पांसुरे प्यायने अन्तरिक्षे पदं न दृश्यते" ( नि. १२–१९–१ ) इति च तस्य निर्वचनम् ॥

तच्च विष्णोः उपेन्द्रस्य गुह्यं पदं भवति, "इदं विष्णुर्विचक्रमे" ( ऋ. मं. १–२२–१७ ) इति तन्मन्त्रवर्णे तदनुश्रवणम् ॥ तच्च अन्तरिक्षं उभयोः द्यावापृथिव्योः लोकयोः तथा विद्युतः वैद्युतज्योतिषः विधृतिः सन्धारकं भवति, मध्यं मध्यस्थं सन्ध्यं सन्धिरूपम्, तथा विश्वस्य अधि विश्वाधिष्ठानभूतम्, नाभिः नाभिसञ्ज्ञकम्, परमपुरुषस्यापि नाभिरूपम्, "नाभ्या आसीदन्तरिक्षम्" ( ऋ. मं. १०–९०–१४ ) इति, "अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः" ( ऋ. मं. १०–८२–६ ) इति च तदनुश्रवणम्, अत एव एतत्पदस्य दुर्विज्ञेयत्वं अनुश्रूयते गुह्यरूपत्वात्, "तिस्रो द्यावः सवितुर्द्वा उप स्थाँ एका यमस्य भुवने विराषाट्। आणिं न रथ्यममृताऽधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत्" ( ऋ. मं. १-३५-६ ) इति तदुपवर्णनम् ॥

## COMMENTARY—SUMMARY TRANSLATION

This Aditi is the mid-air, which is reputed by the name Antariksha. That is not visible as it is the meeting place of the upper and lower worlds. She is Bhuvaḥ, the second Vyāhṛti, which indicates the Yajus and its meaning. She is the element water which is the home of Indra. That is his secret home. Cf. "In the mid-air his feet are concealed" ( Ṛg. I-22-17 ). "His feet cannot be seen in the mid-air ( pyāyane )" ( Nir. 12-19-1 ). That is its derivation. "Vishṇu pervaded all this" ( Ṛg. I-22-17 ). The mid-region is the support of both the worlds Dyau and Pṛthvī, and of the lightning as well. It is between the two worlds being the meeting place. It is called the navel. The navel of the Supreme Purusha. Cf. "In the navel of the unborn, there was one essence in which all the worlds were located" ( Ṛg. X-83-6 ). The unknowableness of this place is further referred to: "There are three worlds of light, two are supported by the sun; the third one is in Yama's place; he is the controller of the mid-world. All the immortals resort to the mid-world which is like the axle of the chariot of the universe. Let him who knows it tell me" ( Ṛg. I-35-6 ).

### सप्तमी ऋक् ।

अदितिः सा परमं व्योम तुरीयं
सत् सत्यं गोष्पदं ब्रह्म बृहत् पूर्णम् ॥
भूतं भवद् भव्यं च यत्र परीतं
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ७ ॥

पदपाठः – अदि॑तिः । सा । प॒र॒मम् । विऽओ॑म । तु॒रीय॑म् ।

स॒त् । स॒त्यम् । गीःऽप॒दम् । ब्रह्म॑ । बृ॒ह॒त् । पू॒र्णम् ॥

भू॒तम् । भव॑त् । भव्य॑म् । च॒ । यत्र॑ । परि॑ । इ॒तम् ।

तत् । प॒र॒मम् । ज्योति॑ः । विश्व॑स्य । द॒र्शय॑त् ॥

That Aditi is the highest sky, beyond everything known. She is the Truth, and the abode of Vāk, of Brahma, of the great and of the supreme existence. The past, present and future are contained in it. That is the light par excellence which illumines the entire universe.

## अन्वयभाष्यम् ।

सा अदितिरेव परमव्योमात्मिका तुरीयपदरूपा भुवनत्रयाधिष्ठानात्मकत्वात्, तत् तुरीयपदरूपत्वं च भुवनत्रयापेक्षया तस्याः परत्वात् । तथा च तदनुश्रवणम्—" यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः " ( ऋ. मं. ७-१०१-४ ) इति ॥ गीष्पदं गिरः वाचः अधिष्ठानं तत् परोक्षं सत्यं नित्यसिद्धं अक्षरात्मकं भवति ॥ " ऋचो अक्षरे परमे व्योमन् " ( ऋ. मं. १-१६४-३९ ) इति तदनुश्रवणम् ॥ तच्च पुनः बृहत् महद् व्यापकं च सत् परं ब्रह्म ब्रह्मात्मकम् परं वस्तु, तच्छरीरात्मकं च भवति । " ब्रह्मायं वाचः परमं व्योम " ( ऋ. मं. १-१६४-३५ ) " ब्रह्म वै वाचः परमं व्योम " ( तै. ) इति च तदनुश्रवणम् ॥ " आकाशशरीरं ब्रह्म " ( शी. उ. ६–२ ) इति च औपनिषदं तत्त्वम् ॥

यत्र विश्वाधारशक्तिरूपे अदितिपदे अखण्डात्मके अधिष्ठाने भूतं इतः पूर्वतनं अतीतं, भवत् इदानीन्तनं वर्तमानं, भव्यं च इतः परं भाव्यं भविष्यत्कालीनं एतत् सर्वस्वमपि परीतं व्याप्तं सत् प्रतितिष्ठति सैव अदितिर्भवतीति ॥ एतस्मिन् अर्थे भौवनविश्वकर्मार्षेयं ऋङ्मन्त्र-दर्शनं च स्पष्टार्थकमनुश्रूयते ॥ "किंस्विदासीदधिष्ठानमारम्भणं कतमत् स्वित् कथाऽऽसीत् । यतो भूमिं जनयन् विश्वकर्मा विद्यामौर्णोन्महिना विश्वचक्षाः " ( ऋ. मं. १०–८१–२ ) इति ॥ तस्य परोक्षसिद्धस्यापि पुनर्जिज्ञासा भवति ॥ " किंस्विद् वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तद् यदध्यतिष्ठद् भुवनानि धारयन् " ( ऋ. मं. १०–८१–४ ) इति ॥ जिज्ञासितस्य प्रपूरकं तदुत्तरानुवचनम्, " ब्रह्म वनं ब्रह्म स वृक्ष आस ततो द्यावापृथिवी निष्टतक्षुः " ( तै. ) इति च यजुः ॥

तत् परमं तुरीयपदात्मकं विश्वस्य सर्वस्यापि जगतः दर्शयत् प्रकाशयत् परं ज्योतिः भवतीति ॥ तदेतददितेः परमतत्त्वबोधकः ऋङ्मन्त्रवर्णः गौतमार्षेयः, " अदितिर्द्यौरदिति-रन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वेदेवा अदितिः पञ्च जना अदितिर्जातमदि-तिर्जनित्वम् " ( ऋ. मं. १–८९–१० ) इति ॥

॥ इति अष्टमेऽनुवाके पञ्चमं अदितिसूक्तं समाप्तम् ॥

## COMMENTARY—SUMMARY TRANSLATION

Aditi is the highest sky, it may be called the fourth foot; it contains all the three worlds. She is called the fourth in the context of the three worlds. She is the highest of the three and beyond. Cf. " That supreme sky containing the entire universe stretched forth in the form of the three illumined worlds " ( Ṛg. VII-101-4 ). That is the invisible abode of Vāk. It is the eternal truth which is indestructible. Cf. " All the Ṛks are there in the highest sky which is in the form of Akshara Brahma " ( Ṛg. I-164-39 ). She is the all-pervasive and Supreme Brahma. She is Brahma itself, being Brahma's body. Cf. "Brahma has the highest sky as its body" ( Ṛg. I-164-35 ). " Brahma is the highest sky of Vāk" ( Tait. ). The highest place, the infinite is Aditi where all the powers which support the universe and also the universes of the past, the present and the future are located. A Ṛk of Bhauvana Viśvakarma describes clearly Aditi who supports the entire universe. " She is the original cause for the beginning of the universe. How was that? It was by Aditi's greatness that the All-seer and the All-doer ( Viśvakarma ) created the universe containing the earth and sky" ( Ṛg. X-81-2 ). "Which was the wood and which the tree out of which were fashioned, the sky and the earth? Oh master-minds, inquire into your own minds about this power which stood all the time supporting those worlds" ( Ṛg. X-81-4 ). " Brahma was the wood, Brahma the tree from which were Dyau and Pṛthvī fashioned. And that Brahma stood supporting the entire universe" ( Yajus, Tait. ).

That 'fourth foot' is the light which illumines the whole universe. Gautama sang his Ṛk which shows this great secret of Aditi: " Aditi is Dyau. Aditi is Antariksha. Aditi is the mother, the father and the son. Aditi is all gods and the five-fold classes of people. Aditi is what was born and Aditi is what is to be born" ( Ṛg. I-89-10 ).

Thus ends the Fifth Hymn in the Eighth Section.

## अथ षष्ठं भाववृत्तसूक्तम ।

अनुवाकः ८ । सूक्तम् ६ । ऋचः १-५ ।

यस्येमे वयमिदं पञ्च, दैवरातो वैश्वामित्रः, भाववृत्तं, त्रिष्टुप् ॥

**Now this the Bhavavritta Sukta, Sixth in the Eighth Anuvaka**

**Section VIII, Hymn 6, Riks 1-5** — BHĀVAVṚTTA

The Sixth Hymn beginning with 'Yasyeme Vayam' contains five Ṛks; Daivarāta Vaiśvāmitra is the Ṛshi; Bhāvavṛtta is the god and the metre is Trishṭup.

### अथ प्रथमा ऋक् ।

यस्येमे वयमिहेदं वदामो
यो वाऽस्मासु पुनर्निरन्तरोऽन्तः ॥
स नः पिता जनिता स नो भर्ता
स नः कलयिता स्वयमात्मनि ॥ १ ॥

पद्पाठः – यस्य । इमे । वयम् । इह । इदम् । वदामः ।
यः । वा । अस्मासु । पुनरिति । निःऽअन्तरः । अन्तरिति ॥
सः । नः । पिता । जनिता । सः । नः । भर्ता ।
सः । नः । कलयिता । स्वयम् । आत्मनि ॥

He (the Supreme Being) of whom we are born and he who says this here, and he who pervades in us through and through, is our Father, being our creator. He is our supporter. It is he who gathers us back into himself.

### अन्वयभाष्यम् ।

यस्य ईश्वरस्य वयमिमे विस्फुलिङ्गा इवाग्नेः, इह इदं वदामः चेतनात्मकलया आप्यायिता चेष्टामहे इति यावत्, यो वा पुनः अस्मासु सर्वेषु प्राणभृत्सु अन्तःशरीरे निरन्तरः नखशिखान्तं व्याप्तः, अत्र च अन्तरात्मनः हृदय-मनो-मूर्धादिस्थानविभागं ऋषिः गौणं मन्यते, सः प्रचेतनः प्रत्यगात्मा नः जनिता जनयिता, पिता, सः एव नः भर्ता सन्धारकः पालकश्च भवति, सः नः स्वयं आत्मनि कलयिता योजयिता अन्ते इति ॥

### COMMENTARY—SUMMARY TRANSLATION

We all come from him (God) like sparks from fire. We say this here. We are like particles of his energy, and are acting all the time. Again, he pervades us from toe to top. The seer considers the division of our being into heart, head, mind etc. as only secondary. He is the basic energy, the

indwelling soul. He is the Creator and therefore our Father; he is certainly our supporter and protector. He gathers us back into himself at the end.

## द्वितीया ऋक् ।

इयं नो धात्री पृथिवी परस्ता-
दद्भ्योऽनुसम्भूता या साकमन्नैः ॥
तेजसो या वा प्रजातास्तपत-
स्ता एता आपोऽमृतं पवित्रं नः ॥ २ ॥

पदपाठः – इयम् । नः । धात्री । पृथिवी । परस्तात् ।
अत्ऽभ्यः । अनु । सम्ऽभूता । या । साकम् । अन्नैः ॥
तेजसः । याः । वा । प्रऽजाताः । तपतः ।
ताः । एताः । आपः । अमृतम् । पवित्रम् । नः ॥

This earth which is the support of all was born of waters, along with all kinds of food. These waters were indeed born of the powerful effulgence of His Tapas. These waters are sacred ambrosia to us.

## अन्वयभाष्यम् ।

इयं पृथिवी नः अस्माकं सर्वेषां प्राणभृतां धात्री पोषयित्री धारयित्री च माता इति सर्गप्रकरणात् लभ्यते, या अन्नैः साकं अद्भ्यः सकाशात् एव सम्भूता प्रादुर्बभूव, परस्तात् आकाशादिभ्यः सर्वभूतेभ्यः अर्वाक्, अत्र ओषधिवनस्पतीनां सङ्ग्रहणार्थं अन्नैरिति बहुवचनम् । तैत्तिरीयाः पृथिव्याः ओषधिवनस्पतीनां अन्नस्य च पार्थक्यमामनन्ति सर्गप्रकरणे, " अद्भ्यः पृथिवी । पृथिव्या ओषधयः ओषधीभ्योऽन्नम् " ( तै. ब्र. उ. १ ) इति ॥ छन्दोगास्तु अन्नात् न पृथक् पूर्वद्रव्यद्वयं मन्यन्ते, " ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त, तस्माद् यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवति, अद्भ्य एव तदध्यन्नाद्यं जायते " ( छां. उ. ६–२–४ ) इति । अत एव तदपेक्षया मीमांसितं निर्णीतं च ब्रह्ममीमांसायाम्, " पृथिवी अधिकाररूपशब्दान्तरेभ्यः " ( ब्र. सू. २–३–१२ ) इति । अत्र ऋषिः दैवरातस्तु पृथिवीमविभाज्य अन्नविशिष्टां पश्यति, न च अन्नात् पृथक् ओषधिवनस्पतीन् इत्येव विशेषः ॥ विश्वसृष्ट्ये तपतः ईशस्य तेजसः अग्नि–सूर्य-विद्युदादिरूपात् याः आपः प्रजाताः प्रादुर्बभूवुः, " अग्नेरापः " ( तै. ब्र. उ. १ ) " तत् तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत " ( छां. उ. ६–२–३ ) इति च तदनुश्रवणम् ॥

ताः एताः प्रत्यक्षसिद्धाः आपः प्राणसत्त्वपूर्णाः रसमय्यः नः अस्माकं अमृतं उपजीव्यत्वात्, पवित्रं शोधकत्वात्, दोषादिपावनसमर्थाः इति यावत्, ईश-तेजसोः सम्बन्धोऽत्र

कार्यकारणभावः, शङ्करादीनां आचार्याणां नये छन्दोगसर्गे इव अत्रापि परम्परया सभावः, अर्थात् ईशात् आत्मनः तेजः प्रजातम्, तेजसः आपः जाताः इति उक्तं भवति, अस्मिन् छन्दोदर्शने तु साक्षादेव स सम्बन्धभावः इति विशेषः ॥

## COMMENTARY—SUMMARY TRANSLATION

This earth which nourishes us is the supporter and mother of all living beings. That the earth is the mother is what one learns from the story of creation. She was born of waters along with all kinds of food, after the elements like the sky and others. The plural 'foods' indicates that vegetation and the medicinal herbs are also to be included. The seers of the Taittirīya Upanishad speak separately (besides the earth) of vegetation, herbs and food, in the story of creation. Cf. "From the waters, the earth (was created); vegetation and the herbs from the earth; food from vegetation and the herbs" (Tait. Brāh. I). The seers of the Chhāndogya differed from that statement and did not mention the earth, vegetation, and the medicinal herbs as preceding food. Cf. "Those waters thought: 'Let us be many and increase our progeny' and they created food" (Chhā. Up.). "Therefore, wherever there is rain, there is profuse food. This means that food etc. are born of waters" (Chhā. Up. VI–2–4). Therefore, this matter was discussed and settled in the Brahmasūtras, "Earth is food, as the context and other words indicate" (Bra. Sū. II–3–12). But here Daivarāta sees, without mentioning the earth and other elements separately, the earth as one with food; and also he does not mention vegetation and the herbs separately from food. From the effulgence of God in Tapas, viz., from fire, sun, lightning etc., the waters were born. Cf. "Of Agni, the waters were born" (Tait. Up. I). "That effulgence of God's Tapas thought: 'Let me be numerous and increase with progeny.' Then it created the waters" (Chhā. Up. VI–2–3). Those waters contain the life-forces and are full of the essence of life. They are ambrosia to us, as they protect life and are sacred, as they purify by removing all sins and abnormalities. The relation of the Lord and His effulgence referred to here is that of cause and effect. Śrī Śaṅkarāchārya accepts the relation between God and waters as that of cause and effect by succession, i.e., from God, light; from light, waters; etc. as stated in the Chhāndogya. Here also the same relation of cause and effect by succession is to be accepted. But, it is to be noted in this Chhandodarśana, that the relation of cause and effect is stated to be direct.

### तृतीया ऋक् ।

यद् वा समुच्छ्वसितं सहसेह
सवितुस्ततस्तपतस्तेजसः ॥

इमे प्राणास्तदस्माकं जगतां
ततो जाता इह जीवन्ति विश्वे ॥ ३ ॥

पदपाठ :– यत् । वा । सम् । उत्ऽश्वसितम् । सहसा । इह ।
सवितुः । ततः । तपतः । तेजसः ॥
इमे । प्राणाः । तत् । अस्माकम् । जगताम् ।
ततः । जाताः । इह । जीवन्ति । विश्वे ॥

These life-forces ( elan vitale ) which animate all living beings born in this world are the outgoing breath proceeding from the effulgence of Savitā ( sun ) in Tapas.

## अन्वयभाष्यम् ।

तपतः तेजसः ज्ञानरूपात् ततः सवितुः प्रसवितुः परमात्मनः सकाशात् इह विश्वस्मिन् जगति यद् वा समुच्छ्वसितं आयातीत्यध्याह्रियते न तु सम्भवतीति श्वासदृष्टान्तसामर्थ्यात्, सहसा इतीदं बलेन श्वसितस्य उपलक्षितविशेषणम्, तत् अस्माकं शरीरभृतां इमे आन्तर्याः प्राणाः, जगतां चेष्टमानानां शरीरिणाम्, इह जाताः विश्वे प्राणभृतः ततो जीवन्तीति ॥

COMMENTARY—SUMMARY TRANSLATION

Savitā ( the sun ) performs Tapas—that is, he meditates. On account of that there is brilliant effulgence. That is as it were his outgoing breath. Out of that all life-forces are born which create and sustain living beings on earth.

## चतुर्थी ऋक् ।

यत्र तत् तेजः परमं पुरस्तात्
स्वयमन्तरिह पूर्णं परीतम् ॥
सा नो माता प्रसवित्री बृहती
विश्वमिदं बिभर्त्यदितिर्गर्भे ॥ ४ ॥

पदपाठः – यत्र । तत् । तेजः । परमम् । पुरस्तात् ।
स्वयम् । अन्तः । इह । पूर्णम् । परि । इतम् ॥
सा । नः । माता । प्रऽसवित्री । बृहती ।
विश्वम् । इदम् । बिभर्ति । अदितिः । गर्भे ॥

The supreme effulgence which existed at the beginning of creation, has pervaded everything thorougly in and out. That is Aditi the great mother who gave us birth. That Aditi holds in her womb this entire universe.

## अन्वयभाष्यम् ।

एवं पूर्वस्मिन् मन्त्रे सर्वज्ञानशक्तिपूर्णस्य क्रियाशक्तिरूपो मातरिश्वा वर्णितः, अथ अस्मिन् मन्त्रे आधारशक्तिं आह । पुरस्तात् सर्गप्रारंभकाले तत् परमं तेजः चैतन्यज्योतिरात्मकं ब्रह्म स्वयमेव इह यत्र सम्परीतं व्यापृतम्, सत् सद्वस्तु स्वतः सिद्धं भवति, सा आधारशक्तिरूपा नः सर्वेषां प्राणभृतां जगतां च माता निर्मात्री आदिमाता प्रसवित्री प्रकृतिः, बृहती अखण्डा, अदितिः आकाशापरपर्याया गर्भे स्वीये अन्तः आत्मनि इदं विश्वं जगत् बिभर्ति, अव्यक्तबीजात्मनेति वेदान्तिनः, परमाणुपुञ्जतया इति तार्किकाः, वस्तुतस्तु भाषाभेदएवोभयेषामिति ॥

### COMMENTARY—SUMMARY TRANSLATION

Mâtariśvâ, the vital form of God who is all intelligence, has been described in the last mantra. In this mantra the power which supports the universe is described.

At the beginning of creation that supreme effulgence, which is energetic light in Brahma itself, and is pervading everything. It is Aditi that is the mother, the first creator of all of us, the living beings, and the worlds. She is the Prakṛti, who gave birth to us all. She is indivisible. She is Aditi pervading everything like Âkâśa. She holds in her womb the entire universe. The Vedântins hold that the universe in that early stage is like an unmanifested seed and the Târkikas hold that it is all a collection of atoms. The difference of opinion between these two groups is only of words !

## पञ्चमी ऋक् ।

आत्मनश्छन्दसा तस्य तपसः
प्रसृतं तदिदमदितौ विश्वम् ॥
प्रत्युपेयं सदीक्षया वो बृहत्
तत् परमं ज्योतिर्विश्वस्य दर्शयत् ॥ ५ ॥

पदपाठः – आत्मनः । छन्दसा । तस्य । तपसः ।
प्रऽसृतम् । तत् । इदम् । अदितौ । विश्वम् ॥
प्रति । उपऽइयम् । सत्ऽईक्षया । वः । बृहत् ।
तत् । परमम् । ज्योतिः । विश्वस्य । दर्शयत् ॥

From the Tapas of the Supreme Soul issued forth mantras and this universe manifested itself in Aditi. That Supreme Soul is to be attained by the realisation that it does exist. That is the light par excellence which illumines the universe.

## अन्वयभाष्यम् ।

रोदितु: वाक्स्वरशक्तेः शब्दायमानस्य यस्य आत्मनः प्रचेतनस्य तपसः प्रज्ञानरूपात् हेतोः अदितौ परमे व्योमनि तत् परोक्षसिद्धं विश्वं इदं प्रत्यक्षं सत् प्रसूतं प्रागव्यक्तं सत् तदा आदिसृष्टौ व्यक्तं बभूव, तस्य अस्य परमस्य प्रत्यगात्मनः दर्शयत् अवभासकं विश्वस्य तत् परमं ज्योतिः बृहत् अखण्डं परब्रह्मात्मकं नः अस्माकं सर्वेषामपि सदीक्षया समन्वयतः योगेन साक्षात्कारेण प्रत्युपेयम् प्राप्तव्यमिति ॥ अत्र तस्य चैतन्यज्योतिरात्मनः परमपुरुषस्य रोदितृत्वं, छन्दः सत्त्वेन स्वरितृत्वं, तथा ईशितृत्वं सर्वान्तःप्रवेशितृत्वं च वेदे अनुश्रूयन्ते, "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश" (ऋ. मं. ४–५८–३), "अमर्त्यो मर्त्यां आ विवेश" (ऋ. मं. ८-४८-१२) इति, "अमर्त्यो मर्त्येनासयोनिः" (ऋ. मं. १-१६४-३०), इति च ॥ तथा तस्य स्वतन्त्रेण नित्यसिद्धेन सत्तात्मकेन अस्तित्वेनैव तदनुभावसम्पत्तिः, सम्प्रसादादिसिद्धिश्च भवितुमर्हतीति औपनिषदं तत्त्वम् ॥ "अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः । अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति" (क. उ. २–३–१३) इति ॥ तच्च बाह्याभ्यन्तरसत्त्वान्वयेनैव सिध्यतीति गम्यते, बहिः सर्वतः समन्वयेन, अन्तस्तु सर्वतः प्रत्यगात्मनि उपरमेण इति विवेकः ॥ तदेतदपि अत्र अन्तिमेन अर्धर्चेण मन्त्रलिङ्गेन अनेन छन्दोदर्शनमुखेन सद्दर्शनमेवेदं सम्पूर्णं भवति इति ॥

अत्रैते उपसंहारश्लोकाः ॥

**आर्षेण चक्षुषाऽपश्यद् या ऋचस्तप आचरन् ॥**
**वैश्वामित्रो दैवरातो विश्वामित्र इवापरः ॥ १ ॥**

**ता इमा अतिगम्भीराः शुद्धाः परमपावनीः ॥**
**वासिष्ठोऽन्वयभाष्येण समलङ्कृतवान् मुनिः ॥ २ ॥**

**इदं ये मन्वते धीरा नवीनं मन्त्रदर्शनम् ॥**
**गम्भीरं दैवरातस्य तेषां नश्यन्ति संशयाः ॥ ३ ॥**

इति वासिष्ठः गणपतिमुनिः ॥

इति अष्टमेऽनुवाके षष्ठं भाववृत्तं सूक्तम् समाप्तम् ॥

॥ इति अष्टमः वैश्वदेव्योऽनुवाकः समाप्तः ॥

॥ इतीदं छन्दोदर्शनं सम्पूर्णम् ॥

## COMMENTARY—SUMMARY TRANSLATION

From the Tapas in the form of active intelligence of the Supreme Soul meaningful sound issued. As a result this universe was born in Aditi, the supreme sky. It was unmanifest at the beginning of creation and it became manifest later. This light of the Supreme Brahma which illumines this universe, is indivisible, and is to be attained by us by getting merged in it and by realising its existence.

The Supreme Purusha and the roaring sound of Vedas, is referred to in a Ṛk in the Veda. Cf. " He who brings down the Vedas like rain is bound by three accents of the Vedic Mantra; the Supreme Radiance entered the mortals " ( Ṛg. IV-58-3 ). "The immortal entered the mortal" ( Ṛg. VIII-48-12 ). " The immortal is all-pervasive even in the mortal" ( Ṛg. I-164-30 ). Thus it is possible to realise Him who is self-existent, independent and eternal. And, also, it is possible to receive His grace. This is the teaching of the Upanishads. Cf. " He is attainable by the conviction that He exists, through the principle of the union of the soul with the indwelling Supreme Soul. That union of the soul with the Supreme Soul is attained through grace by faith and strong conviction of His existence " ( Kaṭha Up. II-3-13 ). It is further stated that the union is achieved by the realisation that the external and the internal are one and the same. This is what is meant by the latter half of the mantra and the words therein also indicate it. The whole work is concluded with Saddarśana—the vision of the Supreme Truth.

The concludiug stanzas of the Commentary are:

Like a second Viśvāmitra, Daivarāta Vaiśvāmitra, performing Tapas, ' saw ' the Ṛks with the eye of a Seer.

Those Ṛks are here. They are very deep in meaning, pure and purifying. The Muni Vāsishṭha ( Gaṇapati ) decorated them with the Commentary called Anvaya-Bhāshya.

Those wise persons of pure mind, who understand this new revelation of mantras by Daivarāta, which is really very deep in significanee, will have all their doubts resolved.

So says Vāsishṭha Gaṇapati Muni.

Thus ends the Sixth Hymn in the Eighth Section.

Thus ends the Eighth Section dedicated to Viśvedevāḥ.

Thus the whole of Chhando Darśana with Eight Anuvākas and fifty Sūktas is complete.

॥ ई ॐ श्रीः ॥

# छन्दोदर्शनसर्वानुक्रमणिकासूत्रम् ।

---

अथास्मिन् वै " छन्दोदर्शननिगमे " समस्मिन्, ऋक्-सूक्तानुवाकानां यथादर्शनम्, यथाऽनुश्रवणम्, यथासङ्ख्यम्, आर्षेय-दैवत-छन्दसामनुक्रमणीयम्, प्रत्यक्ष-परोक्षापरोक्ष-सत्वैः, साधिभूत-साधिदेवत-साध्यात्मकानां तत्त्वानाम्, क्वचिदेव वा अधियज्ञस्य सहसत्त्वेन समार्थानां सद्विधानानां, संविदे भावायोत कृतये सदुपास्त्यै, यज्ञायैव धर्माय योगाय तपसे श्रेयसे प्रेयसे भूयसे बलाय निःश्रेयसाय समार्थाय परमस्मै सदर्थाय वितन्यते भूयस्तत् प्रतिक्रमणीयम् ॥

नातिक्रमणीयं छन्दस एवानुशासनम्, देवतानामनुप्रतिशंसनं समम् ॥

समग्रं तदेतदेकाषयं " दैवरातार्षम्, " मित्रादीनि—भववृत्तान्तानि तद्दैवतानि द्विचत्वारिंशद् आश्रुतानि, चत्वार्येव च्छन्दांसि, गायत्रानुष्टुभत्रैष्टुभजागतानि तानि समिष्टानि भवन्ति, अष्टावेवानुवाकाः, पञ्चाशदेव सूक्तानि, अष्टाचत्वारिंशदुत्तरं चतुःशतमेव ऋचः परिसङ्ख्यया ॥

" असौ मित्रः " तृचं सावित्रं गायत्रम् देवरातो वैश्वामित्रः, मित्र आत्मा सवितेति वा प्रत्यृचं देवता, तृतीयस्यां त्रिपादसौसविता तुरीयपदात्मा चतुष्पात् पूरुषः, अमुं वै दर्शनीयं सन्तं योगात्, उत दर्शयितारं तं परमं सुसन्दृशम्, ज्योतिरात्मानमृषिस्तुष्टाव-च्छन्दसा, संविदा भावेन कर्मणा तदुपास्त्यै योगेनोत सामरस्येन समम्, सर्वत्र सूक्तांते भूय एवानुश्रावणम् " ज्योतिर्विश्वस्य दर्शयत् " इति वै तत् समानं सातिमानम् ॥ १ ॥ " असौ यः " सप्तर्चम्, सावित्रमानुष्टुभम्, चतुर्थ्याम् अग्निरिन्द्रः सूर्यश्च, पञ्चम्यां पुनः श्रुतं समिष्टम्, " ज्योतिर्विश्वस्य दर्शयत् " इति वै तद् विशिष्टम् ॥ २ ॥ " अग्ने तव " चतुष्कमाग्नेयम् त्रयम्, त्रैष्टुभम् तृतीया जगती ॥ ३ ॥ " अग्निरयं " दशर्चे द्वे, जागतं पञ्चकम् ॥ ४–५ ॥ " यो विद्युता " पञ्चर्चानि त्रीणि, मरुत्वान् इन्द्रः स प्रथमे ॥ ६ ॥ " यो दिक्षु " वायुरिन्द्रवान सद्वितीये ॥ ७ ॥ "यो रुद्रस्य रुद्रो मरुत्पिता" ॥ ८ ॥ "त्रयस्तेऽन्तरिक्षाधिपतयः संस्तुताः" इति वै त्रिदैवत्यो भौवनेयोऽनुवाकः प्रथमः ॥ १ ॥

" वाचं देवीं " द्वादशर्चम् सारस्वतानि द्वादशकानि आद्यमानुष्टुभम् ॥ ९ ॥ " नमस्ते " अष्टर्चे द्वे, जागतानि एकादशकानि ॥ १० ॥ " सरस्वति त्वम् " अष्टके ॥ ११ ॥ एकादशर्चं चतुर्थम् ॥ १२ ॥ अष्टर्चं पञ्चमम् ॥ १३ ॥ एकादशर्चं षष्ठम् ॥ १४ ॥ अष्टर्चं

सप्तमम् ॥ १५ ॥ नवर्चमष्टमम् ॥ १६ ॥ अष्टर्चे द्वे ॥ १७–१८ ॥ "सरस्वती त्वं" द्वये नवर्चमेकादशम् ॥ १९ ॥ द्वादशर्चं द्वादशम् ॥ २० ॥ इति वै सारस्वतो द्वितीयः ॥ २ ॥

"ब्रह्मणस्पतिः" अष्टर्चे द्वे ब्राह्मणस्पत्यानि षट्कानि, जागतानि ॥ २१ ॥ "नमो ब्रह्मणस्पतये" तृतीया पञ्चमी सप्तमी च सास्वताश्च ॥ २२ ॥ "नमो ब्रह्मणे" नवर्चे द्वे ॥ २३ ॥ "ब्रह्मणस्पतिः" त्रये ॥ २४ ॥ अष्टर्चे द्वे ॥ २५ ॥ षष्ठे अयुजां अन्त्यायाश्च ब्रह्मणस्पतिः, युजां सरस्वती च ॥ २६ ॥ इति वै ब्राह्मणस्पत्यस्तृतीयः ॥ ३ ॥

"यो देवानां" अष्टर्चम्, ऐन्द्राणि चत्वारि त्रैष्टुभानि तानि ॥ २७ ॥ "यः प्रजानन् अजन्यः" दशर्चम्, इन्द्रस्यैव तत् पारमैश्वर्यं तुष्टाव ॥ २८ ॥ "यो विश्वेषां" द्वादशर्चे द्वे, श्रेयोनिःश्रेयससत्त्वे ॥ २९ ॥ "यद्देवानामृणम्" इन्द्रस्यैवोत्तमर्णत्वम्, स्वस्यैवाधमर्णत्वं, अनृणत्वमन्यतः सर्वतः संस्तुवन् तं प्रत्यर्थयन् ऋषिरिन्द्रमेव प्रतिपेदे तं शरण्यम् ॥ ३० ॥ "यः प्रजानन्" अष्टर्चम ॥ ३१ ॥ "यो विश्वतः सीम्" दशर्चम् ॥ इति वा ऐन्द्रश्चतुर्थः ॥ ४ ॥

"अयमसौ" दशर्चे द्वे, आत्मदैवत्यानि चत्वारि, जागतम् ॥ ३३ ॥ "यो जज्ञे" त्रैष्टुभे द्वे ॥ ३४ ॥ "यो दिव्यो महस्वान्" चतुर्दशर्चम्, छन्दोदर्शनात्तं तदृषित्वं प्रपश्यन् आत्मानमेवापरोक्षतः प्रतितुष्टावच्छन्दसा ॥ ३५ ॥ "अयं प्रत्यङ्" अष्टर्चं जागतम्, आत्मनः चितः तत् सुविज्ञानमृषिस्तुष्टाव भूयः ॥ ३६ ॥ इति वा आत्माधिदैवत्यः पञ्चमः ॥ ५ ॥

"यः प्रजानन् एक एव" अष्टर्चम्, पौरुषाणि चत्वारि जागतानि ॥ ३७ ॥ "यो विश्वतः सीम्" दशर्चम् ॥ ३८ ॥ "पूरुषः सन्" षोडशर्चे द्वे ॥ ३९ ॥ "पूरुषोऽसौ" तत् पूरुषस्यैव पूर्णत्वं सत्त्वेनैव तेन प्रतिपूर्णं वैश्वरूप्यं प्रति तुष्टावच्छन्दसा ॥ ४० ॥ इति वै पुरुषदैवत्यः षष्ठः ॥ ६ ॥

"आपो दिव्याः" दशर्चम्, आप्यानि चत्वारि, आद्यमानुष्टुभम् ॥ ४१ ॥ "अपो देवीः" एकादशर्चम्, त्रैष्टुभानि त्रीणि, अन्त्या जगती ॥ ४२ ॥ "या सवितुः" अष्टर्चम्, अन्त्ये द्वे जगत्यौ ॥ ४३ ॥ "विद्युतो वै" सप्तर्चम्, अन्त्यास्तिस्रो जगत्यः ॥ ४४ ॥ इति वा अब्दैवत्यः सप्तमः ॥ ७ ॥

"गावो रसेन" दशर्चे द्वे, गावः, आनुष्टुभे द्वे ॥ ४५ ॥ "गावो मातरः" गावः सरस्वती श्रीः सोम इन्द्रः सविता आपः प्रत्यृचं देवताः सप्त, अग्निर्वायुः सूर्यः प्रजापतिश्च अष्टम्याः, गव्यानि पञ्चपवित्राणि रससत्त्वानि सन्ददर्श तत् सकल्पम् ॥ ४६ ॥ "नमस्ते देव" अष्टर्चम्, वैश्वदेव्यम्, जागतानि त्रीणि, सविता वायुरिन्द्रोऽग्निः सोम आपः सरस्वती च प्रत्यृचं देवताः, अन्त्याया इन्द्रो ब्रह्मणस्पतिश्च अनशनं तत् तपः परमं संविधानं सन्ददर्श भूयः, अनशनेनैव व्रतेन तेन समृद्धः तपसा छन्दसा सन्दिदेश ॥ ४७ ॥

" अग्निरयं पार्थिवम् " नवर्चम्, अग्नीषोमौ, सप्तमी ऐन्द्रासोमी, अष्टमी आश्विनी, नवम्याः वाग्-आत्मानौ च तद् द्विदैवत्यम् ॥ ४८ ॥ " रुद्रस्य या संवित् " सप्तर्चम्, अदितिः आदिमां तां मातरं च सर्वभूताधिष्ठात्रीं सन्धात्रीं तां परमव्योमसत्त्वां भौवनात्मानमृषिस्तुष्टाव ॥ ४९ ॥ " यस्येमे वयम् " पञ्चर्चम्, भाववृत्तम्, त्रैष्टुभम्, भावितान्तं त्रैष्टुभम् भाववृत्तमिति ॥ ५० ॥ इति वै वैश्वदेव्योऽनुवाकोऽष्टमः प्रपूर्णः ॥ ८ ॥

॥ इति छन्दोदर्शनानुक्रमणिका सम्पूर्णा ॥

## THE AUTHOR

Shri Daivarata is one of the few veteran Vedic scholars in India whose knowledge and insight of the ancient Indian Texts and their liberal interpretation are complete. Nay, he is more: he is the only Rishi in perhaps thirty or forty centuries after the age of the Vedic seers, to whom revelation in pristine Vedic Sanskrit was granted in a state of Yogic trance. At the time of the revelation Shri Daivarata was only 25, and his knowledge of Sanskrit, not to mention Vedic Sanskrit, was at best scrappy. It was only later that he mastered the Vedic lore in all its branches.

Born in Gokarn in 1891, in a family of traditional Vedic pandits, Daivarata was drawn towards mystic realization even as a boy. He left home and wandered off with various saints and sadhakas until he came under the influence of the great Vasishtha Ganapati Muni, the direct disciple of Ramana Maharshi of Tiruvannamalai, and accompanied him to various places of pilgrimage as a handy man. Vasishtha was an outstanding Sanskrit scholar and poet of his time but Daivarata seemed to have acquired not much of this scholarship until the Guru found his disciple being suddenly chosen to be the vehicle of Revelation. This circumstance has been vividly described by the Muni in his introduction to the " Chhando-Darshana ".

Daivarata, now hoary with age, has still an extra-ordinary power of memory and can quote any text and its parallels without referring to the books. He can speak half a dozen Indian languages including Sanskrit and Hindi fluently. He has been awarded various titles by learned assemblies all over India and today runs an Ashrama in his native place, Gokarn.

भारतीय विद्या भवन

अमृतं तु विद्या

मुंबई